Dharma Saṁhitā, Kailāsa-
Saṁhitā - Uttarabhaga (~~2 copies~~),
Vāyavīya Saṁhitā, Jñāna Saṁhitā =
(of the Śiva Mahāpurāṇa) - with the
commentary Śarabodhinī by MM pt.
Gaṅgādhara Śāstrī - slightly brittle
condition, careful handling is needed.
loose leaves edn., Ganapata
Kṛṣṇājī Press, Mumbai, 1806
Saka era.

(290)

Bill No 5/07-08

276

2008-0738(a), 0739(b), 0740(c), 0741(d)

Indira Gandhi National Centre for the Arts

SANS
294.5
SHI
N-3

KALANIDHI
Rare Book Collection
IGNCA
ACC No.: R-740
Date: 21.3.08

DATA ENTERED
Date 2/9/08

Indira Gandhi National
Centre for the Arts

श्रीगणेशायनमः ॥ श्रीसांबसदाशिवायनमः ॥ अथवायुसंहिताप्रारभ्यते॥श्रीमन्महेशायहिरण्यबाहवेवेदांतवेद्यायसुरासुराऽऽहवे ॥ जयप्रदायस्थिरभक्तियोगि नांनमोत्द्दिस्थायसदैवयोगिनाम् ॥ १ ॥ ॐनमःशिवाय ॥ पुत्रप्राप्तिर्हरेःसांबाहेदादीनांव्यवस्थितिः ॥ पुराणानांचसंख्यानंप्रथमेत्रनिरूप्यते ॥ २ ॥ ॥ तत्रादौभगवत्प्रणामरूपंमंगलमाह ॥ नमइति ॥ सर्वजगन्मायाकर्तृत्वबोधकंभगवद्विशेषणमाह ॥ समस्तेति ॥ ईश्वरःसर्वभूतानांहृद्देशेर्जुनतिष्ठति ॥ भ्रामयन्सर्वभूतानियंत्रारूढानिमाययेत्याद्युक्तेरितिभावः॥ननुनिर्गुणस्यकथंभ्रमणहेतुत्वमतआह॥गौरीति॥अनेनमायोपहितस्यैवजगत्कर्तृत्वादिकमस्तीति

श्रीगणेशायनमः ॥ अथशिवमहापुराणांतर्गतवायवीयसंहितायांपूर्वभागःप्रारभ्यते ॥ नमःसमस्तसंसारचक्रभ्रमण हेतवे ॥ गौरीकुचतटद्वंद्वकुंकुमांकितवक्षसे ॥ १ ॥ उक्त्वाभगवतोलब्धंप्रसादादुपमन्युना ॥ नियमादुत्थितोवायुर्मध्यं प्राप्तेदिवाकरे ॥ २ ॥ ऋषयश्चापितेसर्वेनैमिषारण्यवासिनः ॥ अथाऽयमर्थःप्रष्टव्यइतिकृत्वाविनिश्चयम् ॥ ३ ॥ कृत्वायथास्वकंकृत्यंप्रत्यागत्ययथापुरा ॥ भगवंतमुपायांतंसमीक्ष्यसमुपाविशन् ॥ ४ ॥ अथाऽसौनियमस्यांतेभग वानंबरोद्भवः ॥ मध्येमुनिसमाजस्यभेजेकॢप्तंवरासनम् ॥ ५ ॥ सुखासनोपविष्टश्चवायुर्लोकनमस्कृतः ॥ श्रीमद्वि भूतिमीशस्यहृदिकृत्वेदमब्रवीत् ॥ ६ ॥ तंप्रपद्येमहादेवंसर्वज्ञमपराजितं ॥ विभूतिःसकलंयस्यचराचरमिदंजगत् ॥ ॥ ७ ॥ इत्याकर्ण्यशुभांवाणीमृषयःक्षीणकल्मषाः ॥ विभूतिविस्तरंश्रोतुमूचुस्तेपरमंवचः ॥ ८ ॥ ऋषयऊचुः ॥ उ क्तंभगवतावृत्तमुपमन्योर्महात्मनः ॥ क्षीरार्थेनापितपसायत्रप्राप्तंपरमेश्वरात् ॥ ९ ॥ दृष्टोऽसौवासुदेवेनकृष्णेनाऽक्लि ष्टकर्मणा ॥ धौम्याग्रजस्ततस्तेनकृतंपाशुपतंव्रतम् ॥ १० ॥ ॥ ॥

सूचितम् ॥ १ ॥ अतःपरंभगवान्वायुर्विरराममित्याह ॥ उक्त्वेति ॥ उपमन्युनाभगवतःप्रसादाल्लब्धमुक्त्वानियमाद्व्रतोर्मध्यंदिनेउत्थितइत्यन्वयः ॥ २ ॥ अ यमर्थइति ॥ तदानींप्रक्रांतइत्यर्थः ॥ ३ ॥ स्वकंकृत्यंमध्यान्हस्नानादिकं ॥ भगवंतंवायुम् ॥ ४ ॥ असौवायुः ॥ नियमस्यव्रतविशेषस्य॥अंबरोद्भवःनभस्वान् ॥ कॢप्तमिति ॥ कल्पितमित्यर्थः ॥ ऋषिभिरितिशेषः ॥ ५ ॥ ईशस्यशिवस्य ॥ ६ ॥ यस्यशिवस्य ॥ ७ ॥ वाणीमिति ॥ वायोरितिशेषः ॥ ८ ॥ उक्तमिति ॥ भगवतात्वयोपमन्योर्वृत्तंयद्दुग्धार्थेनतपसायत्प्राप्तंतदुक्तमित्यर्थः ॥ ९ ॥ असौउपमन्युः ॥ धौम्याग्रजःधौम्यर्षेर्ज्येष्ठभ्राता ॥ तेनकृष्णेन ॥ १० ॥

Indira Gandhi National Centre for the Arts

अतःपरमृषयोयदपृच्छंस्तदाह ॥ कथमिति ॥ ११ ॥ निंदयन्निति ॥ दुःखबाहुल्यादितिभावः ॥ मुनिसत्तममुपमन्युं ॥ १२ ॥ १३ ॥ १४ ॥ तस्येति ॥ तस्यमुनेरवलोकनादेवकृष्णस्यमलंनष्टमासीदित्यन्वयः ॥ यतइदंकर्ममायामयमित्यर्थः ॥ १५ ॥ १६ ॥ अग्निरित्यादिभिरिति ॥ अग्निरितिभस्मवायुरितिभस्मेत्यादिभिरित्यर्थः ॥ १७ ॥ कारयित्वेति ॥ कृष्णमितिसंबध्यते ॥ हृक्रोरन्यतरस्यामित्यनेनकृष्णस्यकर्मत्वम् ॥ तस्मैकृष्णाय ॥ १८ ॥ गुरुनियोगातउपमन्युप्रेरणया ॥ १९ ॥ वर्षांतेव्रतसंपूर्तिकाले ॥ २० ॥ २१ ॥ तस्मात्सांबेनदत्तत्वात् ॥ ततःशिवंसर्वविद्याद्युत्पादकत्वेनप्रशंसति ॥

प्राप्तंचपरमंज्ञानमितिप्रागेवशुश्रुम ॥ कथंसलब्धवान्कृष्णोज्ञानंपाशुपतंपरम् ॥ ११ ॥ वायुरुवाच ॥ स्वेच्छयाह्यवतीर्णोपिवासुदेवःसनातनः ॥ निंदयन्निवमानुष्यंददर्शमुनिसत्तमम् ॥ १२ ॥ रुद्राक्षमालाभरणंजटामंडलमंडितम् ॥ तच्छिष्यभूतैर्मुनिभिःशास्त्रैर्वेदमिवाऽऽवृतम् ॥ १३ ॥ शिवध्यानरतंशांतमुपमन्युंमहाद्युतिम् ॥ नमश्चकारतंदृष्ट्वाहृष्टसर्वतनूरुहः ॥ १४ ॥ बहुमानेनकृष्णोसौत्रिःकृत्वातुप्रदक्षिणम् ॥ तस्यावलोकनादेवमुनेःकृष्णस्यधीमतः ॥ ॥ १५ ॥ नष्टमासीन्मलंसर्वंमायेयंकर्मएवच ॥ ततःक्षीणमलंकृष्णमुपमन्युर्यथाविधि ॥ १६ ॥ भस्मनोद्धूल्यतंमंत्रैरग्निरित्यादिभिःक्रमात् ॥ अथपाशुपतंसाक्षाद्व्रतंद्वादशमासिकं ॥ १७ ॥ कारयित्वामुनिस्तस्मैददौज्ञानमनुत्तमम् ॥ ततःप्रभृतितंकृष्णंमुनयःशंसितव्रताः ॥ १८ ॥ दिव्याःपाशुपताःसर्वेपरिवृत्त्योपतस्थिरे ॥ ततोगुरुनियोगाद्वैकृष्णःपरमशक्तिमान् ॥१९॥ तपश्चकारपुत्रार्थंसांबमुद्दिश्यशंकरम् ॥ तपसातेनवर्षांतेदृष्ट्वादेवंमहेश्वरं ॥ २० ॥ सांबंसगणमव्यग्रोलब्धवान्पुत्रमात्मनः ॥ यस्मात्सांबोमहादेवःप्रददौपुत्रमात्मनः ॥ २१ ॥ तस्माज्जांबवतीसूनुंसांबंचक्रेसनामतः ॥ पुराणंधर्मशास्त्रंचविद्याह्येताश्चतुर्दश ॥ २२ ॥ आयुर्वेदोधनुर्वेदोगांधर्वश्चेत्यनुक्रमात् ॥ अर्थशास्त्रंपरंतस्माद्विद्याह्यष्टादशस्मृताः ॥ २३ ॥ ॥ ॥ ॥

पुराणमिति ॥ पुराणंब्राह्मादि ॥ धर्मशास्त्रंस्मृतयःएतदादयः ॥ तदुक्तंयाज्ञवल्क्येन ॥ पुराणंन्यायमीमांसाधर्मशास्त्रांगामिश्रिताः ॥ वेदाःस्थानानिविद्यानांधर्मस्यचचतुर्दशेति ॥ नंदिपुराणेपि ॥ षडंगाश्चतुरोवेदाधर्मशास्त्रंपुराणकम् ॥ मीमांसातर्कशास्त्रंचह्येताविद्याश्चतुर्दशेति ॥ २२ ॥ उपवेदानाह ॥ आयुरिति ॥ तत्रायुर्वेदऋग्वेदस्योपवेदः ॥ धनुर्वेदोयजुषः ॥गांधर्वश्चसाम्नः ॥ अर्थशास्त्रंनीतिशास्त्रम् ॥ तदथर्ववेदस्य ॥ २३ ॥ ॥



Indira Gandhi National Centre for the Arts

भिन्नवर्त्मनांविभिन्नविषयप्रतिपादिकानाम् ॥ आदिकर्तेति ॥ निःश्वासरूपेणप्रकाशकइत्यर्थः ॥ अस्यमहतोभूतस्यनिःश्वसितंयदेतदृग्वेदइत्यादिश्रुतेः ॥ नकश्चिद्वेदकर्तास्तीतिपराशरस्मृतेः ॥ अस्यवेदस्यसर्वज्ञःकल्पादौपरमेश्वरः ॥ व्यंजकःकेवलंविप्रानैवकर्तानसंशयः ॥ ब्रह्माणंमुनयःपूर्वंतस्मैसृष्ट्वामहेश्वरः ॥ दत्तवानखिलान्वेदान्विप्राआत्मनिसंस्थितान् ॥ ब्रह्मणाचोदितोविष्णुर्व्यासरूपीद्विजोत्तमः ॥ हितायसर्वभूतानांवेदभेदान्करोतिसइतिमात्स्याच्च ॥ २४ ॥ २५ ॥ २६ ॥ प्रथममिति ॥ सर्वशास्त्राणांमध्येप्रथमंपुराणंस्मृतंप्रकाशितं मत्स्यपुराणेपि पुराणंसर्वशास्त्राणांप्रथमंब्रह्मणास्मृतं अनंतरंचवक्रेभ्योवेदास्तस्यविनिर्गताः॥पुराणमेकमेवासीत्तदाकल्पांतरेनघ ॥ त्रिवर्गसाधनंपुण्यंशतकोटिप्रविस्तरमिति ॥ २७ ॥ तस्यब्रह्मणः ॥ तन्मुखात्ब्रह्ममुखात् ॥ २८ ॥ अस्यविद्यातत्त्वस्य ॥ विद्यासमासार्थं विस्तृतविद्यानांसंक्षेपार्थम् ॥ २९ ॥ व्यासनाम्नेति ॥ व्यासोनारायणःसाक्षादित्युक्तेः ॥ ३० ॥ हव्याशीअग्निः ॥ अजायतेति ॥ पराशरमहर्षेरितिशेषः ॥ ३१ ॥ व्यासंप्रशंसति ॥ मतीति ॥ मतिरूपंमंथनदंडमित्यर्थः ॥येनव्यासेन ॥ प्रकाशःतत्त्वबोधकत्वेनप्रकाशरूपः ॥ ३२ ॥ वेदव्यासइतिनाम्नःप्रवृत्तिनिमित्तमाह ॥ संक्षिप्येति ॥ ३३ ॥ चतुर्लक्षेति ॥ इहलोकेस्तीतिशेषः ॥ ३४ ॥ वेदार्थतत्त्वंपुराणदर्शनेनैवजायतइत्याह ॥ यइति ॥ नारदीयेपि ॥ वेदाःप्रतिष्ठितादेविपुराणैर्नात्रसंशयः ॥ बिभेत्यल्पश्रुताद्वेदोमामयंप्रतरिष्यतीति ॥ ३५ ॥

अष्टादशानांविद्यानामेतासांभिन्नवर्त्मनाम् ॥ आदिकर्ताकविःसाक्षाच्छूलपाणिरितिश्रुतिः ॥ २४ ॥ सहिसर्वजगन्नाथःसिसृक्षुरखिलंजगत् ॥ ब्रह्माणंविदधेसाक्षात्पुत्रमग्रेसनातनम् ॥ २५ ॥ तस्मैप्रथमपुत्रायब्रह्मणेविश्वयोनये ॥ विद्याश्चैमाददौपूर्वंविश्वसृष्ट्यर्थमीश्वरः ॥२६॥ लब्धविद्येनतेनापिप्रजासृष्टिंवितन्वता ॥ प्रथमंसर्वशास्त्राणांपुराणंब्रह्मणास्मृतं ॥ २७ ॥ अनंतरंतुवक्रेभ्योवेदास्तस्यविनिर्गताः ॥ प्रवृत्तिःसर्वशास्त्राणांतन्मुखादभवत्ततः ॥ २८ ॥ यदाऽस्यविस्तरंशक्तानाधिगंतुंप्रजाभुवि ॥ तदाविद्यासमासार्थंविश्वेश्वरनियोगतः ॥२९॥ द्वापरांतेषुविश्वात्माविष्णुःसर्वजगन्मयः ॥ व्यासनाम्नाचरत्यस्मिन्नवतीर्यमहीतले ॥ ३० ॥ सपुनर्द्वापरेचाऽस्मिन्कृष्णद्वैपायनाख्यया ॥ अरण्यामिवहव्याशीसत्यवत्यामजायत ॥ ३१ ॥ मतिमंथानमाविध्ययेनवेदमहार्णवात् ॥ प्रकाशोजनितोलोकेमहाभारतचंद्रमाः ॥ ३२ ॥ संक्षिप्यसपुनर्वेदांश्चतुर्द्धाकृतवान्मुनिः ॥ व्यस्तवेदतयालोकेवेदव्यासइतिश्रुतः ॥ ३३ ॥ पुराणमपिसंक्षिप्तंचतुर्लक्षप्रमाणतः ॥ अद्यापिदेवलोकेतच्छतकोटिप्रविस्तरम् ॥ ३४ ॥ योविद्याच्चतुरोवेदान्सांगोपनिषदोद्विजः ॥ नचेत्पुराणंसंविद्यान्नैवसस्याद्विचक्षणः ॥ ३५ ॥ ॥ ॥

॥ ३ ६॥ पुराणलक्षणमाह॥सर्गश्चेति॥ प्रतिसर्गः प्रलयः अवांतरसर्गोवा ॥ ३ ७॥ पुराणसंख्यामाह॥दशधेति ॥ क्रमेणपुराणनामान्याह॥ब्राह्ममिति ॥ ३ ८॥ ३ ९॥
॥ ४ ० ॥ तुरीयंचतुर्थम् ॥ शार्वंशर्वस्यशिवस्यमहात्म्यप्रतिपादकम् ॥ देवलोकेस्थितांशैवग्रंथसंख्यामाह ॥ ग्रंथेति ॥ ग्रंथोऽनुष्टुप्छंदस्कःश्लोकः ॥ ४ १॥ तदुक्ते

इतिहासपुराणाभ्यांवेदंसमुपबृंहयेत् ॥ बिभेत्यल्पश्रुताद्वेदोमामयंप्रतरिष्यति ॥ ३६ ॥ सर्गश्चप्रतिसर्गश्चवंशोमन्वं
तराणिच ॥ वंशानुचरितंचेतिपुराणंपंचलक्षणम् ॥ ३७ ॥ दशधाचाऽष्टधाचैतत्पुराणमुपदिश्यते ॥ ब्राह्मंपाद्मंवैष्णवंच
शैवंभागवतंतथा ॥ ३८ ॥ भविष्यंनारदीयंचमार्कंडेयमतःपरम् ॥ आग्नेयंब्रह्मवैवर्तंलैंगंवाराहमेवच ॥ ३९ ॥ स्कांदं
चवामनंचैवकौर्मंमात्स्यंचगारुडम् ॥ ब्रह्मांडंचातिपुण्योऽयंपुराणानामनुक्रमः ॥ ४० ॥ तत्रशैवंतुरीयंयच्छार्वंसर्वार्थसा
धकम् ॥ ग्रंथलक्षप्रमाणंतद्व्यस्तंद्वादशसंहितम् ॥ ४१ ॥ निर्मितंतच्छिवेनैवतत्रधर्मःप्रतिष्ठितः ॥ तदुक्तेनैवधर्मेणशैवास्त्रैव
र्णिकानराः ॥ ४२ ॥ एकजन्मनिमुच्यंतेप्रसादात्परमेष्ठिनः ॥ तस्माद्विमुक्तिमन्विच्छन्शिवमेवसमाश्रयेत् ॥ ४३ ॥ तमाश्रि
त्यैवदेवानामपिमुक्तिर्नचाऽन्यथा ॥ यदिदंशैवमाख्यातंपुराणंवेदसंमितम् ॥ ४४ ॥ तस्यभेदान्समासेनब्रुवतोमेनि
बोधत ॥ विद्येश्वरंतथारौद्रंवैनायकमनुत्तमम् ॥ ४५ ॥ औमंमातृपुराणंचैवरुद्रैकादशकंतथा ॥ कैलासंशतरुद्रंचको
टिरुद्राख्यमेवच ॥ ४६ ॥ सहस्रकोटिरुद्राख्यंवायवीयंततःपरम् ॥ धर्मसंज्ञंपुराणंचेत्येवंद्वादशसंहिताः ॥ ४७ ॥
विद्येशंदशसाहस्रमुदितंग्रंथसंख्यया ॥ रौद्रंवैनायकंचौमंमातृकाख्यंततःपरम् ॥ ४८ ॥ प्रत्येकमष्टसाहस्रंत्रयोद
शसहस्रकम् ॥ रुद्रैकादशकाख्यंयत्कैलासंषट्सहस्रकम् ॥ ४९ ॥ शतरुद्रंदशप्रोक्तंकोटिरुद्रंतथैवच ॥ सहस्रको
टिरुद्राख्यंदशसाहस्रकंतथा ॥ ५० ॥ यदेतद्वायुनाप्रोक्तंचतुःसाहस्रमीरितम् ॥ तथापंचसहस्रंतुयदेतद्धर्मनामकम्
॥ ५१ ॥ तदेवंलक्षमुद्दिष्टंशैवंशाखाविभेदतः ॥ चतुःसहस्रकंयत्तुवायुनासमुदीरितम् ॥ ५२ ॥ ॥

नशिवोक्तेन ॥ ४२ ॥ परमेष्ठिनःशिवस्य ॥ ४३ ॥ तंशिवम् ॥ ४४ ॥ द्वादशानांभागानांसंहितारूपाणांनामान्याह ॥ विद्येश्वरमिति ॥ ४५ ॥ ४६ ॥
॥ ४७ ॥ उक्तानांभागानांप्रत्येकंसंख्यामाह ॥ विद्येशमिति ॥ ४८ ॥ ४९ ॥ ५० ॥ ५१ ॥ शाखाविभेदतःशाखारूपसंहिताभेदात् ॥ ५२ ॥



Indira Gandhi National Centre for the Arts

अत्रेदंबोध्यं यद्यप्यत्रैतत्पुराणस्यलक्षसंख्योक्तातथापिदेवलोकेस्थितासाबेदितव्या अत्रतु चतुर्विंशतिसहस्रकमेव चतुर्विंशतिसाहस्रंशैवमितिश्रीमद्भागवतोक्तेः ॥ एवंयद्यपिद्वादशसंहिताउक्तास्तथापियावत्योत्रोपलब्धास्तावत्योव्याख्यायंते ॥ ज्ञानसंहितायाःपृथगपरिगणनेपिउक्तास्वेवसंहितास्वंतर्भावोवेदितव्यः ॥ भिन्नैव वाकृतास्तु ॥ वर्तयिष्यामिकथयिष्यामि ॥ भागद्वयेति॥पूर्वोत्तरार्धयुतमित्यर्थः॥५३॥५४॥५५॥५६ ॥ इतिश्रीशैवमहापुराणवायवीयसंहिताटीकायां सारबोधिन्यांपूर्वभागेविद्यावतारकथनंनामप्रथमोऽध्यायः ॥ १ ॥ ॐनमःशिवाय ॥ जिज्ञासवःपरंतत्त्वंब्रह्माणंमुनयोगताः ॥ तेनोक्तंशिवमाहात्म्यंश्रुत्वाज

तदिदंवर्तयिष्यामिभागद्वयसमन्वितम् ॥ नाऽवेदविदुषेवाच्यमिदंशास्त्रमनुत्तमम् ॥ ५३ ॥ नचैवाऽश्रद्दधानायनाऽपु
राणविदेतथा ॥ परीक्षितायशिष्यायधार्मिकायानसूयवे ॥ प्रदेयंशिवभक्तायशिवधर्मानुसारिणे ॥ ५४ ॥ पुराण
संहितायस्यप्रसादान्मयिवर्तते ॥ ५५ ॥ नमोभगवतेतस्मैव्यासायाऽमिततेजसे ॥ ५६ ॥ इतिश्रीशिवमहापुराणे
वायवीयसंहितायांपूर्वभागेविद्यावतारकथनंनामप्रथमोऽध्यायः ॥ १ ॥ सूतउवाच ॥ पुराकालेनमहताकल्पेऽतीते
पुनःपुनः ॥ अस्मिन्नुपस्थितेकल्पेप्रवृत्तेसृष्टिकर्मणि ॥ १ ॥ प्रतिष्ठितायांवार्तायांप्रबुद्धासुप्रजासुच ॥ मुनीनांषट्कु
लीयानांब्रुवतामितरेतरम् ॥ २ ॥ इदंपरमिदंनेतिविवादःसुमहानभूत् ॥ परस्यदुर्निरूपत्वान्नजातस्तत्रनिश्चयः ॥
॥ ३ ॥ तेऽभिजग्मुर्विधातारंद्रष्टुंब्रह्माणमव्ययम् ॥ यत्राऽऽस्तेभगवान्ब्रह्मास्तूयमानःसुरासुरैः ॥ ४ ॥ मेरुशृंगेशु
भेरम्येदेवदानवसंकुले ॥ सिद्धचारणसंबाधेयक्षगंधर्वसेविते ॥ ५ ॥ विहंगसंगसंघुष्टेमणिविद्रुमभूषिते ॥ निकुंज
कंदरदरीगुहानिर्झरशोभिते ॥ ६ ॥ तत्रब्रह्मवनंनामनानामृगसमाकुलम् ॥ दशयोजनविस्तीर्णंशतयोजनमायत
म् ॥ ७ ॥ सुरसामलपानीयपूर्णरम्यसरोवरम् ॥ मत्तभ्रमरसंछन्नरम्यपुष्पितपादपम् ॥ ८ ॥ तरुणादित्यसंका
शंतत्रचास्तिमहत्पुरम् ॥ दुर्धर्षबलदृप्तानांदैत्यदानवरक्षसाम् ॥ ९ ॥ ॥ ॥

ग्मुस्तदाज्ञया ॥ १ ॥ नैमिशंब्रह्मणाप्रोक्तंसत्रंकर्तुंसमुद्यताः ॥ एतत्कथानकंदिव्यंद्वितीयेऽत्रनिरूप्यते ॥ २ ॥ अस्मिन्श्वेतवाराहाख्ये ॥ १ ॥ वार्तायांसृष्टि प्रवर्तनरूपायांप्रबुद्धासुप्रकृष्टज्ञानयुक्तासु ॥ २ ॥ इदमिति ॥ इदमेवपरंब्रह्मतत्त्वमस्तीदंनेतिविवादोवाकलहइत्यर्थः ॥ परस्यब्रह्मणः ॥ ३ ॥ तेमुनयः ॥ ४ ॥ ५ ॥ विद्रुमःप्रवालः ॥ ६ ॥ ब्रह्मवनस्यपरिमाणमाह ॥ दशेति ॥ आयतंदीर्घं ॥ ७ ॥ तदेवविशिनष्टि॥ सुरसेति ॥ ८ ॥ तत्रब्रह्मवनेपुरंनगरंतद्वि शिनष्टि ॥ दुर्धर्षमित्यादिना ॥ ९ ॥ ॥ ॥ ॥ ॥

Indira Gandhi National Centre for the Arts

जांबूनदंसुवर्णं ॥ निर्व्यूहोनागदंतः ॥ वलभीगोपानसी ॥ प्रतोलीरथ्या ॥ १० ॥ लेलिहानमास्वादवत् ॥ अत्युच्चमितियावत् ॥ ११ ॥ तस्मिन्पुरे ॥ साध्यैःदेवविशेषैः ॥ १२ ॥ चामीकरंसुवर्णं ॥ १३ ॥ १४ ॥ १५ ॥ सरस्वत्यादेव्या ॥ १६ ॥ तंब्रह्माणं ॥ १७ ॥ १८ ॥ प्रधानदेहाय त्रिगुणात्मकप्रकृतिशरीराय ॥ प्रधानक्षोभकारिणेप्रकृतिवैषम्यावस्थाकारिणेत्रयोविंशतिभेदेनमहदादितत्त्वभेदेनविकृतायाप्यविकारिणे ॥ १९ ॥ ब्रह्मांडेति ॥ ब्रह्मांडंजातं

तत्रजांबूनदमयंप्रांशुप्राकारतोरणम् ॥ निर्व्यूहवलभीकूटप्रतोलीशतमंडितम् ॥ १० ॥ महार्हमणिचित्राभिर्लेलिहानमिवांबरम् ॥ महाभवनकोटीभिरनेकाभिरलंकृतम् ॥ ११ ॥ तस्मिन्निवसतिब्रह्मासाध्यैःसार्धंप्रजापतिः ॥ तत्रगत्वामहात्मानंसाक्षाल्लोकपितामहम् ॥ १२ ॥ ददृशुर्मुनयोदेवादेवर्षिगणसेवितम् ॥ शुद्धचामीकरप्रख्यंसर्वाभरणभूषितम् ॥ १३ ॥ प्रसन्नवदनंसौम्यंपद्मपत्रायतेक्षणम् ॥ दिव्यकांतिसमायुक्तंदिव्यगंधानुलेपनम्॥१४॥ दिव्यशुक्लांबरधरंदिव्यमालाविभूषितम् ॥ सुरासुरेंद्रयोगींद्रवंद्यमानपदांबुजं ॥ १५ ॥ सर्वलक्षणयुक्तांग्यालब्धचामरहस्तया ॥ भ्राजमानंसरस्वत्याप्रभयेवदिवाकरम् ॥ १६ ॥ तंदृष्ट्वामुनयःसर्वेप्रहृष्टवदनेक्षणाः ॥ शिरस्यंजलिमाधायतुष्टुवुःसुरपुंगवम् ॥ १७ ॥ मुनयऊचुः ॥ नमस्त्रिमूर्तयेतुभ्यंसर्गस्थित्यंतहेतवे ॥ पुरुषायपुराणायब्रह्मणेपरमात्मने ॥ १८ ॥ नमःप्रधानदेहायप्रधानक्षोभकारिणे ॥ त्रयोविंशतिभेदेनविकृतायाविकारिणे ॥ १९ ॥ नमोब्रह्मांडजातायब्रह्मांडोदरवर्तिने ॥ तत्रसंसिद्धकार्यायसंसिद्धकरणायच ॥ २० ॥ नमोस्तुसर्वलोकायसर्वलोकविधायिने ॥ सर्वात्मदेहसंयोगवियोगविधिहेतवे ॥ २१ ॥ त्वयैवनिखिलंसृष्टंसंहृतंपालितंजगत् ॥ तथापिमाययानाथनविद्मस्त्वांपितामह ॥ २२ ॥ सूतउवाच ॥ एवंब्रह्मामहाभागैर्महर्षिभिरभिष्टुतः ॥ प्राहगंभीरयावाचामुनीन्प्रह्लादयन्निव ॥ २३ ॥ ब्रह्मोवाच ॥ ऋषयोहेमहाभागामहासत्वामहौजसः ॥ किमर्थंसहिताःसर्वेयूयमत्रसमागताः ॥ २४ ॥ तमेवंवादिनंदेवंब्रह्माणंब्रह्मवित्तमाः ॥ वाग्भिर्विनयगर्भाभिःसर्वेप्रांजलयोऽब्रुवन् ॥ २५ ॥

यस्मात्तस्माइत्यर्थः ॥ तथापिब्रह्मांडोदरवर्तिनेब्रह्मांडमध्येस्थिताय ॥ तत्रब्रह्मांडे ॥ कार्यंपंचीकृतमहाभूतात्मकसृष्ट्यादिरूपं ॥ करणान्यपंचीकृतमहाभूतानि ॥ २० ॥ सर्वलोकायसर्वदर्शिने ॥ २१ ॥ सर्वात्मेत्याद्युक्तंविवृत्याहुः ॥ त्वयेति ॥ २२ ॥ २३ ॥ २४ ॥ २५ ॥ ॥



Indira Gandhi National Centre for the Arts

अंधकारेणअविद्यया ॥ परंब्रह्म ॥२६॥ २७ ॥ ऋषयस्तंयदपृच्छंस्तदाह ॥ कइति ॥ विशुद्धःवस्तुतोमायाशून्यः परिपूर्णःव्यापकः शाश्वतोनित्यः ॥ २८ ॥ ॥२९॥३०॥३१॥ध्यात्वेति ॥ शिवतत्त्वमितिशेषः ॥ ३२ ॥ यतइति ॥ यतः ब्रह्मणःसकाशात्वाचःमनसासहतदप्राप्यअज्ञात्वानिवर्ततेनिर्वक्तुमशक्ताभवं तीत्यर्थः ॥ यस्यब्रह्मणः आनंदंनिरतिशयसुखंविद्वान्नकुतोपिबिभेति ॥ अविद्यायानिवृत्तत्वेनभयकारणाभावादितिभावःयतोवाचोनिवर्तन्ते अप्राप्यमनसा सह आनंदंब्रह्मणोविद्वान् नबिभेति कुतश्चनेतीतिब्रह्मवल्ल्यां ॥ ३३ ॥ भूतान्याकाशादीनि ॥ इंद्रियाणिवागादीनिचक्षुरादीनिच ॥ ३४ ॥ कारणानांसृ

मुनयऊचुः ॥ भगवन्नंधकारेणमहतावयमावृताः ॥ खिन्नाविवदमानाश्चनपश्यामोऽत्रयत्परम् ॥ २६ ॥ त्वंहिसं
र्वजगद्धातासर्वकारणकारणम् ॥ त्वयाह्यविदितंनाथनेहकिंचनविद्यते ॥ २७ ॥ कःपुमान्सर्वसत्वेभ्यःपुराणःपुरुषः
परः ॥ विशुद्धःपरिपूर्णश्चशाश्वतःपरमेश्वरः ॥ २८ ॥ केनैवचित्रकृत्येनप्रथमंसृज्यतेजगत् ॥ अंतकालेपुनःसर्वंक
स्मिन्प्रलयमेष्यति ॥ २९ ॥ कस्यभूतानिवश्यानिकःसर्वविनियोजकः ॥ कथंसपुरुषःशक्योद्रष्टुमस्माभिरीश्वरः॥
॥ ३० ॥ एवंपृष्टस्तदाब्रह्माविस्मयस्मेरवीक्षणः ॥ देवानांदानवानांचमुनीनामपिसन्निधौ ॥ ३१ ॥ उत्थायसुचिरं
ध्यात्वारुद्रइत्युच्चरन्गिरम् ॥ आनंदक्लिन्नसर्वांगःकृतांजलिरभाषत ॥ ३२ ॥ ब्रह्मोवाच ॥ यतोवाचोनिवर्तंतेअप्रा
प्यमनसासह ॥ आनंदंयस्यवैविद्वान्नबिभेतिकुतश्चन ॥ ३३ ॥ यस्मात्सर्वमिदंब्रह्मविष्णुरुद्रेंद्रपूर्वकम् ॥ सहभूतें
द्रियैःसर्वैःप्रथमंसंप्रसूयते ॥ ३४ ॥ कारणानांचयोधाताध्याताप्रमकारणम् ॥ नसंप्रसूयतेऽन्यस्मात्कुतश्चनक
दाचन ॥ ३५ ॥ सर्वैश्वर्येणसंपन्नोनाम्नासर्वेश्वरःस्वयम् ॥ सर्वैर्मुमुक्षुभिर्ध्येयःशंभुराकाशमध्यगः ॥ ३६ ॥ योऽग्रे
मांविदधेपुत्रंज्ञानंचप्रहिणोतिमे ॥ यत्प्रसादान्मयालब्धंप्राजापत्यमिदंपदं ॥३७॥ ईशोवृक्षइवस्तब्धोयएकोदिवि
तिष्ठति ॥ येनेदमखिलंपूर्णंपुरुषेणमहात्मना ॥ ३८ ॥ एकोबहूनांजंतूनांनिष्क्रियाणांचसत्क्रियः ॥ यएकोबहुधा
बीजंकरोतिसमहेश्वरः ॥ ३९ ॥ ॥ ॥ ॥ ॥

ष्टिकारणानामाकाशादीनां ॥ ध्यातेति ॥ नारायणपरोध्यातेतिश्रुतेः ॥ परमकारणंशिवः परमकारणत्वेहेतुमाह नेति ॥ ३५ ॥ आकाशमध्यगःहृदाकाशे स्थितः ॥ ३६ ॥ प्रहिणोतिददातिस्म ॥ प्राजापत्यंप्रजानामाधिपत्यरूपं ॥ ३७ ॥ ईशइति यएकईशोवृक्षइवस्तब्धोनिश्चलोदिव्याकाशेतिष्ठति ॥ जगन्नि यंतृत्वेनास्तइत्यर्थः वृक्षइवस्तब्धोदिवितिष्ठत्येकस्तेनेदंपूर्णंपरिगृहीतमभूतेनसर्वमितिश्रुतेः ॥ येनेदमिति ॥ येनेदंभूतंभुवनंभविष्यत्परिगृहीतममृतेनसर्वमि तिश्रुतेः ॥ ३८ ॥ एकइति ॥ बहूनांप्राणिनांनिष्क्रियाणांक्रियाशून्यानांसत्क्रियः सतीसाध्वीक्रियायस्मात्सः सत्कर्मसुप्रेरकइत्यर्थः ॥ ३९ ॥

Indira Gandhi National Centre for the Arts

ईशतइति ॥ ईशते ईष्टे ॥ आर्षबहुवचनम् ॥ यएकइति ॥ एकएवरुद्रोवतस्थेनद्वितीयइतिश्रुतेः ॥ ४० ॥ लक्षयन्प्रकाशयन्नधितिष्ठतिव्याप्नोति ॥ ४१ ॥ कालेति ॥ कालःप्रसिद्धःआत्माबुद्धिस्ताभ्यांयुक्तानिकारणानिआकाशादीनि ॥ अधितिष्ठतीत्यग्रिमेणसंबध्यते ॥ ४२ ॥ यदेति ॥ यदासृष्टेःप्राक्तमएवासीत्तदानदिवसादिकमासीदित्यर्थः ॥ नासदासीन्नोसदासीत्तदानीं ॥ नासीद्रजोनोव्योमापरोयत् ॥ तमआसीत्तमस.गूढमग्रेप्रकेतमितिश्रुतेः ॥ प्रज्ञाबुद्धिः ॥ ४३ ॥ ४४ ॥४५ ॥ क्षरंसर्वाणिभूतानि ॥ अक्षरमविनाशिकूटस्थःपुरुषः ॥ ४६ ॥ तदभिध्यानात्शिवाभिध्यानात् पशोर्जीवस्यअंतेअंतकाले ॥४७॥

जीवैरेभिरिमाल्लोकान्सर्वानीशोयईशते ॥ यएकोभगवान्रुद्रोनद्वितीयोऽस्तिकश्चन ॥ ४० ॥ सदाजनानांहृदये सन्निविष्टोपियःपरैः ॥ अलक्ष्योलक्षयन्विश्वमधितिष्ठतिसर्वदा ॥ ४१ ॥ यस्तुकालात्मयुक्तानिकारणान्यखिलान्यपि ॥ अनंतशक्तिरेकोवैभगवानधितिष्ठति ॥ ४२ ॥ यदातमस्तन्नदिवानरात्रिर्नसदप्यसत् ॥ केवलःशिवएवैकोयस्मात्प्रज्ञाविनिःसृता ॥ ४३ ॥ यस्यपुंसःपराशक्तिर्भावगम्यामहीयसी ॥ निर्गुणास्वगुणैरेवनिगूढानिष्कलाशिवा ॥ ४४ ॥ नतस्यकार्यकरणेनसमानोनचाऽधिकः ॥ स्वाभाविकीपराशक्तिर्नित्याज्ञानाक्रियाअपि ॥ ४५ ॥ यच्चेदंक्षरमव्यक्तंयदप्यमृतमक्षरम् ॥ तावुभावक्षरात्मानावेकोदेवःस्वयंहरः ॥ ४६ ॥ ईशतेतदभिध्यानाद्योजनात्तत्त्वभावतः ॥ भूयोप्यस्यपशोरंतेविश्वमायानिवर्तते ॥ ४७ ॥ यस्मिन्नभासतेविद्युन्नसूर्योनचचंद्रमाः ॥ यस्यभासाविभातीदमित्येषाशाश्वतीश्रुतिः ॥ ४८ ॥ एकोदेवोमहादेवोविज्ञेयस्तुमहेश्वरः ॥ नतस्यपरमंकिंचित्पदंसमधिगम्यते ॥ ४९ ॥ अयमादिरनाद्यंतःस्वभावादेवनिर्मलः ॥ स्वतंत्रःपरिपूर्णश्चस्वेच्छाधीनचराचरः ॥ ५० ॥ अप्राकृतवपुःश्रीमांल्लक्ष्यलक्षणवर्जितः ॥ अमुक्तोमोचकश्चायमकालःकालचोदकः ॥ ५१ ॥ सर्वोपरिकृतावासःसर्वावासश्चसर्ववित् ॥ षड्विधाध्वमयस्यास्यसर्वस्यजगतःपतिः ॥ ५२ ॥ उत्तरोत्तरभूतानामुत्तरश्चनिरुत्तरः ॥ अनंतमहिमाभूमिरनवच्छिन्नवैभवः॥५३॥अशेषविषयामोघशुद्धबुद्धिविजृंभणः॥आत्मशक्त्यमृतास्वादप्रमोदरसिकोयुवा॥५४॥

यस्मिन्शिवे ॥ यस्यशिवस्य ॥ यस्यभासासर्वमिदंभातीतिश्रुतिः ॥ ४८ ॥ परमंतत्त्वं ॥ ४९ ॥ तत्रहेतुमाह ॥ अयमिति ॥ निर्मलःनिर्गुणः ॥ ५० ॥ अमुक्तइति ॥ स्वयंमायासंबद्धोपीत्यर्थः ॥ मोचकइति ॥ भक्तानामितिशेषः ॥ ५१ ॥ षड्विधेति ॥ वक्ष्यमाणषडध्वयुक्तस्य॥५२ ॥ उत्तरेति ॥ अत्युत्तमानामप्युत्तमइत्यर्थः ॥ अतएव ॥ निरुत्तरःसर्वोत्कृष्टः ॥ अनवच्छिन्नवैभवः अपरिच्छिन्नैश्वर्यः ॥ ५३ ॥ अशेषेति ॥ अशेषेषुशब्दादिविषयेषुयाअमोघशुद्धबुद्धिःभक्तहितकारिनिर्मलज्ञानंतयाविजृंभणोव्यापनशीलः ॥ आत्मेति ॥ आत्मशक्तिरेवामृतंतदास्वादप्रमोदरसिकः ॥ ५४ ॥ ॥





Indira Gandhi National Centre for the Arts

॥ ५५ ॥ ५६ ॥ अतुलःअनुपमः ॥ ५७ ॥ एष्यतीति ॥ यत्प्रयंत्यभिसंविशंतीतिश्रुतेः ॥ सर्वनियोजकःसर्वप्रेरकः ॥ ५८ ॥ ५९ ॥ भावार्थईश्वरचिंतनप्रसादाद्यर्थम्
॥ ६० ॥ तस्यभगवतः ॥ ६१ ॥ ६२ ॥ त्रैविध्यमाह ॥ अस्मदादीति ॥ ततःसूक्ष्मात् ॥ ६३ ॥ ६४ ॥ शिवइति ॥ शिवभक्तिरेवपरंगुह्यंनान्यदित्यर्थः ॥ तयायुक्तः

अनंतानंदसंदोहमकरंदमधुव्रतः ॥ अखंडजगदंडानांपिंडीकरणपंडितः ॥ ५५ ॥ औदार्यवीर्यगांभीर्यमाधुर्यमक
रालयः ॥ नैवाऽस्यसदृशंवस्तुनाधिकंचापिकिंचन ॥ ५६ ॥ अतुलःसर्वभूतानांराजराजश्चतिष्ठति ॥ अनेनचित्रकृ
त्येनप्रथमंसृज्यतेजगत् ॥ ५७ ॥ अंतकालेपुनश्चेदंतस्मिन्प्रलयमेष्यति ॥ अस्यभूतानिवश्यानिअयंसर्वनियोज
कः ॥ ५८ ॥ अयंतुपरयाभक्त्यादृश्यतेनाऽन्यथाक्वचित् ॥ व्रतानिसर्वदानानितपांसिनियमास्तथा ॥ ५९ ॥ कथि
तानिपुरासद्भिर्भावार्थनाऽत्रसंशयः ॥ हरिश्चाहंचरुद्रश्चतथान्येचसुरासुराः ॥ ६० ॥ तपोभिरुग्रैरद्यापितस्यदर्शन
कांक्षिणः ॥ अदृश्यःपतितैर्मूढैर्दुर्जनैरपिकुत्सितैः ॥ ६१ ॥ भक्तैरंतर्बहिश्चापिपूज्यःसंभाष्यएवच ॥ तदिदंत्रिविधं
रूपंस्थूलंसूक्ष्मंततःपरम् ॥ ६२ ॥ अस्मदाद्यमरैर्दृश्यंस्थूलंसूक्ष्मंतुयोगिभिः ॥ ततःपरंतुयन्नित्यंज्ञानमानंदमव्य
यम् ॥ ६३ ॥ तन्निष्ठैस्तत्परैर्भक्तैर्दृश्यंतद्व्रतमास्थितैः ॥ बहुनात्रकिमुक्तेनगुह्याद्गुह्यतरंपरम् ॥ ६४ ॥ शिवेभक्तिर्न
संदेहस्तयायुक्तोविमुच्यते ॥ प्रसादादेवसाभक्तिःप्रसादोभक्तिसंभवः ॥ ६५ ॥ यथावांऽकुरतोबीजंबीजतोवायथां
ऽकुरः ॥ प्रसादपूर्विकाएवपशोःसर्वत्रसिद्धयः ॥ ६६ ॥ सएवसाधनैरंतेसर्वैरपिचसाध्यते ॥ प्रसादसाधनंधर्मःसच
वेदेनदर्शितः ॥ ६७ ॥ तदभ्यासवशात्साम्यंपूर्वयोःपुण्यपापयोः ॥ साम्यात्प्रसादसंपर्कोधर्मस्यातिशयस्ततः ॥
॥ ६८ ॥ धर्मातिशयमासाद्यपशोःपापपरिक्षयः ॥ एवंप्रक्षीणपापस्यबहुभिर्जन्मभिःक्रमात् ॥ ६९ ॥

शिवभक्तियुक्तः ॥ ६५ ॥ ईश्वरभक्तीश्वरप्रसादयोःपरस्परोपजीव्यत्वेनान्योन्याश्रयत्वेइष्टापत्तिंमत्वातत्रदृष्टांतमाह ॥ यथावेति ॥ पशोःप्राणिनः ॥ ६६ ॥
॥ सएवशिवएव ॥ धर्मेप्रमाणमाह ॥ वेदेनेति ॥ ६७ ॥ तदभ्यासेति ॥ वेदाभ्यासवशादित्यर्थः ॥ पूर्वयोःपूर्वार्जितयोः ॥ ततःप्रसादसंपर्कात् ॥ ६८ ॥ ६९ ॥

...ra Gandhi National
...ntre for the Arts

भावानुगुणंचिंतनसेवनानुरूपेण ॥ ७० ॥ स्वरूपतइति॥फलमनुद्दिश्यैवनित्यकर्माणिकर्तव्यानीत्यर्थः॥काम्यानांकर्मणांन्यासंसंन्यासंकवयोविदुरितिभगव
द्गीतोक्तेः ॥ तदेवाह ॥ तस्मादिति ॥ शिवधर्माशिवधर्मपरिग्रहइत्यर्थः ॥ भवतीतिशेषः ॥ ७१ ॥ सद्विविधइत्याह ॥ सचेति ॥ तदपेक्षोगुर्वपेक्षः ॥ ७२ ॥
तस्यमुख्यत्वेहेतुमाह ॥ शिवधर्मेति ॥ यस्मादस्यगुर्वपेक्षस्यशिवधर्मान्वयस्याशिवधर्मानुवर्तनस्यकरणाच्छिवज्ञानसमन्वयोभवतीत्यर्थः ॥ ७३ ॥ ततो
दोषदर्शनात् ॥ ७४ ॥ ७५ ॥ एवंकारणपरंपरामुक्त्वाशिवसाम्यप्राप्तौसाक्षात्कारणमाह ॥ प्रसादादिति ॥ ननुएतावतःशिवधर्मादेःकर्तुमशक्तस्यकागति

सांबेसर्वेश्वरेभक्तिर्ज्ञानपूर्वाप्रजायते ॥ भावानुगुणमीशस्यप्रसादोव्यतिरिच्यते ॥ ७० ॥ प्रसादात्कर्मसंत्यागःफ
लतोनस्वरूपतः ॥ तस्मात्कर्मफलत्यागाच्छिवधर्मान्वयःशुभः ॥ ७१ ॥ सचगुर्वनपेक्षश्चतदपेक्षइतिद्विधा ॥ त
त्राऽनपेक्षात्सापेक्षोमुख्यःशतगुणाधिकः ॥ ७२ ॥ शिवधर्मान्वयस्यास्यशिवज्ञानसमन्वयः ॥ज्ञानान्वयवशात्पुंसः
संसारेदोषदर्शनम् ॥ ७३ ॥ ततोविषयवैराग्यंवैराग्याद्भावसाधनम् ॥ भावसिद्ध्युपपन्नस्यध्यानेनिष्ठानकर्मणि ॥
॥ ७४ ॥ ज्ञानध्यानाभियुक्तस्यपुंसोयोगःप्रवर्तते ॥ योगेनतुपराभक्तिःप्रसादस्तदनंतरम् ॥ ७५ ॥ प्रसादान्मुच्य
तेजंतुर्मुक्तःशिवसमोभवेत् ॥ अनुग्रहप्रकारस्यक्रमोयमविवक्षितः ॥ ७६ ॥ यादृशीयोग्यतापुंसस्तस्यतादृगनुग्रहः
॥ गर्भस्थोमुच्यतेकश्चिज्जायमानस्तथापरः ॥ ७७ ॥ बालोवातरुणोवाथवृद्धोवामुच्यतेपरः ॥ तिर्यग्योनिगतःक
श्चिन्मुच्यतेनारकीपरः ॥ ७८ ॥ अपरस्तुपदंप्राप्तोमुच्यतेस्वपदक्षयात् ॥ कश्चित्क्षीणपदोभूत्वापुनरावर्त्यमुच्यते
॥ ७९ ॥ कश्चिदूर्ध्वगतस्तस्मिंमस्थित्वास्थित्वाविमुच्यते ॥ तस्मान्नैकप्रकारेणनराणांमुक्तिरिष्यते ॥ ८० ॥ ज्ञान
भावानुरूपेणप्रसादेनैवनिर्वृतिः ॥ तस्मादस्यप्रसादार्थंवाङ्मनोदोषवर्जिताः ॥८१॥ ध्यायंतःशिवमेवैकंसदारतन
यान्नयः ॥ तन्निष्ठास्तत्पराःसर्वेतद्युक्तास्तदुपाश्रयाः ॥ ८२ ॥ सर्वक्रियाःप्रकुर्वाणास्तमेवमनसागताः ॥ दीर्घसत्रं
समासध्वंदिव्यंवर्षसहस्रकम् ॥ ८३ ॥ सत्रांतेमंत्रयोगेनवायुस्तत्रागमिष्यति ॥ सएवभवतांश्रेयःसोपायंकथयि
ष्यति ॥ ८४ ॥ ततोवाराणसीपुण्यापुरीपरमशोभना ॥ गंतव्यायत्रविश्वेशोदेव्यासहपिनाकधृक् ॥ ८५ ॥

रित्यतआह ॥ अनुग्रहेति ॥ ७६ ॥ ७७ ॥ ७८ ॥ अपरःअक्षीणपुण्यपापःआवर्त्यकर्मभूमिंप्राप्य ॥ ७९ ॥ ऊर्ध्वगतःस्वर्गेस्थितः ॥ ८० ॥ निर्वृतिःनिर
तिशयानंदः ॥ ८१ ॥ तन्निष्ठाःशिवनिष्ठाः ॥ अनेनाभ्यंतरभक्तिर्दर्शिता ॥ तत्पराइति ॥ अनेनबाह्यभक्तिः ॥ एतस्यैवविवरणमाह ॥ तद्युक्ताइति ॥८२॥
तमेवशिवमेव ॥ ८३ ॥ मंत्रयोगेनमंत्रप्रभावेण ॥ तत्रनैमिशे ॥ ८४ ॥ देव्यापार्वत्या ॥ ८५ ॥ ॥ ॥

तत्रवाराणस्याम् ॥ ८६ ॥ ८७ ॥ एतदिति ॥ उपन्यस्तंचैतज्ज्ञानसंहितारंभेऽस्माभिः ॥ ८८ ॥ ८९ ॥ ९० ॥ ९१ ॥ अनेनहेतुनातद्वनस्यै तन्नामसंपन्नमित्याह ॥ तद्वनमिति ॥ ९२ ॥ अष्टादशेति ॥ समुद्रस्याष्टादशद्वीपानित्यर्थः ॥ दैवेनदुर्दैवेन ॥ ९३ ॥ तदेवाह ॥ अक्रमेणेतिधर्मा तिक्रमेणेत्यर्थः ॥ यज्ञवाटंमुनीनांयज्ञशालां ॥ कुशवज्रैरिति ॥ कुशाएववज्राणितैरित्यर्थः ॥ ९४ ॥ विश्वसृजइति ॥ विश्वसृजःप्रथमा.सत्रमासतेतिश्रुतेः

सदाविहरतिश्रीमान्भक्तानुग्रहकारणात् ॥ तत्राश्चर्यंमहद्दृष्टामत्समीपंगमिष्यथ ॥ ८६ ॥ ततोवःकथयिष्यामि मोक्षोपायंद्विजोत्तमाः ॥ येनैकजन्मनामुक्तिर्युष्मत्करतलेस्थिता ॥ ८७ ॥ एतन्मनोमयंचक्रंमयासृष्टंविसृज्यते ॥ यत्राऽस्यशीर्यतेनेमिःसदेशस्तपसःशुभः ॥ ८८ ॥ इत्युक्त्वासूर्यसंकाशंचक्रंदृष्ट्वामनोमयम् ॥ प्रणिपत्यमहादेवंवि ससर्जपितामहः ॥ ८९ ॥ तेपिहृष्टतराविप्राःप्रणम्यजगतांप्रभुम् ॥ प्रययुस्तस्यचक्रस्ययत्रनेमिरशीर्यत ॥ ९० ॥ चक्रंतदपिसंक्षिप्तंश्लक्ष्णंचारुशिलातले ॥ विमलस्वादुपानीयेनिपपातवनेक्वचित् ॥ ९१ ॥ तद्वनंतेनविख्यातंनैमि शंमुनिपूजितम् ॥ अनेकयक्षगंधर्वविद्याधरसमाकुलम् ॥ ९२ ॥ अष्टादशसमुद्रस्यद्वीपानश्नन्पुरूरवाः ॥ विलास वशमुर्वश्यायातोदैवेनचोदितः ॥ ९३ ॥ अक्रमेणाहरन्मोहाद्यज्ञवाटंहिरण्मयम् ॥ मुनिभिर्यत्रसंक्रुद्धैःकुशवज्रैर्निपा तितः ॥ ९४ ॥ विश्वंसिसृक्षमाणावैयत्रविश्वसृजःपुरा ॥ सत्रमारेभिरेदिव्यंब्रह्मज्ञागार्हपत्यगाः ॥ ९५ ॥ ऋषिभि र्यत्रविद्वद्भिःशब्दार्थन्यायकोविदैः ॥ शक्तिप्रज्ञाक्रियायोगैर्विधिरासीदनुष्ठितः ॥ ९६ ॥ यत्रवेदविदोनित्यंवेदवाद बहिष्कृतान् ॥ वादजल्पबलैर्घ्नंतिवचोभिःप्रतिवादिनः ॥ ९७ ॥ स्फटिकमयमहीभृत्पादजाभ्यःशिलाभ्यःप्रसरद मृतकल्पस्वच्छपानीयरम्यम् ॥ अतिरसफलवृक्षप्रायमव्यालसत्त्वंतपसउचितमार्सान्नैमिशंतन्मुनीनाम् ॥ ९८ ॥ इतिश्रीशिवमहापुराणेवायवीयसंहितायांपूर्वभागेद्वितीयोऽध्यायः ॥ २ ॥ ॥ श्रीसांबसदाशिवायनमः ॥

॥ ९५ ॥ ९६ ॥ नैमिषारण्यंप्रशंसति ॥ यत्रेति ॥ वेदवादबहिष्कृतान्नास्तिकान् ॥ ९७ ॥ ९८ ॥ इतिश्रीशिवमहापुराणवायवीयसंहिताटीकायां सारबोधिन्यांपूर्वभागेद्वितीयोध्यायः ॥ २ ॥ ॥ ॥ ॥ ॥

ॐनमःशिवाय ॥ नैमिषेवायुरागत्यकुशलप्रश्नपूर्वकम् ॥ मुनीन्समब्रवीदेवंतृतीयेत्रनिरूप्यते ॥ १ ॥ तस्मिन्देशेनैमिषारण्ये ॥ १ ॥ सर्वाश्चर्यमिति ॥ सर्वाण्याश्चर्याणिअद्भुतकृत्यानियत्रतदित्यर्थः ॥ विश्वंजगत् ॥ २ ॥ ३ ॥ स्वयंभुवःब्रह्मणः ॥ सर्वप्रत्यक्षदृक्सर्वंजगत्प्रत्यक्षतयैवपश्यतीत्यर्थः ॥ वशीइंद्रियनिग्रही ॥ मरुतःमरुद्गणाः ॥ सप्तसप्तकाःएकोनपंचाशत् ॥ ४ ॥ प्रेरयन्चालयन् ॥ प्राणाद्याभिःप्राणापानव्यानोदानसमानरूपभिः ॥ ५ ॥ तिर्यक्करादिभिःतिर्यक्पति

सूतउवाच ॥ तस्मिन्देशेमहाभागामुनयःसंशितव्रताः ॥ अर्चयंतोमहादेवंसत्रमारेभिरेतदा ॥ १ ॥ तच्चसत्रंप्रवट्ट
तेसर्वाश्चर्यमहर्षिणाम् ॥ विश्वंसिसृक्षमाणानांपुराविश्वसृजामिव ॥ २ ॥ अथकालेगतेसत्रेसमाप्तेभूरिदक्षिणे ॥
पितामहनियोगेनवायुस्तत्रागमत्स्वयम् ॥ ३ ॥ शिष्यःस्वयंभुवोदेवःसर्वप्रत्यक्षदृग्वशी ॥ आज्ञायांमरुतोयस्यसं
स्थिताःसप्तसप्तकाः ॥ ४ ॥ प्रेरयन्छश्वदंगानिप्राणाद्याभिःस्ववृत्तिभिः ॥ सर्वभूतशरीराणांकुरुतेयश्चधारणम् ॥
॥ ५ ॥ अणिमादिभिरष्टाभिरैश्वर्यैश्चसमन्वितः ॥ तिर्यक्करादिभिर्मेघैर्भुवनानिबिभर्त्तियः ॥ ६ ॥ आकाशयोनिर्द्वि
गुणःस्पर्शशब्दसमन्वयात् ॥ तेजसांप्रकृतिश्चेतियमाहुस्तत्वचिंतकाः ॥७॥ तमाश्रमगतंदृष्ट्वामुनयोदीर्घसत्रिणः ॥
पितामहवचःस्मृत्वाप्रहर्षमतुलंययुः ॥ ८ ॥ अभ्युत्थायततःसर्वेप्रणम्यांबरसंभवम् ॥ चामीकरमयंतस्मैविष्टरंसम
कल्पयन् ॥ ९ ॥ सोपितत्रसमासीनोमुनिभिःसम्यगर्चितः ॥ प्रतिनंद्यचतान्सर्वान्पप्रच्छकुशलंततः ॥ १० ॥ वा
युरुवाच ॥ अत्रवःकुशलंविप्राःकच्चिद्वृत्तेमहाक्रतौ ॥ कच्चिद्यज्ञहनोदैत्यानबाधेरन्सुरद्विषः ॥ ११ ॥ प्रायश्चित्तंदु
रिष्टंवानकच्चित्समजायत ॥ स्तोत्रशस्त्रग्रहैर्देवान्पितॄन्पित्र्यैश्चकर्मभिः ॥ १२ ॥ कच्चिदभ्यर्च्ययुष्माभिर्विधिरासी
त्स्वनुष्ठितः ॥ निवृत्तेचमहासत्रेपश्चात्किंवश्चिकीर्षितम् ॥ १३ ॥ इत्युक्त्वामुनयःसर्वेवायुनाशिवभाविना ॥ प्रहृष्ट
मनसःपूताःप्रत्यूचुर्विनयान्विताः ॥ १४ ॥ ॥ ॥

तसूर्यकिरणादिभिः ॥ मेघैःहेतुभिःबिभर्तिपोषयति ॥ ६ ॥ आकाशयोनिरिति ॥ आकाशाद्वायुरितिश्रुतेः ॥ द्विगुणःगुणद्वययुक्तः ॥ तत्रहेतुमाह ॥ स्पर्शशब्देति ॥ आकाशगुणस्यशब्दस्यानुवर्तनादितिभावः ॥ तेजसामग्न्यादीनां ॥ प्रकृतिःकारणं ॥ वायोरग्निरितिश्रुतेः ॥ यंवायुं ॥ ७ ॥ ८ ॥ अंबरसंभवंवायुं ॥ चामीकरमयंसुवर्णमयंविष्टरंआसनं ॥ ९ ॥ सोपिवायुरपि ॥ १० ॥ वृत्तेजाते ॥ ११ ॥ दुरिष्टमनिष्टं ॥ १२ ॥ १३ ॥ शिवभाविनाकल्याणवादिना ॥ १४ ॥



Indira Gandhi National Centre for the Arts

॥१५॥ तमसेति॥अविद्यायुक्तैरित्यर्थः॥ विज्ञानार्थंब्रह्मापरोक्षज्ञानार्थं ॥१६॥ ब्रह्मणायत्पूर्वमुक्तंतदन्ववदन्नित्याह ॥ सर्वस्मादिति॥ १७ ॥ अप्रतर्क्येति ॥
अप्रतर्क्यमचिंत्यंयाथार्थ्यंयथावत्तत्त्वंयस्यतं ॥ १८ ॥ मंत्रयोगतःमंत्रसामर्थ्येन ॥ १९ ॥ तत्प्रसादेनरुद्रप्रसादेन॥२०॥२१॥२२॥२३॥ तेषांमुनीनां ॥ शार्वं
शिवसंबंधि॥समासात्संक्षेपात् ॥ विभुःवायुः ॥२४॥ इतिश्रीशैवमहापुराणवायवीयसंहिताटीकायांसारबोधिन्यांपूर्वभागेतृतीयोध्यायः॥ ३ ॥ श्रीसांबसदाशि

मुनयऊचुः ॥ अद्यनःकुशलंसर्वमद्यसाधुभवेत्तपः ॥ अस्मच्छ्रेयोविवृद्ध्यर्थंभवानत्रागतोयतः ॥ १५ ॥ शृणुचेदंपु
रावृत्तंतमसाक्रांतमानसैः ॥ उपासितःपुराऽस्माभिर्विज्ञानार्थंप्रजापतिः ॥ १६ ॥ सोप्यस्माननुगृह्याहशरण्यःशर
णागतान् ॥ सर्वस्मादधिकोविप्रारुद्रःपरमकारणम् ॥ १७ ॥ तमप्रतर्क्यंयाथार्थ्यंभक्तिमानेवपश्यति ॥ भक्तिश्चा
स्यप्रसादेनप्रसादादेवनिर्वृतिः ॥ १८ ॥ तस्मादस्यप्रसादार्थंनैमिषेमंत्रयोगतः ॥ यजध्वंदीर्घसत्रेणरुद्रंपरमकार
णम् ॥ १९ ॥ तत्प्रसादेनसत्रांतेवायुस्तत्रागमिष्यति ॥ तन्मुखाज्ज्ञानलाभोवस्तत्रश्रेयोभविष्यति ॥२०॥ इत्या
दिश्यवयंसर्वेप्रेषिताःपरमेष्ठिना ॥ अस्मिन्देशेमहाभागत्वदागमनकांक्षिणः ॥ २१ ॥ दीर्घसत्रंसमासीनादिव्य
वर्षसहस्रकम् ॥ अतस्तवागमादन्यत्प्रार्थ्यंनोनास्तिकिंचन ॥ २२ ॥ इत्याकर्ण्यपुरावृत्तमृषीणांदीर्घसत्रिणाम् ॥
वायुःप्रीतमनाभूत्वातत्रास्तेमुनिसंवृतः ॥ २३ ॥ ततस्तैर्मुनिभिःपृष्टस्तेषांभावविवृद्धये ॥ सर्गादिशार्वमैश्वर्यंसमा
सादवदद्विभुः ॥ २४ ॥ इतिश्रीशिवमहापुराणेवायवीयसंहितायांपूर्वभागेतृतीयोऽध्यायः ॥ ३ ॥ ॥ सूतउवाच ॥
तत्रपूर्वंमहाभागानैमिषारण्यवासिनः ॥ प्रणिपत्ययथान्यायंपप्रच्छुःपवनंप्रभुम् ॥ १ ॥ नैमिषीयाऊचुः ॥ भवान्
कथमनुप्राप्तोज्ञानमीश्वरगोचरम् ॥ कथंचशिष्यभावस्तेब्रह्मणोऽव्यक्तजन्मनः ॥२॥ वायुरुवाच ॥ एकोनविंशतिः
कल्पोविज्ञेयःश्वेतलोहितः ॥ तस्मिन्कल्पेचतुर्वक्त्रःस्रष्टुकामोऽतपत्तपः ॥ ३ ॥ तपसातेनतीव्रेणतुष्टस्तस्यपितास्वयं
॥ दिव्यंकौमारमास्थायरूपंरूपवतांवरः ॥ ४ ॥ ॥ ॥ ॥

वार्पणमस्तु ॥ ओंनमःशिवाय ॥ तत्त्वंपाशुपतंमायास्वरूपंवायुनेरितम् ॥ क्षराक्षरादिभेदेनचतुर्थैतन्निरूप्यते ॥ १ ॥ १ ॥ अव्यक्तजन्मनःप्रकृतिसंभवस्य
॥ २ ॥ एकोनविंशतिःएकोनविंशः ॥ श्वेतलोहितःएतन्नामा ॥ चतुर्वक्त्रः ब्रह्मा ॥ ३ ॥ पिताशिवः ॥ ४ ॥ ॥

तस्मैब्रह्मणे ॥ ५ ॥ ब्रह्मणःवेदस्य ॥ ६ ॥ विश्वकर्माब्रह्मा ॥ ७ ॥ अमृतंतत्त्वज्ञानम् ॥ तद्वदनात्ब्रह्ममुखात् ॥ ८ ॥ यत्रज्ञाने ॥ ९ ॥ पशुपाशेति ॥ पशवोजीवाः ॥ पाशोमाया ॥ पतिःशिवःतेषांज्ञानमित्यर्थः ॥ १० ॥ अज्ञानप्रभवं ॥ अविद्यामूलकं ॥ ज्ञानेनपूर्वोक्तेन ॥ सामान्यतोज्ञानस्यलक्षणमाह ॥ वरित्वति ॥ वस्तूनांपदार्थानांपरिच्छेदः तदाकारावृत्तिर्ज्ञानमित्यर्थः ॥ ११ ॥ वस्तुत्रैविध्यमाह ॥ अजडमिति ॥ अजडंजीवरूपं ॥ जडंप्रकृतिः ॥ नियं

श्वेतोनाममुनिर्भूत्वादिव्यांवाचमुदीरयन् ॥ दर्शनंप्रददौतस्मैदेवदेवोमहेश्वरः ॥ ५ ॥ तंदृष्ट्वापितरंब्रह्माब्रह्मणोऽधिपतिंपतिम् ॥ प्रणम्यपरमंज्ञानंगायत्र्यासहलब्धवान् ॥ ६ ॥ ततःसलब्धविज्ञानोविश्वकर्माचतुर्मुखः ॥ असृजत्सर्वंभूतानिस्थावराणिचराणिच ॥ ७ ॥ यच्छ्रुत्वाह्यमृतंलब्धंब्रह्मणापरमेश्वरात् ॥ ततस्तद्वदनादेवमयालब्धंतपोबलात् ॥ ८ ॥ मुनयऊचुः ॥ किंतज्ज्ञानंत्वयालब्धंतथ्यात्तथ्यतरंशुभम् ॥ यत्रकृत्वापरांनिष्ठांपुरुषःसुखमृच्छति ॥ ९ ॥ वायुरुवाच ॥ पशुपाशपतिज्ञानंयल्लब्धंतुमयापुरा ॥ तत्रनिष्ठापराकार्यापुरुषेणसुखार्थिना ॥ १० ॥ अज्ञानप्रभवंदुःखंज्ञानेनैवनिवर्तते ॥ ज्ञानंवस्तुपरिच्छेदोवस्तुचत्रिविधंस्मृतम् ॥ ११ ॥ अजडंचजडंचैवनियंतृचतयोरपि ॥ पशुःपाशःपतिश्चेतिकथ्यतेतत्रयंक्रमात् ॥ १२ ॥ अक्षरंचक्षरंचैवक्षराक्षरपरंतथा ॥ तदेतत्रितयंभूयःकथ्यतेतत्त्ववेदिभिः ॥ १३ ॥ अक्षरंपशुरित्युक्तःक्षरंपाशउदाहृतः ॥ क्षराक्षरपरंयत्तत्पतिरित्यभिधीयते ॥ १४ ॥ मुनयऊचुः ॥ किंतदक्षरमित्युक्तंकिंचक्षरमुदाहृतम् ॥ तयोश्चपरमंकिंवातदेतद्ब्रूहिमारुत ॥ १५ ॥ वायुरुवाच ॥ प्रकृतिःक्षरमित्युक्तंपुरुषोऽक्षरउच्यते ॥ ताविमौप्रेरयत्यन्यःसपरःपरमेश्वरः ॥ १६ ॥ मुनयऊचुः ॥ कैषाप्रकृतिरित्युक्ताकएषपुरुषोमतः ॥ अनयोःकेनसंबंधःकोयंप्रेरकईश्वरः ॥ १७ ॥ ॥ ॥ ॥

तृतदुपाहितंब्रह्मचैतन्यम् ॥ तयोर्जडाजडयोः ॥ तदेवक्रमेणोदाहरति ॥ पशुरिति ॥ १२ ॥ क्षराक्षरपरम् ॥ जडाजडविलक्षणम् ॥ १३ ॥ अक्षरमिति ॥ जीवस्यब्रह्मरूपत्वेननित्यत्वात्क्षरणाभावादितिभावः ॥ क्षरमिति ॥ ब्रह्मज्ञानेनक्षरणादितिभावः ॥ पतिरिति ॥ द्वयोर्नियंतृत्वादितिभावः ॥ १४ ॥ तयोःक्षराक्षरयोः ॥ १५ ॥ क्षरादिस्वरूपमाह ॥ प्रकृतिरिति ॥ प्रकृतिर्मायापुरुषोजीवः ॥ द्वाविमौपुरुषौलोकेक्षरश्चाक्षरएवच ॥ क्षरःसर्वाणिभूतानिकूटस्थोक्षरउच्यतइतिभगवद्गीतायां ॥ १६ ॥ विशेषजिज्ञासयामायादिस्वरूपंपुनःपृच्छंति ॥ कैषेति ॥ १७ ॥ ॥



Indira Gandhi National Centre for the Arts

मलंज्ञानावरकंतमः ॥ १८ ॥ अस्यपुरुषस्य ॥ १९ ॥ माहेश्वरीति ॥ मायांतुप्रकृतिंविद्यान्मायिनंतुमहेश्वरमितिश्रुतेः ॥ चिद्रूपःज्ञानात्मकः ॥ ननुचिद्रूपस्यकथंमाययावरणंतत्राह ॥ मलइति ॥ मलःतमोगुणः ॥ नैजःस्वीयत्वेनकल्पितः ॥ विशुद्धिःवस्तुतस्तद्राहित्यं ॥ २० ॥ व्यापिनंपरमेश्वरं ॥ मायायाः आवरणनिवारणयोःफलंचकारणंपृच्छंति ॥ किमर्थमिति ॥ आवृतिरावरणं ॥ पुंसःजीवस्य ॥ २१ ॥ व्यापिनःईश्वरस्य ॥ कलादीति ॥ आदिशब्देनवक्ष्यमाणविद्यादयोग्राह्याः ॥ आवृतेःकारणमाह ॥ कर्मेति ॥ निवृत्तेःकारणमाह ॥ मलेति ॥ २२ ॥ कलादितत्त्वानिपृच्छंति ॥ किंतदिति ॥ २३ ॥ २४ ॥

वायुरुवाच ॥ मायाप्रकृतिरुद्दिष्टापुरुषोमाययावृतः॥संबंधोमलकर्मभ्यांशिवःप्रेरकईश्वरः॥१८॥मुनयऊचुः॥केयंमायासमाख्याताकिंरूपोमाययावृतः॥मलंकीदृक्कुतोवाऽस्यकिंशिवत्वंकुतःशिवः ॥१९॥ वायुरुवाच ॥ मायामाहेश्वरीशक्तिश्चिद्रूपोमाययावृतः ॥ मलश्चिच्छादकोनैजोविशुद्धिःशिवतास्वतः ॥ २० ॥ मुनयऊचुः ॥ आवृणोतिकथंमायाव्यापिनंकेनहेतुना ॥ किमर्थंवावृतिःपुंसःकेनवाविनिवर्तते ॥ २१ ॥ वायुरुवाच ॥ आवृतिर्व्यापिनोपिस्याद्व्यापियस्मात्कलाद्यपि ॥ हेतुःकर्मैवभोगार्थंनिवर्तेतमलक्षयात् ॥ २२ ॥ मुनयऊचुः ॥ कलादिकथ्यतेकिंतत्कर्मवाकिमुदाहृतम् ॥ तत्किमादिकिमंतंवाकिंफलंवाकिमाश्रयं ॥ २३ ॥ कस्मैभोगश्चकिंभोग्यंकिंवातद्भोगसाधनम् ॥ मलक्षयस्यकोहेतुःकीदृक्क्षीणमलःपुमान् ॥ २४ ॥ वायुरुवाच ॥ कलाविद्याचरागश्चकालोनियतिरेवच ॥ कलादयःसमाख्यातायोभोक्तापुरुषोभवेत् ॥ २५ ॥ पुण्यपापात्मकंकर्मसुखदुःखफलंतुयत् ॥ अनादिमलभोगांतमज्ञानात्मसमाश्रयम् ॥ २६ ॥ भोगःकर्मविनाशायभोग्यमव्यक्तमुच्यते ॥ बाह्यांतःकरणद्वारंशरीरंभोगसाधनम् ॥ २७ ॥

कलेति ॥ आसांस्वरूपंकार्यंचवक्ष्यते ॥ रागःरजोगुणसंभवोविषयाभिलाषः ॥ नियतिर्दैवशक्तिः ॥ भोक्तेति ॥ कर्मफलस्येतिशेषः ॥ २५ ॥ तदेवकर्माह ॥ पुण्येति ॥ अनादिमलमविद्यातत्कृतभोगांतं ॥ अज्ञानेति ॥ अज्ञानात्मानोजीवास्तन्निष्ठमित्यर्थः ॥ २६ ॥ अव्यक्तंप्रकृतिः ॥ बाह्येति ॥ बाह्यानिचक्षुरादीनि अंतःकरणंमनः तानिद्वाराणि ज्ञानसाधनानियस्यतदित्यर्थः ॥ भोगःसुखदुःखान्यतरसाक्षात्कारः ॥ २७ ॥ ॥

Indira Gandhi National Centre for the Arts

भावोभावनाशिवतत्वचिंतनं ॥ प्रसादेनशिवस्येतिशेषः ॥ मलक्षयःअविद्यानाशः ॥ २८ ॥ कलादीति ॥ कलादीनांपंचानांतत्वानांपृथक्यत्कर्मोच्यतेतत्किं किमात्मकंभोक्तेतिप्रसिद्धःपुरुषश्चपृथगुच्यतेसकिमात्मकइत्यर्थः ॥ येनकर्मफलभोगयोगेनात्मेतिव्यपदिश्यतेव्यवह्रियते ॥ २९ ॥ भुज्यतइति ॥ पुरुषेणेतिशेषः ॥ तस्यपुरुषस्य ॥ ३० ॥ दृगिति ॥ पुरुषस्यदृशोज्ञानस्यव्यंजिकेशशक्तिर्विद्या ॥ क्रियायाव्यंजिकाकलेतिविवेकः कालोवच्छेदकःसर्ववस्तुपरिच्छेदकः ॥ ३१ ॥ त्रिगुणप्रभवाप्ययंसत्वरजस्तमोगुणानांप्रभवाप्ययौउत्पत्तिनाशौयस्मिंस्तत् ॥ ३२ ॥ कलातइति ॥ क्रियाव्यंजकप्रभुश

भावातिशयलभ्येनप्रसादेनमलक्षयः ॥ क्षीणेचात्ममलेतस्मिन्पुमान्शिवसमोभवेत् ॥ २८ ॥ मुनयऊचुः ॥ कलादिपंचतत्वानांकिंकर्मपृथगुच्यते ॥ भोक्तेतिपुरुषश्चेतियेनात्माव्यपदिश्यते ॥२९॥ किमात्मकंतदव्यक्तंकेनाकारेण भुज्यते ॥ किंतस्यशरणंभुक्तौशरीरंचकिमुच्यते ॥ ३० ॥ वायुरुवाच ॥ दृक्क्रियाव्यंजिकेविद्याकलेरागःप्रवर्तकः ॥ कालोवच्छेदकस्तत्रनियतिस्तुनियामिका ॥ ३१ ॥ अव्यक्तंकारणंयत्तत्त्रिगुणप्रभवाप्ययम्॥ प्रधानंप्रकृतिश्चेतियदाहुस्तत्वचिंतकाः ॥ ३२ ॥ कलातस्तदभिव्यक्तमनभिव्यक्तलक्षणम् ॥ सुखदुःखविमोहात्माभुज्यतेगुणवांस्त्रिधा ॥ ३३ ॥ सत्वंरजस्तमइतिगुणाःप्रकृतिसंभवाः ॥ प्रकृतौसूक्ष्मरूपेणतिलेतैलमिवस्थिताः ॥ ३४ ॥ सुखंचसुखहेतुश्चसमासात्सात्विकंस्मृतम् ॥ राजसंतद्विपर्यासःस्तंभमोहौतुतामसौ ॥३५ ॥ सात्विक्यूर्ध्वगतिःप्रोक्तातामसीस्यादधोगतिः ॥ मध्यमातुगतिर्यासाराजसीपरिपठ्यते ॥ ३६ ॥ तन्मात्रापंचकंचैवभूतपंचकमेवच ॥ ज्ञानेंद्रियाणिपंचैवपंचकर्मेंद्रियाणिच ॥ ३७॥ प्रधानबुध्यहंकारमनांसिचचतुष्टयम् ॥ समासादेवमव्यक्तंसविकारमुदाहृतम् ॥३८॥ तत्कारणदशापन्नमव्यक्तमितिकथ्यते ॥ व्यक्तंकार्यदशापन्नंशरीरादिघटादिवत् ॥ ३९ ॥

क्तेरित्यर्थः ॥ तदिति ॥ तदव्यक्तंसृष्टेःपूर्वंअनभिव्यक्तस्वरूपमपिसृष्टिदशायांव्यक्तरूपमित्यर्थः ॥ भुज्यतइति ॥ उपभुंक्तइत्यर्थः ॥ यथार्थः॥ गुणवान्पुरुषः ॥ ३३ ॥ गुणानामनभिव्यक्तस्वरूपेणास्थितिमाह ॥ प्रकृताविति ॥ ३४ ॥ सत्त्वगुणपरिणाममाह ॥ सुखमिति ॥ समासात्संक्षेपात् ॥ तद्विपर्यासोदुःखंदुःखहेतुश्च ॥ स्तंभःप्रवृत्तिनिवृत्तिशून्यता ॥ ३५ ॥ ३६ ॥ तदिति ॥ शब्दादिसूक्ष्मतन्मात्रापंचकमित्यर्थः ॥ भूतपंचकमाकाशादिपंचभूतानि ॥ ज्ञानेंद्रियाणिचक्षुरादीनि ॥ कर्मेंद्रियाणिवागादीनि ॥ ३७ ॥ बुद्धिर्महत्तत्वं ॥ ३८ ॥ कारणदशासृष्ट्यारंभप्राक्काळः ॥ कार्यदशासृष्टिदशा ॥ ३९ ॥



Indira Gandhi National Centre for the Arts

कार्यकारणयोरभेदंसदृष्टांतमाह ॥ यथेति ॥ अतिभिद्यतइति ॥ अनेनव्यवहारदशायांभेदभ्रमेपिपरमार्थदशायांभेदोनास्तीतिसूचितम् ॥ ४० ॥ करणानि कलादीनि ॥ तदाधारमव्यक्ताधारं ॥ तद्भोग्यंपुरुषभोग्यं ॥ नेतरदिति ॥ इतरत्पुरुषादिकंनभोग्यं ॥ किंतुअव्यक्ततत्कार्यमेवेत्यर्थः ॥ ४१ ॥ पुरुषस्तुज डाद्भिन्नःकुतोज्ञातइत्याहुः॥बुद्धीति॥कुतइति बुध्यादेर्व्यतिरिक्तत्वेनज्ञातत्वेपिवस्तुतोयाथार्थ्येनस्थितिःस्वरूपंकस्माद्धेतोर्ज्ञायतइत्यर्थः ॥ ४२ ॥ सुदुर्गमइ ति ॥ अनेकजन्मपरंपरायासगम्यइत्यर्थः ॥ ४३ ॥ बुध्यादिभिन्नत्वेहेतूनाह ॥ स्मृतेरिति ॥ तत्रबुद्धिभिन्नत्वेहेतुःस्मृतेरिति ॥ स्मर्तृत्वादित्यर्थः ॥ नहिबुद्धेःस्मृ त्याश्रयत्वरूपंस्मर्तृत्वंसंभवति ॥ स्मृतेर्बुद्धिपरिणामित्वेनबुध्यभेदात् आश्रयाश्रयिभावस्यभेदनिबंधनत्वात् ॥ इंद्रियभिन्नत्वेहेतुरनियतज्ञानादिति ॥ इं

यथाघटादिकंकार्यंमृदादेर्नातिभिद्यते ॥ शरीरादितथाव्यक्तमव्यक्तान्नातिभिद्यते ॥ ४० ॥ तस्मादव्यक्तमेवैकंका रणंकरणानिच ॥ शरीरंचतदाधारंतद्भोग्यंचापिनेतरत् ॥ ४१ ॥ ऋषयऊचुः ॥ बुद्धींद्रियशरीरेभ्योव्यतिरिक्तस्यक स्यचित् ॥ आत्मशब्दाभिधेयस्यवस्तुतोपिकुतःस्थितिः ॥ ४२ ॥ वायुरुवाच ॥ बुद्धींद्रियशरीरेभ्योव्यतिरिक्तोविभु र्ध्रुवः ॥ अस्त्येवकश्चिदात्मेतिहेतुस्तत्रसुदुर्गमः ॥ ४३ ॥ बुद्धींद्रियशरीराणांनात्मतासद्भिरिष्यते ॥ स्मृतेरनियत ज्ञानादयावद्देहवेदनात् ॥ ४४ ॥ अतःस्मर्ताऽनुभूतानामशेषज्ञेयगोचरः ॥ अंतर्यामीतिवेदेषुवेदांतेषुचगीयते ॥ ॥४५॥सर्वंतत्रससर्वत्रव्याप्यतिष्ठतिशाश्वतः॥तथापिक्वापिकेनापिव्यक्तमेषनदृश्यते॥४६॥ नैवाऽयंचक्षुषाग्राह्योना परैरिंद्रियैरपि॥मनसैवप्रदीप्तेनमहानात्माऽवसीयते॥४७॥नचस्त्रीनपुमानेषनैवचापिनपुंसकः ॥ नैवोर्ध्वंनापितिर्य क्नाधस्तान्नकुतश्चन ॥४८॥ अशरीरंशरीरेषुचलेषुस्थाणुमव्ययम्॥सदापश्यतितंधीरोनरःप्रत्यवमर्शनात् ॥४९॥

द्रियैर्हिनियतविषयंज्ञानंजन्यतेयथाचक्षुषारूपादिकमेवगृह्यतेनस्पर्शादिकंआत्मनातुप्रत्यक्षयोग्यंसर्वंगृह्यतेअथवानियतंसंनिकृष्टमेवेंद्रियेणगृह्यतेनासंनिकृष्ट मिति ॥शरीरआत्मस्वरूपत्वाभावेहेतुरयावद्देहवेदनादिति॥ शरीरस्यहियावत्स्थितिस्तावदेववेदनंज्ञानंसंभवति॥आत्मनस्त्वंतर्यामितयातदत्ययेपिशरीरांतरे णज्ञानंअन्यथादेहांतरेकृतस्यकर्मणोदेहांतरेभोगानुपपत्तिःकर्मतत्फलयोःसामानाधिकरण्यनियमात् ॥ ४४ ॥ तस्मात्बुध्यादिभिन्नःकर्मफलानांभोक्तात्मा सिद्धइतिक्रमेणो[?]गमयति॥अतइति ॥ गीयतइति ॥ अंतर्बहिश्चतत्सर्वमित्यादिश्रुतेरितिभावः ॥ ४५ ॥ तदेवप्रपंचयति ॥ सर्वमिति ॥ ४६ ॥ ईश्वरस्यप्रत्य क्षागोचरत्वमाह ॥ नैवेति ॥ प्रदीप्तेनयोगाभ्यासादिनाशोधितेन ॥ अवसीयतेज्ञायते ॥ ४७ ॥ ४८ ॥ शरीरादितस्तस्यभेदंदर्शयति ॥ अशरीरमिति ॥ प्रत्यवमर्शनात् ॥ श्रवणाद्यभ्यासात् ॥ ४९ ॥ ॥ ॥ ॥ ॥

देहादभेददर्शनंनसम्यगित्याह ॥ किमत्रेति ॥ दर्शनंज्ञानं ॥ ५० ॥ शरीरंनिंदति ॥ अवशामिति ॥ अवशंअनिगृहीतेंद्रियंअध्रुवमनित्यमतोनविद्यतेपरमार्थदृशानतदस्तीत्यर्थः ॥ ५१ ॥ तेनशरीरेण ॥ सत्वादिगुणयोगप्रयुक्तकर्मणांक्रमेणफलान्याह ॥ सुखीति ॥ ५२ ॥ ५३ ॥ देहस्यविशेषणत्रयमाह अत्यंतमिति ॥ अतिशायितोंतोनाशोयस्यतम् ॥ अस्यपुरुषस्यतनवःसंतितिशेषः ॥ ५४ ॥ शरीरिणःपुरुषाः ॥ तिष्ठंतीतिशेषः ॥ अत्यंतवसतिः॥ अंतंनाशम

किमत्रबहुनोक्तेनपुरुषोदेहतःपृथक् ॥ अपृथग्येतुपश्यंतिअसम्यक्तेषुदर्शनम् ॥ ५० ॥ यच्छशरीरमिदंप्रोक्तंपुरुषस्यततःपरम्॥अशुद्धमवशंदुःखमध्रुवंचनविद्यते ॥५१॥ विपदांबीजभूतेनपुरुषस्तेनसंयुतः॥सुखीदुःखीचमूढश्च भवतिस्वेनकर्मणा ॥ ५२ ॥ अद्भिराप्लावितंक्षेत्रंजनयत्यंकुरंयथा ॥ अज्ञानप्लावितंकर्मदेहंजनयतेतथा ॥ ५३ ॥ अत्यंतमसुखावासंरुग्णंचैकांतमृत्यवः॥अनागताअतीताश्चतनवोऽस्यसहस्रशः ॥५४॥ आगत्यागत्यशीर्णेषुशरीरेषु शरीरिणः ॥ अत्यंतवसतिःक्वापिनकेनापिचलभ्यते ॥५५॥ छादितश्चवियुक्तश्चशरीरैरेषलक्ष्यते ॥ चंद्रबिंबवदाकाशेतरलैरभ्रसंचयैः ॥ ५६ ॥ अनेकदेहभेदेनभिन्नावृत्तिरिहात्मनः ॥ अष्टापदपरिक्षेपेह्यक्षमुद्रेवलक्ष्यते ॥ ५७ ॥ नैवाऽस्यभविताकश्चिन्नाऽसौभवतिकस्यचित् ॥ पथिसंगमएवायंदारैरन्यैश्चबंधुभिः ॥ ५८ ॥ यथाकाष्ठंचकाष्ठंचसमेयातांमहोदधौ ॥ समेत्यचव्यपेयातांतद्वद्भूतसमागमः ॥५९॥ सपश्यतिशरीरंतच्छरीरंतंनपश्यति ॥ तौपश्यति परःकश्चित्तावुभौतंनपश्यतः ॥ ६० ॥ ब्रह्माद्याःस्थावरांताश्चपशवःपरिकीर्तिताः ॥ पशूनामेवसर्वेषांप्रोक्तमेतन्निदर्शनम् ॥ ६१ ॥ यएषबध्यतेपाशैःसुखदुःखाशनःपशुः ॥ लीलासाधनभूतोऽयमीश्वरस्येतिसूरयः ॥ ६२ ॥ अज्ञोजंतुरनीशोऽयमात्मनःसुखदुःखयोः ॥ ईश्वरप्रेरितोगच्छेत्स्वर्गंवाश्वभ्रमेववा ॥ ६३ ॥ ॥ ॥

तिक्रांतावसतिःस्थितिर्यस्यसःनित्यइत्यर्थः ॥ ५५ ॥ एषःजीवपुरुषः ॥ ५६ ॥ अष्टापदपरीक्षेपेशारिफलद्यूतक्रीडायांअक्षमुद्रापाशचिन्हं ॥ ५७ ॥ अस्यपुरुषस्य ॥ भवितास्वीयत्वेनभवन् ॥ कस्यचिदिति ॥ कस्यापिसंबंधीनभवतीत्यर्थः ॥ ५८ ॥ भूतसमागमःप्राणिसंयोगः ॥ ५९ ॥ जडाजडयोःस्वरूपंविविनक्ति ॥ सइति ॥ सपुरुषःशरीरंपश्यति जानाति अजडत्वादितिभावः ॥ तंपुरुषं ॥ नेति ॥ जडत्वादितिभावः ॥ तौशरीरजीवपुरुषौ ॥ परःईश्वरः ॥ ६० ॥ ॥ ६१ ॥ पाशैःप्रकृतिसंभवैः ॥ किमितिबध्यतइत्यतआह ॥ लीलेति ॥ लीलाविलासः ॥ ६२ ॥ श्वभ्रंनरकं ॥ ६३ ॥ ॥



Indira Gandhi National Centre for the Arts

॥ ६४ ॥ अपर्यंतेति ॥ अपर्यंताःअनंतायेरमणीयगुणाऐश्वर्याणितेषामाश्रयः ॥ पशुपाशेति ॥ जीवबंधनिवर्तकइत्यर्थः ॥ ६५ ॥ अज्ञानादिति ॥ असर्वज्ञ त्वादित्यर्थः ॥ नहिसर्वज्ञंविनाजगत्स्रष्टासंभवति ॥ ६६ ॥ सांख्यादिमतंखंडयति ॥ प्रधानेति ॥ बुद्धिमत्कारणंविना ॥ चैतन्यसंबंधरूपबीजंविना॥६७॥ ईश्वरस्यैवजगत्कर्तृत्वमनुमानेनसाधयति ॥ जगादिति ॥ अत्रायंप्रयोगः ॥ जगत्सकर्तृकंसावयवकार्यत्वात्घटवदिति ॥ कर्तृत्वमिति ॥ जगद्रूपकार्य कर्तृत्वमीश्वरस्यैवेत्यर्थः ॥ ६८ ॥ ननुजीवस्यापिकर्तृत्वंदृश्यतइत्यतआह ॥ पशोरिति ॥ पशोरपिजीवस्यापि ॥ अयथाकरणज्ञानमिति ॥ अयथाव

मुनयऊचुः॥योयंपशुरितिप्रोक्तोयश्चपाशउदाहृतः॥आभ्यांविलक्षणःकश्चित्कोयमस्त्यनयोःपतिः॥६४॥वायुरुवाच
अस्तिकश्चिदपर्यंतरमणीयगुणाश्रयः॥पतिर्विश्वस्यनिर्मातापशुपाशविमोक्षणः॥६५॥अभावेतस्यविश्वस्यसृष्टिरेषा
कथंभवेत् ॥ अचेतनत्वादज्ञानादनयोःपशुपाशयोः ॥ ६६ ॥ प्रधानपरमाण्वादियावत्किंचिदचेतनम् ॥ नतत्कर्तृ
स्वयंदृष्टंबुद्धिमत्कारणंविना ॥ ६७ ॥ जगच्चकर्तृसापेक्षंकार्यंसावयवंयतः ॥ तस्मात्कार्यस्यकर्तृत्वंपत्युर्नपशुपाश
योः॥ ६८ ॥ पशोरपिचकर्तृत्वंपत्युःप्रेरणपूर्वकम् ॥ अयथाकरणज्ञानमंधस्यगमनंयथा ॥ ६९ ॥ आत्मानंचपृथङ्म
त्वाप्रेरितारंततःपृथक् ॥ असौजुष्टस्ततस्तेनह्यमृतत्वायकल्पते ॥ ७० ॥ पशोःपाशस्यपत्युश्चतत्त्वतोऽस्तियदंतरम्
॥ ब्रह्मवित्तद्विदित्वैवयोनिमुक्तोभविष्यति ॥ ७१ ॥ संयुक्तमेतद्द्वितयंक्षरमक्षरमेवच ॥ व्यक्ताव्यक्तंबिभर्तीशोविश्वं
विश्वविमोचकः॥ ७२ ॥भोक्ताभोग्यंप्रेरयितामंतव्यंत्रिविधंस्मृतम् ॥ नातःपरंविजानद्भिर्वेदितव्यंहिकिंचन॥७३॥
तिलेषुवायथातैलंदध्निवासर्पिरर्पितं ॥ यथाऽऽपःस्त्रोतसिव्याप्तायथारण्यांहुताशनः ॥ ७४ ॥ एवमेवमहात्मानमा
त्मन्यात्मविलक्षणम् ॥ सत्येनतपसाचैवनित्ययुक्तोऽनुपश्यति ॥ ७५ ॥ यएकोजालवानीशईशनीभिःस्वशक्तिभिः
॥ सर्वाल्लोकानिमान्कृत्वाएकएवसईशते ॥ ७६ ॥ ॥ ॥ ॥

त्अयथार्थअर्थमतिक्रम्यापिवर्तमानमिंद्रियादिकरणंयस्यतादृशंज्ञानंभ्रमात्मकंयस्यतादृशंकर्तृत्वंजीवस्येत्यर्थः ॥ तत्रदृष्टांतमाह ॥ अंधस्येति ॥ ६९ ॥ पृथगिति ॥ शरीरादेरितिशेषः ॥ प्रेरितारंईश्वरं ॥ पृथगिति ॥ मत्वेतिसंबध्यते ॥ अनेनोपासनादशायांब्रह्मजीवयोर्भेदोंगीकर्तव्यइतिसूचितं ॥ ततःजीवात्मनः ॥ असौआत्माजुष्टःअनुगृहीतःतेनईश्वरेण ॥ ७० ॥ तत्वतःवस्तुतः ॥ तदंतरं ॥ ७१ ॥ ७२ ॥ ७३ ॥ ॥ ७४ ॥ आत्मनिस्वास्मिन् ॥ ७५ ॥ जालवान्इं द्रजालसदृशमायायुक्तः ॥ ईशनीभिःनियंत्रीभिः ॥ ईशतइति ॥ बहुवचनमार्षं छांदसःशब्लुगभावोवा ॥ ७६ ॥ ॥

एकएवेति ॥ एकएवरुद्रोनद्वितीयायतस्थइतिश्रुतेः ॥ संचुकोचसंजहार ॥ ७७ ॥ विश्वतइति ॥ विश्वतश्चक्षुरुतविश्वतोमुखइतिश्रुतेर्विराट्स्वरूपइत्यर्थः ॥ ७८ ॥ ७९ ॥ हिरण्यगर्भंब्रह्माणंयोब्रह्माणंविदधातिपूर्वमितिश्रुतेः ॥ विश्वस्मादिति ॥ योदेवानांप्रथमंपुरस्ताद्विश्वाधियोरुद्रोमहर्षिरितिश्रुतेरित्यर्थः ॥ ॥ ८० ॥ आदित्यवर्णसूर्यवत्प्रकाशमानंतमसोमायायाः ॥ ८१ ॥ अस्मादिति ॥ यस्मात्परंनापरमस्तिकिंचिदितिश्रुतेः ॥ ८२ ॥ ८३ ॥ विराड्रूपंवर्णयति ॥ सर्वेति ॥ गुहाबुद्धिः ॥ ८४ ॥ सर्वव्यापित्वंदर्शयति ॥ सर्वतइति ॥ ८५ ॥ एतत्सर्वंनवास्तवमीश्वरस्यस्वरूपमित्याह ॥ सर्वेंद्रियेति ॥८६॥ अचक्षुरिति ॥ अपाणिपादोजवनोग्रहीतापश्यत्यचक्षुःसशृणोत्यकर्णइतिश्रुतेः ॥ ८७ ॥ अणोरिति ॥ अणोरणीयान्महतोमहीयानात्मागुहायांनिहितोस्यजंतोः ॥ तमक्रतुंपश्यातिवीतशोकोधातुःप्रसादान्महिमानमीशमितिश्रुतिः ॥ ८८ ॥ अक्रतुमिति ॥ क्रतुर्यज्ञस्तद्रहितमपिक्रतुप्रचुरमित्यर्थः ॥ ८९ ॥ निरोधमिति॥ जन्मनोऽभावमित्यर्थः ९० ॥ ॥ ॥ ॥ ॥

एकएवतदारुद्रोनद्वितीयोऽस्तिकश्चन ॥ संसृज्यविश्वंभुवनंगोप्तांऽतेसंचुकोचसः ॥ ७७ ॥ विश्वतश्चक्षुरेवाऽयमुताऽयंविश्वतोमुखः ॥ तथैवविश्वतोबाहुर्विश्वतःपादसंयुतः ॥ ७८ ॥ द्यावाभूमीचजनयन्देवएकोमहेश्वरः ॥ सएवसर्वदेवानांप्रभवश्चोद्भवस्तथा ॥ ७९ ॥ हिरण्यगर्भंदेवानांप्रथमंजनयेदयम् ॥ विश्वस्मादधिकोरुद्रोमहर्षिरितिहिश्रुतिः ॥ ८० ॥ वेदाहमेतंपुरुषंमहांतमममृतंध्रुवम् ॥ आदित्यवर्णंतमसःपरस्तात्संस्थितंप्रभुम् ॥ ८१ ॥ अस्मान्नाऽस्तिपरंकिंचिदपरंपरमात्मनः ॥ नाणीयोस्तिनचज्यायस्तेनपूर्णमिदंजगत् ॥ ८२ ॥ सदैकोवृक्षवत्स्तब्धःकेवलोदिवितिष्ठति ॥ संकल्पप्रभवंतस्यचराचरमिदंजगत् ॥ ८३ ॥ सर्वाननशिरोग्रीवःसर्वभूतगुहाशयः ॥ सर्वव्यापीचभगवांस्तस्मात्सर्वगतःशिवः ॥ ८४ ॥ सर्वतःपाणिपादोऽयंसर्वतोऽक्षिशिरोमुखः ॥ सर्वतःश्रुतिमाँल्लोकेसर्वमावृत्यतिष्ठति ॥ ८५ ॥ सर्वेंद्रियगुणाभासःसर्वेंद्रियविवर्जितः ॥ सर्वस्यप्रभुरीशानःसर्वस्यशरणंसुहृत् ॥ ८६ ॥ अचक्षुरपियःपश्यत्यकर्णोपिशृणोतियः ॥ सर्ववेत्तिनवेत्ताऽस्यतमाहुःपुरुषंपरम् ॥ ८७ ॥ अणोरणीयान्महतोमहीयानयमव्ययः ॥ गुहायांनिहितश्चापिजंतोश्चाऽस्यमहेश्वरः ॥ ८८ ॥ तमक्रतुंक्रतुप्रायंमहिमातिशयान्वितम् ॥ धातुःप्रसादादीशानंवीतशोकःप्रपश्यति ॥ ८९ ॥ वेदाहमेनमजरंपुराणंसर्वगंप्रभुं ॥ निरोधंजन्मनोयस्यवदंतिब्रह्मवादिनः ९०



Indira Gandhi National Centre for the Arts

विचेतीति ॥ आर्परूपंविचिनोति संहरतीत्यर्थः ॥ ९१ ॥ प्रकृतिस्वरूपमाह ॥ विश्वेति ॥ तस्याअनादित्वमाह ॥ अजेति ॥ नजायतइत्यजाअनादिसिद्धा ॥ लोहितांरजोगुणात्मिकांशुक्लांसत्वात्मिकांकृष्णांतमोरूपां ॥ श्रुतिरपि ॥ अजामेकांलोहितशुक्लकृष्णांबह्वींप्रजांजनयंतींस्सरूपां ॥ अजोह्येकोजुषमाणोनुशेतेजहात्येनांभुक्तभोगामजोन्यइति ॥ ९२ ॥ ९३ ॥ द्वाविति ॥ द्वौपरमात्मजीवात्मानौ वृक्षंदेहरूपंपिप्पलंकर्मफलंद्वासुपर्णासयुजासखायावि

एकोपित्रीनिमान्लोकान्बहुधाशक्तियोगतः ॥ विदधातिविचेत्यंतेविश्वमादौमहेश्वरः ॥ ९१ ॥ विश्वधात्रीत्वजाख्याचशैवीचित्प्रकृतिःस्मृता ॥ तामजांलोहितांशुक्लांकृष्णामेकांत्वजःप्रजाः॥९२॥ जनित्रीमनुशेतेऽन्योजुषमाणःसरूपिणीम ॥ तामेवाजामजोऽन्यस्तुभुक्तभोगांजहातिच ॥९३॥ द्वौसुपर्णौचसयुजौसमानंवृक्षमास्थितौ ॥ एकोत्तिपिप्पलंस्वादुपरोनश्नन्प्रपश्यति ॥९४॥ वृक्षेऽस्मिन्पुरुषोमग्नोमुह्यमानश्चशोचति ॥ जुष्टमन्यंयदापश्येदीशंपरमकारणं॥ ॥९५॥ तदास्यमहिमानंचवीतशोकःसुखीभवेत् ॥ छंदांसियज्ञाःक्रतवोयद्भूतंभव्यमेवच ॥ ९६ ॥ मायीविश्वंसृजत्यस्मिन्निविष्टोमाययापुरः॥ मायांतुप्रकृतिंविद्यान्मायिनंतुमहेश्वरम् ॥९७॥ तस्यास्त्ववयवैरेवव्याप्तंसर्वमिदंजगत् ॥ सूक्ष्मातिसूक्ष्ममीशानंकललस्यापिमध्यतः ॥ ९८ ॥ स्रष्टारमपिविश्वस्यचेष्टितारंतुतस्यच ॥ शिवमेवेश्वरंज्ञात्वाशांतिमत्यंतमृच्छति ॥९९॥ सएवकालोगोप्ताचविश्वस्याधिपतिःप्रभुः ॥ तंविश्वाधिपतिंज्ञात्वामृत्युपाशात्प्रमुच्यते १००॥ घृतात्परंमंडमिवसूक्ष्मंज्ञात्वाधिपंशिवम ॥ सर्वभूतेषुगूढंचसर्वपापैःप्रमुच्यते ॥ १०१॥ एषएवपरोदेवोविश्वकर्मामहेश्वरः ॥ हृदयेसंनिविष्टंतंज्ञात्वैवाऽमृतमश्नुते ॥१०२॥ यदासमस्तंनदिवानरात्रिर्नसदप्यसत् ॥ केवलःशिवएवैकोयतःप्रज्ञापुरातनी ॥१०३॥ नैनमूर्ध्वंनतिर्यंचंनमध्येपरिजगृहत् ॥ नतस्यप्रतिमाचास्तियस्यनाममहद्यशः॥१०४॥

त्यादिश्रुतेः॥ ९४ ॥ वृक्षेप्रकृतिसंभवेसंसारेजुष्टंप्रसादितं ॥ ९५ ॥ महिमानामिति ॥ पश्येदितिसंबध्यते ॥ ९६ ॥ निविष्टोयुक्तः॥ ९७ ॥ तस्याःमायायाः कललस्यगर्भाशयस्य ॥ ९८ ॥ ९९ ॥ १०० ॥ १०१ ॥ १०२ ॥ प्रलयकालिकंशिवस्वरूपमाह॥ यदेतिसदसज्जगत् ॥ यतइति ॥ तस्यज्ञानरूपत्वादितिभावः ॥ १०३ ॥ परिजगृहतज्ज्ञातवान् ॥ अतएवाह ॥ नेति ॥ प्रतिमासादृश्यंश्रुतिरपि ॥ नैनमूर्ध्वनतिर्यंचंनमध्येपरिजग्रभत् नतस्येशेकश्चनतस्यनाममहद्यशइति ॥ १०४ ॥ ॥ ॥ ॥ ॥

Indira Gandhi National Centre for the Arts

भीरवोदुःखाद्भीताः प्रपद्यंतइति ॥ रुद्रस्यदक्षिणंमुखंप्राप्नुवंतीत्यर्थः ॥ १०५ ॥ तत्ररक्षोपायोस्तीत्याह॥द्वेइति ॥ यत्रमुखे ॥ १०६ ॥ अमृतमिति ॥ अमृतं मोक्षस्तदुपायज्ञानंवा ॥ १०७ ॥ जालंजगत्प्रपंचं ॥ एकवत्एकब्रह्मांडतुल्यं ॥ १०८ ॥ योनिस्वभावात् जगत्कारणस्वभावात् ॥ १०९ ॥ स्वभावंस्व रूपं ॥ वाचकान्शब्दान् ॥ वाच्यानर्थान् ॥ ११० ॥ १११ ॥ अनीडाख्यमिति ॥ विश्वस्यायंनीडरूपोनत्वस्यनीडमाश्रयइत्यर्थः ॥ यत्रविश्वंभवत्येक

अजातमिममेवैकंबुध्वाजन्मनिभीरवः ॥ रुद्रस्यास्यप्रपद्यंतेरक्षार्थंदक्षिणंमुखम् ॥ १०५॥ द्वेअक्षरेब्रह्मपरेत्वनंतेस मुदाहृते ॥ विद्याविद्येसमाख्यातेनिहितेयत्रगूढवत् ॥ १०६ ॥ क्षरंत्वविद्याह्यमृतंविद्येतिपरिगीयते ॥ तेउभेईशते यस्तुसोऽन्यःखलुमहेश्वरः ॥ १०७ ॥ एकैकंबहुधाजालंविकुर्वन्नेकवच्चयः ॥ सर्वाधिपत्यंकुरुतेसृष्ट्वासर्वान्प्रतापवा न् ॥ १०८ ॥ दिशउर्ध्वमधस्तिर्यग्भासयन्भ्राजतेस्वयम् ॥ योनिस्वभावादप्येकोवरेण्यस्त्वधितिष्ठति ॥ १०९ ॥ स्वभावंवाचकान्सर्वान्वाच्यांश्चपरिणामयन् ॥ गुणांश्चभोग्यभोक्तृत्वेतद्विश्वमधितिष्ठति ॥ ११० ॥ तंवैगुह्योप निषदिगूढंब्रह्मपरात्परम् ॥ ब्रह्मयोनिंजगत्पूर्वंविदुर्देवामहर्षयः॥ १११ ॥ भावग्राह्यमनीडाख्यंभावाभावकरंशि वम् ॥ कलासर्गकरंदेवंयेविदुस्तेजहुस्तनुम् ॥ ११२ ॥ स्वभावमेकेमन्यंतेकालमन्येविमोहिताः ॥ देवस्यमहिमा ह्येषयेनेदंभ्राम्यतेजगत् ॥ ११३ ॥ येनेदमावृतंनित्यंकालकालात्मनायतः ॥ तेनेरितमिदंकर्मभूतैःसहविवर्तते ॥ ॥ ११४ ॥ तत्कर्मभूयशःकृत्वाविनिवर्त्यचभूयशः ॥ तत्वस्यसहसत्वेनयोगंचापिसमेत्यवै ॥ ११५ ॥ अष्टाभिश्चत्रि भिश्चैवद्वाभ्यांचैकेनवापुनः ॥ कालेनात्मगुणैश्चापिकृत्स्नमेवजगत्स्वयम् ॥ ११६ ॥ गुणैरारभ्यकर्माणिस्वभावा न्विनियोजयेत् ॥ तेषामभावेनाशःस्यात्कृतस्यापिचकर्मणः ॥ ११७ ॥ ॥ ॥ ॥

नीडमितिश्रुतेः ॥ भावाभावकरंविश्वोदयप्रलयकरं ॥ ११२ ॥ भ्राम्यतइति ॥ भ्रामयन्सर्वभूतानीतिगीतोक्तेः ॥ ११३ ॥ कालकालेति ॥ कालस्यापि कालरूपेणेत्यर्थः ॥ कर्मतन्मूलमिदंजगत् ॥ विवर्ततेप्रकाशते ॥ ११४ ॥ इदमेवव्यनक्ति तदिति ॥ तत्वस्यकलादितत्वस्यसत्वेनसत्वगुणेन ॥ ॥ ११५ ॥ अष्टाभिराकाशादिमूर्तिभिः त्रिभिःसत्वादिगुणैः द्वाभ्यांविद्याविद्याभ्यां ॥ ११६ ॥ गुणैःसत्वादिभिः ॥ स्वभावानिति ॥ प्राणिनामितिशेषः ॥ तेषांकर्मणाम् ॥ ११७ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥



Indira Gandhi National Centre for the Arts

॥ ११८ ॥ अकलःनिर्गुणः ॥ विश्वरूपेति ॥ विश्वस्यरूपस्यप्रभवोयस्मात्तं ॥ ११९ ॥ १२० ॥ १२१ ॥ १२२ ॥ १२३ ॥ याभ्योज्ञानक्रियाशक्ति
भ्यःलिंगंसाक्षाज्ज्ञापकं ॥ १२४ ॥ करणानामाकाशादीनां ॥ १२५ ॥ तद्वदिति ॥ यथास्यजनितानास्तितद्वदन्येपिमलादयोजनिहेतवोनसंतीत्यर्थः ॥ मल

कर्मक्षयेपुनश्चाऽन्यत्ततोयातिसतत्वतः ॥ सएवादिःस्वयंयोगनिमित्तंभोक्तृभोगयोः ॥ ११८ ॥ परस्त्रिकालादकलः
सएवपरमेश्वरः ॥ तंविश्वरूपप्रभवंभवमीड्यंप्रजापतिम् ॥११९॥ देवदेवंजगत्पूज्यंस्वचित्तस्थमुपास्महे ॥ कालादि
भिःपरोयस्मात्प्रपंचःपरिवर्तते॥१२०॥धर्मावहंपापनुदंभगेशंविश्वधामच॥तमीश्वराणांपरमंमहेश्वरंतंदेवतानांपरमं
चदैवतम्॥१२१॥पतिंपतीनांपरमंपरस्ताद्विदामदेवंभुवनेश्वरेश्वरम् ॥ नतस्यविद्यतेकार्यंकारणंचनविद्यते ॥१२२॥
नतत्समोऽधिकश्चापिक्वचिज्जगतिदृश्यते॥पराऽस्यविविधाशक्तिःश्रुतौस्वाभाविकीश्रुता ॥१२३॥ज्ञानंबलंक्रियाचैव
याभ्योविश्वमिदंकृतं ॥ नतस्याऽस्तिपतिःकश्चिन्नैवलिंगंनचेशिता ॥ १२४ ॥ कारणंकरणानांचसतेषामधिपाधिपः
॥ नचाऽस्यजनिताकश्चिन्नचजन्मकुतश्चन ॥ १२५ ॥ नजन्महेतवस्तद्वन्मलमायादिसंज्ञकाः ॥ सएकःसर्वभूतेषु
गूढोव्याप्तश्चसर्वतः ॥ १२६ ॥ सर्वभूतांतरात्माचधर्माध्यक्षःसकथ्यते ॥ सर्वभूताधिवासश्चसाक्षीचेताचनिर्गुणः ॥
॥ १२७ ॥ एकोवशीनिष्क्रियाणांबहूनांविवशात्मनाम् ॥ एकस्तुबहुधाबीजंकरोतिसमयोचितम् ॥१२८॥ तमेवा
त्मनितिष्ठंतंयेपश्यंतिमुमुक्षवः ॥ तेषामेवसुखंनित्यंनेतरेषामिहात्मनाम् ॥१२९॥ नित्यानामप्यसौनित्यश्चेतनानां
चचेतनः ॥ एकोबहूनांचाकामःकामानीशःप्रयच्छति ॥ १३० ॥ सांख्ययोगाधिगम्यंतत्कारणंजगतःपतिम् ॥ ज्ञा
त्वादेवंपशुःपाशैःसर्वैरेवविमुच्यते ॥ १३१ ॥ विश्वकृद्विश्ववित्स्वात्मयोनिज्ञःकालकृद्गुणी ॥ प्रधानक्षेत्रज्ञपतिर्गुणे
शःपाशमोचकः ॥१३२॥ ब्रह्माणंविदधेपूर्वंवेदांश्चोपादिशत्स्वयम् ॥ योदेवस्तमहंबुध्वास्वात्मबुद्धिप्रसादतः॥१३३॥

मविद्याआदिशब्देनप्राणिकर्म ॥ १२६ ॥ चेताजगच्चिनोतीतिचेता ॥ १२७ ॥ एकइति ॥ बहूनामीदृग्योगिनामेकोमुख्यइत्यर्थः ॥ बीजंजीवेषुप्रजो
त्पादनसामर्थ्यं ॥ १२८ ॥ आत्मनिस्वहृदये ॥ १२९ ॥ १३० ॥ १३१ ॥ स्वात्मेति ॥ स्वात्मनांजीवानांयोनिंकर्मात्मकबीजंजानातीतिसः ॥ क्षेत्रज्ञोजीवः
॥ १३२ ॥ स्वात्मेति ॥ स्वात्मबुद्धीश्वरप्रसादाभ्यामित्यर्थः ॥ १३३ ॥ ॥ ॥ ॥

Indira Gandhi National Centre for the Arts

॥ १३४ ॥ शिवतत्त्वज्ञानंविनादुःखनाशोनसंभवतीत्याह ॥ यदेति ॥ उपायांतरेणदुःखांतस्यासंभाव्यत्त्वकथनमेतत् ॥ १३५ ॥ १३६ ॥ अत्याश्रमः
चतुर्थाश्रमः ॥ इदानींपाशुपततत्त्वकथनमुपसंहरति ॥ वेदांतइति ॥ १३७ ॥ १३८ ॥ एतस्याधिकारीयोभवातितमाह ॥ यस्येति ॥ १३९ ॥ १४० ॥
सर्वसारमाह॥अतश्चेति ॥ तदिदंशैवदर्शनंसंक्षेपेणोक्तंविस्तरस्त्वस्यसर्वदर्शनसंग्रहादौद्रष्टव्यः ॥ १४१ ॥ इतिश्रीशैवमहापुराणवायवीयसंहिताटीकायांसार



मुमुक्षुरस्मात्संसारात्प्रपद्येशरणंशिवम्॥ निष्कलंनिष्क्रियंशांतंनिरवद्यंनिरंजनम्॥१३४॥अमृतस्यपरंसेतुंदग्धेंधन
मिवाऽनलम्॥यदाचर्मवदाकाशंवेष्टयिष्यंतिमानवाः॥१३५॥तदाशिवमविज्ञायदुःखस्यांऽतोभविष्यति॥तपःप्रभा
वाद्देवस्यप्रसादाच्चमहर्षयः ॥१३६॥ अत्याश्रमोचितंज्ञानंपवित्रंपापनाशनम्॥वेदांतेपरमंगुह्यंपुराकल्पप्रचोदितम्
॥१३७॥ब्रह्मणोवदनाल्लब्धंमयेदंभाग्यगौरवात्॥नाऽप्रशांतायदातव्यमेतज्ज्ञानमनुत्तमम्॥१३८॥नापुत्रायासुवृत्ता
यनाशिष्यायचसर्वथा॥यस्यदेवेपराभक्तिर्यथादेवेतथागुरौ॥१३९॥तस्यैतेकथिताह्यर्थाःप्रकाशंतेमहात्मनः॥१४०॥
अतश्चसंक्षेपमिदंशृणुध्वंशिवःपरस्तात्प्रकृतेश्चपुंसः ॥ ससर्गकालेचकरोतिसर्वंसंहारकालेपुनराददाति ॥ १४१ ॥
इतिश्रीशिवमहापुराणेवायवीयसंहितायांपूर्वभागेचतुर्थोऽध्यायः ॥ ४ ॥ मुनयऊचुः ॥ कालादुत्पद्यतेसर्वंकाला
देवविपद्यते ॥ नकालनिरपेक्षंहिक्कचित्किंचनविद्यते ॥ १ ॥ यदास्यांतर्गतंविश्वंशश्वत्संसारमंडलम् ॥ सर्गसंहृति
मुद्राभ्यांचक्रवत्परिवर्तते ॥ २ ॥ ब्रह्माहरिश्चरुद्रश्चतथाऽन्येचसुरासुराः ॥ यत्कृतांनियतिंप्राप्यप्रभवोनातिवर्ति
तुम् ॥ ३ ॥ भूतभव्यभविष्याद्यैर्विभज्यजरयन्प्रजाः ॥ अतिप्रभुरितिस्वैरंवर्ततेऽतिभयंकरः ॥ ४ ॥ कएषभगवा
न्कालःकस्यवावशवर्त्ययम् ॥ कएवाऽस्यवशेनस्यात्कथयैतद्विचक्षण ॥ ५ ॥ वायुरुवाच ॥ कलाकाष्ठानिमेषादिक
लाकलितविग्रहम् ॥ कालात्मेतिसमाख्यातंतेजोमाहेश्वरंपरम् ॥ ६ ॥ ॥ ॥

बोधिन्यांचतुर्थोऽध्यायः ॥ ४ ॥ ॐनमःशिवाय ॥ विश्वस्यकलनाच्छंभुःकालरूपीतिवर्णितं ॥ वायुनाविस्तरेणात्रपंचमेतन्निरूप्यते ॥ १ ॥ कालादिति ॥
कालरूपादीश्वरतेजसइत्यर्थः॥विपद्यतइति ॥ नश्यतीत्यर्थः ॥भूतानिकालःपचतीतिवार्तेत्युक्तेरितिभावः ॥ १ ॥ अस्यईश्वरस्य॥शश्वत्पुनःपुनः ॥ मुद्राउ
त्पत्तिः ॥ २ ॥ नियतिंनियमं ॥ ३ ॥ अतिभयंकरइति ॥ कालइतिशेषः ॥ ४ ॥ ५ ॥ कालस्वरूपमाह ॥ कलेति ॥ ६ ॥ ॥



Indira Gandhi National Centre for the Arts

नियोगरूपंशासनरूपम् ॥ ॥ ७ ॥ ततःईशबलात् ॥ ८ ॥ कस्यतर्हिकालोवशस्तदाह ॥ शिवस्येति ॥ ९ ॥ अप्रतिहतंपरैरपराभूतं ॥ १० ॥ तमतिवार्तितुंकोपिनसमर्थइत्याह ॥ कालमिति ॥ ११ ॥ शासतीति ॥ आर्षरूपं ॥ शास्तीत्यर्थः ॥ १२ ॥ १३ ॥ ॥ १४ ॥ कालस्याग्रेकिमपिचिंतितंव्यर्थंभवतीत्या

यदलंघ्यमशेषस्यस्थावरस्यचरस्यच ॥ नियोगरूपमीशस्यबलंविश्वनियामकम् ॥ ७ ॥ तस्यांशांशमयीशक्तिःकालात्मनिमहात्मनि ॥ ततोनिष्क्रम्यसंक्रांताविसृष्टाग्नेरिवाऽऽयसी ॥ ८ ॥ तस्मात्कालवशेविश्वंनसविश्ववशेस्थितः ॥ शिवस्यतुवशेकालोनकालस्यवशेशिवः ॥ ९ ॥ यतोऽप्रतिहतंशार्वंतेजःकालेप्रतिष्ठितम् ॥ महतीतेनकालस्यमर्यादाहिदुरत्यया ॥ १० ॥ कालंप्रज्ञाविशेषेणकोऽतिवर्तितुमर्हति ॥ कालेनतुकृतंकर्मनकश्चिदतिवर्तते ॥ ११ ॥ एकच्छत्रांमहींकृत्स्नांयःपराक्रम्यशासति ॥ सोपिनैवातिवर्तेतकालंवेलामिवोदधिः ॥ १२ ॥ येनिगृह्येंद्रियग्रामंजयंतिसकलंजगत् ॥ नजयंत्यपितेकालंकालोजयतितानपि ॥१३॥ आयुर्वेदविदोवैद्यास्त्वनुष्ठितरसायनाः ॥ नमृत्युमतिवर्ततेकालोहिदुरितक्रमः ॥ १४ ॥ श्रियारूपेणशीलेनबलेनसकलेनच ॥ अन्यच्चिंतयतेजंतुःकालोऽन्यत्कुरुतेबलात् ॥१५॥ अप्रियैश्चप्रियैश्चैवअचिंतितगमागमैः ॥ संयोजयतिभूतानिवियोजयतिचेश्वरः ॥ १६ ॥ यदैवदुःखितःकश्चित्तदैवसुखितःपरः ॥ दुर्विज्ञेयस्वभावस्यकालस्याहोविचित्रता ॥ १७ ॥ योयुवासभवेद्वृद्धोयोबलीयान्सदुर्बलः ॥ यःश्रीमान्सोपिनिःश्रीकश्चित्रःकालविपर्ययः ॥१८॥ नाभिजात्यंनवैशीलंनबलंनचनैपुणं ॥ भवेत्कार्यायपर्याप्तंकालश्चेत्प्रतिरोधकः॥१९॥ येचनिष्परुषैस्तूर्यैर्गीतवाद्यैरुपस्थिताः॥ येचानाथाःपरान्नादाःकालस्तेषुसमक्रियः ॥ २० ॥ फलंत्यकालेनरसायनानिसम्यक्प्रयुक्तान्यपिचौषधानि ॥ तान्येवकालेनसमाहृतानिसिद्धिंप्रयांत्याशुसुखंदिशंति ॥ २१ ॥ नाकालतोयंम्रियतेजायतेवानाकालतःपुष्टिमग्र्यामुपैति ॥ नाकालतःसुखितंदुःखितंवानाकालिकंवस्तुसमस्तिकिंचित्॥ २२ ॥ ॥ ॥ ॥ ॥

ह ॥ श्रियेति ॥ शीलेनसद्वृत्तेन ॥ १५ ॥ अप्रियैरिति ॥ वस्तुभिरितिशेषः ॥ अचिंतितगमागमैःअविदितलाभालाभैः ॥ १६ ॥ तदेवव्यनक्ति ॥ यदेति ॥ १७ ॥ १८ ॥ १९ ॥ कालवृत्तिःसर्वत्रतुल्यैवेत्याह ॥ येचेति ॥ २० ॥ कालानुकूल्यंविनाफलंनसिध्यतीत्याह ॥ फलंतीति ॥ २१ ॥ अयंजीवःसुखितंसुखंदुःखितंदुःखं ॥ २२ ॥ ॥ ॥ ॥

Indira Gandhi National Centre for the Arts

॥ २३ ॥ कालात्मनःपरमेश्वरस्य ॥ अनादिरेषभगवान्कालोनंतोजरोमरः ॥ सर्वगत्वात्स्वतंत्रत्वात्सर्वात्मत्वान्महेश्वरइतिकूर्मपुराणे ॥ तथाविष्णुधर्मे ॥ अनादिनिधनःकालोरुद्रःसंकर्षणःपरः ॥ कल्पनात्सर्वभूतानांसकालःपरिकीर्तितः ॥ कर्षणात्सर्वभूतानांसतुसंकर्षणःस्मृतः ॥ सर्वभूतशमित्वाच्चसरुद्रःपरिकीर्तितः ॥ अनादिनिधनत्वेनसमहान्परमेश्वरः ॥ निमेषादपिसूक्ष्मत्वात्सूक्ष्मात्सूक्ष्मतरेष्वपि ॥ तस्यसूक्ष्मातिसूक्ष्मस्यकालस्यपरमेष्ठिनः ॥ दुर्विभाव्यामहाभागयोगिनामपिसूक्ष्मतेति ॥ कालात्मानंकालरूपमीशतेजः ॥ कालातीतंनिर्गुणम् ॥ २४ ॥ कालातीतत्वमेवाह ॥ नयस्येति ॥ २५ ॥ इतिश्रीशैवमहापुराणवायवीयसंहिताटीकायांसारबोधिन्यांपूर्वभागेपंचमोऽध्यायः ॥ ५ ॥ ओंनमःशिवाय ॥ निमेषादिशिवाहांतंकालमानमुदाहृतम् ॥ वायुनाविस्तरे

कालेनशीतःप्रतिवातिवातःकालेनवृष्टिर्जलदानुपैति ॥ कालेनसस्यानिभवंतितस्मात्कालेनसंजीवतिजीवलोकः ॥
॥ २३ ॥ इत्थंकालात्मनस्तत्त्वंयोविजानातितत्वतः ॥ कालात्मानमतिक्रम्यकालातीतंसपश्यति ॥ २४ ॥ नयस्यकालोनचबंधमुक्तीनयःपुमान्नप्रकृतिर्नविश्वम् ॥ विचित्ररूपायशिवायतस्मैनमःपरस्मैपरमेश्वराय ॥ २५ ॥ इतिश्रीशिवमहापुराणेवायवीयसंहितायांपूर्वभागेपंचमोऽध्यायः ॥ ५ ॥ ऋषयऊचुः ॥ केनमानेनकालेऽस्मिन्नायुःसंख्याप्रकल्प्यते ॥ संख्यारूपस्यकालस्यकःपुनःपरमोऽवधिः ॥ १ ॥ वायुरुवाच ॥ आयुषोऽत्रनिमेषाख्यमाद्यमानंप्रचक्षते ॥ संख्यामयस्यकालस्यशांत्यतीतकलावधिः ॥ २ ॥ अक्षिपक्ष्मपरिक्षेपोनिमेषःपरिकीर्तितः ॥ तादृशानांनिमेषाणांकाष्ठादशचपंचच ॥ ३ ॥ काष्ठात्रिंशत्कलानामकलात्रिंशन्मुहूर्तकम् ॥ मुहूर्तानामपित्रिंशदहोरात्रंप्रचक्षते ॥
॥ ४ ॥ त्रिंशत्संख्यैरहोरात्रैर्मासःपक्षद्वयात्मकः ॥ ज्ञेयःपित्र्यमहोरात्रंमासःकृष्णसितात्मकः ॥ ५ ॥ मासैस्तैरयनंषड्भिर्वर्षंद्वेचाऽयनेमते ॥ लौकिकेनैवमानेनअब्दोयोमानुषःस्मृतः ॥ ६ ॥ ॥ ॥ ॥

णैतत्षष्ठेध्यायेनिरूप्यते ॥ १ ॥ मानेनपरिमाणेन ॥ आयुःसंख्याब्रह्मादीनामायुषःपरिमाणं ॥ अवधिरवसानं ॥ १ ॥ आयुषःकालस्य ॥ निमेषस्वरूपमाह ॥ संख्येति ॥ संख्यामयस्यवक्ष्यमाणस्पंदसंख्यायुक्तस्य ॥ शांतीति ॥ शांत्यतीतकलावधिःसीमायस्यसः शांत्यतीतकलादीनांस्वरूपंवक्ष्यते ॥ २ ॥ दशेति ॥ पंचदशनिमेषाःकाष्ठेत्यर्थः ॥ निमेषादशचाष्टौचकाष्ठेतितुमन्वादयः ॥ ३ ॥ ४ ॥ पक्षद्वयात्मकःशुक्लकृष्णोभयात्मकः ॥ पित्र्याहोरात्रमानमाह ॥ ज्ञेयइति ॥ ५ ॥ अयनवर्षमानमाह ॥ मासैरिति लौकिकेनव्यावहारिकेण ॥ ६ ॥ ॥ ॥ ॥



Indira Gandhi National Centre for the Arts

दिव्यंदैवं ॥ ७ ॥ ८ ॥ दिव्यसंवत्सरमाह ॥ त्रीणीति ॥ मानुषेणमानुषमानेन ॥ ९ ॥ ॥ १० ॥ युगनामान्याह ॥ पूर्वमिति ॥ ११ ॥ कृतयुगमानमाह ॥ चत्वारीति ॥ तस्यकालस्यचतुःशतवर्षाणिसंध्यासंध्यांशश्चभवति ॥ युगस्यपूर्वासंध्याउत्तरश्चसंध्यांशः तदुक्तंविष्णुपुराणे ॥ तत्प्रमाणैःशतैःसंध्यापूर्वातत्राभिधीयते ॥ संध्यांशकश्चतत्तुल्योयुगस्यानंतरोहियः ॥ संध्यासंध्यांशयोरंतर्यःकालोमुनिसत्तम ॥ युगाख्यःसतुविज्ञेयःकृतत्रेतादिसंज्ञकइति ॥ १२ ॥ इतरेषु

एतद्दिव्यमहोरात्रमितिशास्त्रस्यनिश्चयः ॥ दक्षिणंचाऽयनंरात्रिस्तथोदगयनंदिनम् ॥ ७ ॥ मासस्त्रिंशदहोरात्रैर्दिव्योमानुषवत्स्मृतः ॥ संवत्सरोपिदेवानांमासैर्द्वादशभिस्तथा ॥ ८ ॥ त्रीणिवर्षशतान्येवषष्टिवर्षयुतान्यपि ॥ दिव्यसंवत्सरोज्ञेयोमानुषेणप्रकीर्तितः ॥ ९ ॥ दिव्येनैवप्रमाणेनयुगसंख्याप्रवर्तते ॥ चत्वारिभारतेवर्षेयुगानिकवयोविदुः ॥ १० ॥ पूर्वंकृतयुगंनामततस्त्रेताविधीयते ॥ द्वापरंचकलिश्चैवयुगान्येतानिकृत्स्नशः ॥ ११ ॥ चत्वारितुसहस्राणिवर्षाणांतत्कृतंयुगम् ॥ तस्यतावच्छतीसंध्यासंध्यांशश्चतथाविधः ॥ १२ ॥ इतरेषुससंध्येषुससंध्यांशेषुचत्रिषु ॥ एकापायेनवर्ततेसहस्राणिशतानिच ॥ १३ ॥ एतद्द्वादशसाहस्रंसाधिकंचचतुर्युगम् ॥ चतुर्युगसहस्रंयत्सकल्पइतिकथ्यते ॥ १४ ॥ चतुर्युगैकसप्तत्यामनोरंतरमुच्यते ॥ कल्पेचतुर्दशैकस्मिन्मनूनांपरिवृत्तयः ॥ १५ ॥ एतेनक्रमयोगेनकल्पमन्वंतराणिच ॥ सप्रजानिव्यतीतानिशतशोऽथसहस्रशः ॥ १६ ॥ अज्ञेयत्वाच्चसर्वेषामसंख्येयतयापुनः ॥ शक्योनैवाऽनुपूर्व्याद्वैतेषांवक्तुंसुविस्तरः ॥ १७ ॥ ॥ ॥

त्रेतादियुगेषुसंध्यासंध्यांशसहितेषुएकहान्यासहस्राणिशतानिचभवंति ॥ तेनैवंसंपद्यते ॥ त्रीणिवर्षसहस्राणित्रेतायुगं तस्यत्रीणिवर्षशतासंध्यासंध्यांशश्च ॥ एवंद्वेवर्षसहस्रेद्वापरः तस्यद्वेवर्षशतेसंध्यासंध्यांशश्च ॥ एवंवर्षसहस्रंकलिः तस्यैकवर्षशतंसंध्यासंध्यांशश्च ॥ १३ ॥ अवांतरकल्पमानमाह ॥ चतुर्युगेति ॥ १४ ॥ मनोरंतरंमन्वंतरम् ॥ १५ ॥ १६ ॥ अतोयुगानांप्राथम्येनआरंभसमाप्तीज्ञातुमशक्यएवेत्याह ॥ अज्ञेयत्वादिति ॥ आनुपूर्व्यात् अनुक्रमेण ॥ तेषांकल्पमन्वंतरादीनां ॥ १७ ॥ ॥ ॥ ॥ ॥

Indira Gandhi National Centre for the Arts

दिवादिवसः ॥ ब्राह्मवर्षमानमाह कल्पानामिति ॥ १८ ॥ ब्राह्मयुगमानमाह ॥ वर्षाणामिति ॥ ब्राह्मवर्षाणामित्यर्थः ॥ सवनपरिमाणमाह ॥ युगेति ॥ १९ ॥ ब्रह्मायुर्मानमाह ॥ सवनानामिति ॥ त्रिगुणमिति ॥ त्रिभिर्गुणितंसवनानांसहस्रंत्रिवृतमित्यर्थः ॥२०॥ तस्यब्रह्मणः॥ पुरंदराःइंद्राः ॥ शतानीति ॥ पुरंदराइतिसंबध्यते ॥ २१ ॥ २२ ॥ विष्णुरुद्रदिनमानमाह ॥ ब्रह्मेति ॥ तथाएकः ॥ २३ ॥ सक्षाच्छिवस्यपरब्रह्मणः तत्संख्यएकएवेत्यर्थः सदाशिवःपूर्वोक्तसदाख्यईश्वरः ॥ २४ ॥ तस्मिन्निति ॥ यस्मिन्ब्रह्मायुषिउक्तसंख्याइंद्राभवंतितस्मिन्नित्यर्थः ॥ शिवेनैवशिवप्रेरणयैव ॥ कालांतरंयाव



कल्पोनामदिवाप्रोक्तोब्रह्मणोऽव्यक्तजन्मनः ॥ कल्पानांवैसहस्रंचब्राह्मंवर्षमिहोच्यते ॥ १८ ॥ वर्षाणामष्टसाहस्रं यच्चतद्ब्रह्मणोयुगम् ॥ सवनंयुगसाहस्रंब्रह्मणःपद्मजन्मनः ॥ १९ ॥ सवनानांसहस्रंचत्रिगुणंत्रिवृतंतथा ॥ कल्प्यतेसकलःकालोब्रह्मणःपरमेष्ठिनः ॥ २० ॥ तस्यवैदिवसेयांतिचतुर्दशपुरंदराः ॥ शतानिमासेचत्वारिविंशत्यासहितानिच ॥ २१ ॥ अब्देपंचसहस्राणिचत्वारिंशद्युतानिच ॥ चत्वारिंशत्सहस्राणिपंचलक्षाणिचाऽऽयुषि ॥ २२ ॥ ब्रह्माविष्णोर्दिनेचैकोविष्णूरुद्रदिनेतथा ॥ ईश्वरस्यदिनेरुद्रःसदाख्यस्यतथेश्वरः ॥ २३ ॥ साक्षाच्छिवस्यतत्संख्यस्तथासोपिसदाशिवः ॥ चत्वारिंशत्सहस्राणिपंचलक्षाणिचाऽऽयुषि ॥ २४ ॥ तस्मिन्साक्षाच्छिवेनैषकालात्मासंप्रवर्तते ॥ यत्तत्सृष्टेःसमाख्यातंकालांतरमिहद्विजाः॥ २५ ॥ एतत्कालांतरंज्ञेयमहर्वैपारमेश्वरम् ॥ रात्रिश्चतावतीज्ञेयापरमेशस्यकृत्स्नशः ॥ २६ ॥ अहस्तस्यतुयासृष्टीरात्रिश्चप्रलयःस्मृतः ॥ अहर्नविद्यतेतस्यनरात्रिरितिधारयेत् ॥ २७ ॥ एषोपचारःक्रियतेलोकानांहितकाम्यया ॥ प्रजाःप्रजानांपतयोमूर्तयश्चसुरासुराः ॥ २८ ॥ इंद्रियाणींद्रियार्थाश्च महाभूतानिपंचच ॥ तन्मात्राण्यथभूतादिर्बुद्धिश्चसहदैवतैः ॥ २९ ॥ अहस्तिष्ठंतिसर्वाणिपरमेशस्यधीमतः ॥ अहरंतेप्रलीयंतेरात्र्यंतेविश्वसंभवः ॥ ३० ॥ ॥ ॥ ॥ ॥

त्सृष्टिपरिमितःकालः ॥ २५ ॥ २६ ॥ सृष्टिप्रलययोर्विभागमाह ॥ अहरिति ॥ तस्यपरमेश्वरस्य ॥ २७ ॥ किमर्थंतर्ह्ययंव्यवहारइत्यतआह ॥ एषइति ॥ संधिरार्षः ॥ उपचारोव्यवहारः ॥ २८ ॥ इंद्रियार्थाःशब्दादयोविषयाःस्थूलाः॥ तन्मात्राणिशब्दादीनिसूक्ष्मतत्वानि ॥ भूतादिःआकाशादिभूतगणः ॥ २९ ॥ अहरिति ॥ अत्यंतसंयोगेद्वितीया ॥ अहरंतेपरमेशदिनांते ॥ ३० ॥ ॥ ॥ ॥



Indira Gandhi National Centre for the Arts

कर्मेति ॥ कर्माणिप्राणिनांसंचितादीनि ॥ कालःपूर्वोक्तःएषांस्वभावःसृष्टिप्रवर्तनादिरूपस्तदर्थइत्यर्थः ॥३१॥ इतिश्रीशैवमहापुराणवायवीयसंहिताटीकायांसारबोधिन्यांपूर्वभागेब्रह्माद्यायुर्माननिरूपणंनामषष्ठोऽध्यायः ॥ ६ ॥ ओंनमःशिवाय ॥ ईशस्यशक्तिमारभ्यसृष्ट्यारंभोलयस्तथा ॥ संक्षिप्यवायुनाप्रोक्तःसप्तमेत्रनिरूप्यते ॥ १ ॥ विधायेति ॥ विधायकृत्वा निधायप्रतिष्ठाप्यआज्ञयास्वशक्तिरूपया ॥ १ ॥ इदंजगत् ॥ २ ॥ शांतीति ॥ शांत्यतीताख्यंपदंकलारूपंतत्वमुत्तरंयस्याःसा ॥ शिवादिति ॥ शक्तिमतःशिवात्सकाशात्ततोमायाततोऽव्यक्तंसंभूतमित्यर्थः ॥ मायाशक्तिविशेषःअव्यक्तंप्रकृतिः ॥ ३ ॥

योविश्वात्माकर्मकालस्वभावाद्यर्थेशक्तिर्यस्यनोल्लंघनीया ॥ यस्यैवाज्ञाधीनमेतत्समस्तंनमस्तस्मैमहतेशंकराय ॥ ॥ ३१ ॥ इतिश्रीशिवमहापुराणेवायवीयसंहितायांपूर्वभागेब्रह्माद्यायुर्मानकथनंनामषष्ठोऽध्यायः॥ ६ ॥ मुनयऊचुः ॥ कथंजगदिदंकृत्स्नंविधायचनिधायच ॥ आज्ञयापरमांक्रीडांकरोतिपरमेश्वरः ॥ १ ॥ किंतत्प्रथमसंभूतंकेनेदमखिलंततम् ॥ केनवापुनरेवेदंग्रस्यतेपृथुकुक्षिणा ॥ २ ॥ वायुरुवाच ॥ शक्तिःप्रथमसंभूताशांत्यतीतपदोत्तरा ॥ ततोमायाततोऽव्यक्तंशिवाच्छक्तिमतःप्रभोः ॥ ३ ॥ शांत्यतीतपदंशक्तेस्ततःशांतिपदक्रमात् ॥ ततोविद्यापदंतस्मात्प्रतिष्ठापदसंभवः ॥ ४ ॥ निवृत्तिपदमुत्पन्नंप्रतिष्ठापदतःक्रमात् ॥ एवमुक्तासमासेनसृष्टिरीश्वरचोदिता ॥ ५ ॥ आनुलोम्यात्तथैतेषांप्रातिलोम्येनसंहृतिः ॥ अस्मात्पंचपदोद्दिष्टानसृष्ट्यंतरमिष्यते ॥ ६ ॥ कलाभिःपंचभिर्व्याप्तंयस्माद्विश्वमिदंजगत् ॥ अव्यक्तंकारणंयत्तदात्मनासमधिष्ठितम् ॥ ७ ॥ महदादिविशेषांतंसृजतीत्यपिसंमतम् ॥ किंतुतत्रापिकर्तृत्वंनाऽव्यक्तस्यनचात्मनः ॥ ८ ॥ अचेतनत्वात्प्रकृतेरज्ञत्वात्पुरुषस्यच ॥ प्रधानपरमाण्वादियावत्किंचिदचेतनम् ॥ ९ ॥ नतत्कर्तृस्वयंदृष्टंबुद्धिमत्कारणंविना ॥ जगच्चकर्तृसापेक्षंकार्यंसावयवंयतः ॥ १० ॥

शक्तेरिति ॥ प्रथमंसृष्टायाःशक्तेःशांत्यतीतपदंततःशांतिपदंततोविद्यापदंतस्मात्प्रतिष्ठापदंतस्मान्निवृत्तिपदमुत्पन्नमितिक्रमेणपंचपदोत्पत्तिरित्यर्थः ॥ एषांस्वरूपंकार्यंचवक्ष्यते ॥ ४ ॥ ५ ॥ एतेषांशक्त्यादीनां ॥ ६ ॥ कलाभिःशांत्यतीतपदाद्यभिधाभिः ॥ ७ ॥ आत्मनःजीवस्य ॥ ८ ॥ तत्रक्रमेणहेतुद्वयमाह ॥ अचेतनत्वादिति ॥ पुरुषस्यजीवात्मनः ॥ ९ ॥ प्रधानादीनांकारणत्वेसपक्षाभावमाह ॥ नतदिति ॥ सृष्टेःसकर्तृत्वानुमानपूर्वकमीश्वरस्यैवतत्कर्तृत्वंसाधयति ॥ जगदिति ॥ प्रयोगस्तुपूर्वमुक्तः ॥ १० ॥ ॥ ॥ ॥

Indira Gandhi National Centre for the Arts

भूतानिआकाशादीनि ॥ तन्मात्राणिशब्दस्पर्शरूपरसगंधात्मिकाःसूक्ष्मकलाः ॥ सात्विकाहंकारकार्याण्याह ॥ वैकारिकादिति ॥ १४ ॥ बुद्धींद्रियाणिज्ञा
नेंद्रियाणि ॥ १५ ॥ उभयात्मकंसात्विकंराजसंचेत्यर्थः ॥ १६ ॥ भूतानामाकाशादीनां सःतमोयुक्तोहंकारः ॥ भूतादेरहंकारात् शब्दमात्रं ॥ ततःशब्दात्
॥ १७ ॥ एवमाकाशादेःसकाशाद्गुणद्वारेणैववाय्वादिसृष्टिर्नतुसाक्षादित्याह ॥ आकाशादिति ॥ १८ ॥ अन्यत्ओषध्यादिकम् ॥ १९ ॥ उत्पादयंति

अहंकाराच्चभूतानितन्मात्राणींद्रियाणिच ॥ वैकारिकादहंकारात्सत्वोद्रिक्तात्तुसात्विकः ॥ १४ ॥ वैकारिकःससर्ग
स्तुयुगपत्संप्रवर्तते ॥ बुद्धींद्रियाणिपंचैवपंचकर्मेंद्रियाणिच ॥ १५ ॥ एकादशंमनस्तत्रस्वगुणेनोभयात्मकम् ॥ त
मोयुक्तादहंकाराद्भूततन्मात्रसंभवः ॥ १६ ॥ भूतानामादिभूतत्वाद्भूतादिःकथ्यतेतुसः ॥ भूतादेःशब्दमात्रंस्यात्तत
आकाशसंभवः ॥१७॥ आकाशात्स्पर्शउत्पन्नःस्पर्शाद्वायुसमुद्भवः ॥ वायोरूपंततस्तेजस्तेजसोरससंभवः॥१८॥
रसादापःसमुत्पन्नास्ताभ्योगंधसमुद्भवः ॥ गंधाच्चपृथिवीजाताभूतेभ्योऽन्यच्चराचरम् ॥ १९ ॥ पुरुषाधिष्ठितत्वाच्च
अव्यक्तानुग्रहेणच ॥ महदादिविशेषांताह्यंडमुत्पादयंतिते ॥ २० ॥ तत्रकार्यंचकरणंसंसिद्धंब्रह्मणोयदा ॥ तदांडे
ऽस्मिन्प्रवृत्थोऽभूत्क्षेत्रज्ञोब्रह्मसंज्ञितः ॥ २१ ॥ सवैशरीरीप्रथमःसवैपुरुषउच्यते ॥ आदिकर्तासभूतानांब्रह्माग्रे
समवर्तत ॥ २२ ॥ तस्येश्वरस्याऽप्रतिमाज्ञानवैराग्यलक्षणा ॥ धर्मैश्वर्यकराबुद्धिर्ब्राह्मीजज्ञेऽभिमानिनः ॥ २३ ॥
अव्यक्ताज्जायतेतस्यमनसायद्यदीप्सितम् ॥ वशीकृतत्वात्त्रैगुण्यात्सापेक्षत्वात्स्वभावतः ॥ २४ ॥ त्रिधाविभज्यचा
त्मानंत्रैलोक्येसंप्रवर्तते ॥ सृजतेग्रसतेचैववीक्षतेचत्रिभिःस्वयम् ॥ २५ ॥ चतुर्मुखस्तुब्रह्मत्वेकालत्वेचांतकःस्मृतः ॥
सहस्रमूर्धापुरुषस्तिस्रोऽवस्थाःस्वयंभुवः ॥ २६ ॥ ॥ ॥ ॥

आरभंते ॥ २० ॥ २१ ॥ सःब्रह्मा ॥ समवर्ततेति ॥ हिरण्यगर्भःसमवर्तताग्रेभूतस्यजातःपतिरेकआसीदितिश्रुतेः ॥ २२ ॥ तस्यब्रह्मणःअभिमानिनः
सृष्टिकर्तृत्वाभिमानयुक्तस्य ॥ २३ ॥ ननुकथमेकएवसृष्टिंरचयतीत्यत्राह ॥ अव्यक्तादिति ॥ २४ ॥ वीक्षतेपालयितुमितिशेषः ॥ त्रिभिःअवस्थाविशे
षैः ॥ २५ ॥ ताअवस्थाआह ॥ चतुर्मुखइति॥ ब्रह्मत्वेसृष्टिकर्मणि ॥ कालत्वेसंहारकर्मणि ॥ पुरुषोऽत्रविष्णुः ॥ २६ ॥ ॥



Indira Gandhi National Centre for the Arts

गुणानामुक्तरूपेषुयोजनामाह ॥ सत्वमिति ॥२७॥ पूर्वोक्तमेवाविशदयति ॥ ब्रह्मत्वइति ॥ उदासीनःनिर्व्यापारः ॥ वीक्षणव्यापारमात्रेणैवपालनकार्यस्य सिद्धत्वादितिभावः ॥ २८ ॥ २९ ॥ ३० ॥ तस्यब्रह्मणःउल्बंगर्भाशयःसएवजरायुः गर्भाशयोजरायुःस्यादुल्वंचेत्यमरः ॥ ३१ ॥ ३२ ॥ जलादिभूतानांपरिमाणमाह ॥ अद्भिरिति॥पूर्वोक्तांडमपेक्ष्यदशगुणिताभिरद्भिरित्यर्थः ॥ ३३ ॥ भूतादिनाहंकारेण ॥ ३४ ॥ महतामहत्तत्त्वेन ॥ प्राकृतैःप्रकृतिसंभवैः

सत्वंरजश्चब्रह्मत्वेकालत्वेचतमोरजः ॥ विष्णुत्वेकेवलंसत्वंगुणवृद्धिस्त्रिधाप्रभो ॥ २७ ॥ ब्रह्मत्वेसृजतेलोकान्कालत्वेसंक्षिपत्यपि ॥ पुरुषत्वेप्युदासीनःकर्मचत्रिविधंविभोः ॥ २८ ॥ एवंत्रिधाविभिन्नत्वाद्ब्रह्मात्रिगुणउच्यते ॥ चतुर्धाप्रविभक्तत्वाच्चतुर्व्यूहःप्रकीर्तितः ॥ २९ ॥ आदित्वादादिदेवोसावजातत्वादजःस्मृतः ॥ पातियस्मात्प्रजाःसर्वाःप्रजापतिरितिस्मृतः ॥ ३० ॥ हिरण्मयस्तुयोमेरुस्तस्योल्बंसुमहात्मनः ॥ गर्भोदकंसमुद्राश्चजरायुश्चापिपर्वताः ॥ ॥ ३१ ॥ तस्मिन्नंडेत्विमेलोकाअंतर्विश्वमिदंजगत् ॥ चंद्रादित्यौसनक्षत्रौसग्रहौसहवायुना ॥ ३२ ॥ अद्भिर्दशगुणाभिस्तुबाह्यतोंऽडंसमावृतम् ॥ आपोदशगुणेनैवतेजसाबहिरावृताः ॥ ३३ ॥ तेजोदशगुणेनैववायुनाबहिरावृतम् ॥ आकाशेनावृतोवायुःखंचभूतादिनावृतम् ॥ ३४ ॥ भूतादिर्महतातद्वदव्यक्तेनावृतोमहान् ॥ एतैरावरणैरंडंसप्तभिःप्राकृतैर्वृतम् ॥ ३५ ॥ एतदावृत्यचाऽन्योन्यमष्टौप्रकृततयःस्थिताः ॥ एवंपरस्परोत्पन्नाधारयंतिपरस्परम् ॥ ३६ ॥ आधाराधेयभावेनविकारास्तुविकारिषु ॥ कूर्मोऽगानियथापूर्वंप्रसार्यविनियच्छति ॥ ३७ ॥ विकारांश्चतथाव्यक्तंसृष्ट्वाभूयोनियच्छति ॥ अव्यक्तप्रभवंसर्वमानुलोम्येनजायते ॥ ३८ ॥ प्राप्तेप्रलयकालेतुप्रातिलोम्येनलीयते ॥ गुणाःकालवशादेवभवंतिविषमाःसमाः ॥ ३९ ॥ गुणसाम्येलयोज्ञेयोवैषम्येसृष्टिरुच्यते ॥ तदिदंब्रह्मणोयोनिरेतदंडंघनंमहत् ॥ ४० ॥ ब्रह्मणःक्षेत्रमुद्दिष्टंब्रह्माक्षेत्रज्ञउच्यते ॥ इतीदृशानामंडानांकोट्योज्ञेयाःसहस्रशः ॥ ४१ ॥

॥ ३५ ॥ ३६ ॥ विकारिष्विति ॥ कारणेष्वित्यर्थः ॥ तिष्ठंतीतिशेषः ॥ उत्पत्तिलयविषयेदृष्टांतमाह ॥ कूर्मइति ॥ कूर्मोंगानीवसर्वशइतिगीतायाम् ॥ विनियच्छतिसंहरति ॥ ३७ ॥ आनुलोम्येनपूर्वोक्तानुक्रमेण ॥ ३८ ॥ प्रतिलोम्येनव्युत्क्रमेण ॥ गुणानांसमविषमभावप्राप्तौकारणमाह ॥ कालेति ॥ ३९॥ ब्रह्मणःपितामहस्य ॥ योनिःकारणम् ॥ ४० ॥ ४१ ॥ ॥ ॥ ॥

Indira Gandhi National Centre for the Arts

एवंब्रह्मांडानिब्रह्मादयश्चानंतानिसंतीत्याह ॥ सर्वगत्वादिति॥ ४२॥लब्ध्वेति॥ अनेनशंभोर्निर्गुणत्वेपि कल्पितमायासंबंधमात्रेणजगत्कर्तृत्वोपचारइतिसूचितम् ॥ तदेवविशदयति ॥ महेश्वरइति ॥ ४३ ॥ अबुद्धिपूर्वः अबुद्धिर्जीवानामावरणंविक्षेपश्चतत्पूर्वइत्यर्थः जडस्वभावइतिवा॥आत्यंतिकोमहान् ॥ ४४॥कारणतत्वस्यसामर्थ्यंदर्शयति ॥ यदिति ॥ ४५ ॥ जगदुत्पात्तौसहकारिहेतूनाह ॥ उत्पादकत्वादिति ॥ विकारान्पूर्वोक्तान्प्रकृतिपरिणामान् ॥ ४६ ॥

सर्वगत्वात्प्रधानस्यतिर्यगूर्ध्वमधःस्थिताः ॥ तत्रतत्रचतुर्वक्त्राब्रह्माणोहरयोभवाः ॥ ४२ ॥ सृष्टाःप्रधानेनतथालब्ध्वाशंभोस्तुसंनिधिम् ॥ महेश्वरःपरोव्यक्तादंडमव्यक्तसंभवम् ॥ ४३ ॥ अंडाज्जज्ञेविभुर्ब्रह्मालोकास्तेनकृतास्त्विमे ॥ अबुद्धिपूर्वःकथितोमयैषप्रधानसर्गःप्रथमःप्रवृत्तः ॥ आत्यंतिकश्चप्रलयोंऽतकालेलीलाकृतःकेवलमीश्वरस्य ॥ ॥ ४४ ॥ यत्तत्स्मृतंकारणमप्रमेयंब्रह्मप्रधानंप्रकृतेःप्रसूतिः ॥ अनादिमध्यांतमनंतवीर्यंशुक्लंसुरक्तंपुरुषेणयुक्तम् ॥ ॥ ४५ ॥ उत्पादकत्वाद्रजसोऽतिरेकाल्लोकस्यसंतानविवृद्धिहेतून् ॥ अष्टौविकारानपिचादिकालेसृष्ट्वासमश्नातितथांऽतकाले ॥ ४६ ॥ प्रकृत्यवस्थापितकारणानांयावत्स्थितिर्याचपुनःप्रवृत्तिः ॥ तत्सर्वमप्राकृतवैभवस्यसंकल्पमात्रेणमहेश्वरस्य ॥ ४७ ॥ इतिश्रीशिवमहापुराणेवायवीयसंहितायांपूर्वभागेलोकोत्पत्तिवर्णनंनामाऽष्टमोऽध्यायः ॥ ॥ ८ ॥ मुनयऊचुः ॥ मन्वंतराणिसर्वाणिकल्पभेदांश्चसर्वशः ॥ तेष्ववांतरसर्गंचप्रतिसर्गंचनोवद ॥ १ ॥ वायुरुवाच ॥ कालसंख्याविवृत्तस्यपरार्धोब्रह्मणःस्मृतः ॥ तावांश्चैवाऽस्यकालोन्यस्तस्यांतेप्रतिसृज्यते ॥ २ ॥ दिवसेदिवसेतस्यब्रह्मणःपूर्वजन्मनः ॥ चतुर्दशमहाभागामनूनांपरिवृत्तयः ॥ ३ ॥ ॥ ॥

मुख्यंकारणमाह ॥ प्रकृतीति ॥ ४७ ॥ इतिश्रीशैवमहापुराणवायवीयसंहिताटीकायांसारबोधिन्यांपूर्वभागेलोकोत्पत्तिवर्णनंनामाष्टमोऽध्यायः ॥ ८ ॥ ॐनमःशिवाय॥ब्रह्मणाचवराहेणप्रादुर्भूयाखिलंजगत्॥यव्द्यवस्थापितंसर्वंनवमेतन्निरूप्यते॥ १ ॥मन्वंतराणिस्वायंभुवादीनि॥ १ ॥कालेति ॥ पूर्वोक्तकालमानेनप्रादुर्भूतस्यब्रह्मणइत्यन्वयः पूर्वायुर्भागइतिशेषः ॥ अन्यःद्वितीयपरार्धः ॥ प्रतिसृज्यतेसंह्रियते॥ २॥ पूर्वजन्मनःआदिजन्मनः॥मनूनांस्वायंभुवादीनाम्॥ ३॥



Indira Gandhi National Centre for the Arts

॥ ४ ॥ कथंचिच्छक्यवचनत्वेपितत्कथनेप्रयोजनाभावइत्याह ॥ उक्तेष्विति ॥ सर्वेषुमन्वंतरादिषु॥ उत्सहइति ॥ काकदंतपरीक्षातुल्यत्वादितिभावः ॥ ॥ ५ ॥ यएवेति ॥ प्रतिसृष्टयःअवांतरसृष्टयःसंहारावा ॥ ६ ॥ एतत्कल्पनामाह ॥ यस्त्विति ॥ ७ ॥ तेषुस्वायंभुवादिषु ॥ ८ ॥ समाःतुल्याः ॥ ९ ॥ प्रलयस्वरूपमाह ॥ पूर्वकल्पइति ॥ परावृत्तेगते ॥ १० ॥ जगंतिलोकाः ॥ विवेलेषुअतिक्रांतमर्यादेषु ॥ ११ ॥ तरंगेति ॥ तरंगाएवभुजमंडलानितैरि

अनादित्वादनंतत्वादज्ञेयत्वाच्चकृत्स्नशः ॥ मन्वंतराणिकल्पाश्चनशक्यवचनाःपृथक् ॥ ४ ॥ उक्तेष्वपिचसर्वेषुशृण्वतांवोथवामम ॥ किमिहास्तिफलंतस्मान्नपृथग्वक्तुमुत्सहे ॥ ५ ॥ यएवखलुकल्पेषुकल्पःसंप्रतिवर्तते ॥ तत्रसंक्षिप्यवर्ततेसृष्टयःप्रतिसृष्टयः ॥ ६ ॥ यस्त्वयंवर्ततेकल्पोवाराहोनामनामतः ॥ अस्मिन्नपिद्विजश्रेष्ठामनवस्तुचतुर्दश ॥ ७॥ स्वायंभुवादयःसप्तसप्तसावर्णिकादयः ॥ तेषुवैवस्वतोनामसप्तमोवर्ततेमनुः ॥८॥ मन्वंतरेषुसर्वेषुसर्गसंहारवृत्तयः॥ प्रायःसमाभवंतीतितर्कःकार्योविजानता ॥ ९ ॥ पूर्वकल्पेपरावृत्तेप्रवृत्तेकालमारुते ॥ समुन्मूलितमूलेषुवृक्षेषुचवनेषुच ॥ १० ॥ जगंतितृणवत्त्रीणिदेवेदहतिपावके ॥ वृष्ट्याभुविनिषिक्तायांविवेलेष्वर्णवेषुच ॥ ११ ॥ दिक्षुसर्वासुमग्नासुवारिपूरेमहीयसि ॥ तरद्भिश्चटुलाक्षेपैस्तरंगभुजमंडलैः ॥ १२ ॥ प्रारब्धचंडनृत्येषुततःप्रलयवारिषु ॥ ब्रह्मानारायणोभूत्वासुष्वापसलिलेसुखम् ॥ १३ ॥ इमंचोदाहरन्मंत्रंश्लोकंनारायणंप्रति ॥ आपोनाराइतिप्रोक्ताआपोवैनरसूनवः ॥ १४ ॥ अयनंतस्यतायस्मात्तेननारायणःस्मृतः ॥ शिवयोगमयींनिद्रांकुर्वंतंत्रिदशेश्वरम् ॥ १५ ॥ बद्धांजलिपुटाःसिद्धाजनलोकनिवासिनः ॥ स्तोत्रैःप्रबोधयामासुःप्रभातसमयेसुराः ॥ १६ ॥ ततःप्रबुद्धउत्थायशयनात्तोयमध्यगात् ॥ उदैक्षतदिशःसर्वायोगनिद्रालसेक्षणः ॥ १७ ॥ नाऽपश्यत्सतदाकिंचित्स्वात्मनोव्यतिरेकियत् ॥ सविस्मयइवासीनःपरांचिंतामुपागमत् ॥ १८ ॥ ॥ ॥

त्यर्थः ॥ १२ ॥ भूत्वेति ॥ नारायणस्वरूपेविलीयेत्यर्थः ॥ १३ ॥ किंकुर्वन्सुष्वापेतितदाह ॥ इममिति ॥ तंमंत्रमाह ॥ आपइति ॥ व्याख्यातमेवज्ञानसंहितायां ॥ १४ ॥ शिवयोगमयीम् शिवैकाग्रचित्ततारूपाम् ॥ त्रिदशेश्वरंनारायणं ॥ १५ ॥ जनलोकनिवासिनःपंचमस्वर्लोकनिवासिनः ॥ १६॥ १७॥ व्यतिरेकिभिन्नं ॥ १८ ॥ ॥ ॥ ॥ ॥ ॥

Indira Gandhi National Centre for the Arts

महीपृथ्वी ॥ १९ ॥ भूस्थितिंभूवःपृथिव्याःस्थितिं ब्रह्मेतिविष्णुर्बुधइतिपाठांतरं ॥ २० ॥ २१ ॥ २२ ॥ महापर्वतेति ॥ पुंस्त्वमार्षम् ॥ २३ ॥
॥ २४ ॥ वराहेक्षणंविशिनष्टि ॥ पद्मरागेति ॥ वृत्तभीषणंवृत्तंवर्तुलम्अतएवभीषणं ॥ वृत्तदीर्घेति ॥ दृढदीर्घमहागात्रमितिपाठांतरं ॥ स्थलोज्वलंसर्वशरीर



क्साभगवतीयातुमनोज्ञामहतीमही ॥ नानाविधमहाशैलनदीनगरकानना ॥ १९ ॥ एवंसंचिंतयन्ब्रह्माबुबु
धेनैवभूस्थितिम् ॥ तदासस्मारपितरंभगवंतंत्रिलोचनम् ॥ २० ॥ स्मरणाद्देवदेवस्यभवस्यामिततेजसः ॥ ज्ञातवा
न्सलिलेमग्नांधरणींधरणीपतिः ॥ २१ ॥ ततोभूमेःसमुद्धारंकर्तुकामःप्रजापतिः ॥ जलक्रीडोचितंदिव्यंवाराहंरूपम
स्मरत् ॥ २२ ॥ महापर्वतवर्ष्माणंमहाजलदनिःस्वनम् ॥ नीलमेघप्रतीकाशंदीप्तशब्दंभयानकम् ॥ २३ ॥
पीनवृत्तघनस्कंधंपीनोन्नतकटीतटम् ॥ ह्रस्ववृत्तोरुजंघाग्रंसुतीक्ष्णखुरमंडलम् ॥ २४ ॥ पद्मरागमणिप्रख्यंवृत्त
भीषणमीक्षणम् ॥ वृत्तदीर्घमहागात्रंस्तब्धकर्णस्थलोज्वलम् ॥ २५ ॥ उदीर्णोच्छ्वासनिश्वासघूर्णितप्रलयार्णवम्
॥ विस्फुरत्सुसटाछन्नकपोलंस्कंधबंधुरम् ॥ २६ ॥ मणिभिर्भूषणैश्चित्रैर्महारत्नैःपरिष्कृतैः ॥ विराजमानंविद्युद्भि
र्मेघसंघमिवोन्नतम् ॥ २७ ॥ आस्थायविपुलंरूपंवाराहममितंविधिः ॥ पृथिव्युद्धरणार्थायप्रविवेशरसातलम् ॥
॥ २८ ॥ सतदाशुशुभेतीवसूकरोगिरिसन्निभः ॥ लिंगाकृतेर्महेशस्यपादमूलगतोयथा ॥ २९ ॥ ततःससलिलेम
ग्नांपृथिवींपृथिवीधरः ॥ उद्धृत्यालिंग्यदंष्ट्राभ्यामुन्ममज्जरसातलात् ॥ ३० ॥ तंदृष्ट्वामुनयःसिद्धाजनलोकनिवासि
नः ॥ मुमुदुर्ननृतुर्मूर्द्धितस्यपुष्पैरवाकिरन् ॥ ३१ ॥ वपुर्महावराहस्यशुशुभेपुष्पसंवृतम् ॥ पतद्भिरिवखद्योतैःप्रांशु
रंजनपर्वतः ॥ ३२ ॥ ततःसंस्थानमानीयवराहोमहतींमहीम् ॥ स्वमेवरूपमास्थायस्थापयामासवैप्रभुः ॥ ३३ ॥

स्थलेउज्वलंदीप्तं ॥ २५ ॥ २६ ॥ २७ ॥ विधिरिति॥अमितंहरिरितिपाठांतरं ॥ २८ ॥ पादमूलेति ॥ अनेनतादृशवराहादपिशिवलिंगस्यापारिच्छिन्नत्वं
दर्शितम् ॥ २९ ॥ सःवराहरूपीनारायणात्मकोब्रह्मा ॥ ३० ॥ तस्यवराहस्य ॥ ३१ ॥ प्रांशुरुच्चःअंजनपर्वतःकज्जलपर्वतः ॥ ३२ ॥ संस्थानंसम्यक्
स्थितिं ॥ ३३ ॥ ॥ ॥ ॥ ॥ ॥



Indira Gandhi National Centre for the Arts

भूराद्यानिति ॥ भूरादिमहर्लोकपर्यंतानित्यर्थः ॥ अनेनजनलोकप्रभृत्यूर्ध्वलोकवासिसुरजनानामवांतरप्रलयेलयोनास्तीतिसूचितम् ॥ पूर्ववदिति ॥ धाता यथापूर्वमकल्पयदितिश्रुतेः ॥३४॥ ततोमहींसुस्थितांकृत्वातत्रजगदरचयदित्याह॥इतीति॥३५॥इतिश्रीशिवमहापुराणवायवीयसंहिताटीकायांसारबोधिन्यां पूर्वभागेवराहरूपवर्णनंनामनवमोऽध्यायः ॥ ९ ॥ ॥ ओंनमःशिवाय ॥ ब्रह्मादृष्ट्वाशिवंतस्यप्रसादादखिलंजगत् ॥ निर्ममेविस्तरेणैतद्दशमेत्रनिरूप्यते॥१॥ ॥ सर्गमिति ॥ तस्यस्रष्टुर्ब्रह्मणः ॥ प्रध्यानकालेचिंतनकाले ॥ मोहभेदानाह ॥ तमोमोहइति ॥ महात्मनःब्रह्मणःसकाशात् ॥ २ ॥ बीजेति ॥ सर्गइति

पृथिवींचसमीकृत्यपृथिव्यांस्थापयन्गिरीन् ॥ भूराद्यांश्चतुरोलोकान्कल्पयामासपूर्ववत् ॥३४॥ इतिसहमहतींच महींमहीध्रैःप्रलयमहाजलधेरधस्थमध्यात् ॥ उपरिचविनिवेश्यसविश्वकर्माचरमचरंचजगत्ससर्जभूयः ॥ ३५ ॥ इ तिश्रीशिवमहापुराणेवायवीयसंहितायांपूर्वभागेवराहरूपवर्णनंनामनवमोऽध्यायः ॥ ९ ॥ वायुरुवाच ॥ सर्गंचिंत यतस्तस्यतदावैबुद्धिपूर्वकम् ॥ प्रध्यानकालेमोहस्तुप्रादुर्भूतस्तमोमयः ॥ १ ॥ तमोमोहोमहामोहस्तामिस्त्रश्चांध संज्ञितः ॥ अविद्यापंचमीचैषाप्रादुर्भूतामहात्मनः ॥ २ ॥ पंचधावस्थितःसर्गोध्यायतस्त्वभिमानिनः ॥ सर्वतस्तम सातीवबीजकुंभवदावृतः ॥ ३ ॥ बहिरंतश्चाप्रकाशश्चस्तब्धोनिःसंज्ञएवच ॥ तस्मात्तेषांवृताबुद्धिर्मुखानिकरणानि च ॥ ४ ॥ तस्मात्तेसंवृतात्मानोनगामुख्याःप्रकीर्तिताः ॥ तंदृष्ट्वाऽसाधकंब्रह्माप्रथमंसर्गमीदृशं ॥ ५ ॥ अप्रसन्नम नाभूत्वाद्वितीयंसोभ्यमन्यत ॥ तस्याभिध्यायतःसर्गतिर्यक्स्त्रोतोभ्यवर्तत ॥ ६ ॥ अंतःप्रकाशास्तिर्यंचआवृताश्च बहिःपुनः ॥ पश्चात्मानस्ततोजाताउत्पथग्राहिणश्चते ॥ ७ ॥ ॥ ॥

संबध्यते ॥ यथावीजपूर्णःकुंभोबीजानिस्वावयवैरावृणोतितद्वत्तमसावृतइत्यर्थः ॥३॥ अप्रकाशोगमनाद्यनुकूलचैतन्यशून्यः॥तेषांतत्सर्गेजायमानानांवृताआ च्छादिता ॥ करणानिइंद्रियाणिवृतानीतिविपरिणामेनसंबध्यते ॥ ४ ॥ नगाःपर्वतावृक्षाश्चमुख्याःमुखेआरंभेभवामुख्याः ॥ असाधकंसृष्ट्यनुपयोगिनं ॥५॥ द्वितीयंसर्गमितिसंबध्यते ॥ तिर्यक्स्त्रोतःतिरश्चांपश्वादिनिकृष्टप्राणिनांस्त्रोतःप्रवाहः ॥ ६ ॥ अंतःप्रकाशाअंतर्ज्ञानिनः ॥ आहारादिमात्रज्ञानयुक्ताइत्यर्थः ॥ आवृताःमोहेनेतिशेषः ॥ अतएवपश्वात्मानः सर्वान्समानंपश्यंतीतिपशवोगवादयस्तद्रूपाइत्यर्थः ॥ अतएवोत्पथग्राहिणःअसन्मार्गपरिग्राहिणः ॥ ७ ॥

Indira Gandhi National Centre for the Arts

तमपिद्वितीयसर्गमपि॥अन्यंतृतीयं॥ऊर्ध्वस्रोतसः उपरितनस्रोतसः ततोर्ध्वेतिसंधिरार्षः ॥८॥ तेदेवाः॥नावृताइति॥तमसेतिशेषः॥देवसंज्ञिताइति॥बहिरंतर्द्योतन स्वभावादेवदेवपदवाच्याइत्यर्थः॥९॥अर्वाक्स्रोतः अधस्तनस्रोतः॥दुःखसमुत्कटःतापत्रयव्याप्तः ॥१०॥ दुःखबाहुल्येकारणमाह॥तमोद्रिक्ताइति ॥संधिरार्षः अनुग्रहइति॥सर्वदुःखव्यपगमेनेश्वरप्रसादरूपइत्यर्थः॥११॥चातुर्विध्यमाह ॥ विपर्ययेणेति ॥ विरोधभक्त्येत्यर्थः ॥ शक्त्यातपःसामर्थ्येन ॥ तुष्ट्यापरमेश्वर प्रसादमात्रेण सिध्यामंत्रादिसाधनेनफलप्राप्त्या॥तइति॥येतूक्तमार्गापरिग्राहिणस्तेसर्वेसंविभागरताःस्त्रीधनाद्यभिमानयुक्ताःखादनाःभक्षणादितत्पराः ॥ अ

तमप्यसाधकंज्ञात्वासर्गमन्यममन्यत ॥ ततोर्ध्वस्रोतसोवृत्तोदेवसर्गस्तुसात्विकः ॥ ८ ॥ तेसुखप्रीतिबहुलाबहिरंत श्चनावृताः ॥ प्रकाशाबहिरंतश्चस्वभावाद्देवसंज्ञिताः ॥ ९ ॥ ततोभिध्यायतोव्यक्तादर्वाक्स्रोतस्तुसाधकः ॥ मनुष्य नामासंजातःसर्गोदुःखसमुत्कटः ॥ १० ॥ प्रकाशाबहिरंतस्तेतमोद्रिक्तारजोधिकाः ॥पंचमोनुग्रहःसर्गश्चतुर्धासंव्य वस्थितः ॥ ११ ॥ विपर्ययेणशक्त्याचतुष्ट्यासिध्यातथैवच ॥ तेऽपरिग्राहिणःसर्वेसंविभागरताःपुनः ॥ १२ ॥ खाद नाश्चाप्यशीलाश्चभूताद्याःपरिकीर्तिताः ॥ प्रथमोमहतःसर्गोब्रह्मणःपरमेष्ठिनः ॥ १३ ॥ तन्मात्राणांद्वितीयस्तुभू तसर्गःसउच्यते ॥ वैकारिकस्तृतीयस्तुसर्गऐंद्रियकःस्मृतः ॥ १४ ॥ इत्येषप्रकृतेःसर्गःसंभूतोऽबुद्धिपूर्वकः ॥ मुख्य सर्गश्चतुर्थस्तुमुख्यावैस्थावराःस्मृताः ॥१५॥ तिर्यक्स्रोतस्तुयःप्रोक्तस्तिर्यग्योनिःसपंचमः ॥ तदोर्ध्वस्रोतसःषष्ठो देवसर्गस्तुसस्मृतः ॥ १६ ॥ ततोर्वाक्स्रोतसांसर्गःसप्तमःसतुमानुषः ॥ अष्टमोनुग्रहःसर्गःकौमारोनवमःस्मृतः ॥ ॥ १७ ॥ प्राकृताश्चत्रयःपूर्वेसर्गास्तेबुद्धिपूर्वकाः ॥ बुद्धिपूर्वंप्रवर्ततेमुख्याद्याःपंचवैकृताः ॥१८॥ अग्रेससर्जवैब्रह्मा मानसानात्मनःसमान् ॥ सनंदंसनकंचैवविद्वांसंचसनातनम् ॥ १९ ॥ ॥ ॥

शीलादुर्वृत्ताःभूताद्याभूतप्रेतपिशाचाद्याइत्युत्तरेणान्वयः॥१२॥प्रकारांतरेणसृष्टिक्रममाह॥प्रथमइति॥१३॥भूतसर्गइति॥ तन्मात्राद्द्वारैवाकाशादीनामुत्पन्न त्वात्भूतसर्गइत्यर्थः ॥ वैकारिकइति ॥ विकारमात्ररूपत्वात्वैकारिकत्वंतस्य ॥ ऐंद्रियकःज्ञानकर्मेंद्रियरूपः ॥ १४ ॥ अबुद्धिपूर्वकः प्रकृतेर्जडत्वाज्ज डस्वभावइत्यर्थः॥वैकृतसर्गमाह ॥ मुख्यसर्गइति ॥ बुद्धिपूर्वकसृष्टौप्रथमोत्पन्नत्वान्मुख्यसर्गत्वमस्यतदाह॥मुख्याइति॥१५॥तिर्यक्स्रोतइति ॥यस्तिर्यक्स्रो तइतिप्रोक्तःसतिर्यग्योनिःपंचमोवेदितव्यः ॥ १६ ॥ १७ ॥ १८ ॥ कौमारसर्गमाह ॥ अग्रइति ॥ १९ ॥ ॥ ॥



Indira Gandhi National Centre for the Arts

॥ २० ॥ २१ ॥ २२ ॥ व्यजायतेति ॥ तस्येतिसंबध्यते ॥ २३ ॥ २४ ॥ तस्यब्रह्मणः ॥ क्रोधेति॥परनाशनेप्रवर्तनंक्रोधःपरसहनाभावोऽमर्षइत्यनयो
र्भेदः ॥ २५ ॥ प्रभोर्ब्रह्मणः ॥ २६ ॥ ईश्वरःशिवः तेनईश्वरेण ॥ २७ ॥ २८ ॥ रुरुदुरिति ॥ सृष्टौप्रवर्तनमेवरोदनहेतुः ॥२९॥ रुद्रशब्दप्रवृत्तिनिमित्त

ऋभुंसनत्कुमारंचपूर्वमेवप्रजापतिः ॥ सर्वेतेयोगिनोज्ञेयावीतरागाविमत्सराः ॥२०॥ ईश्वरासक्तमनसोनचक्रुःसृष्ट
येमतिं ॥ तेषुसृष्ट्यनपेक्षेषुगतेषुसनकादिषु ॥ २१ ॥ स्रष्टुकामःपुनर्ब्रह्मातताापपरमंतपः ॥ तस्यैवंतप्यमानस्यनकिं
चित्समवर्तत ॥ २२ ॥ ततोदीर्घेणकालेनदुःखात्क्रोधोऽव्यजायत ॥ क्रोधाविष्टस्यनेत्राभ्यांप्रापतन्नश्रुबिंदवः॥ २३ ॥
ततस्तेभ्योश्रुबिंदुभ्योभूताःप्रेतास्तदाभवन् ॥ सर्वास्तानश्रुजान्दृष्ट्वाब्रह्मात्मानमनिंदत ॥ २४ ॥ तस्यतीव्राभव
न्मूर्छाक्रोधामर्षसमुद्भवा ॥ मूर्छितस्तुजहौप्राणान्क्रोधाविष्टःप्रजापतिः ॥ २५ ॥ ततःप्राणेश्वरोरुद्रोभगवान्नीललो
हितः ॥ प्रसादमतुलंकर्तुंप्रादुरासीत्प्रभोर्मुखात् ॥ २६ ॥ दशधाचैकधाचक्रेस्वात्मानंप्रभुरीश्वरः ॥ तेतेनोक्तामहा
त्मानोदशधाचैकधाकृताः ॥ २७ ॥ यूयंसृष्टामयावत्सालोकानुग्रहकारणात् ॥ तस्मात्सर्वस्यलोकस्यस्थापनायहि
तायच ॥ २८ ॥ प्रजासंतानहेतोश्चप्रयतध्वमतंद्रिताः ॥ एवमुक्ताश्चरुरुदुर्दुद्रुवुश्चसमंततः ॥ २९ ॥ रोदनाद्द्रावणा
च्चैवतेरुद्रानामतःस्मृताः ॥ येरुद्रास्तेखलुप्राणायेप्राणास्तेमहात्मकाः ॥ ३० ॥ ततोमृतस्यदेवस्यब्रह्मणःपरमेष्ठिनः
॥ घृणीददौपुनःप्राणान्ब्रह्मपुत्रोमहेश्वरः ॥ ३१ ॥ प्रहृष्टवदनोरुद्रःप्राणप्रत्यागमाद्विभोः ॥ अभ्यभाषतविश्वेशो
ब्रह्माणंपरमंवचः ॥ ३२ ॥ माभैर्माभैर्महाभागविरिंचजगतांगुरो ॥ मयातेप्राणिताःप्राणाःसुखमुत्तिष्ठसुव्रत ॥३३ ॥
स्वप्नानुभूतमिवतच्छ्रुत्वावाक्यंमनोहरं ॥ हरंनिरीक्ष्यशनकैर्नेत्रैःफुल्लांबुजप्रभैः ॥ ३४ ॥ तथाप्रत्यागतप्राणःस्निग्ध
गंभीरयागिरा ॥ उवाचवचनंब्रह्मातमुद्दिश्यकृतांजलिः ॥ ३५ ॥ भोभोवदमहाभागआनंदयसिमेमनः ॥ कोभवा
न्विश्वमूर्तिस्त्वंस्थितएकादशात्मकः ॥ ३६ ॥ ॥ ॥ ॥ ॥

माह ॥ रोदनादिति ॥ ३० ॥ रुद्राणांप्राणतादात्म्यंसृष्टिकर्तृत्वेनमहानुभावत्वंचाह ॥ येरुद्राइति ॥ ३० ॥ घृणीकरुणायुक्तः ॥ ३१ ॥ विभोर्ब्रह्मणः ॥
॥ ३२ ॥ ३३ ॥ ३४ ॥ तंहरं ॥ ३५ ॥ एकादशात्मकःएकादशस्वविभूतिरूपः ॥ ३६ ॥ ॥ ॥ ॥

महेश्वरःशिवः ॥ ३७ ॥ शिवोब्रह्माणमाह ॥ मामिति ॥ एकादशेति एकादशआसमंताद्रुद्राइत्यर्थः ॥ ३८ ॥ यथापूर्वमिति ॥ धातायथापूर्वमकल्पयदि तिश्रुतेः ॥ ३९ ॥ ४० ॥ रसायरसगुणस्वरूपाय ॥ ४१ ॥ सुरभिणेसुगंधस्वरूपाय ॥ स्पर्शेति ॥ स्पर्शगुणस्वरूपायेत्यर्थः ॥ ४२ ॥ पशूनांजीवानां ॥

तस्यतद्वचनंश्रुत्वाव्याजहारमहेश्वरः ॥ स्पृशन्कराभ्यांब्रह्माणंसुमुखाभ्यांसुरेश्वरः ॥ ३७॥ मांविद्धिपरमात्मानंतव पुत्रत्वमागतम् ॥ एतेचैकादशारुद्रास्त्वांसुरक्षितुमागताः ॥ ३८॥ तस्मात्तीव्रामिमांमूर्च्छांविधूयमदनुग्रहात् ॥ प्रबुद्ध श्चयथापूर्वंप्रजावैस्त्रष्टुमर्हसि ॥ ३९ ॥ एवंभगवताप्रोक्तोब्रह्माप्रीतमनाह्यभूत् ॥ नामाष्टकेनविश्वात्मातुष्टावपरमेश्व रम् ॥ ४० ॥ ब्रह्मोवाच ॥ नमस्तेभगवन्रुद्रभास्करामिततेजसे ॥ नमोभवायदेवायरसायांबुमयात्मने ॥ ४१ ॥ शर्वायक्षितिरूपायसदासुरभिणेनमः ॥ ईशायवायवेतुभ्यंनमःस्पर्शमयात्मने ॥ ४२ ॥ पशूनांपतयेचैवपावकाया तितेजसे ॥ भीमायव्योमरूपायशब्दमात्रायतेनमः ॥ ४३ ॥ उग्रायोग्रस्वरूपाययजमानात्मनेनमः ॥ महादेवाय सोमायनमोऽस्त्वमृतमूर्तये ॥ ४४ ॥ एवंस्तुत्वामहादेवंब्रह्मालोकपितामहः ॥ प्रार्थयामासविश्वेशंगिराप्रणतिपूर्वया ॥ ४५ ॥ भगवन्भूतभव्येशममपुत्रमहेश्वर ॥ सृष्टिहेतोस्त्वमुत्पन्नोममांगेऽनंगनाशन ॥ ४६ ॥ तस्मान्महतिकार्ये ऽस्मिन्व्यापृतस्यममप्रभो ॥ साहाय्यंकुरुसर्वत्रस्त्रष्टुमर्हसिसंप्रजाः ॥ ४७ ॥ तेनैवंयाचितोदेवोरुद्रस्त्रिपुरमर्दनः ॥ बाढमित्येवतांवाणींप्रतिजग्राहशंकरः ॥ ४८ ॥ ततःसभगवान्ब्रह्माहृष्टस्तमभिवंद्यच ॥ स्त्रष्टुंतेनाऽभ्यनुज्ञातस्तथा ऽन्याश्चाऽसृजत्प्रजाः ॥ ४९ ॥ मरीचिभृग्वंगिरसःपुलस्त्यंपुलहंक्रतुम् ॥ दक्षमत्रिंवसिष्ठंचसोऽसृजन्मनसैवच ॥५०॥ पुरस्तादसृजद्ब्रह्माधर्मंसंकल्पमेवच ॥ इत्येतेब्रह्मणःपुत्राद्वादशादौप्रकीर्तिताः ॥ ५१ ॥ सहरुद्रेणसंभूताःपुराणागृ हमेधिनः ॥ तेषांद्वादशवंशाःस्युर्दिव्यादेवगणार्चिताः ॥ ५२ ॥ प्रजावंतःक्रियावंतोमहर्षिभिरलंकृताः ॥ अथदेवा सुरपितॄन्मनुष्यांश्चचतुष्टयम् ॥ ५३ ॥ ॥ ॥ ॥

॥ ४३ ॥ ४४ ॥ ४५ ॥ ममांगेमल्ललाटे ॥ ४६ ॥ ४७ ॥ तेनब्रह्मणा ॥ तांब्रह्मोक्तां ॥ ४८ ॥ तेनशंकरेण ॥ ४९ ॥ काःप्रजाअसृजत्ताआह ॥ मरीचीति ॥ ५० ॥ पुरस्तात्सर्वसृष्टेःपूर्वम् ॥ धर्मंवेदोदितं ॥ संकल्पंमानसंकर्म ॥ ५१ ॥ गृहमेधिनःगृहस्थाश्रमयुक्ताः ॥ तेषांब्रह्मपुत्राणां ॥ ५२ ॥ ५३ ॥



Indira Gandhi National Centre for the Arts

विधिःब्रह्मा ॥ ५४ ॥ कथंदेवादीनसृजत्तदाह ॥ मुखादिति ॥ उपपक्षतःकक्षाप्रदेशात् ॥ जघनात्कटेरधोभागात् ॥ प्रजनात्शिश्नस्थानात् ॥ ५५ ॥ अधमांसृष्टिमाह॥अवस्करइति॥अवस्करेमलोत्सर्गस्थानात्॥५६॥पक्षतःपार्श्वतः॥वक्षसः॥उरःस्थलात्॥५७॥५८॥तस्यब्रह्मणः॥५९॥ पूर्वादिमुखक्रमेणवेदादीनामुत्पत्तिमाह ॥ गायत्रीमिति ॥ ऋचंऋग्वेदं ॥ गायत्रींगायत्र्याख्यंछंदः ॥ त्रिवृत्स्तोमोरथंतरंचसामविशेषौ ॥ अग्निष्टोमंप्रथमंक्रतुं ॥ ६० ॥ यजूंषि

सहरुद्रेणसिसृक्षुरंभस्येतानिवैविधिः ॥ सृष्ट्यर्थंवैसमाधायब्रह्मात्मानमयूयुजत् ॥ ५४ ॥ मुखादजनयद्देवान्पितॄंश्चैवोपपक्षतः ॥ जघनादसुरान्सर्वान्प्रजनादपिमानुषान् ॥ ५५ ॥ अवस्करेक्षुधाविष्टाराक्षसास्तस्यजज्ञिरे ॥ पुत्रास्तमोरजःप्रायाबलिनस्तेनिशाचराः ॥ ५६ ॥ सर्पायक्षास्तथाभूतागंधर्वाःसंप्रजज्ञिरे ॥ वयांसिपक्षतःसृष्टाःपक्षिणोवक्षसोऽसृजत् ॥ ५७ ॥ मुखतोऽजांस्तथापार्श्वादुरगांश्चविनिर्ममे ॥ पद्भ्यांचाऽश्वान्समातंगान्शरभान्गवयान्मृगान् ॥ ५८ ॥ उष्ट्रानश्वतरांश्चैवन्यंकूनन्यांश्चजातयः ॥ ओषध्यःफलमूलानिरोमभ्यस्तस्यजज्ञिरे ॥ ५९ ॥ गायत्रींचऋचंचैवत्रिवृत्स्तोमंरथंतरम् ॥ अग्निष्टोमंचयज्ञानांनिर्ममेप्रथमान्मुखात् ॥ ६० ॥ यजूंषित्रैष्टुभंछंदस्तोमंपंचदशंतथा ॥ बृहत्सामतथोक्थ्यंचदक्षिणादसृजन्मुखात् ॥ ६१ ॥ सामानिजगतीछंदःस्तोमंसप्तदशंतथा॥ वैरूपमतिरात्रंचपश्चिमादसृजन्मुखात् ॥ ६२ ॥ एकविंशमथर्वाणमाप्तोर्यामाणमेवच ॥ अनुष्टुभंसवैराजमुत्तरादसृजन्मुखात् ॥ ६३ ॥ उच्चावचानिभूतानिगात्रेभ्यस्तस्यजज्ञिरे ॥ यक्षाःपिशाचागंधर्वास्तथैवाऽप्सरसांगणाः ॥ ॥ ६४ ॥ नरकिंनररक्षांसिवयःपशुमृगोरगाः ॥ अव्ययंचैवयदिदंजगत्स्थावरजंगमम् ॥ ६५ ॥ तेषांवैयानिकर्माणिप्राक्सृष्ट्यांप्रतिपेदिरे ॥ तान्येवतेप्रपद्यंतेसृज्यमानाःपुनःपुनः ॥ ६६ ॥ हिंस्राहिंस्रेमृदुक्रूरेधर्माधर्मावृतानृते ॥ तद्भाविताःप्रपद्यंतेतस्मात्तत्तस्यरोचते ॥ ६७ ॥ ॥ ॥ ॥ ॥

यजुर्वेदं ॥ पंचदशंसामपृष्ठ्यंविशेषं ॥ उक्थ्यंक्रतुविशेषम् ॥ ६१ ॥ सामानिसामवेदं ॥ सप्तदशंपृष्ठ्यं ॥ वैरूपंसामविशेषं ॥ अतिरात्रंक्रतुं ॥ ६२ ॥ एकविंशंपृष्ठ्यं ॥ आप्तोर्यामाणंक्रतुं ॥ वैराजंसाम ॥ ६३ ॥ तस्यब्रह्मणः ॥ ६४ ॥ अव्ययंसर्वथाविनाशशून्यम् ॥ ६५ ॥ तेषांदेवादीनां ॥ तेदेवादयः ॥ ॥ ६६ ॥ कानिकर्माणितान्याह ॥ हिंस्रेति ॥ ऋतानृतेसत्यासत्ये ॥ तद्भावितास्तत्कर्मप्रयुक्ताः ॥ तत्स्वकर्मानुरूपमाचरणं ॥ तस्यप्राणिनः ॥ ६७ ॥

इंद्रियार्थेषुइंद्रियेष्वर्थेषुचेत्यर्थः ॥ मुक्तिष्विति ॥ सारूप्यादिभेदेनेतिभावः ॥ विनियोगंभोगार्थेप्रवर्तनं ॥ ६८ ॥ प्राकृतानांप्रकृतिसंभवानाम् ॥ नामशब्दाः ॥ रूपमाकारः ॥ वेदशब्देभ्यइति ॥ योवेदेभ्योऽखिलंजगन्निर्ममइत्याद्युक्तेः ॥ ६९ ॥ आर्षाणिवेदप्रणीतानि ॥ दृष्टयःज्ञानानि ॥ शर्वर्यंतेप्रलयांते ॥ प्रसूतानामुत्पन्नानांमध्ये ॥ एभ्यःपूर्वसृष्टेभ्यः ॥ ७० ॥ पर्ययेसृष्ट्यंतरे ॥ भावाःपदार्थाः ॥ ७१ ॥ स्वयंभुवःब्रह्मणः ॥ ७२ ॥ ब्रह्माणंवर्णयति ॥ चंद्रेति ॥

महाभूतेषुनानात्वमिंद्रियार्थेषुमुक्तिषु ॥ विनियोगंचभूतानांधातैवविदधत्स्वयम् ॥ ६८ ॥ नामरूपंचभूतानांप्राकृतानांप्रपंचनम् ॥ वेदशब्देभ्यएवादौनिर्ममेऽसौपितामहः ॥ ६९ ॥ आर्षाणिचैवनामानियाश्चवेदेषुदृष्टयः ॥ शर्वर्यंतेप्रसूतानांतान्येवैभ्योददावजः ॥ ७० ॥ यथर्तुष्वृतुलिंगानिनानारूपाणिपर्यये ॥ दृश्यंतेतानितान्येवतथाभावायुगादिषु ॥ ७१ ॥ इत्येषकरणोद्भूतोलोकसर्गःस्वयंभुवः ॥ महदाद्योविशेषांतोविकारःप्रकृतेःस्वयम् ॥ ७२ ॥ चंद्रसूर्यप्रभाजुष्टोग्रहनक्षत्रमंडितः ॥ नदीभिश्चसमुद्रैश्चपर्वतैश्चसमंडितः ॥ ७३ ॥ पुरैश्चविविधैरम्यैःस्फीतैर्जनपदैस्तथा ॥ तस्मिन्ब्रह्मवनेऽव्यक्तोब्रह्माचरतिसर्ववित् ॥ ७४ ॥ अव्यक्तबीजप्रभवईश्वरानुग्रहेस्थितः ॥ बुद्धिस्कंधमहाशाखइंद्रियांतरकोटरः ॥ ७५ ॥ महाभूतप्रमाणश्चविशेषामलपल्लवः ॥ धर्माधर्मसुपुष्पाढ्यःसुखदुःखफलोदयः ॥ ७६ ॥ आजीव्यःसर्वभूतानांब्रह्मवृक्षःसनातनः ॥ द्यांमूर्धानंतस्यविप्रावदंतिखंवैनाभिंचंद्रसूर्यौचनेत्रे ॥ दिशःश्रोत्रेचरणौचक्षितिंचसोऽचिंत्यात्मासर्वभूतप्रणेता ॥ ७७ ॥ वक्त्रात्तस्यब्राह्मणाःसंप्रसूतास्तद्वक्षसःक्षत्रियाःपूर्वभागात् ॥ वैश्याऊरुभ्यांतस्यपद्भ्यांचशूद्राःसर्वेवर्णागात्रतःसंप्रसूताः ॥ ७८ ॥ इतिश्रीशिवमहापुराणेवायवीयसंहितायांपूर्वभागेसृष्टिनिरूपणंनामदशमोऽध्यायः ॥ १० ॥ ॥ ॥ ॥

॥ ७३ ॥ तस्मिन्पूर्वोक्ते ॥ ७४ ॥ ब्रह्माणंवृक्षत्वेनरूपयति ॥ अव्यक्तेति ॥ ७५ ॥ ७६ ॥ आजीव्यःउपजीव्यः ॥ तस्यविराड्रूपंवर्णयति ॥ द्यामिति ॥ खमंतरिक्षं ॥ ७७ ॥ वक्त्रादिति ॥ ब्राह्मणोस्यमुखमासीत् ॥ तस्मात्तेमुख्यामुखतोह्यसृज्यंतेत्यादिश्रुतेः ॥ वक्षसइति ॥ वक्षस्थलस्यपूर्वप्रदेशादित्यर्थः ॥ ॥ ७८ ॥ इतिश्रीशिवमहापुराणवायवीयसंहिताटीकायांसारबोधिन्यांपूर्वभागेसृष्टिनिरूपणंनामदशमोऽध्यायः ॥ १० ॥ ॥



Indira Gandhi National Centre for the Arts

ओंनमःशिवाय ॥ ब्रह्मविष्णुमहेशानांपरस्परवशेस्थितिः ॥ ब्रह्मणोरुद्रसंभूतिरेतदेकादशेस्थितम् ॥ १ ॥ परमात्मनइति ॥ आज्ञयाजातेतिशेषः ॥ १ ॥
॥ २ ॥ ३ ॥ तौब्रह्मविष्णू ॥ ४ ॥ ५ ॥ ६ ॥ परस्परामिति ॥ अंगभूतावितिशेषः ॥ ७ ॥ गुणप्रधानभावेनस्वस्वामिभावेनपरस्परात्परस्परस्मात् ॥८॥

ऋषयऊचुः ॥ भवताकथितासृष्टिर्भवस्यपरमात्मनः ॥ चतुर्मुखमुखात्तत्रसंशयोनःप्रजायते ॥ १ ॥ देवश्रेष्ठोविरूपाक्षोदीप्तःशूलधरोहरः ॥ कालात्माभगवान्रुद्रःकपर्दीनीललोहितः ॥ २ ॥ सब्रह्मकमिमंलोकंसविष्णुंचसपावकम् ॥ यःसंहरतिसंक्रुद्धोयुगांतेसमुपस्थिते ॥ ३ ॥ यस्यब्रह्माचविष्णुश्चप्रणामंकुरुतोभयात् ॥ लोकसंकोचकस्यास्ययस्यतौवशवर्तिनौ ॥ ४ ॥ योऽयंदेवःस्वकादंगाद्ब्रह्मविष्णूपुराऽसृजत् ॥ सएवहितयोर्नित्यंयोगक्षेमकरःप्रभुः ॥ ५ ॥ सकथंभगवान्रुद्रआदिदेवःपुरातनः ॥ पुत्रत्वमगमच्छंभुर्ब्रह्मणोऽव्यक्तजन्मनः ॥ ६ ॥ प्रजापतिश्चविष्णुश्चरुद्रस्यतौपरस्परम् ॥ सृष्टौपरस्परस्यांऽगादितिप्रागपिशुश्रुम ॥ ७ ॥ कथंपुनरशेषाणांभूतानांहेतुभूतयोः ॥ गुणप्रधानभावेनप्रादुर्भावःपरस्परात् ॥ ८ ॥ नाऽपृष्टंभवताकिंचिन्नाऽश्रुतंचकथंचन ॥ भगवच्छिष्यभूतेनभवतासकलंश्रुतम् ॥ ९ ॥ यथाहभगवान्ब्रह्मावदत्वमपिनस्तथा ॥ सर्वमेतद्यथावृत्तंवक्तुमर्हसिमारुत ॥ १० ॥ सूतउवाच ॥ एवंपृष्टःसभगवान्वायुराकाशसंभवः ॥ सर्वमेतत्समासेनमुनीनामवदद्विभुः ॥ ११ ॥ वायुरुवाच ॥ स्थानेपृष्टमिदंविप्राभवद्भिःप्रश्नकोविदैः ॥ इदमेवपुरापृष्टोममप्राहपितामहः ॥ १२ ॥ तदहंसंप्रवक्ष्यामियथारुद्रसमुद्भवः ॥ यथाचपुनरुत्पत्तिर्ब्रह्मविष्ण्वोःपरस्परम् ॥ १३ ॥ त्रयस्तेकरणात्मानोजाताःसाक्षान्महेश्वरात् ॥ चराचरस्यविश्वस्यसर्गस्थित्यंतहेतवः ॥ १४ ॥ परमैश्वर्यसंयुक्ताःपरमेश्वरभाविताः ॥ तच्छक्त्याधिष्ठितानित्यंतत्कार्यकरणक्षमाः ॥ १५ ॥ पित्रानियमिताःपूर्वंत्रयोपित्रिषुकर्मसु ॥ ब्रह्मासर्गेहरिस्त्राणेरुद्रःसंहरणेपुनः ॥ १६ ॥ तथाप्यन्योन्यमात्सर्यादन्योन्यातिशयाशिनः ॥ तपसातोषयित्वास्वंपितरंपरमेश्वरम् ॥ १७ ॥ ॥

॥ ९ ॥ १० ॥ ११ ॥ स्थानेयोग्यस्थले ॥ १२ ॥ १३ ॥ १४ ॥ तच्छक्त्यापरमेश्वरशक्त्या ॥ १५ ॥ पित्रापरमेश्वरेण ॥ १६ ॥ अन्योन्यातिशयाशिनःपरस्परोत्कर्षासहिष्णवः ॥ १७ ॥ ॥ ॥ ॥ ॥

परमेष्ठिनःपरमेश्वरस्य ॥ १८ ॥ १९ ॥ भवःरुद्रः ॥ २० ॥ २१ ॥ तेषांब्रह्मादीनाम् ॥ २२ ॥ मेघवाहनेएतन्नामके ॥ २३ ॥ आवहत्प्राप ॥ भावंभक्त्यतिशयं ॥ २४ ॥ सर्वात्मभावेनसर्वप्रकारेण ॥ २५ ॥ वैभवमैश्वर्यम् ॥ तेनाशिवेन ॥ २६ ॥ सब्रह्मायदब्रवीत्तदाह ॥ गच्छेति ॥ कारणंउत्पादनसा



लब्धासर्वात्मतातस्यप्रसादात्परमेष्ठिनः ॥ ब्रह्मनारायणौपूर्वंरुद्रःकल्पांतरेऽसृजत् ॥ १८ ॥ कल्पांतरेपुनर्ब्रह्मारुद्रविष्णूजगन्मयः ॥ विष्णुश्चभगवान्रुद्रंब्रह्माणमसृजत्पुनः ॥ १९ ॥ नारायणंपुनर्ब्रह्माब्रह्माणंचपुनर्भवः ॥ एवंकल्पेषुकल्पेषुब्रह्मविष्णुमहेश्वराः ॥ २० ॥ परस्परेणजायंतेपरस्परजयैषिणः ॥ तत्तत्कल्पांतवृत्तांतमधिकृत्यमहर्षिभिः ॥ २१ ॥ प्रभावःकथ्यतेतेषांपरस्परसमुद्भवात् ॥ शृणुतेमांकथांचित्रांपुण्यांपापप्रमोचनीम् ॥ २२ ॥ कल्पेतत्पुरुषेवृत्तांब्रह्मणःपरमेष्ठिनः ॥ पुरानारायणोनामकल्पेवैमेघवाहने ॥ २३ ॥ दिव्यंवर्षसहस्रंतुमेघोभूत्वावहद्धरम् ॥ तस्यभावंसमालक्ष्यविष्णोर्विश्वजगद्गुरुः ॥ २४ ॥ शर्वःसर्वात्मभावेनप्रददौशक्तिमव्ययाम् ॥ शक्तिंलब्ध्वातुसर्वात्माशिवात्सर्वेश्वरेश्वरात् ॥ २५ ॥ ससर्जभगवान्विष्णुर्विश्वंविश्वसृजासह ॥ विष्णोस्तद्वैभवंदृष्ट्वासृष्टस्तेनपितामहः ॥ २६ ॥ ईर्ष्ययापरयाग्रस्तःसहसन्निदमब्रवीत् ॥ गच्छविष्णोमयाज्ञातंतवसर्गस्यकारणम् ॥ २७ ॥ आवयोरधिकश्चास्तिसरुद्रोनास्तिसंशयः ॥ तस्यदेवादिदेवस्यप्रसादात्परमेष्ठिनः ॥ २८ ॥ स्रष्टात्वंभगवानाद्यःपालकःपरमार्थतः ॥ अहंचतपसाराध्यरुद्रंत्रिदशनायकम् ॥ २९ ॥ त्वयासहजगत्सर्वंस्रक्ष्याम्यत्रनसंशयः ॥ एवंविष्णुमुपालभ्यभगवानब्जसंभवः ॥ ३० ॥ एवंविज्ञापयामासतपसाप्राप्यशंकरम् ॥ भगवन्देवदेवेशविश्वेश्वरमहेश्वर ॥ ३१ ॥ तववामांगजोविष्णुर्दक्षिणांगभवोह्यहम् ॥ मयासहजगत्सर्वंतथाऽप्यसृजदच्युतः ॥ ३२ ॥ समत्सरादुपालब्धस्त्वदाश्रयबलान्मया ॥ मद्भावादधिकस्तस्यभावस्त्वयिमहेश्वर ॥ ३३ ॥ त्वत्तएवसमुत्पत्तिरावयोःसदृशीयतः ॥ तस्यभक्त्यायथापूर्वंप्रसादंकृतवानसि ॥ ३४ ॥ ॥ ॥ ॥

मर्थ्यम् ॥ २७ ॥ २८ ॥ २९ ॥ उपालभ्यनिर्भर्त्स्य ॥ ३० ॥ यद्विज्ञापयामासतदाह ॥ भगवन्निति ॥ ३१ ॥ ३२ ॥ सःविष्णुः ॥ भावोभक्त्यतिशयः ॥ ॥ ३३ ॥ सदृशीतुल्या ॥ तस्यविष्णोः ॥ ३४ ॥ ॥ ॥ ॥



Indira Gandhi National Centre for the Arts

तेनब्रह्मणा ॥ ३५ ॥ सईश्वरः ॥ ३६ ॥ कददर्शतदाह ॥ क्षीरेति ॥ ३७ ॥ तेनविष्णुना ॥ अनंतेति ॥ अनंतःशेषः ॥ तच्छरीररूपायांशय्यायाम् ॥ ३८॥
॥ ३९ ॥ धरेति ॥ धरयाभुवास्त्रीरूपयापादसंवाहनेकृतेनमृदुकरांभोजस्पर्शेनरक्तंपदांबुजंयस्यतं ॥४०॥ एकैकगुणयोगेनएकैकंनामभगवतःसंपन्नमित्या

तथाममापितत्सर्वंदातुमर्हसिशंकर ॥ इतिविज्ञापितस्तेनभगवान्भगनेत्रहा ॥ ३५ ॥ स्मयेनवेददौसर्वंतस्यापिस
घृणानिधिः ॥ लब्ध्वैवमीश्वरादेवब्रह्मासर्वात्मतांक्षणात् ॥ ३६ ॥ त्वरमाणोऽथसंगम्यददर्शपुरुषोत्तमम् ॥ क्षीरार्ण
वालयेशुभ्रेविमानेसूर्यसन्निभे ॥ ३७ ॥ हेमरत्नान्वितेदिव्येमनसातेननिर्मिते ॥ अनंतभोगशय्यायांशयानंपंक
जेक्षणम् ॥ ३८ ॥ चतुर्भुजमुदारांगंसर्वाभरणभूषितम् ॥ शंखचक्रधरंसौम्यंचंद्रबिंबसमाननम् ॥ ३९ ॥ श्रीवत्स
वक्षसंदेवंप्रसन्नमधुरस्मितम् ॥ धरामृदुकरांभोजस्पर्शरक्तपदांबुजम् ॥ ४० ॥ क्षीरार्णवेऽमृतमिवशयानंयोगनि
द्रया ॥ तमसाकालरुद्राख्यंरजसाकनकांडजम ॥ ४१ ॥ सत्वेनसर्वगंविष्णुंनिर्गुणत्वेमहेश्वरम् ॥ तंदृष्ट्वापुरुषंब्रह्मा
प्रगल्भमिदमब्रवीत् ॥ ४२ ॥ ग्रसामित्वामहंविष्णोत्वमात्मानंयथापुरा ॥ तस्यतद्वचनंश्रुत्वाप्रतिबुध्यपितामहम् ॥
॥ ४३ ॥ उदैक्षतमहाबाहुःस्मितमीषच्चकारच ॥ तस्मिन्नवसरेविष्णुर्ग्रस्तस्तेनमहात्मना ॥ ४४ ॥ सृष्टश्चब्रह्मणा
सद्योभ्रुवोर्मध्यादयत्नतः ॥ तस्मिन्नवसरेसाक्षाद्भगवानिंदुभूषणः ॥ ४५ ॥ शक्तितयोरपिद्रष्टुमरूपोरूपमास्थितः ॥
प्रसादमतुलंकर्तुंपुरादत्तवरस्तयोः ॥ ४६ ॥ आगच्छत्तत्रयत्रैमौब्रह्मनारायणौस्थितौ ॥ अथतुष्टवतुर्देवंप्रीतौभीतौ
चकौतुकात् ॥ ४७ ॥ प्रणेमतुश्चबहुशोबहुमानेनदूरतः ॥ भवोपिभगवानेतावनुगृह्यपिनाकधृक् ॥ सादरंपश्यतोरे
वतयोरंतरधीयत ॥ ४८ ॥ इतिश्रीशिवमहापुराणेवायवीयसंहितायांपूर्वभागेशेषशायिनारायणवर्णनंनामैकादशो
ध्यायः ॥ ११ ॥ वायुरुवाच ॥ प्रतिकल्पंप्रवक्ष्यामिरुद्राविर्भावकारणम् ॥ यतोविच्छिन्नसंतानाब्रह्मसृष्टिःप्रवर्तते ॥ १ ॥

ह ॥ तमसेति ॥ ४१ ॥ ४२॥ ब्रह्मायदब्रवीत्तदाह ॥ ग्रसामीति ॥ पुर्वसृष्ट्यंते ॥ तस्यब्रह्मणः ॥ ४३ ॥ तेनब्रह्मणा ॥ ४४ ॥ ४५ ॥ तयोःविष्णुब्रह्मयोः ॥
॥ ४६ ॥ ४७ ॥ ४८ ॥ इतिश्रीशैवमहापुराणवायवीयसंहिताटीकायांसारबोधिन्यांपूर्वभागेशेषशायिवर्णनंनामैकादशोऽध्यायः ॥ ११ ॥ ओंनमःशिवाय
॥ रुद्रोरुद्रान्स्वसदृशान्सृष्ट्वाब्रह्माणमादिशत् ॥ स्रष्टुमन्यदिदंवृत्तंद्वादशेत्रनिरूप्यते ॥ १ ॥ १ ॥

॥

Indira Gandhi National Centre for the Arts

अवृद्धिहेतोः अवृद्धिरूपाद्धेतोः ॥ २ ॥ तस्यब्रह्मणः ॥ ३ ॥ अनुजः सूनुः ॥ ४ ॥ भूतसंकोचकः जगत्संहारी ॥ ५ ॥ परमेश्वरभावितः परमेश्वरप्रेरितः ॥ तच्छ त्त्याशिवशक्त्या ॥ तच्चिन्हैः शिवचिन्हैः ॥ ६ ॥ उक्तमेवविवृणोति ॥ तन्नामेति ॥ ७ ॥ चंद्रावयवश्चंद्रखंडः ॥ भुजंगेति ॥ भुजंगाएवहारादयोयस्यस इत्यर्थः ॥ मुंजमेखलः मुंजतृणमयकटिसूत्रः ॥ ८ ॥ जलंधरोदेवविशेषः ॥ ९ ॥ भग्नेति ॥ भग्नदंष्ट्रांकुरैः आक्रांताः प्रांतभागायस्यअतएवतादृशः कांतः रमणी

कल्पेकल्पेप्रजांसृष्ट्वाब्रह्माब्रह्मांडसंभवः ॥ अवृद्धिहेतोर्भूतानांमुमोहभृशदुःखितः ॥ २ ॥ तस्यदुःखप्रशांत्यर्थंप्रजा नांचविवृद्धये ॥ तत्तत्कल्पेषुकालात्मारुद्रोरुद्रगणाधिपः ॥ ३ ॥ निर्दिष्टः परमेशेनमहेशोनीललोहितः ॥ पुत्रोभूत्वा ऽनुगृण्हातिब्रह्माणंब्रह्मणोऽनुजः ॥ ४ ॥ सएवभगवानीशस्तेजोराशिरनामयः ॥ अनादिनिधनोधाताभूतसंकोच कोविभुः ॥ ५ ॥ परमैश्वर्यसंयुक्तः परमेश्वरभावितः ॥ तच्छक्त्याधिष्ठितः शश्वत्तच्चिन्हैरपिचिन्हितः ॥ ६ ॥ तन्नाम नामातद्रूपस्तत्कार्यकारणक्षमः ॥ तत्तुल्यव्यवहारश्चतदाज्ञापरिपालकः ॥ ७ ॥ सहस्रादित्यसंकाशश्चंद्रावयवभू षणः ॥ भुजंगहारकेयूरवलयोमुंजमेखलः ॥ ८ ॥ जलंधरविरंचींद्रकपालशकलोज्वलः ॥ गंगातुंगतरंगार्द्रपिंगला ननमूर्धजः ॥ ९ ॥ भग्नदंष्ट्रांकुराक्रांतप्रांतकांतधराधरः ॥ सव्यश्रवणपाशांतमंडलीकृतकुंडलः ॥ १० ॥ महावृष भनिर्याणोमहाजलदनिःस्वनः ॥ महानलसमप्रख्योमहाबलपराक्रमः ॥ ११ ॥ एवंघोरमहारूपोब्रह्मपुत्रोमहेश्व रः ॥ विज्ञानंब्रह्मणेदत्वासर्गेसहकरोतिच ॥ १२ ॥ तस्माद्रुद्रप्रसादेनप्रतिकल्पंप्रजापतेः ॥ प्रवाहरूपतोनित्याप्र जासृष्टिः प्रवर्तते ॥ १३ ॥ कदाचित्प्रार्थितः स्रष्टुंब्रह्मणानीललोहितः ॥ स्वात्मनासदृशान्सर्वान्ससर्जमनसाविभुः ॥ १४ ॥ कपर्दिनोनिरातंकान्नीलग्रीवांस्त्रिलोचनान् ॥ जरामरणनिर्मुक्तान्दीप्तशूलवरायुधान् ॥ १५ ॥ तैस्तुसं छादितंसर्वंचतुर्दशविधंजगत् ॥ तान्दृष्ट्वाविविधान्रुद्रान्रुद्रमाहपितामहः ॥ १६ ॥ नमस्तेदेवदेवेशमास्राक्षीरी दृशीः प्रजाः ॥ अन्याः सृजहभद्रंतेप्रजामृत्युसमन्विताः ॥ १७ ॥ ॥ ॥

यः धराधरः कैलासपर्वतोयस्य ॥ १० ॥ महेति ॥ महावृषभएवनिर्याणंगमनसाधनंयस्यसइत्यर्थः ॥ प्रख्याकांतिः ॥ ११ ॥ प्रवाहरूपतः धारावाहिकया ॥ १३ ॥ नीललो हितः रुद्रः ॥ १४ ॥ तेषांस्वरूपमाह ॥ कपर्दिनइति ॥ निरातंकान्निर्भयान् ॥ १५ ॥ चतुर्दशविधंचतुर्दशभुवनात्मकम् ॥ १६ ॥ ईदृशीः मृत्युरहिताः ॥ १७ ॥



Indira Gandhi National Centre for the Arts

परमेश्वरोरुद्रः ॥१८॥ याज्ञिकाःसृष्टियज्ञेनचरंतः॥१९॥ विश्वकर्माणंब्रह्माणं ॥ निवृत्तात्मात्यक्तयत्नः ॥ व्यतिष्ठतउदासीनोबभूव॥२०॥अशुभाःजरामरण युक्ताः ॥ देवोरुद्रः ॥ २१ ॥ इतिश्रीशिवमहापुराणवायवीयसंहिताटीकायांसारबोधिन्यांपूर्वभागेरुद्रोत्पत्तिवर्णनंनामद्वादशोऽध्यायः ॥ १२ ॥ ओनमः शिवाय ॥ ब्रह्माप्रजाविवृद्ध्यर्थमर्धनारीश्वरेश्वरम् ॥ तपसातोषयामासवर्ण्यतेतत्त्रयोदशे ॥ १ ॥ वेधसःब्रह्मणः ॥ मैथुनजांस्त्रीपुरुषसंगजाम् ॥१॥ ननुपूर्व

इत्युक्तःप्रहसन्प्राहब्रह्माणंपरमेश्वरः ॥ नास्तिमेतादृशःसर्गःसृजत्वमशुभाःप्रजाः ॥ १८ ॥ येत्विमेमनसासृष्टाम
हात्मानोमहाबलाः ॥ चरिष्यंतिमयासार्धंसर्वएवहियाज्ञिकाः ॥ १९ ॥ इत्युक्त्वाविश्वकर्माणंविश्वभूतेश्वरोहरः ॥
सहरुद्रैःप्रजासर्गान्निवृत्तात्माव्यतिष्ठत ॥ २० ॥ ततःप्रभृतिदेवोऽसौनप्रसूतेशुभाःप्रजाः ॥ ऊर्ध्वरेताःस्थितःस्था
णुर्यावदाभूतसंप्लवम् ॥ २१ ॥ इतिश्रीशिवमहापुराणेवायवीयसंहितायांपूर्वभागेरुद्रोत्पत्तिर्नामद्वादशोऽध्यायः॥
॥ १२ ॥ वायुरुवाच ॥ यदापुनःप्रजाःसृष्टानव्यवर्धंतवेधसः ॥ तदामैथुनजांसृष्टिंब्रह्माकर्तुममन्यत ॥ १ ॥ ननिर्ग
तंपुरायस्मान्नारीणांकुलमीश्वरात् ॥ तेनमैथुनजांसृष्टिंनशशाकपितामहः ॥ २ ॥ ततःसविदधेबुद्धिमर्थनिश्चयगा
मिनीम् ॥ प्रजानामेववृद्ध्यर्थंप्रष्टव्यःपरमेश्वरः ॥ ३ ॥ प्रसादेनविनातस्यनवर्धेरन्निमाःप्रजाः ॥ एवंसंचिंत्यविश्वा
त्मातपःकर्तुंप्रचक्रमे ॥ ४ ॥ तदाद्यापरमाशक्तिरनंतालोकभाविनी ॥ आद्यासूक्ष्मतराशुद्धाभावगम्यामनोहरा ॥
॥ ५ ॥ निर्गुणानिष्प्रपंचाचनिष्कलानिरुपप्लवा ॥ निरंतरतरानित्यानित्यमीश्वरपार्श्वगा ॥ ६ ॥ तयापरमयाश
क्त्याभगवंतंत्रियंबकम् ॥ संचिंत्यहृदयेब्रह्माततापपरमंतपः ॥ ७ ॥ तीव्रेणतपसातस्ययुक्तस्यपरमेष्ठिनः ॥ अचि
रेणैवकालेनपितासंप्रतुतोषह ॥ ८ ॥ ॥ ॥ ॥ ॥

मेवमैथुनजांसृष्टिंकुतोनचकारेतितत्राह ॥ ननिर्गतमिति ॥ ईश्वरात्शिवात् ॥ सृष्टिमिति ॥ कर्तुमितिशेषः ॥२॥ बुद्धिंविचारं ॥ अर्थनिश्चयगामिनीमर्थ निश्चयकारिणीम् ॥ तस्याआकारमाह ॥ प्रजानामिति ॥ ३ ॥ तस्यपरमेश्वरस्य ॥ ४ ॥ तदातपःसमयेआद्यामुख्या ॥ लोकभाविनीलोककर्त्री ॥ भावग म्याभक्त्यतिशयप्राप्या ॥ ५ ॥ निरंतरतरेति॥अंतरमीश्वराद्भेदःसर्वथातद्रहितेत्यर्थःईश्वरपार्श्वगाशिवसमीपगा ॥ ६ ॥ शक्त्येति ॥ शक्त्यासहेत्यर्थः ॥ ७ ॥ पिताशिवः ॥ ८ ॥ ॥ ॥ ॥ ॥ ॥

Indira Gandhi National Centre for the Arts

कामपीति ॥ कामपिकल्पितांमूर्तिंआविश्यअनुप्रविश्येत्यर्थः ॥ ९ ॥ अनिर्देश्यमिति ॥ अकृतात्मभिःअकृतश्रवणादिप्रयत्नैरनिर्देश्यंनिर्देष्टुमशक्यमतएव अदृश्यमज्ञेयमित्यर्थः ॥ १० ॥ ११ ॥ अनाभासंनभवत्याभासोज्ञानंयस्यतं ॥ १२ ॥ १३ ॥ संस्कारसंयुतैःच्युतसंस्कृतित्वादिदोषरहितैरलंकारयुक्तैरित्यर्थः ॥ १४ ॥ १५ ॥ सूक्तान्याह ॥ जयेति ॥ सर्वोत्कर्षेणवर्तस्वेत्यर्थः ॥ १६ ॥ एवंशिवंस्तुत्वैकेनदेवींस्तौति ॥ जयेति ॥ एवमग्रेपि॥दूरांगिदूरंमहत्अंगंय

ततःकेनचिदंशेनमूर्तिमाविश्यकामपि ॥ अर्धनारीश्वरोभूत्वाययौदेवःस्वयंहरः ॥९॥ तंदृष्ट्वापरमंदेवंतमसःपरमव्ययम् ॥ अद्वितीयमनिर्देश्यमदृश्यमकृतात्मभिः ॥ १० ॥ सर्वलोकविधातारंसर्वलोकेश्वरेश्वरम् ॥ सर्वलोकविधायिन्याशक्त्यापरमयायुतम् ॥ ११ ॥ अप्रतर्क्यमनाभासममेयमजरंध्रुवम् ॥ अचलंनिर्गुणंशांतमनंतमहिमास्पदम् ॥ १२ ॥ सर्वदंसर्वगंसर्वसदसद्व्यक्तिवर्जितम् ॥ सर्वोपमाननिर्मुक्तंशरण्यंशाश्वतंशिवम् ॥ १३ ॥ प्रणम्यदंडवद्ब्रह्मासमुत्थायकृतांजलिः ॥ श्रद्धाविनयसंपन्नैःश्राव्यैःसंस्कारसंयुतैः ॥ १४ ॥ यथार्थयुक्तसर्वार्थैर्वेदार्थपरिबृंहितैः ॥ तुष्टावदेवंदेवींचसूक्तैःसूक्ष्मार्थगोचरैः ॥ १५ ॥ श्रीब्रह्मोवाच ॥ जयदेवमहादेवजयेश्वरमहेश्वर ॥ जयसर्वगुणश्रेष्ठजयसर्वसुराधिप ॥ १६ ॥ जयप्रकृतिकल्याणिजयप्रकृतिनायिके ॥ जयप्रकृतिदूरांगिजयप्रकृतिसुंदरि ॥ ॥ १७ ॥ जयामोघमहामायजयामोघमनोरथ ॥ जयामोघमहालीलजयामोघमहाबल ॥ १८ ॥ जयविश्वजगन्मातर्जयविश्वजगन्मयि ॥ जयविश्वजगद्धात्रिजयविश्वजगत्सखि ॥ १९ ॥ जयशाश्वतिकैश्वर्यजयशाश्वतिकालय ॥ जयशाश्वतिकाकारजयशाश्वतिकानुग ॥ २० ॥ जयात्मत्रयनिर्मात्रिजयात्मत्रयपालिनि ॥ जयात्मत्रयसंहर्त्रिजयात्मत्रयनायिके ॥ २१ ॥ जयावलोकनायत्तजगत्कारणबृंहण ॥ जयोपेक्षाकटाक्षोत्थहुतभुग्भुक्तमौक्तिक ॥ ॥ २२ ॥ जयदेवाद्यविज्ञेयस्वात्मसूक्ष्मदृशोज्ज्वले ॥ जयस्थूलात्मशक्त्यंशव्याप्तविश्वचराचरे ॥ २३ ॥

स्याःसातत्संबुद्धौ ॥ प्रकृतिसुंदरीस्वभावसुंदरी ॥ १७ ॥ १८ ॥ विश्वजगत्सखिसर्वजगन्मित्रभूते ॥ १९ ॥ २० ॥ आत्मत्रयंब्रह्मादित्रितयं॥२१॥अवलोकनेति ॥ अवलोकनमात्रेणआयत्तानिअधीनानियानिजगत्कारणानिअव्यक्तादीनितेषांबृंहणप्रसारक ॥ उपेक्षेति ॥ उपेक्षानिग्रहस्तद्युक्तकटाक्षोत्थहुतभुजाभुक्तंध्वंसितंकामरूपमौक्तिकंयेनसः ॥ २२ ॥ देवादीति ॥ देवादिभिरप्यविज्ञेयोयःस्वात्मातद्गोचरसूक्ष्मदृशाउज्वले ॥ २३ ॥

नानेति ॥ अनेकप्रकारेणएकरूपेणचविन्यस्तःविश्वतत्त्वसमुच्चयोयेन ॥ असुरेति ॥ असुरशिरोनिष्ठानिअसुरशिरस्सुस्थितानिश्रेष्ठानुगकदंबकानियस्य ॥
॥२४॥ उपाश्रितेति ॥ भक्तरक्षणविधानकुशलेइत्यर्थः ॥ २५ ॥ प्रादेशिकेति ॥ ईषदैश्वर्यवीर्यशौर्ययुक्तानांमदस्यनाशकेत्यर्थः॥विश्वबहिर्भूतजगदसंबद्ध
॥ २६ ॥ प्रणीतेति ॥ प्रणीतानांउत्पादितानांपंचानामर्थानांपंचमहाभूतानांप्रयोगेणव्यवस्थापनेनपरमामृतपरब्रह्मस्वरूप ॥ पंचार्थेति ॥ पूर्वोक्तपंचार्था
नांविज्ञानंतदेवसुधास्रोतस्तद्रूपिणि ॥ २७ ॥ अनादीति ॥ अनादिमलरूपंयदज्ञानमाविद्यातदेवतमःपटलंतन्नाशायचंद्रिकारूपिणि ॥ २८ ॥ २९ ॥ प्रम

जयनानैकविन्यस्तविश्वतत्वसमुच्चय ॥ जयासुरशिरोनिष्ठश्रेष्ठानुगकदंबक ॥ २४ ॥ जयोपाश्रितसंरक्षासंविधानप
टीयसि ॥ जयोन्मूलितसंसारविषवृक्षांकुरोद्गमे ॥ २५ ॥ जयप्रादेशिकैश्वर्यवीर्यशौर्यविजृंभण ॥ जयविश्वबहिर्भूत
निरस्तपरवैभव ॥ २६ ॥ जयप्रणीतपंचार्थप्रयोगपरमामृत ॥ जयपंचार्थविज्ञानसुधास्रोतःस्वरूपिणि ॥ २७ ॥
जयातिघोरसंसारमहारोगभिषग्वर ॥ जयानादिमलाज्ञानतमःपटलचंद्रिके ॥ २८ ॥ जयत्रिपुरकालाग्नेजयत्रि
पुरभैरवि ॥ जयत्रिगुणनिर्मुक्तजयत्रिगुणमर्दिनि ॥ २९ ॥ जयप्रमथसर्वज्ञजयसर्वप्रबाधिके ॥ जयप्रचुरदिव्यांग
जयप्रार्थितदायिनि ॥ ३० ॥ क्वदेवतेपरंधामक्वयंक्वचनोवचः ॥ तथापिभगवन्भक्त्याप्रलपंतंक्षमस्वमां ॥ ३१ ॥
विज्ञाप्यैवंविधैःसूक्तैर्विश्वकर्माचतुर्मुखः ॥ नमश्चकाररुद्रायरुद्राण्यैचमुहुर्मुहुः ॥ ३२ ॥ इदंस्तोत्रवरंपुण्यंब्रह्मणास
मुदीरितम् ॥ अर्धनारीश्वरंनामशिवयोर्हर्षवर्द्धनम् ॥ ३३ ॥ यइदंकीर्तयेद्भक्त्यायस्यकस्यापिलिप्सया ॥ सतत्फल
मवाप्नोतिशिवयोःप्रीतिकारणात् ॥ ३४ ॥ सकलभुवनभूतभावनाभ्यांजननविनाशविहीनविग्रहाभ्यां ॥ नरवरयु
वतिवपुर्धराभ्यांसततमहंप्रणतोऽस्मिशंकराभ्याम् ॥३५॥ इतिश्रीशिवमहापुराणेवायवीयसंहितायांपूर्वभागेरुद्रब्र
ह्मसंवादेत्रयोदशोऽध्यायः ॥ १३ ॥ ॥ ॥ ॥ ॥

थसर्वशत्रुनाशक॥प्रचुरेति॥प्रचुरदिव्याङ्गेतिपाठः ॥३०॥३१॥३२॥३३॥ एतत्स्तोत्रकीर्तनफलमाह॥यइदमिति ॥ शिवयोःउमामहेश्वरयोः ॥ ३४ ॥ अ
र्धनारीनरेश्वरंवायुःप्रणमति ॥ सकलेति ॥ सकलभुवनभूतानांभावनाउत्पादनायाभ्यां ॥ जननेनि ॥ उत्पत्तिनाशाभ्यांविहीनौविग्रहौययोस्ताभ्यामि
त्यर्थः ॥ ३५ ॥ इतिश्रीशैवमहपुराणेवायवीयसंहिताटीकायांसारबोधिन्यांपूर्वभागेरुद्रब्रह्मसंवादेअर्धनारीनरेश्वरस्तुतिर्नामत्रयोदशोऽध्यायः ॥ १३ ॥

Indira Gandhi National Centre for the Arts

ओंनमःशिवाय ॥ ब्रह्मार्थितेनरुद्रेणसृष्टास्त्रीशक्तिरूपिणी ॥ प्रजाविवर्धिनीत्येवंवर्ण्यतेऽत्रचतुर्दशे ॥१॥१॥ अर्थेति ॥ अर्थेनसंपन्नानिपूर्णानिपदानियस्यांत
याधाचा ॥ राजलक्षणयुक्तयाराजवल्लक्षणंसंकेतकरणंतद्युक्तया ॥ अशेषविषयेति ॥ अशेषभुवनारंभेतिपाठांतरं ॥ २ ॥ विश्वकर्माणंब्रह्माणं ॥३॥ वाक्यस्यपूर्वा
ध्यायोक्तस्यगौरवंमहत्वं ॥ ४ ॥ यज्ज्ञातंतदेवाह ॥ प्रजानामिति ॥ ५ ॥ ६ ॥ कासादेवीतामाह ॥ यामिति ॥ ७ ॥ समाविरभवत्प्रादुर्भूतवती ॥ ८ ॥ इ

वायुरुवाच ॥ अथदेवोमहादेवोमहाजलदनादया ॥ वाचामधुरगंभीरविशदश्लक्ष्णवर्णया ॥ १ ॥ अर्थसंपन्नपदयारा
जलक्षणयुक्तया ॥ अशेषविषयारंभरक्षाविलयदक्षया ॥२॥ मनोहरतरोदारमधुरस्मितपूर्वया ॥ संबभाषेसुसंप्रीतो
विश्वकर्माणमीश्वरः ॥ ३ ॥ ईश्वरउवाच ॥ वत्सवत्समहाभागममपुत्रपितामह ॥ ज्ञातमेवमयासर्वंतववाक्यस्यगौर
वम् ॥ ४ ॥ प्रजानामेववृद्ध्यर्थंतपस्तप्तंत्वयाऽधुना ॥ तपसानेनतुष्टोऽस्मिददामिचतवेप्सितम् ॥ ५ ॥ इत्युक्त्वापर
मोदारःस्वभावमधुरंवचः ॥ ससर्जवपुषोभागाद्देवींदेववरोहरः ॥ ६ ॥ यामाहुर्ब्रह्मविद्वांसोदेवींदिव्यगुणान्विताम् ॥
परस्यपरमांशक्तिंभवस्यपरमात्मनः ॥ ७ ॥ यस्यानखलुविद्यंतेजन्ममृत्युजरादयः ॥ याभवानीभवस्यांगात्समावि
रभवत्किल ॥ ८ ॥ यस्यावाचोनिवर्तंतेमनसाचेंद्रियैःसह ॥ साभर्तुर्वपुषोभागाज्जातेवसमदृश्यत ॥ ९ ॥ यासाज
गदिदंकृत्स्नंमहिम्नाव्याप्यतिष्ठति॥शरीरिणीवसादेवीविचित्रासमलक्षिता ॥१०॥ सर्वंजगदिदंयैषासंमोहयतिमा
यया ॥ ईश्वरात्सैवजाताभूदजातापरमार्थतः ॥ ११ ॥ नयस्याःपरमोभावःसुराणामपिगोचरः ॥ विश्वामरेश्वराचै
वविभक्ताभर्तुरंगतः ॥ १२ ॥ तांदृष्ट्वापरमेशानींसर्वलोकमहेश्वरीम् ॥ सर्वज्ञांसर्वगांसूक्ष्मांसदसद्व्यक्तिवर्जिताम् ॥
॥ १३ ॥ परयानिखिलंभासाभासयंतीमिदंजगत् ॥ प्रणिपत्यमहादेवींप्रार्थयामासवैविराट् ॥ १४ ॥ ब्रह्मोवाच ॥
देविदेवेनसृष्टोऽहमाद्यौसर्वजगन्मयि ॥ प्रजासर्गेनियुक्तश्चसृजामिसकलंजगत् ॥ १५ ॥ मनसानिर्मिताःसर्वेदेवि
देवादयोमया ॥ नवृद्धिमुपगच्छंतिसृज्यमानाःपुनःपुनः ॥ १६ ॥ ॥ ॥

यमपिब्रह्मस्वरूपैवेत्याह ॥ यस्याइति ॥ भर्तुःशिवस्य ॥ ९ ॥ तस्याब्रह्मस्वरूपमेवाह ॥ येति ॥ १० ॥ परमार्थतःवस्तुतः ॥ ११ ॥ भावःस्वरूपं ॥ १२ ॥
॥ १३ ॥ विराट्ब्रह्मा ॥ १४ ॥ १५ ॥ १६ ॥ ॥ ॥ ॥



Indira Gandhi National Centre for the Arts

॥ १७ ॥ १८ ॥ सर्वेषामस्मदादीनां ॥ १९ ॥ प्रार्थयामिप्रार्थये ॥ २० ॥ भवार्दिनिसंसारनाशिनि॥ब्रह्मयोनिनावेदप्रकाशकेन ॥ २१ ॥ तांस्रष्टुंशक्तिं ॥२२॥
तस्यब्रह्मणः॥साभ्रुवोनिर्गताशक्तिःतथाकरोदितिशेषः॥२३॥ब्रह्मरूपिणीआद्याशक्तिः॥२४॥देवस्यशिवस्यदेवःशिवः भोगःरतिः॥२५॥प्रवर्ततेप्रवर्ततेस्मआ
ख्यानमुपसंहरति ॥ एतदिति ॥ २६ ॥ अनुषंगतःकथनप्रसंगात् ॥ एतदाख्यानकीर्तनफलमाह ॥ यइदमिति ॥ २७ ॥ इतिश्रीशैवमहापुराणेवायवीयसंहि

मिथुनप्रभवामेवकृत्वासृष्टिमतःपरम् ॥ संवर्धयितुमिच्छामिसर्वाएवममप्रजाः ॥ १७ ॥ ननिर्गतंपुरात्वत्तोनारीणां
कुलमव्ययम् ॥ तेननारीकुलंस्रष्टुंशक्तिर्ममनविद्यते ॥ १८ ॥ सर्वासामेवशक्तीनांत्वत्तःखलुसमुद्भवः ॥ तस्मात्सर्व
त्रसर्वेषांसर्वशक्तिप्रदायिनि ॥ १९ ॥ त्वामेववरदामद्यप्रार्थयामिसुरेश्वरीं ॥ चराचरविवृद्ध्यर्थमंशेनैकेनसर्वगे ॥
॥ २० ॥ दक्षस्यममपुत्रस्यपुत्रीभवभवार्दिनि ॥ एवंसायाचितादेवीब्रह्मणाब्रह्मयोनिना ॥ २१ ॥ शक्तिमेकांभ्रुवो
र्मध्यात्ससर्जात्मसमप्रभाम् ॥ तामाहप्रहसन्प्रेक्ष्यदेवदेववरोहरः ॥ २२ ॥ ब्रह्माणंतपसाराध्यकुरुतस्ययथेप्सित
म् ॥ तामाज्ञांपरमेशस्यशिरसाप्रतिगृह्यसा ॥ २३ ॥ ब्रह्मणोवचनाद्देवीदक्षस्यदुहिताऽभवत् ॥ दत्वैवमतुलांशक्तिंब्र
ह्मणेब्रह्मरूपिणी ॥ २४ ॥ विवेशदेहंदेवस्यदेवश्चांतरधीयत ॥ तदाप्रभृतिलोकेऽस्मिन्स्त्रियाभोगःप्रतिष्ठितः ॥ २५ ॥
प्रजासृष्टिश्चविप्रेंद्रामैथुनेनप्रवर्तते ॥ एतद्वःसर्वमाख्यातंदेव्याःशक्तिसमुद्भवम् ॥ २६ ॥ पुण्यमृद्धिकरंश्राव्यंभूतस
र्गानुषंगतः ॥ यइदंकीर्तयेन्नित्यंदेव्याःशक्तिसमुद्भवम् ॥ पुण्यंसर्वमवाप्नोतिपुत्रांश्चलभतेशुभान् ॥ २७ ॥ इतिश्री
शिवमहापुराणेवायवीयसंहितायांपूर्वभागेसृष्टिनिरूपणंनामचतुर्दशोऽध्यायः ॥१४॥ वायुरुवाच ॥ एवंलब्ध्वापरां
शक्तिमीश्वरादेवशाश्वतीम् ॥ मैथुनप्रभवांसृष्टिंकर्तुकामःप्रजापतिः ॥ १ ॥ स्वयमप्यर्धतोनारीचार्धेनपुरुषोऽभवत्
॥ यार्धेननारीसातस्माच्छतरूपाव्यजायत ॥ २ ॥ विराजमसृजद्ब्रह्मासोऽर्धेनपुरुषोविराट् ॥ सवैस्वायंभुवःपूर्वपुरु
षोमनुरुच्यते ॥ ३ ॥ ॥ ॥ ॥ ॥

तायांपूर्वभागेसृष्टिनिरूपणंनामचतुर्दशोऽध्यायः ॥१४॥ ॐनमःशिवाय ॥ ब्रह्मालब्धवरःशंभोःसर्गमैथुनजंव्यधात्॥स्वायंभुवादिद्वारेणेत्येवंपंचदशेस्थितम्
॥ १ ॥ शाश्वतींनित्यां ॥ १ ॥ स्वयमिति ॥ शिवरूपंदृष्ट्वातत्तादात्म्यभावनयास्वयमपितथैवाभवदित्यर्थः ॥ तस्मादर्धात् ॥ शतरूपाएतन्नाम्नी ॥ २ ॥ ३ ॥

IGNCA RAR ACC. No.
SANS 294.5 SHI V.3
IGNCA RAR ACC No
Indira Gandhi National Centre for the Arts

मनुंस्वायंभुवं ॥ ४ ॥ तस्मान्मनोः ॥ ५ ॥ ६ ॥ दक्षायब्रह्मपुत्राय ॥ रुचेरेतन्नाम्नः ॥ प्रत्यपादयत्अदात् ॥ ७ ॥ मिथुनंस्त्रीपुंसयुग्मं ॥ मानसस्यमानसपु
त्रस्य ॥ संवर्धितमिति ॥ यज्ञाद्भवतिपर्जन्यइत्याद्युक्तेरितिभावः ॥ ८ ॥ ९ ॥ तासांनामान्याह॥श्रद्धेति॥ १०॥दाक्षायणीःपूर्वोक्तादक्षकन्याः ॥ ताभ्यःत्रयो
दशभ्यः ॥ यवीयस्यःकनिष्ठाः ॥ ११ ॥ तासांनामान्याह ॥ ख्यातिरिति ॥ १२ ॥ १३ ॥ मुनयःभृग्वाद्याः ॥ कामाद्याइति॥तेचोक्तालिंगपुराणे ॥ कामो
दर्पोथनिलयःसंतोषोलाभएवच ॥ श्रुतंतुदंडःसमयोबोधश्चैवमहाद्युतिः ॥ अप्रमादश्चविनयोव्यवसायोद्विजोत्तमाः ॥ क्षेमःसुखंयशश्चैवधर्मपुत्राश्चतासु

सादेवीशतरूपातुतपःकृत्वासुदुश्चरम् ॥ भर्तारंदीप्तयशसंमनुमेवाभ्यपद्यत ॥ ४ ॥ तस्मात्तुशतरूपासापुत्रद्वयमसू
यत ॥ प्रियव्रतोत्तानपादौपुत्रौपुत्रवतांवरौ ॥ ५ ॥ कन्येद्वेचमहाभागेयाभ्यांजातास्त्विमाःप्रजाः ॥ आकूतिरेकावि
ज्ञेयाप्रसूतिरपरास्मृता ॥ ६ ॥ स्वायंभुवःप्रसूतिंतुददौदक्षायतांप्रभुः ॥ रुचेःप्रजापतेश्चैवआकूतिंप्रत्यपादयत् ॥
॥ ७ ॥ आकूत्यांमिथुनंजज्ञेमानसस्यरुचेःशुभम् ॥ यज्ञश्चदक्षिणाचैवयाभ्यांसंवर्धितंजगत् ॥ ८ ॥ स्वायंभुवसुता
यांतुप्रसूत्यांलोकमातरः ॥ चतस्रोविंशतिंकन्यादक्षस्त्वजनयत्प्रभुः ॥ ९ ॥ श्रद्धालक्ष्मीर्धृतिःपुष्टिस्तुष्टिर्मेधाक्रिया
तथा ॥ बुद्धिर्लज्जावपुःशांतिःसिद्धिःकीर्तिस्त्रयोदशी ॥ १० ॥ पत्न्यर्थंप्रतिजग्राहधर्मोदाक्षायणीःप्रभुः ॥ ताभ्यः
शिष्टायवीयस्यएकादशसुलोचनाः ॥ ११ ॥ ख्यातिःसत्यथसंभूतिःस्मृतिःप्रीतिःक्षमातथा ॥ सन्नतिश्चानुसूयाच
ऊर्जास्वाहास्वधातथा ॥ १२ ॥ भृगुःशर्वोमरीचिश्चअंगिराःपुलहःक्रतुः ॥ पुलस्त्योऽत्रिर्वसिष्ठश्चपावकःपितरस्त
था ॥ १३ ॥ ख्यात्याद्याजगृहुःकन्यामुनयोमुनिसत्तमाः ॥ कामाद्यास्तुयशोंतायेतेत्रयोदशसुसूनवः ॥ १४ ॥ धर्म
स्यजज्ञिरेतासुश्रद्धाद्यासुसुखोत्तराः ॥ दुःखोत्तराश्चहिंसायामधर्मस्यचसंततौ ॥ १५ ॥ ॥

वाइति ॥ विष्णुपुराणेतु श्रद्धाकामंचलादर्पंनियमंधृतिरात्मजं ॥ संतोषंचतथातुष्टिर्लोभंपुष्टिरसूयत ॥ मेधाश्रुतंक्रियादंडंनयंविनयमेवच ॥ बोधंबुद्धिस्त
थालज्जाविनयंवपुरात्मजं ॥ व्यवसायंप्रजज्ञेवैक्षेमंशांतिरसूयत ॥ सुखमृद्धिर्यशःकीर्तिरित्येतेधर्मसूनवइत्युक्तं ॥ १४ ॥ सुखोत्तराःसुखंउत्तरंउत्कृष्टंयेभ्य
स्तेसुखोत्तराःसुखोदर्काइत्यर्थः॥धर्मप्रतियोगितयाऽधर्मस्याप्युपास्थितौतत्संततिमाह॥दुःखोत्तराइति ॥ दुःखोदर्काइत्यर्थः ॥ हिंसायांअधर्मपत्न्यां॥ १५॥


Indira Gandhi National Centre for the Arts

उत्पन्नाइति ॥ हिंसायामितिसंबध्यते ॥ विष्णुपुराणेपि ॥ हिंसाभार्यात्वधर्मस्यतयोर्जज्ञेतथानृतं॥कन्याचनिकृतिस्ताभ्यांभयंनरकमेवच ॥ मायाचवेदनाचैवमिथुनंत्विदमेतयोः ॥ तयोर्जज्ञेथवैमायाम्मृत्युंभूतापहारिणं ॥ वेदनास्वसुतंवापिदुःखंजज्ञेथरौरवात् ॥ मृत्योर्व्याधिजराशोकतृष्णाक्रोधाश्चजज्ञिरे ॥दुःखोत्तराःस्मृताह्येतेसर्वेचाधर्मलक्षणाइति ॥ धर्माधर्मावपिब्रह्मपुत्रौ ॥ धर्मःस्तनाद्दक्षिणतोयत्रनारायणःस्वयं ॥ अधर्मःपृष्ठतोयस्मान्मृत्युर्लोकभयंकरइतिशुको

निकृत्यादयउत्पन्नाःपुत्राश्चाधर्मलक्षणाः ॥ नैषांभार्याश्चपुत्रावासर्वेह्यनियमाःस्मृताः ॥ १६ ॥ सएषतामसःसर्गोजज्ञेऽधर्मनियामकः ॥ यासादक्षस्यदुहितारुद्रस्यदयितासती ॥ १७ ॥ भर्तृनिंदाप्रसंगेनत्यक्त्वादाक्षायणींतनुं ॥ दक्षंचदक्षभार्यांचविनिंद्यसहबंधुभिः ॥ १८ ॥ सामेनायामाविरभूत्पुत्रीहिमवतोगिरेः ॥ रुद्रस्तुतांसतींदृष्ट्वारुद्रांस्त्वात्मसमप्रभान् ॥ १९ ॥ यथाऽसृजदसंख्यातांस्तथाकथितमेवच ॥ भृगोःख्यात्यांसमुत्पन्नालक्ष्मीर्नारायणप्रिया॥ ॥ २० ॥ देवौधातृविधातारौमन्वंतरविचारिणौ ॥ तयोर्वैपुत्रपौत्राद्याःशतशोऽथसहस्रशः ॥ २१ ॥ स्वायंभुवेंतरेऽतीताःसर्वेतेभार्गवामताः ॥ मरीचेरपिसंभूतिःपौर्णमासमसूयत ॥ २२ ॥ कन्याचतुष्टयंचैवमहीयांसस्तदन्वयाः॥ येषांवंशेसमुत्पन्नोबहुपुत्रःसकाश्यपः ॥ २३ ॥ स्मृतिश्चांऽगिरसःपत्नीजनयामासवैसुतौ ॥ आग्नीध्रंशरभंचैवतथाकन्याचतुष्टयम् ॥ २४ ॥ तदीयाःपुत्रपौत्राश्चयेऽतीतास्तेसहस्रशः ॥ प्रीत्यांपुलस्त्यभार्यायांदंतोग्निरभवत्सुतः ॥ ॥ २५ ॥ पूर्वजन्मनियोऽगस्त्यःस्मृतःस्वायंभुवेंतरे ॥ तत्संततीयाबहवःपौलस्त्याइतिविश्रुताः ॥ २६ ॥ क्षमातुसुषुवेपुत्रान्पुलहस्यप्रजापतेः ॥ कर्दमश्चासुरीयश्चसहिष्णुश्चेतितेत्रयः ॥ २७ ॥ त्रेताग्निवर्चसःसर्वेएषांवंशःप्रतिष्ठितः ॥ क्रतोःक्रतुसमान्पुत्रान्सन्नतिःसुषुवेसुतान् ॥ २८ ॥ नैषांभार्याश्चपुत्राश्चसर्वेतेह्यूर्ध्वरेतसः ॥ षष्टिस्तानिसहस्राणिवालखिल्याइतिस्मृताः ॥ २९ ॥ ॥ ॥ ॥

क्तेः ॥ एषांपुत्राणां ॥ अनियमाःसत्धर्मरहिताःअनिधनाःस्मृताइतिपाठांतरम् ॥ १६ ॥ अधर्मनियामकःपापप्रवर्तकः ॥१७॥ भर्तृनिंदाप्रसंगेनपित्रादिकृतशिवनिंदाप्रसंगेन ॥ दक्षभार्यांप्रसूतिं ॥१८॥ १९ ॥ २० ॥ धातृविधातारौएतन्नामकौ ॥ २१ ॥ अंतरेमन्वंतरे ॥ पौर्णमासंपुत्रं॥भार्गवाभृगुवंशजाः ॥२२॥ तदन्वयाःमरीच्यन्वयाः ॥ २३ ॥ २४ ॥ २५ ॥ संततीयाःसंततौभवाः ॥ २६ ॥ २७ ॥ पुत्रान्पुन्नामनरकात्त्रातॄन् ॥ २८ ॥ २९ ॥

॥ ६१ ॥ प्रजापतिसमुद्भवःब्रह्मसमुद्भवः ॥ ६२ ॥ संक्षेपेणराजवंशमाह ॥ राज्ञामिति ॥ ६३ ॥ ६४ ॥ ६५ ॥ अनुक्रांतैरनुक्रमेणकथितैःकिंप्रयोजन मित्यर्थः ॥ अन्यकीर्तनमिति ॥ इदंसंमतमित्यग्रिमेणसंबध्यते ॥ ६६ ॥ प्रभावद्योतनादपिईश्वरसामर्थ्यप्रकाशनादपीत्यर्थः ॥ तत्प्रविस्तरैःराजादिवंशकथन

नातिसंक्षेपतोविप्रानातिविस्तरतःक्रमात् ॥ वर्णितावैमयावंशादिव्यदेवगणान्विताः ॥ ६१ ॥ क्रियावंतःप्रजावंतोमहर्द्धिभिरलंकृताः ॥ प्रजानांसंनिवेशोयंप्रजापतिसमुद्भवः ॥ ६२ ॥ नहिशक्यःप्रसंख्यातुंवर्षकोटिशतैरपि ॥ राज्ञामपिचयोवंशोद्विधासोपिप्रवर्तते ॥ ६३ ॥ सूर्यवंशःसोमवंशइतिपुण्यतमःक्षितौ ॥ इक्ष्वाकुरंबरीषश्चययातिर्नहुषादयः ॥ ६४ ॥ पुण्यश्लोकाःश्रुतायेत्रतेपितद्वंशसंभवाः ॥ अन्येचराजऋषयोनानावीर्यपराक्रमाः ॥ ६५ ॥ किंतैःफलमनुक्रांतैरुक्तपूर्वैःपुरातनैः ॥ किंचेश्वरकथावृत्तायत्रतत्राऽन्यकीर्तनम् ॥ ६६ ॥ नसद्भिःसंमतंमत्वानोत्सहे बहुभाषितुम् ॥ प्रसंगादीश्वरस्यैवप्रभावद्योतनादपि ॥ सर्गादयोऽपिकथ्यंतइत्यलंतत्प्रविस्तरैः ॥ ६७ ॥ इतिश्रीशिवमहापुराणेवायवीयसंहितायांपूर्वभागेस्वायंभुववंशवर्णनंनामपंचदशोऽध्यायः ॥ १५ ॥ ऋषयऊचुः ॥ देवीदक्षस्यतनयात्यक्त्वादाक्षायणींतनुम् ॥ कथंहिमवतःपुत्रीमेनायामभवत्पुरा ॥ १ ॥ कथंचनिंदितोरुद्रोदक्षेणचमहात्मना ॥ निमित्तमपिकिंतत्रयेनस्यान्निंदितोभवः ॥ ॥ २ ॥ उत्पन्नश्चकथंदक्षोअपिशापाद्भवस्यतु ॥ चाक्षुषस्यांऽतरे पूर्वंमनोःप्रब्रूहिमारुत ॥ ३ ॥ वायुरुवाच ॥ शृण्वंतुकथयिष्यामिदक्षस्यलघुचेतसः ॥ वृत्तंपापात्प्रमादाच्चविश्वामरविदूषणम् ॥ ४ ॥ पुरासुरासुराःसर्वेसिद्धाश्चपरमर्षयः ॥ कदाचिद्द्रष्टुमीशानंहिमवच्छिखरंययुः ॥ ५ ॥ तदादेवश्च देवीचदिव्यासनगतावुभौ ॥ दर्शनंददतुस्तेषांदेवादीनांद्विजोत्तमाः ॥ ६ ॥ तदानीमेवदक्षोपिगतस्तत्रसहामरैः ॥ जामातरंहरंद्रष्टुंद्रष्टुंचात्मसुतांसतीम् ॥ ७ ॥ ॥ ॥ ॥

प्रपंचविस्तारैः ॥ ६७ ॥ इतिश्रीशिवमहापुराणवायवीयसंहिताटीकायांसारबोधिन्यांपूर्वभागेस्वायंभुववंशवर्णनंनामपंचदशोऽध्यायः ॥ १५ ॥ ओनमःशिवाय ॥ दक्षेणानादृतंशंभुंदृष्ट्वोमादक्षमागमत् ॥ यज्वानंपितरंतंचशप्त्वागाद्धिमवद्गिरिम् ॥ १ ॥ तच्छ्रुत्वाशंकरस्तत्रदक्षादिभ्योऽशपत्क्रुधा ॥ एतत्कथानकंदिव्यं षोडशेत्रनिरूप्यते ॥ २ ॥ येननिमित्तेन ॥ २ ॥ ३ ॥ वृत्तंचरित्रं ॥ विश्वामरविदूषणं सर्वदेवदूषणकारणं ॥ ४ ॥ ५ ॥ ६ ॥ ७ ॥



Indira Gandhi National Centre for the Arts

आत्मगौरवात्आत्ममहत्वात् ॥ विशेषेणपितृत्वप्रयुक्तोत्कर्षेण ॥ ८ ॥ तस्यदक्षस्य ॥ तस्याःपुत्र्याः ॥ ९ ॥ विधिनादुर्दैवेन ॥ भवंशिवम् ॥ तामपिपुत्रीमपि ॥ १० ॥ जामातरइतिव्यत्ययेनद्वितीयार्थेप्रथमा ॥ ११ ॥ रुद्राणीति ॥ रुद्राणीगौरीरुद्रायविज्ञाप्यपितुर्भवनंययावित्यन्वयः ॥ १२ ॥ लक्षणाढ्यं

तदात्मगौरवादेवदेव्यादक्षेसमागते ॥ देवादिभ्योविशेषेणनकाचिदभवत्स्मृतिः ॥ ८ ॥ तस्यतस्याःपरंभावमज्ञातुश्चापिकेवलम् ॥ पुत्रीत्येवंविमूढस्यतस्यांवैरमजायत ॥ ९ ॥ ततस्तेनैववैरेणविधिनाचप्रचोदितः ॥ नाजुहावभवंदक्षोदीक्षितस्तामपिद्विषन् ॥ १० ॥ अन्यान्जामातरःसर्वानाहूयसयथाक्रमम् ॥ शतशःपुष्कलामर्चांचकारचपृथक्पृथक् ॥ ११ ॥ तथातान्संगतान्श्रुत्वानारदस्यमुखात्तदा ॥ ययौरुद्रायरुद्राणीविज्ञाप्यभवनंपितुः ॥ १२ ॥ अथसन्निहितंदिव्यंविमानंविश्वतोमुखं ॥ लक्षणाढ्यंसुखारोहमतिमात्रमनोहरम् ॥ १३ ॥ तप्तजांबूनदप्रख्यंचित्ररत्नपरिष्कृतम् ॥ मुक्तामयवितानाग्र्यंस्रग्दामसमलंकृतं ॥ १४ ॥ तप्तकांचननिर्व्यूहंरत्नस्तंभशतावृतम् ॥ वज्रकल्पितसोपानंविद्रुमस्तंभतोरणम् ॥ १५ ॥ पुष्पपट्टपरिस्तीर्णंचित्ररत्नमहासनम् ॥ वज्रजालकिरच्छिद्रमच्छिद्रमणिकुट्टिमम् ॥ १६ ॥ मणिदंडमनोज्ञेनमहावृषभलक्ष्मणा ॥ अलंकृतपुरोभागमभ्रशुभ्रेणकेतुना ॥ १७ ॥ रत्नकंचुकगुप्तांगैश्चित्रवेत्रैकपाणिभिः॥अधिष्ठितमहाद्वारमप्रधृष्यैर्गणेश्वरैः ॥१८॥ मृदंगतालगीतादिवेणुवीणाविशारदैः ॥ विदग्धवेषभाषैश्चबहुभिःस्त्रीजनैर्वृतम् ॥ १९ ॥ आरुरोहमहादेवीसहप्रियसखीजनैः ॥ चामरव्यजनेतस्यावज्रदंडेमनोहरे ॥ २० ॥ गृहीत्वारुद्रकन्येद्वेविवीजतुरुभेशुभे ॥ तदाचामरयोर्मध्येदेव्यावदनमाबभौ ॥ २१ ॥ अन्योऽन्यंयुध्यतोर्मध्येहंसयोरिवपंकजम् ॥ छत्रंशशिनिभंतस्याश्चूडोपरिसुमालिनी ॥ २२ ॥ धृतमुक्तापरिक्षिप्तंबभारप्रेमनिर्भरा ॥ तच्छत्रमुज्ज्वलंदेव्यारुरुचेवदनोपरि ॥ २३ ॥ ॥ ॥

सुलक्षणयुक्तं ॥ १३ ॥ १४ ॥ निर्व्यूहोनागदंतः ॥ वज्रंहीरकं ॥ विद्रुमःप्रवालं ॥ १५ ॥ वज्रेति ॥ वज्रजालानिहीरकादिरत्नजालानिकिरंतिक्षिपंतिछिद्राणियस्मिन्तत् ॥ १६ ॥ अभ्रशुभ्रेणशारदाभ्रवत्श्वेतेन ॥ १७ ॥ १८ ॥ १९ ॥ २० ॥ देव्याःगौर्याः ॥ २१ ॥ कथमाबभौतदाह ॥ अन्योन्यमिति ॥ चूडोपरिमस्तकोपरि॥सुमालिनीएतन्नाम्नी ॥ २२ ॥ २३ ॥ ॥ ॥ ॥

कथंरुरुचेतदाह ॥ उपरीति ॥ शुभावतीएतन्नाम्नी ॥ २४ ॥ २५ ॥ दर्पणमादर्श ॥ २६ ॥ तालवृंतंव्यजनं ॥ २७ ॥ २८ ॥ आलेपंचंदनादिद्रव्यं ॥२९॥ ॥ ३० ॥ ३१ ॥ प्रास्थानिकःप्रस्थाननिमित्तकः ॥ ३२ ॥ संनेदुःनादमकुर्वन् ॥ काहलानांवाद्यविशेषाणां ॥ ३३ ॥ ३४ ॥ सोमनंदीएतन्नामा ॥ ३५ ॥



उपर्यमृतभांडस्यमंडलंशशिनोयथा ॥ अथचाऽग्रेसमासीनासुस्मितास्याःशुभावती ॥ २४ ॥ अक्षद्यूतविनोदेनरमयामासपार्वतीं ॥ सुयशाःपादुकेदेव्याःशुभेरत्नपरिष्कृते ॥ २५ ॥ स्तनयोरंतरेकृत्वातदादेवीमसेवत ॥ अन्याकांचनचार्वंगीदीप्तंजग्राहदर्पणम् ॥ २६ ॥ अपरातालवृंतंचपरातांबूलपेटिकाम् ॥ काचित्क्रीडाशुकंचारुकरेचकारभामिनी ॥ २७ ॥ काचित्तुसुमनोज्ञानिपुष्पाणिसुरभीणिच ॥ काचिदाभरणाधारंबभारकमलेक्षणा ॥ २८ ॥ काचिच्चपुनरालेपंसप्रसूनंसभाजनम् ॥ अन्याश्चसुदृशस्तास्तायथास्वमुचितक्रियाः ॥ २९ ॥ आवृत्यांतर्महादेवीमसेवंतसमंततः ॥ अतीवशुशुभेतासामंतरेपरमेश्वरी ॥ ३० ॥ तारापरिषदोमध्येचंद्रलेखेवशारदी ॥ ततःशंखसमुत्थस्यनादस्यसमनंतरम् ॥ ३१ ॥ प्रास्थानिकोमहानादःपटहःसमताड्यत ॥ ततोमधुरवाद्यानिसहतालोद्यतैःस्वनैः ॥ ३२ ॥ अनाहतानिसंनेदुःकाहलानांशतानिच ॥ सायुधानांगणेशानांमहेशसमतेजसाम् ॥ ३३ ॥ सहस्राणिशतान्यष्टौतदानींपुरतोययुः ॥ तेषांमध्येवृषारूढोगजारूढोयथागुहः ॥ ३४ ॥ जगामगणपःश्रीमान्सोमनंदीसुरार्चितः ॥ देवदुंदुभयोनेदुर्दिविदिव्यसुखस्वनाः ॥ ३५॥ ननृतुर्मुनयःसर्वेमुमुदुःसिद्धयोगिनः ॥ ससृजुःपुष्पवृष्टिंचविमानोपरिवारिदाः ॥ ३६ ॥ तदादेवगणैश्चान्यैःपथिसर्वत्रसंगता ॥ क्षणादिवपितुर्गेहंप्रविवेशमहेश्वरी ॥ ३७॥ तांदृष्ट्वाकुपितोदक्षश्चात्मनःक्षयकारणात् ॥ तस्यायवीयसीभ्योपिचक्रेपूजामसत्कृताम् ॥ ३८॥ तदाशशिमुखीदेवीपितरंसदसिस्थितम् ॥ अंबिकायुक्तमव्यग्रमुवाचकृपणंवचः ॥ ३९ ॥ देव्युवाच ॥ ब्रह्मादयःपिशाचांतायस्याज्ञावशवर्तिनः ॥ सदेवःसांप्रतंतातविधिनानार्चितःकिल ॥ ४० ॥ तदास्तांममज्यायस्याःपुत्र्याःपूजांकिमीदृशीम् ॥ असत्कृतामवज्ञायकृतवानसिगर्हिताम् ॥ ४१ ॥ ॥ ॥ ॥ ॥

॥३६॥ पितुःदक्षस्य ॥३७॥ तांपुत्रीं ॥ तस्याःगौर्याः ॥ यवीयसीभ्यःकनिष्ठाभ्यः ॥ ३८ ॥ अंबिकायुक्तंमातृयुक्तं ॥३९॥ यस्यशिवस्य ॥ ४० ॥ ४१ ॥



Indira Gandhi National Centre for the Arts

एनांपुत्रीं ॥ ४२ ॥ ४३ ॥ त्र्यंबकंनिंदति ॥ स्तब्धेति ॥ स्तब्धात्मानिरुद्योगः ॥ तामसःतमोगुणप्रधानः ॥ ४४ ॥ ४५ ॥ अजाताशे
षदूषणं सर्वथादूषणरहितं ॥ अशेषगुणभूषणमितिपाठांतरं ॥ ४६ ॥ गौरीदक्षंनिंदति ॥ विद्येति ॥ ४७ ॥ देवात्‌शिवात्‌ ॥ ४८ ॥ ४९ ॥ अव्ययानि

एवमुक्तोऽब्रवीदेनांदक्षःक्रोधादमर्षितः ॥ त्वत्तःश्रेष्ठावरिष्ठाश्चपूज्याबालाःसुताम्म ॥ ४२ ॥ तासांतुयेचभर्त्तारस्ते
मेबहुमतामुदा ॥ गुणैश्चाप्यधिकाःसर्वेभर्त्तुस्तेत्र्यंबकादपि ॥ ४३ ॥ स्तब्धात्मातामसःसर्वस्त्वमिमंसमुपाश्रिता ॥
तेनत्वामवमन्येहंप्रतिकूलोहिमेभवः ॥ ४४ ॥ तथोक्तापितरंदक्षंक्रुद्धादेवीदमब्रवीत्‌ ॥ शृण्वतामेवसर्वेषांयेयज्ञसद
सिस्थिताः ॥ ४५ ॥ अकस्मान्ममभर्तारमजाताशेषदूषणं ॥ वाचादूषयसेदक्षसाक्षाल्लोकमहेश्वरम्‌ ॥ ४६ ॥ वि
द्याचौरोगुरुद्रोहीदेवेश्वरविदूषकः ॥ तएतेबहुपाप्मानःसद्योदंड्याइतिश्रुतिः ॥ ४७ ॥ तस्मादत्युत्कटस्यास्यपाप
स्यसदृशोभृशम्‌ ॥ सहसादारुणोदंडस्तवदेवाद्भविष्यति ॥ ४८ ॥ त्वयानपूजितोयस्माद्देवदेवस्त्रियंबकः ॥ तस्मा
त्तवकुलंदुष्टंनष्टमित्यवधारय ॥ ४९ ॥ इत्युक्त्वापितरंरुष्टासतीसंत्यज्यसाऽव्यया ॥ तदीयांचतनुंत्यक्त्वाहिमवंतंययौ
गिरिम्‌ ॥ ५० ॥ सपर्वतवरःश्रीमाल्लब्धपुण्यफलोदयः ॥ तदर्थमेवकृतवान्सुचिरंदुश्चरंतपः ॥ ५१ ॥ तस्मात्तमनु
गृण्हातिभूधरेश्वरमीश्वरी ॥ स्वेच्छयापितरंचक्रेस्वात्मनोयोगमायया॥५२॥ यदागतासतीदक्षंविनिंद्यभयविव्हला
॥ तदातिरोहितामंत्राविहतश्चततोऽध्वरः ॥ ५३ ॥ तदुपश्रुत्यगमनंदेव्यास्त्रिपुरमर्दनः ॥ दक्षायचऋषिभ्यश्चचुको
पचशशापतान्‌ ॥ ५४ ॥ यस्मादवमतादक्षमत्कृतेनागसासती ॥ पूजिताश्चेतराःसर्वाःस्वसुताभर्तृभिःसह ॥५५॥
वैवस्वतेंऽतरेयस्मात्तवजामातरस्त्वमी ॥ उत्पत्स्यंतेसमंसर्वेब्राह्मयज्ञेष्वयोनिजाः ॥ ५६ ॥ भवितामानुषोराजाचा
क्षुषस्यत्वमन्वये ॥ प्राचीनबर्हिषःपौत्रःपुत्रश्चापिप्रचेतसः ॥ ५७ ॥ ॥ ॥

त्यापि ॥ तदीयांदक्षोत्पादिताम्‌ ॥ ५० ॥ तदर्थंसंतत्यर्थं ॥ ५१ ॥ अनुग्रण्हाति ॥ अन्वग्रहीत्‌ ॥ योगमायया स्वकीययोगमायाशक्त्या ॥ ५२ ॥ गौर्या
रोषेजातेमंत्रशक्तिहानिर्यज्ञध्वंसश्चाभवदित्याह ॥ तदेति ॥ ५३ ॥ त्रिपुरमर्दनःशिवः ॥ ऋषिभ्यःभृग्वादिभ्यः ॥ ५४ ॥ यच्छशापतदाह ॥ यस्मादिति ॥
अनागसाअपराधंविनासतीगौरी ॥ इतराःयवीयस्यः ॥५५॥ अयोनिजाःयोनिसंभवरहिताअपि ॥ ५६ ॥ भवितेति ॥ राजादक्षः ॥ असीतिशेषः ॥ ५७ ॥

Indira Gandhi National Centre for the Arts

॥ ५८ ॥ ५९ ॥ ६० ॥ वारुणींवरुणात्प्राप्ताम् ॥ ६१ ॥ ६२ ॥ इतिश्रीशैवमहापुराणवायवीयसंहिताटीकायांसारबोधिन्यांपूर्वभागेदक्षशापवर्णनंनाम
षोडशोऽध्यायः ॥ १६ ॥ ओंनमःशिवाय ॥ वैवस्वतेंतरेदक्षयज्ञध्वंसार्थमीश्वरः ॥ वीरभद्रंमहावीरंभद्रकालींचसृष्टवान् ॥ १ ॥ ताभ्यांशिवाज्ञयातत्रसर्वेदे



अहंतत्रापितेविघ्नमाचरिष्यामिदुर्मते ॥ धर्मार्थकामयुक्तेषुकर्मस्वपिपुनःपुनः॥ ५८ ॥ तेनैवंव्याहृतोदक्षोरुद्रेणामित
तेजसा ॥ स्वायंभुवींतनुंत्यक्त्वापपातभुविदुःखितः ॥ ५९ ॥ ततःप्राचेतसोदक्षोजज्ञेवैचाक्षुषेंतरे ॥ प्राचीनबर्हिषः
पौत्रःपुत्रश्चैवप्रचेतसः ॥ ६० ॥ भृग्वादयोपितेजातावैमनोर्वैवस्वतस्यतु ॥ अंतरेब्रह्मणोयज्ञेवारुणींबिभ्रतस्तनुम्
॥ ६१ ॥ तदादक्षस्यधर्मार्थंप्रवृत्तस्यदुरात्मनः ॥ महेशःकृतवान्विघ्नंमनोर्वैवस्वतेसति ॥ ६२ ॥ इतिश्रीशिवमहा
पुराणेवायवीयसंहितायांपूर्वभागेदक्षशापवर्णनंनामषोडशोऽध्यायः ॥ १६ ॥ ऋषयऊचुः ॥ कथंदक्षस्यधर्मार्थंप्र
वृत्तस्यदुरात्मनः ॥ महेशःकृतवान्विघ्नमेतदिच्छामहेवयम् ॥ १ ॥ वायुरुवाच ॥ विश्वस्यजगतोमातुरपिदेव्यास्त
पोबलात् ॥ पितृभावमुपागम्यमुदितेहिमवद्गुरौ ॥ २ ॥ देवेपिचकृतोद्वाहेहिमवच्छिखरालये ॥ क्रीडमानेतयासा
र्धंकालेबहुतरेगते ॥ ३ ॥ वैवस्वतेऽतरेप्राप्तेदक्षःप्राचेतसःस्वयम् ॥ अश्वमेधेनयज्ञेनयक्ष्यमाणोन्वपद्यत ॥ ४ ॥ त
तोहिमवतःपृष्ठेदक्षोवैयज्ञमाहरत् ॥ गंगाद्वारेशुभेदेशेऋषिसिद्धनिषेविते ॥ ५ ॥ तस्यतस्मिन्मखेदेवाःसर्वेशक्रपुरो
गमाः ॥ गमनायसमागम्यबुद्धिमापेदिरेतदा ॥ ६ ॥ आदित्यावसवोरुद्राःसाध्याःसहमरुद्गणैः ॥ सोमपाश्चैवपि
तरआज्यपाधूमपास्तथा ॥ ७ ॥ अश्विनौपितरश्चैवतथाचान्येमहर्षयः ॥ विष्णुनासहिताःसर्वेह्यागतायज्ञभागि
नः ॥ ८ ॥ दृष्ट्वादेवकुलंसर्वमीश्वरेणविनागतं ॥ दधीचिर्मन्युनाविष्टोदक्षमेवमभाषत ॥ ९ ॥ दधीचिरुवाच ॥ अपू
ज्यपूजनेचैवपूज्यानांचाप्यपूजने ॥ नरःपापमवाप्नोतिमहद्वैनात्रसंशयः ॥ १० ॥ ॥ ॥

वर्षिसत्तमाः ॥ पीडिताभृशमित्येतद्वृत्तंसप्तदशेस्थितम् ॥ २ ॥ एतदिति ॥ श्रोतुमितिशेषः ॥ १ ॥ मुदितेआनंदयुक्ते ॥ २ ॥ देवेशिवे ॥ तयागौर्या ॥ ३ ॥
प्राचेतसःप्रचेतःपुत्रः ॥ अन्वपद्यतप्राप्तवान् ॥ ४ ॥ ५ ॥ तस्यदक्षस्य ॥ ६ ॥ ७ ॥ ८ ॥ ईश्वरेणशिवेन ॥ दधीचिरेतन्नामामहर्षिः ॥ ९ ॥ १० ॥



Indira Gandhi National Centre for the Arts

संमतिःसंमाननं॥अवमतिरवज्ञा ॥ ११ ॥ विप्रर्षिर्दधीचिः ॥ पशुभर्तारंशिवं ॥ १२ ॥ १३ ॥ १४ ॥ कैंकर्यवादिनःवयंकिंकराःस्मइतिवादिनः ॥ १५ ॥
॥ १६ ॥ १७ ॥ १८ ॥ मखेशस्यविष्णोरित्यन्वयः ॥ १९ ॥ २० ॥ २१ ॥ तस्मिन्दधीचौ ॥ देवाविष्णवादयः ॥ अत्यागेहेतुमाह ॥ अवश्यमिति ॥

असतांसंमतिर्यत्रसतामवमतिस्तथा ॥ दंडोदैवकृतस्तत्रसद्यःपततिदारुणः ॥ ११ ॥ एवमुक्त्वातुविप्रर्षिःपुनर्दक्षमभाषत ॥ पूज्यंतुपशुभर्तारंकस्मान्नार्चयसेप्रभुम् ॥ १२ ॥ दक्षउवाच ॥ संतिमेबहवोरुद्राःशूलहस्ताःकपर्दिनः ॥ एकादशावस्थितायेनान्यंवेद्मिमहेश्वरम् ॥ १३ ॥ दधीचिरुवाच ॥ किमेभिरमरैरन्यैःपूजितैरध्वरेफलम् ॥ राजाचेदध्वरस्यास्यनरुद्रःपूज्यतेत्वया॥१४॥ब्रह्मविष्णुमहेशानांस्त्रष्टायःप्रभुरव्ययः॥ब्रह्मादयःपिशाचांतायस्यकैंकर्यवादिनः॥ १५ ॥ प्रकृतीनांपरश्चैवपुरुषस्यचयःपरः ॥ चिंत्यतेयोगविद्वद्भिर्ऋषिभिस्तत्त्वदर्शिभिः ॥१६॥ अक्षरंपरमंब्रह्मअसच्चसदसच्चयत् ॥ अनादिमध्यनिधनमप्रतर्क्यंसनातनम् ॥१७॥ यःस्त्रष्टाचैवसंहर्ताभर्ताचैवमहेश्वरः ॥ तस्मादन्यंनपश्यामिशंकरात्मानमध्वरे ॥ १८ ॥ दक्षउवाच ॥ एतन्मखेशस्यसुवर्णपात्रेहविःसमस्तंविधिमंत्रपूतम् ॥ विष्णोर्नयाम्यप्रतिमस्यभागंप्रभोर्विभज्याहवनीयमद्य ॥ १९ ॥ दधीचिरुवाच ॥ यस्मान्नाराधितोरुद्रःसर्वदेवेश्वरेश्वरः ॥ तस्माद्दक्षतवाशेषोयज्ञोऽयंनभविष्यति ॥ २० ॥ इत्युक्त्वावचनंक्रुद्धोदधीचोमुनिसत्तमः ॥ निर्गम्यचततोदेशाज्जगामस्वकमाश्रमम् ॥ २१ ॥ निर्गतेपिमुनौतस्मिन्देवादक्षंनतत्यजुः ॥ अवश्यमनुभाव्यत्वादनर्थस्यतुभाविनः ॥ २२ ॥ एतस्मिन्नेवकालेतुज्ञात्वैतत्सर्वमीश्वरात् ॥ दग्धुंदक्षाध्वरंविप्रादेवीदेवमचोदयत् ॥ २३ ॥ देव्यासंचोदितोदेवोदक्षाध्वरजिघांसया ॥ ससर्जसहरोवीरंवीरभद्रंगणेश्वरं ॥ २४ ॥ सहस्त्रवदनंदेवंसहस्त्रकमलेक्षणम् ॥ सहस्त्रमुद्गरधरंसहस्त्रशरपाणिकम् ॥ २५ ॥ शूलटंकगदाहस्तंदीप्तकार्मुकधारिणम् ॥ चक्रवज्रधरंघोरंचंद्रार्धकृतशेखरम् ॥ २६ ॥ कुलिशोद्योतितकरंतडिज्ज्वलितमूर्धजम् ॥ दंष्ट्रांकरालांबिभ्राणंमहावक्त्रंमहोदरम् ॥ २७ ॥

॥ २२ ॥ एतत्सर्वंदक्षचेष्टितम् ॥ देवंशिवं ॥२३॥२४॥ वीरभद्रस्वरूपमाह ॥ सहस्त्रवदनमिति ॥२५॥२६॥ कुलिशंवज्रम् ॥ तडिदिति ॥ तडिद्ज्वलितामूर्धजाःकेशायस्यतम् ॥ २७ ॥ ॥ ॥ ॥ ॥

Indira Gandhi National Centre for the Arts

॥ २८ ॥ वरामरेति ॥ वरामराःश्रेष्ठदेवास्तैस्तद्दद्दाशिरोमालावलीभिःकलितंभूषितंशेखरंयस्यतम् ॥ २९ ॥ ३० ॥ ३१ ॥ अद्रींद्रंहिमालयम् ॥ ३२ ॥
॥ ३३ ॥ देवदेवस्यशिवस्य ॥ गणेश्वरोवीरभद्रः ॥ ३४ ॥ किमर्थमसृजत्तदाह ॥ आत्मनइति ॥ तेनभद्रकालीरूपस्वकर्मसाक्षिणा ॥ ३५ ॥ भद्रया

विद्युज्जिव्हंप्रलंबोष्ठंमेघसागरनिस्वनम् ॥ वसानंचर्मवैयाघ्रंमहद्रुधिरनिस्त्रवं ॥२८॥ गंडद्वितयसंसृष्टमंडलीकृतकुं
डलम् ॥ वरामरशिरोमालावलीकलितशेखरम् ॥ २९ ॥ रणन्नूपुरकेयूरमहाकनकभूषितम् ॥ रत्नसंचयसंदीप्तंता
रहारावृतोरसम् ॥ ३० ॥ महाशरभशार्दूलसिंहैःसदृशविक्रमम् ॥ प्रशस्तमत्तमातंगसमानगमनालसम् ॥ ३१ ॥
शंखचामरकुंदेंदुमृणालसदृशप्रभम् ॥ सतुषारमिवाद्रींद्रंसाक्षाज्जंगमतांगतम् ॥ ३२ ॥ ज्वालामालापरिक्षिप्तंदीप्त
मौक्तिकभूषणम् ॥ तेजसाचैवदीप्यंतंयुगांतइवपावकम् ॥ ३३ ॥ सजानुभ्यांमहींगत्वाप्रणतःप्रांजलिस्ततः ॥ पा
र्श्वतोदेवदेवस्यपर्यतिष्ठद्गणेश्वरः ॥ ३४ ॥ मन्युनाचासृजद्भद्रांभद्रकालींमहेश्वरीम् ॥ आत्मनःकर्मसाक्षित्वेतेनगंतुं
सहैवतु ॥ ३५ ॥ तंदृष्ट्वावस्थितंवीरंभद्रंकालाग्निसंन्निभम् ॥ भद्रयासहितंप्राहभद्रमस्त्वितिशंकरः ॥ ३६ ॥ सचवि
ज्ञापयामाससहदेव्यामहेश्वरम् ॥ आज्ञापयमहादेवकिंकार्यंकरवाण्यहम् ॥ ३७ ॥ ततस्त्रिपुरहाप्राहहैमवत्याप्रि
येशया ॥ वीरभद्रंमहाबाहुंवाचाविपुलनादया ॥ ३८ ॥ देवदेवउवाच ॥ प्राचेतसस्यदक्षस्ययज्ञंसद्योविनाशय ॥
भद्रकाल्यासहासित्वमेतत्कृत्यंगणेश्वर ॥ ३९ ॥ अहमप्यनयासार्धंरम्याश्रमसमीपतः ॥ स्थित्वावीक्षेगणेशानवि
क्रमंतवदुःसहम् ॥ ४० ॥ वृक्षाःकनखलेयेतुगंगाद्वारसमीपगाः ॥ सुवर्णशृंगस्यगिरेर्मेरुमंदरसन्निभाः ॥ ४१ ॥
तस्मिन्प्रदेशेदक्षस्ययज्ञःसंप्रतिवर्तते ॥ सहसातस्ययज्ञस्यविघातंकुरुमाचिरम् ॥ ४२ ॥ इत्युक्तेसतिदेवेनदेवीहिम
गिरींद्रजा ॥ भद्रंभद्रांचसंप्रेक्ष्यवत्संधेनुरिवौरसम् ॥ ४३ ॥ आलिंग्यचसमाघ्रायमूर्ध्निषड्वदनंयथा ॥ सस्मितावच
नंप्राहमधुरंमधुरस्वनम् ॥ ४४ ॥ ॥ ॥ ॥

भद्रकाल्या ॥ ३६ ॥ सःवीरभद्रः ॥ ३७ ॥ त्रिपुरहाशिवः ॥ हैमवत्येति पार्वत्यासहेत्यर्थः ॥ ३८ ॥ एतद्यज्ञध्वंसरूपं ॥ ३९ ॥ अनयादेव्या ॥ ४० ॥
कनखलेकनखलनामकतीर्थे ॥ ४१ ॥ ४२ ॥ देवेनशिवेन ॥ ४३ ॥ ४४ ॥ ॥ ॥ ॥



Indira Gandhi National Centre for the Arts

॥४५॥ यज्ञेश्वरंशिवम् ॥४६॥ भद्रवीरभद्र ॥ यजमानंदक्षं ॥ भद्रयास्वशक्त्या ॥४७॥ अशेषामिवपूर्णामिव ॥ कचित्सशेषामितिपाठः ॥ शिवयोःगौरीशंकरयोः ॥ भद्रोवीरभद्रः ॥ ४८ ॥ प्रेतावासःश्मशानं ॥ देव्याःगौर्याः ॥४९॥५०॥ सर्वतोभद्रान्सर्वकल्याणयुक्तान् ॥ रुद्रानुभावान्रुद्रतुल्यप्रतापान् ॥५१॥५२

देव्युवाच ॥ वत्सभद्रमहाभागमहाबलपराक्रम ॥ मत्प्रियार्थंत्वमुत्पन्नोमममन्युंप्रमार्जय ॥ ४५ ॥ यज्ञेश्वरमनाहूय यज्ञकर्मरतोभवत् ॥ दक्षोवैरेणतंतस्माद्विंधियज्ञंगणेश्वरैः ॥ ४६ ॥ यज्ञलक्ष्मींत्वलक्ष्मींत्वंभद्रकृत्वाममाज्ञया ॥ यजमानंचतंहत्वावत्सहिंसयभद्रया ॥ ४७ ॥ अशेषामिवतामाज्ञांशिवयोश्चित्रकृत्ययोः ॥ मूर्ध्निकृत्वानमस्कृत्यभद्रोगंतुंप्रचक्रमे ॥ ४८ ॥ अथैषभगवान्क्रुद्धःप्रेतावासकृतालयः ॥ वीरभद्रोमहादेवोदेव्यामन्युप्रमार्जकः ॥ ४९ ॥ ससर्जरोमकूपेभ्योरोमजाख्यान्गणेश्वरान् ॥ दक्षिणाद्भुजदेशात्तुशतकोटिगणेश्वरान् ॥ ५० ॥ सदारान्सर्वतोभद्रान्साक्षाद्वामाच्चवैभुजात् ॥ रुद्रानुभावान्रौद्रांश्चरुद्रवीर्यपराक्रमान् ॥ ५१ ॥ पादात्तथोरुदेशाच्चपृष्ठात्पार्श्वान्मुखाद्गलात् ॥ गुह्याद्गुल्फाच्छिरोमध्यात्कंठादास्यात्तथोदरात् ॥ ५२ ॥ तथागणेश्वरैर्भद्रैर्भद्रतुल्यपराक्रमैः ॥ संछादितमभूत्सर्वंसाकाशविवरंजगत् ॥५३॥ सर्वेसहस्रहस्तास्तेसहस्रायुधपाणयः॥रुद्रस्यानुचराःसर्वेसर्वेरुद्रसमप्रभाः ॥ ॥ ५४ ॥ शूलशक्तिगदाहस्ताष्टंकोपलशिलाधराः ॥ कालाग्निरुद्रसदृशास्त्रिनेत्राश्चजटाधराः ॥ ५५ ॥ निपेतुर्भृशमाकाशेशतशःसिंहवाहनाः ॥ विनेदुश्चमहानादंजलदाइवभद्रजाः ॥ ५६ ॥ तैर्भद्रोभगवान्भद्रस्तथापरिवृतोबभौ ॥ कालानलशतैर्युक्तोयथांतेकालभैरवः ॥ ५७ ॥ तेषांमध्येसमारुह्यवृषेंद्रंवृषभध्वजः ॥ जगामभगवान्भद्रःशुभ्रमभ्रंयथाभवः ॥ ५८ ॥ तमेवंवृषमारूढेभद्रेतुभसितप्रभः ॥ बभारमौक्तिकच्छत्रंगृहीतसितचामरः ॥ ५९ ॥ सतदाशुशुभेपार्श्वेभद्रस्यभसितप्रभः ॥ भगवानिवशैलेंद्रःपार्श्वेविश्वजगद्गुरोः ॥ ६० ॥ सोपितेनबभौभद्रःश्वेतचामरपाणिना ॥ सोमवर्णेनसौम्येनयथाशूलवरायुधः ॥ ६१ ॥ ॥ ॥

॥५३॥५४॥५५॥ भद्रजाःवीरभद्रजाः ॥५६॥ भद्रःकल्याणयुक्तः ॥ अंतेप्रलयकाले॥५७॥तेषांगणानाम् ॥ अभ्रंमेघं ॥ भवःशिवः ॥५८॥ भसितंभस्मतद्वत्प्रभायस्यसएतन्नामकोगणः ॥ ५९॥६०॥ तेनभसितप्रभेण ॥ श्वेतचामरेति ॥ श्वेतचामरधारिणेतिपाठांतरं ॥ सोमवर्णेनशुभ्रेण॥शूलवरायुधःशिवः ॥ ६१ ॥

Indira Gandhi National Centre for the Arts

भानुकंपःएतन्नामागणः ॥ ६२ ॥ बलाहकामेघाः ॥ ६३ ॥ गंधबंधवइति ॥ गंधस्यसर्वतःप्रसारणेनोपकारादेतदुक्तं ॥ मार्गेति ॥ मार्गेअनुकूलःप्रीति
जनकःसंवाहोवहनंयेषांते ॥ ६४ ॥ ६५ ॥ ६६ ॥ अद्रिजानुगःअद्रिजापार्वतीतस्याअनुगःअनुचरः ॥ ६७ ॥ दक्षप्रतिपादितस्यदक्षप्रवर्तितस्यक्रतुप्र



दध्मौशंखंसितंभद्रंभद्रस्यपुरतःशुभम् ॥ भानुकंपोमहातेजाहैमरत्नैरलंकृतम् ॥ ६२ ॥ देवदुंदुभयोनेदुर्दिविसंकुल
निस्वनाः ॥ ववृषुःशतशोमूर्ध्निपुष्पवर्षंबलाहकाः ॥ ६३ ॥ फुल्लानांमधुगर्भाणांपुष्पाणांगंधबंधवः ॥ मार्गानुकूलसं
वाहाववुश्चपथिमारुताः ॥ ६४ ॥ ततोगणेश्वराःसर्वेमत्तायुद्धबलोद्धताः ॥ ननृतुर्मुमुदुर्नेदुर्जहसुर्जगदुर्जगुः ॥ ६५ ॥
तदाभद्रगणांतस्थोबभौभद्रःसभद्रया ॥ यथारुद्रगणांतस्थस्त्र्यंबकोंऽबिकयासह ॥ ६६ ॥ तत्क्षणादेवदक्षस्ययज्ञ
वाटंहिरण्मयम् ॥ प्रविवेशमहाबाहुर्वीरभद्रोऽद्रिजानुगः ॥ ६७ ॥ ततस्तुदक्षप्रतिपादितस्यक्रतुप्रधानस्यगणप्र
धानः ॥ प्रयोगभूमिंप्रविवेशभद्रोरुद्रोयथांतेभुवनंदिधक्षुः ॥ ६८ ॥ इतिश्रीशिवमहापुराणेवायवीयसंहितायांपूर्व
भागेदक्षयज्ञमथनंनामसप्तदशोऽध्यायः ॥ १७ ॥ वायुरुवाच ॥ ततोविष्णुप्रधानानांसुराणाममितौजसाम् ॥ दद
र्शचमहत्सत्रंचित्रध्वजपरिच्छदम् ॥ १ ॥ सुदर्भऋजुसंस्तीर्णंसुसमिद्धहुताशनम् ॥ कांचनैर्यज्ञभांडैश्चभ्राजिष्णुभिर
लंकृतम् ॥ २ ॥ ऋषिभिर्यज्ञपटुभिर्यथावत्कर्मकर्तृभिः ॥ विधिनावेददृष्टेनस्वनुष्ठितबहुक्रमम् ॥ ३ ॥ देवांगनास
हस्राढ्यमप्सरोगणसेवितम् ॥ वेणुवीणारवैर्जुष्टंवेदघोषैश्चबृंहितम् ॥ ४ ॥ दृष्ट्वादक्षाध्वरंवीरोवीरभद्रःप्रतापवान्
॥ सिंहनादंतदाचक्रेगंभीरोनिनदोयथा ॥ ५ ॥ ततःकिलकिलाशब्दआकाशंपूरयन्निव ॥ गणेश्वरैःकृतोयज्ञेमहा
न्यक्कृतसागरः ॥ ६ ॥ तेनशब्देनमहतात्रस्ताःसर्वेदिवौकसः ॥ दुद्रुवुःपरितोभीताःस्रस्तवस्त्रविभूषणाः ॥ ७ ॥

धानस्यअश्वमेधस्य ॥ प्रयोगभूमिमनुष्ठानशालां ॥ ६८ ॥ इतिश्रीशैवमहापुराणेवायवीयसंहिताटीकायांसारबोधिन्यांपूर्वभागेदक्षयज्ञमथनंनामसप्तदशो
ऽध्यायः ॥ १७ ॥ ओंनमःशिवाय ॥ दक्षस्ययज्ञसंभारंवीरभद्रोगणैःसह ॥ गत्वानाशयदित्येवंवृत्तमष्टादशेस्थितम् ॥१॥ परिच्छदोवितानमंडपादिः ॥१॥
सुदर्भेति ॥ सुदर्भरज्जुसंस्तीर्णमितिपाठांतरं ॥ २ ॥ वेददृष्टेनवेदोक्तेन ॥ ३ ॥ ४ ॥ ५ ॥ न्यक्कृतेति ॥ न्यक्कृतःधिक्कृतःसागरोयेनसः ॥ ६ ॥ ७ ॥



Indira Gandhi National Centre for the Arts

तदादेवायदतर्कयंस्तदाह ॥ किंस्विदिति ॥ ८ ॥ ९ ॥ मरुतोवायवः ॥ मकरालयःसमुद्रः ॥ १० ॥ ग्रहाश्चंद्रादयः ॥ ११ ॥ भद्रैःगणैः ॥ १२ ॥ तंवी
रभद्रं ॥ भीतभीतःअतित्रस्तः ॥ १३ ॥ १४ ॥ १५ ॥ यदवोचत्तदाह ॥ वयमिति ॥ शर्वस्यशिवस्य ॥ भागोयज्ञभागः ॥ १६ ॥ मयेति ॥ मयासहेतिपा

किंस्विद्भिन्नोमहामेरुःकिंस्वित्संदीर्यतेमही ॥ किमिदंकिमिदंचेतिजजल्पुस्त्रिदशाभृशं ॥ ८ ॥ मृगेंद्राणांयथानादंग
जेंद्रागहनेवने ॥ श्रुत्वातथाविधंकेचित्तत्यजुर्जीवितंभयात् ॥ ९ ॥ पर्वताश्चव्यशीर्यंतचकंपेचवसुंधरा ॥ मरुतश्चव्य
घूर्णंतचुक्षुभेमकरालयः ॥ १० ॥ अग्नयोनैवदीप्यंतेनचदीप्यतिभास्करः ॥ ग्रहाश्चनप्रकाशंतेनक्षत्राणिचतारकाः
॥ ११ ॥ एतस्मिन्नेवकालेतुयज्ञवाटंतदुज्ज्वलम् ॥ संप्रापभगवान्भद्रोभद्रैश्चसहभद्रया ॥ १२ ॥ तंदृष्ट्वाभीतभीतो
पिदक्षोदृढइवस्थितः ॥ क्रुद्धवद्वचनंप्राहकोभवान्किमिहेक्षसे ॥ १३ ॥ तस्यतद्वचनंश्रुत्वादक्षस्यचदुरात्मनः ॥ वी
रभद्रोमहातेजामेघगंभीरनिस्वनः ॥ १४ ॥ स्मयन्निवतमालोक्यदक्षंदेवांश्चऋत्विजः ॥ अर्थगर्भमसंभ्रांतमवोच
दुचितंवचः ॥ १५ ॥ वीरभद्रउवाच ॥ वयंह्यनुचराःसर्वेशर्वस्यामिततेजसः ॥ भागाभिलिप्सयाप्राप्ताभागोनःसं
प्रदीयताम् ॥ १६ ॥ अथचेदध्वरेऽस्माकंनभागःपरिकल्पितः ॥ कथ्यतांकारणंतत्रयुध्यतांवामयाऽमरैः ॥ १७ ॥
इत्युक्तास्तेगणेंद्रेणदेवादक्षपुरोगमाः ॥ ऊचुर्मंत्राःप्रमाणंनोनवयंप्रभवस्त्विति ॥ १८ ॥ मंत्राऊचुःसुरायूयंतमोपहत
चेतसः ॥ येनप्रथमभागार्हंनयजध्वंमहेश्वरम् ॥ १९ ॥ तथोक्ताअपितैर्मंत्रैर्देवाःसंमूढचेतसः ॥ भद्रायनददुर्भागंत
त्प्रहारमभीप्सवः ॥ २० ॥ यदातथ्यंचपथ्यंचस्ववाक्यंतद्वृथाऽभवत् ॥ तदाततोययुर्मंत्राब्रह्मलोकंसनातनम् ॥
॥ २१ ॥ अथोवाचगणाध्यक्षोदेवान्विष्णुपुरोगमान् ॥ मंत्राःप्रमाणंनकृतायुष्माभिर्बलगर्वितैः ॥ २२ ॥ यस्माद
स्मिन्मखेदेवैरित्थंवयमसत्कृताः ॥ तस्माद्वोजीवितैःसार्धमपनेष्यामिगर्वितं ॥ २३ ॥ ॥

ठांतरम् ॥ १७ ॥ गणेंद्रेणवीरभद्रेण ॥ मंत्राइति ॥ मंत्राःयज्ञकर्मसाधनीभूताःवेदमंत्राः ॥ १८ ॥ मंत्रादेवान्प्रतियदूचुस्तदाह ॥ सुराइति ॥ १९ ॥
देवामंत्रोक्तमपिनाकुर्वन्नित्याह ॥ तथेति ॥ तत्प्रहारंवीरभद्रप्रहारं ॥ २० ॥ तदामंत्रायदकुर्वंस्तदाह ॥ यदेति ॥ पथ्यंमार्गादनपेतम् ॥ अभवदिति ॥ इति
निश्चित्येतिशेषः ॥ २१ ॥ गणाध्यक्षोवीरभद्रः ॥ वीरभद्रोयदुवाचतदाह ॥ मंत्राइति ॥ २२ ॥ २३ ॥ ॥ ॥

Indira Gandhi National Centre for the Arts

भगवान्वीरभद्रः ॥ महाकूटंमहांतःकूटाअन्नादिसमुदायायस्मिन्तत ॥ २४ ॥ २५ ॥ गृहीत्वेति ॥ गृहीत्वाश्वंचयज्ञांगमितिपाठांतरम् ॥ २६ ॥ २७ ॥
उच्चावचनिनानाविधानि ॥ २८ ॥ २९ ॥ ३० ॥ ३१ ॥ उत्पाटयेतीति ॥ इतिशब्दागणेशानांजज्ञिरइत्यन्वयः ॥ संरंभप्रभवाःवेगेनोत्पन्नाः ॥ ३२ ॥

इत्युक्त्वाभगवान्क्रुद्धोऽप्यदहन्नेत्रवन्हिना ॥ यज्ञवाटंमहाकूटंयथातिस्त्रःपुरोहरः ॥ २४ ॥ ततोगणेश्वराःसर्वेपर्वतो
दग्रविग्रहाः ॥ यूपानुत्पाट्यहोतॄणांकंठेष्वाबध्यरज्जुभिः ॥ २५ ॥ यज्ञपात्राणिचित्राणिभित्वासंचूर्ण्यवारिणि ॥ गृही
त्वाचैवयज्ञांगंगंगास्त्रोतसिचिक्षिपुः ॥ २६ ॥ तत्रदिव्यान्नपानानांराशयःपर्वतोपमाः ॥ क्षीरनद्योऽमृतस्त्रावाःसुस्नि
ग्धदधिकर्दमाः ॥ २७ ॥ उच्चावचानिमांसानिभक्ष्याणिसुरभीणिच ॥ रसवंतिचपानानिलेह्यचोष्याणितानिवै ॥
॥ २८ ॥ वीरास्तद्भुंजतेवक्त्रैर्विलुंपंतिक्षिपंतिच ॥ वज्रैश्चक्रैर्महाशूलैःशक्तिभिःप्रासपट्टिशैः ॥ २९ ॥ मुसलैरसिभिष्टं
कैर्भिंदिपालैःपरश्वधैः ॥ उद्धतांस्त्रिदशान्सर्वान्लोकपालपुरःसरान् ॥ ३० ॥ बिभिदुर्बलिनोवीरावीरभद्रांगसंभ
वाः ॥ छिंधिभिंधिक्षिपक्षिप्रंमार्यतांदार्यतामिति ॥ ३१ ॥ हरस्वप्रहरस्वेतिपाटयोत्पाटयेतिच ॥ संरंभप्रभवाःक्रूराः
शब्दाःश्रवणशंकवः ॥ ३२ ॥ तत्रतत्रगणेशानांजज्ञिरेसमरोचिताः ॥ विवृत्तनयनाःकेचिद्दष्टदंष्ट्रोष्ठतालवः ॥ ३३ ॥
आश्रमस्थान्समाकृष्यमारयंतितपोधनान् ॥ स्रुवानपहरंतश्चक्षिपंतोग्निंजलेषुच ॥ ३४ ॥ कलशानपिभिंदंतश्छिं
दंतोमणिवेदिकाः ॥ गायंतश्चनदंतश्चहसंतश्चमुहुर्मुहुः ॥ ३५ ॥ रक्तासवंपिबंतश्चननृतुर्गणपुंगवाः ॥ निर्मथ्यसेंद्रा
नमरान्गणेंद्राव्रुषेंद्रनागेंद्रमृगेंद्रसाराः ॥ ३६ ॥ चक्रुर्बहून्यप्रतिमप्रभावाःसहर्षरोमाणिविचेष्टितानि ॥ नंदंतिकेचि
त्प्रहरंतिकेचिद्धावंतिकेचित्प्रलपंतिकेचित् ॥ ३७ ॥ नृत्यंतिकेचिद्विहसंतिकेचिद्वल्गंतिकेचित्प्रमथामदेन ॥ केचिज्जि
घृक्षंतिघनान्सतोयान्केचिद्ग्रहीतुंरविमुत्पतंति ॥ ३८ ॥ केचित्प्रसर्तुंपवनेनसार्धमिच्छंतिभीमाःप्रमथावियत्स्थाः ॥
आक्षिप्यकेचिच्चवरायुधानिमहाभुजंगानिववैनतेयाः ॥ ३९ ॥ ॥ ॥ ॥

श्रवणशंकवःश्रवणेषुपीडाजननात्कीलसदृशाः ॥ ३३ ॥ ३४ ॥ ३५ ॥ रक्तासवंरक्तंरुधिरमेवासवंसुरां ॥ ३६ ॥ निर्मथ्यपीडयित्वा ॥ ३७ ॥ प्रमथाः
गणाः ॥ घनान्मेघान् ॥ ३८ ॥ वैनतेयाःगरुडादयः ॥ ३९ ॥ ॥ ॥ ॥



Indira Gandhi National Centre for the Arts

खमंडलेआकाशे ॥ पर्वतकूटकल्पाःपर्वतशिखरतुल्याः ॥ ४० ॥ ४१ ॥ कथमभज्यत ॥ तत्रदृष्टांतमाह ॥ अनाप्तवदिति ॥ अनाप्तोऽयथार्थवक्ता त दुच्चारितवाक्यमिवार्थशून्यमित्यर्थः ॥ ४२ ॥ तदानींतत्रत्यस्त्रीणांयःकोलाहलोभवत्तमाह ॥ हानाथेति ॥ ४३ ॥ इतिश्रीशिवमहापुराणेवायवीयसंहिताटीका यांसारबोधिन्यांपूर्वभागेदक्षयज्ञमथनंनामाष्टादशोऽध्यायः ॥ १८ ॥ ओंनमःशिवाय ॥ विष्ण्वादीनामपिबलंजितंवीरवरेणयत् ॥ शंकरस्यप्रसादेनेत्येवंन

भ्रमंतिदेवानपिविद्रवंतःखमंडलेपर्वतकूटकल्पाः ॥ उत्पाट्यचोत्पाटयगृहाणिकेचित्सजालवातायनवेदिकानि ॥ ॥ ४० ॥ प्रक्षिप्यविक्षिप्यजलस्यमध्येकालांबुदाभाःप्रमथानिनेदुः ॥ उद्वर्तितद्वारकपाटकुड्यंविध्वस्तशालावलभी गवाक्षम् ॥ ४१ ॥ अहोबताभज्यतयज्ञवाटमनाप्तवद्वाक्यमिवायथार्थम् ॥ हानाथतातेतिपितःसुतेतिभ्रातर्ममांबे तिचमातुलेति ॥ ४२ ॥ उत्पाट्यमानेषुगृहेषुनार्योह्यनाथशब्दान्बहुशःप्रचक्रुः ॥ ४३ ॥ इतिश्रीशिवमहापुराणेवा यवीयसंहितायांपूर्वभागेदक्षयज्ञमथनंनामाऽष्टादशोऽध्यायः ॥ १८ ॥ वायुरुवाच ॥ ततस्त्रिदशमुख्यास्तेविष्णुश क्रपुरोगमाः ॥ सर्वेभयपरित्रस्तादुद्रुवुर्भयविह्वलाः ॥ १ ॥ निर्जैरदूषितैरंगैर्दृष्ट्वादेवानुपद्रुतान् ॥ दंड्यानदंडिता न्मत्वाचुकोपगणपुंगवः ॥ २ ॥ ततस्त्रिशूलमादायसर्वशक्तिनिबर्हणम् ॥ ऊर्ध्वदृष्टिर्महाबाहुर्मुखाज्ज्वालांसमुत्सृजन् ॥ ३ ॥ अमरानभिदुद्रावद्विरदानिवकेसरी ॥ तानभिद्रवतस्तस्यगमनंसुमनोहरम् ॥ ४ ॥ वारणस्येवमत्तस्यजगा मप्रेक्षणीयताम् ॥ ततस्तत्क्षोभयामासमहत्सुरबलंबली ॥ ५ ॥ महासरोवरंयद्वन्मत्तोवारणयूथपः ॥ विकुर्वन्बहु धावर्णान्नीलपांडुरलोहितान् ॥ ६ ॥ बिभ्रद्व्याघ्राजिनंवासोहेमप्रवरतारकम् ॥ छिंदन्भिंदन्रुजन्क्रुदन्दारयन्प्र मथन्नपि ॥ ७ ॥ व्यचरद्देवसंघेषुभद्रोऽग्निरिवकक्षगः ॥ तत्रतत्रमहावेगाच्चरंतंशूलधारिणम् ॥ ८ ॥ तमेकंत्रिदशाः सर्वेसहस्रमिवमेनिरे ॥ भद्रकालीचसंक्रुद्धायुद्धवृद्धिमदोद्धता ॥ ९ ॥ मुक्तज्वालेनशूलेननिर्बिभेदरणेसुरान् ॥ सत यारुरुचेभद्रोरुद्रकोपसमुद्भवः॥१०॥प्रभयेवयुगांताग्निश्चलयाधूमधूम्रया॥भद्रकालीतदायुद्धेविद्रुतत्रिदशाबभौ ११

वदग्रेस्थितम् ॥ १ ॥ १ ॥ गणपुंगवःवीरभद्रः ॥ २ ॥ ३ ॥ तस्यवीरभद्रस्य ॥ ४ ॥ प्रेक्षणीयतांसुंदरत्वेनदर्शनीयतां ॥ ५ ॥ ६ ॥ हेमप्रवरतारकंहेममय्यः प्रवराःतारकाःयस्मिंस्तत् ॥ ७ ॥ कक्षंशुष्कतृणसमूहःअरण्यंवा ॥ कक्षःस्मृतोभुजामूलेकक्षोऽरण्येचवीरुधि ॥ कक्षःशुष्कतृणेप्रोक्तइतिधरणि ॥ ८ ॥ तंभद्रं ॥ ९ ॥ १० ॥ विद्रुतत्रिदशाविद्रुताःपलायितात्रिदशादेवायस्याः सा ॥ ११ ॥ ॥ ॥ ॥

Indira Gandhi National Centre for the Arts

कल्पेति ॥ कल्पशेषःकल्पांतः तत्रानलज्वालयादग्धंविश्वंजगत्ययासेत्यर्थः ॥ १२ ॥ पावकमग्निं ॥ १३ ॥ निर्ऋतिंराक्षसं ॥ टंकैरिति ॥ टंकः पाषाणदारणइत्यमरः ॥ १४ ॥ १५ ॥ देवमातुःअदितेः ॥ १६ ॥ १७ ॥ स्तनचूचूकंस्तनाग्रं ॥ १८ ॥ १९ ॥ सःपूषा ॥ २० ॥ २१ ॥ वैरि

कल्पशेषानलज्वालादग्धविश्वजगद्यथा ॥ तदासवाजिनंसूर्यैरुद्रानूरुद्रगणाग्रणीः ॥ १२ ॥ भद्रोमूर्ध्निजघानाशु वामपादेनलीलया ॥ असिभिःपावकंभद्रःपट्टिशैस्तुयमंयमी ॥ १३ ॥ रुद्रान्दृढेनशूलेनमुद्गरैर्वरुणंदृढैः ॥ परिघै र्निर्ऋतिंवायुंटंकैष्टंकधरःस्वयम् ॥ १४ ॥ निर्बिभेदरणेवीरोलीलयैवगणेश्वरः ॥ ततोदेवःसरस्वत्यानासिकाग्रंसुशो भनम् ॥ १५ ॥ चिच्छेदकरजाग्रेणदेवमातुस्तथैवच ॥ चिच्छेदचकुठारेणबाहुदंडंविभावसोः ॥ १६ ॥ अग्रतोद्व्यंगु लांजिह्वामात्तहव्यांलुलावच ॥ स्वाहादेव्यास्तथादेवोदक्षिणंनासिकापुटं ॥ १७ ॥ चकर्तकरजाग्रेणवामंचस्तनचू चुकम् ॥ भगस्यविपुलेनेत्रेशतपत्रसमप्रभे ॥ १८ ॥ प्रसह्योत्पाटयामासभद्रःपरमवेगवान् ॥ पूष्णोदशनरेखांचदी प्तांमुक्तावलीमिव ॥ १९ ॥ जघानधनुषःकोट्यासतेनास्पष्टवागभूत् ॥ ततश्चंद्रमसंदेवःपादांगुष्ठेनलीलया ॥ २० ॥ क्षणात्कृमिवदाक्रम्यघर्षयामासभूतले ॥ शिरश्चिच्छेददक्षस्यभद्रःपरमशोभनम् ॥ क्रोशंत्यामेववैरिण्यांभद्रकाल्यै ददौचतत् ॥ तत्प्रहृष्टासमादायशिरस्तालफलोपमम् ॥ २२ ॥ सादेवीकंदुकक्रीडांचकारसमरांगणे ॥ ततोदक्षस्य यापत्नीकुशीलाभर्तृभिर्यथा ॥ २३ ॥ पादाभ्यांचैवहस्ताभ्यांहन्यतेस्मगणेश्वरैः ॥ अरिष्टनेमिनंसोमंधर्मंचैवप्रजा पतिम् ॥ २४ ॥ बहुपुत्रंचांगिरसंभृशाश्वंकाश्यपंतथा ॥ गलेप्रगृह्यबलिनोगणपाःसिंहविक्रमाः ॥ २५ ॥ भर्त्सयं तोभृशंवाग्भिःसंजघ्नुर्मूर्ध्निमुष्टिभिः ॥ धर्षिताभूतवेतालैर्दाराःसुतपरिग्रहाः ॥ २६ ॥ यथाकलियुगेजारैर्बलेनकुल योषितः ॥ तच्चविध्वस्तकलशंभग्नयूपंगतोत्सवम् ॥ २७ ॥ प्रदीपितमहाशालंप्रभिन्नद्वारतोरणम् ॥ उत्पाटितसु रानीकंहन्यमानतपोधनम् ॥ २८ ॥ ॥ ॥ ॥ ॥

ण्यांदक्षपत्न्यां ॥ तत्दक्षशिरः ॥ २२ ॥ २३ ॥ यथेति ॥ यथाकुशीलास्त्रीभर्तृभिःपादादिभिर्हन्यतेतद्वदित्यर्थः ॥ २४ ॥ २५ ॥ २६ ॥ कुलयोषितइति ॥ धर्ष्यंतइतिशेषः ॥ २७ ॥ तद्यज्ञवाटंकीदृशमभवत्तदाह ॥ विध्वस्तेति ॥ विध्वस्तकलशंनष्टद्रोणकलशं ॥ २८ ॥ ॥



Indira Gandhi National Centre for the Arts

प्रशांतब्रह्मनिर्घोषंनष्टवेदघोषं ॥ हताशेषपरिच्छदंनष्टसर्वयज्ञसंभारं ॥ २९ ॥ ३० ॥ ३१ ॥ गणेशानोवीरभद्रः ॥ ३२ ॥ दुद्रावेति ॥ आहवनीयादिति शेषः ॥३३॥ तंयज्ञम् ॥३४॥ हतोस्मीति ॥ चिंतयेतिशेषः ॥ ३५॥ अध्वरपूरुषंयज्ञपूरुषम् ॥३६॥ सूर्यसंभवमिति ॥ सूर्येतपतियश्चासौशुचिःसौरउदाहृत इतिपूर्वमुक्तेःसूर्यसंभवत्वमस्यबोध्यम् ॥ अथेदृशमवज्ञानंदृष्ट्वातत्पूर्वसंभवामितिपाठांतरं ॥ तत्रावज्ञानंअपमानंपूर्वसंभवंप्रथममेवसंभवोयस्यतदित्यर्थः ॥ अ

प्रशांतब्रह्मनिर्घोषंप्रक्षीणजनसंचयम् ॥ क्रंदमानातुरस्त्रीकंहताशेषपरिच्छदम् ॥ २९ ॥ शून्यारण्यनिभंजज्ञेयज्ञवाटंतदार्दितम् ॥ शूलवेगप्ररुग्णाश्चभिन्नबाहूरुवक्षसः ॥ ३० ॥ विनिकृत्तोत्तमांगाश्चपेतुरुर्व्यांसुरोत्तमाः ॥ हतेषुतेषु देवेषुपतितेषुसहस्रशः ॥ ३१ ॥ प्रविवेशगणेशानःक्षणादाहवनीयकम् ॥ प्रविष्टमथतंदृष्ट्वाभद्रंकालाग्निसंनिभम् ॥ ॥ ३२ ॥ दुद्रावमरणाद्भीतोयज्ञोमृगवपुर्धरः ॥ सविस्फार्यमहच्चापंदृढज्याघोषभीषणम् ॥ ३३ ॥ भद्रस्तमभिदुद्राववविक्षिपन्नेवसायकान् ॥ आकर्णपूर्णमाकृष्टंधनुरंबुदसंनिभम् ॥ ३४ ॥ नादयामासतज्ज्यांचखंचभूमिंचसर्वशः ॥ तमुपश्रुत्यसंनादंहतोस्मीत्येवविव्हलम् ॥ ३५ ॥ शरेणाऽर्द्धेदुवक्रेणसवीरोऽध्वरपूरुषम् ॥ मृगरूपेणधावंतंविशिरस्कंतदाऽकरोत् ॥ ३६ ॥ तदीदृशमवज्ञातंदृष्ट्वातंसूर्यसंभवम् ॥ विष्णुःपरमसंक्रुद्धोयुद्धायाऽभवदुद्यतः ॥ ३७ ॥ तमुवाहमहावेगःस्कंधेननतसंधिना ॥ सर्वेषांवयसांराजागरुडःपन्नगाशनः ॥ ३८ ॥ देवाश्चहताशिष्टायेदेवराजपुरोगमाः ॥ प्रचक्रुस्तस्यसाहाय्यंप्राणांस्त्यक्तुमिवोद्यताः ॥ ३९ ॥ विष्णुनासहितान्देवान्वृकेणक्रोष्टुकानिव ॥ दृष्ट्वाजहासभूतेंद्रोमृगेंद्रइवविव्यथः ॥ ४० ॥ तस्मिन्नवसरेव्योम्निसमाविरभवद्रथः ॥ सहस्रसूर्यसंकाशश्चारुवीरवृषध्वजः ॥४१॥ अश्वरत्नद्वयोदारःखरचक्रचतुष्टयः ॥संचितानेकदिव्यास्त्रशररत्नपरिष्कृतः ॥४२॥ तस्यापिरथवर्यस्यस्यात्सएवहिसारथिः॥यएवत्रैपुरेयुद्धेपूर्वंशार्वरथेस्थितः॥४३॥सतंरथवरंब्रह्माशासनाद्देवशूलिनः॥हरेःसमीपमानीयकृतांजलिरभाषत ॥४४॥ भगवन्भद्रभद्रांगभगवानिंदुभूषणः॥आज्ञापयतिधीरत्वांरथमारोढुमव्ययः ॥४५॥

स्ययज्ञपुरुषस्येतिशेषः ॥ ३७ ॥ ३८ ॥ तस्यविष्णोः ॥ ३९ ॥ भूतेंद्रोवीरभद्रः ॥ ४० ॥ रथंवर्णयति ॥ सहस्रेति ॥ ४१ ॥ खरचक्रचतुष्टयः तीक्ष्णचक्रचतुष्टययुक्तः ॥ ४२ ॥ सएवब्रह्मेवयोग्यःस्यादित्यर्थः ॥ ४३ ॥ तमेवसारथिमाह ॥ सइति ॥ शूलिनःशिवस्य ॥ हरेरिति ॥ गरुडारूढस्यहरेःसमीपंसमक्षंभद्रोपवेशनार्थमानीयेत्यर्थः ॥ ४४ ॥ यदभाषततदाह ॥ भगवन्निति ॥ अव्ययःशिवः ॥ ४५ ॥

॥ ॥

Indira Gandhi National Centre for the Arts

रम्येति ॥ रैभ्याश्रमसमीपस्थमितिपाठांतरं ॥ रैभ्योमुनिः॥ ४६॥ तस्यब्रह्मणः॥ ४७॥ ४८॥ भानुकंपःएतन्नामागणः॥ ४९॥ भिन्नसागरसन्निभंक्षुभितसमुद्रतुल्यं निबिडीभूताघनीभूताः॥ ५०॥ ५१॥ गणगोवृषंगणश्रेष्ठम् ॥ ५२॥ ५३॥ ५४॥ ५५॥ आशीविषोपमंसर्पतुल्यम् ॥ ५६॥ इदानींवीरभद्रस्ययुद्धकौशलंवर्णयति ॥

रम्याश्रमसमीपस्थरूयंबकोंऽबिकयासह ॥ पश्यत्येवमहाबाहोदुःसहंतेपराक्रमं ॥ ४६ ॥ तस्यतद्वचनंश्रुत्वासवीरो रणकुंजरः ॥ आरुरोहरथंदिव्यमनुगृह्यपितामहम् ॥ ४७ ॥ तदारथवरेतस्मिन्स्थितेब्रह्मणिसारथौ ॥ भद्रस्यववृधेलक्ष्मीरुद्रस्येवपुरद्विषः ॥ ४८ ॥ ततःशंखवरंदीप्तंचंद्रकुंदसमप्रभम् ॥ प्रदध्मौवदनेकृत्वाभानुकंपोमहाबलः ॥ ॥ ४९ ॥ तस्यशंखस्यसंनादंभिन्नसागरसंनिभम् ॥ श्रुत्वाभयेनदेवानांजज्वालजठरानलः ॥ ५० ॥ यक्षविद्याधराहींद्रैःसिद्धैर्युद्धदिदृक्षुभिः ॥ क्षणेननिबिडीभूताःसाकाशविवरादिशः ॥ ५१ ॥ ततःशार्ङ्गेंद्रचापांकःसनारायणनीरदः ॥ महताबाणवर्षेणतुतोदगणगोवृषम् ॥ ५२ ॥ तंदृष्ट्वाविष्णुमायांतंशतधाबाणवर्षिणम् ॥ सचाददेधनुर्जैत्रंभद्रोबाणसहस्रमुक् ॥ ५३ ॥ समादायचतद्दिव्यंधनुःसमरभैरवम ॥ शनैर्विस्फारयामासमेरुंधनुरिवेश्वरः ॥ ५४ ॥ तस्यविस्फार्यमाणस्यधनुषोऽभून्महास्वनः ॥ तेनस्वनेनमहतापृथिवीसमकंपत ॥ ५५ ॥ ततःशरवरंघोरंदीप्तमाशीविषोपमम् ॥ जग्राहगणपःश्रीमान्स्वयमुग्रपराक्रमः ॥ ५६ ॥ बाणोद्धारेभुजोयस्यतूणीवदनसंगतः ॥ प्रत्यदृश्यतवल्मीकंविविक्षुरिवपन्नगः ॥ ५७ ॥ समुद्धृतःकरेतस्यतत्क्षणंरुरुचेशरः ॥ महाभुजंगसंदष्टोयथाबालभुजंगमः ॥ ॥ ५८ ॥ शरेणघनतीव्रेणभद्रोरुद्रपराक्रमः ॥ विव्याधकुपितोबाढंललाटेविष्णुमप्यथ ॥ ५९ ॥ ललाटेऽभिहतोविष्णुःपूर्वमेवावमानितः ॥ चुकोपगणपेंद्रायमृगेंद्रायेवगोवृषः ॥ ६० ॥ ततस्त्वशनिकल्पेनक्रूरास्येनमहेषुणा ॥ विव्याधगणराजस्यभुजेभुजगसंनिभे ॥ ६१ ॥ सोपितस्यभुजेभूयःसूर्यायुतसमप्रभम् ॥ विससर्जशरंवेगाद्वीरभद्रोमहाबलः ॥ ६२ ॥ सचविष्णुःपुनर्भद्रंभद्रोविष्णुंतथापुनः ॥ सचतंसचतंविप्राःशरैस्तावनुजघ्नतुः ॥ ६३ ॥ तथापरस्परंवेगाच्छरानाशुविमुंचतोः ॥ तयोःसमभवद्युद्धंतुमुलंरोमहर्षणम् ॥ ६४ ॥ ॥

बाणोद्धारेति ॥ तूणीवदनसंगतःइषुधिमुखंप्रविष्टः ॥ ५७ ॥ ५८ ॥ ५९ ॥ ६० ॥ अशनिकल्पेनवज्रतुल्येन ॥ ६१ ॥ तस्यविष्णोः ॥ ६२ ॥ ६३ ॥ ६४ ॥



Indira Gandhi National Centre for the Arts

॥ ६५ ॥ ६६ ॥ दृढजीवितःबलवत्प्राणोपि ॥ ६७ ॥ एनंवीरभद्रं ॥ ६८ ॥ ६९ ॥ ७० ॥ ७१ ॥ ७२ ॥ ७३ ॥ ७४ ॥ चक्रंसुदर्शन

तद्दृष्ट्वातुमुलंयुद्धंतयोर्वैविजिगीषतोः ॥ हाहाकारोमहानासीदाकाशेखेचरेरितः ॥ ६५ ॥ ततस्त्वनलतुंडेनशरेणादि
त्यवर्चसा ॥ विव्याधसुदृढंभद्रोविष्णोर्महतिवक्षसि ॥ ६६ ॥ सतुतीव्रप्रपातेनशरेणदृढजीवितः ॥ महतींरुजमासा
द्यनिपपातविमोहितः ॥ ६७ ॥ पुनःक्षणादिवोत्थायलब्धसंज्ञस्तदाहरिः ॥ सर्वाण्यपिचदिव्यास्त्राण्यथैनंप्रत्यवासृ
जत् ॥ ६८ ॥ सचविष्णुधनुर्मुक्तान्सर्वान्शर्वचमूपतिः ॥ सहसावारयामासघोरैःप्रतिशरैःशरान् ॥ ६९ ॥ ततोवि
ष्णुःस्वनामांकंबाणमव्याहतंक्वचित् ॥ ससर्जक्रोधरक्ताक्षस्तमुद्दिश्यगणेश्वरम् ॥ ७० ॥ तंबाणंबाणवर्येणभद्रोभ
द्राव्हयेनतु ॥ अप्राप्तमेवभगवांश्छिच्छेदशतधापथि ॥ ७१ ॥ अथैकेनेषुणाशार्ङ्गंद्वाभ्यांपक्षौगरुत्मतः ॥ निमेषादि
वचिच्छेदतदद्भुतमिवाऽभवत् ॥ ७२ ॥ ततोयोगबलाद्विष्णुर्देहाद्दिवान्सुदारुणान् ॥ शंखचक्रगदाहस्तान्विससर्ज
सहस्रशः ॥ ७३ ॥ सर्वांस्तान्क्षणमात्रेणत्रैपुरानिवशंकरः ॥ निर्ददाहमहाबाहुर्नेत्रसृष्टेनवन्हिना ॥ ७४ ॥ ततः
क्रुद्धतरोविष्णुश्चक्रमुद्यम्यसत्वरः ॥ तस्मिन्वीरेसमुत्स्रष्टुंतदानीमुद्यतोऽभवत् ॥ ७५ ॥ तंदृष्ट्वाचक्रमुद्यम्यपुरतः
समुपस्थितम् ॥ स्मयन्निवगणेशानोव्यष्टंभयदयत्नतः ॥ ७६ ॥ स्तंभितांगस्तुतच्चक्रंघोरमप्रतिमंक्वचित् ॥ इच्छ
न्नपिसमुत्स्रष्टुंनविष्णुरभवत्क्षमः ॥ ७७ ॥ क्रोशन्निवैकमुद्धृत्यबाहुंचक्रसमन्वितम् ॥ अतिष्ठदलसोविष्णुःपाषाण
इवनिश्चलः ॥ ७८ ॥ विशरीरोयथाजीवोविशृंगोवायथावृषः ॥ विदंष्ट्रश्चयथासिंहस्तथाविष्णुरवस्थितः ॥ ७९ ॥
तंदृष्ट्वादुर्दशापन्नंविष्णुमिंद्रादयःसुराः ॥ सुसन्नद्धागणेंद्रेणमृगेंद्रेणेवगोवृषाः ॥ ८० ॥ प्रगृहीतायुधायोद्धुंक्रुद्धाःस
मुपतस्थिरे ॥ तान्दृष्ट्वासमरेभद्रःक्षुद्रानिवहरिर्मृगान् ॥ ८१ ॥ अट्टहासेनघोरेणव्यष्टंभयदनिंदितः ॥ तथाशतम
खस्यापिसवज्रोदक्षिणःकरः ॥ ८२ ॥ सिसृक्षुरेवतद्वज्रंचित्रीकृतइवाऽभवत् ॥ अन्येषामपिसर्वेषामुद्युक्ताअपि
बाहवः ॥ ८३ ॥ ॥ ॥ ॥ ॥ ॥

म् ॥ ७५ ॥ ७६ ॥ ७७ ॥ ७८ ॥ ७९ ॥ सुसन्नद्धाःबद्धाः ॥ ८० ॥ ८१ ॥ शतमखस्यइंद्रस्य सिसृक्षुःत्यक्तुमिच्छुः ॥ ८२ ॥ ८३ ॥

Indira Gandhi National Centre for the Arts

नातियांतिनातिक्रामंतिस्म ॥ ८४ ॥ ८५ ॥ ८६ ॥ ८७ ॥ विश्वसंभवःब्रह्मा ॥ ८८ ॥ ८९ ॥ उपमानपदंतेजस्व्यंतराणामुपमानभावं ॥ ९० ॥ डुंडुभाः सर्पविशेषाः ॥ ९१ ॥ ९२ ॥ विशिखोन्माथितैर्बाणकृत्तैः ॥ ९३ ॥ अलब्धेति ॥ अलब्धमप्राप्तंआत्मतिरोधानंआत्मरक्षणार्थमंतर्धानंयैस्तइत्यर्थः ॥ ९४ ॥



अलसानामिवारंभास्तांदृशांनातियांत्युत ॥ एवंभगवतातेनव्याहताशेषवैभवाः ॥ ८४ ॥ अमराःसमरेतस्यपुरतः स्थातुमक्षमाः ॥ स्तब्धैरवयवैरेवदुद्रुवुर्भयविह्वलाः ॥ ८५ ॥ विद्रुतांस्त्रिदशान्वीरान्वीरभद्रोमहाभुजः ॥ विव्याधनिशितैर्बाणैर्मेघोवर्षैरिवाचलान् ॥ ८६ ॥ बहवस्तस्यवीरस्यबाहवःपरिघोपमाः ॥ शस्त्रैश्चकाशिरेदीप्तैःसाग्निज्वालाइवोरगाः ॥ ८७ ॥ अस्त्रशस्त्राण्यनेकानिसवीरोविसृजन्बभौ ॥ विसृजन्सर्वभूतानियथादौविश्वसंभवः ॥ ८८ ॥ यथारश्मिभिरादित्यःप्रच्छादयतिमेदिनीम् ॥ तथावीरःक्षणादेवशरैःप्राच्छादयद्दिशः ॥ ८९ ॥ खमंडलेगणेंद्रस्य शराःकनकभूषिताः ॥ उत्पतंतस्तडिद्रूपैरुपमानपदंययुः ॥ ९० ॥ महांतस्तेसुरांस्तांश्चमंडूकानिवडुंडुभाः ॥ प्राणैर्वियोजयामासुःपपुश्चरुधिरासवम् ॥ ९१ ॥ निकृत्तबाहवःकेचित्केचिल्लूनवराननाः ॥ पार्श्वेविदारिताःकेचिन्निपेतुरमराभुवि ॥ ९२ ॥ विशिखोन्मथितैर्गात्रैर्बाहुभिश्छिन्नसंधिभिः ॥ विवृत्तनयनाःकेचिन्निपेतुर्भूतलेमृताः ॥ ९३ ॥ गांप्रवेष्टुमिवेच्छंतःखंगंतुमिवलिप्सवः ॥ अलब्धात्मतिरोधानाव्यलीयंतपरस्परम् ॥ ९४ ॥ भूमौकेचित्प्रविविशुःपर्वतानांगुहाःपरे ॥ अपरेजग्मुराकाशंपरेचविविशुर्जलम् ॥ ९५ ॥ तथासंछिन्नसर्वांगैःसवीरस्त्रिदशैर्बभौ ॥ परिग्रस्तप्रजावर्गोभगवानिवभैरवः ॥ ९६ ॥ एवंदेवबलंसर्वंदीनंबीभत्सदर्शनम् ॥ गणेश्वरसमुत्पन्नंकृपणंवपुराददे ॥ ९७ ॥ तदात्रिदशवीराणामसृक्सलिलवाहिनी ॥ प्रावर्त्ततनदीघोराप्राणिनांभयशंसिनी ॥ ९८ ॥ रुधिरेणपरिक्लिन्नायज्ञभूमिस्तदाबभौ ॥ रक्तार्द्रवसनाढ्यामाहतशुंभेवकौशिकी ॥ ९९ ॥ तस्मिन्महतिनिर्वृत्तेसमरेभृशदारुणे ॥ भयेनैवपरित्रस्ताप्रचचालवसुंधरा ॥ १०० ॥ महोर्मिकलिलावर्त्तश्चुक्षुभेचमहोदधिः ॥ पेतुश्चोल्काःसहोत्पातैःशाखाश्चमुमुचुर्द्रुमाः ॥ १०१ ॥ अप्रसन्नादिशःसर्वाःपवनश्चाशिवोववौ ॥ अहोविधिविपर्यासस्त्वश्वमेधोऽयमध्वरः ॥ १०२ ॥

॥ ९५ ॥ ९६ ॥ ९७ ॥ ९८ ॥ कौशिकीमहाकाली ॥ ९९ ॥ १०० ॥ महोर्मीति ॥ महोर्मिभिःकलिलाःगंभीराःआवर्तायस्मिन्सइत्यर्थः ॥ १०१ ॥ १०२ ॥



Indira Gandhi National Centre for the Arts

॥ १०३ ॥ १०४ ॥ ईश्वरबहिष्कृतंईश्वरार्पणबुद्धिरहितम् ॥ १०५ ॥ असत्परिगृहीतंअशिष्टैरनंगीकृतं ॥ १०६ ॥ १०७ ॥ एवमन्वयव्यतिरेकाभ्यां शिवभक्तेरेवफलहेतुत्वमुक्त्वातद्राहितदानादेर्वैयर्थ्यमाह ॥ बहुनेति ॥ १०८ ॥ १०९ ॥ सेदुःउपविष्टाः ॥ ११० ॥ १११ ॥ उत्पथप्रस्थितंकुपथंगतम्

यजमानःस्वयंदक्षोब्रह्मपुत्रःप्रजापतिः ॥ धर्मादयःसदस्याश्चरक्षितागरुडध्वजः ॥ १०३ ॥ भागांश्चप्रतिगृण्हंतिसा
क्षादिंद्रादयःसुराः ॥ तथापियजमानस्ययज्ञस्यचसहर्त्विजः ॥ १०४ ॥ सद्यएवशिरश्छेदःसाधुसंपद्यतेफलम् ॥ त
स्माच्चावेदनिर्दिष्टंनचेश्वरबहिष्कृतम् ॥ १०५ ॥ नासत्परिगृहीतंचकर्मकुर्यात्कदाचन ॥ कृत्वापिसुमहत्पुण्यमिष्ट्वाय
ज्ञशतैरपि ॥ १०६ ॥ नतत्फलमवाप्नोतिभक्तिहीनोमहेश्वरे ॥ कृत्वापिसुमहत्पापंभक्त्यायजतियःशिवम् ॥ १०७ ॥
मुच्यतेपातकैःसर्वैर्नात्रकार्याविचारणा ॥ बहुनाऽत्रकिमुक्तेनवृथादानंवृथातपः ॥ वृथायज्ञोवृथाहोमःशिवनिंदारत
स्यतु ॥ १०८ ॥ ततःसनारायणकाःसरुद्राःसलोकपालाःसमरेसुरौघाः ॥ गणेंद्रचापच्युतबाणविद्धाःप्रदुद्रुवुर्गाढ
रुजाभिभूताः ॥ १०९ ॥ चेलुःक्वचित्केचनशीर्णकेशाःसेदुःक्वचित्केचनदीर्घगात्राः ॥ पेतुःक्वचित्केचनभिन्नवक्त्रानेशुःक्व
चित्केचनदेववीराः ॥ ११० ॥ केचिच्चतत्रत्रिदशाविपन्नाविस्रस्तवस्त्राभरणास्त्रशस्त्राः ॥ निपेतुरुद्धावितदीनमुद्राम
दंचदर्पंचबलंचहित्वा ॥ १११ ॥ तमुत्पथप्रस्थितमप्रधृष्योविक्षिप्यदक्षाध्वरमक्षतास्त्रः ॥ बभौगणेशःसगणेश्वराणां
मध्येस्थितःसिंहइवर्षभाणाम् ॥ ११२ ॥ इतिश्रीशिवमहापुराणेवायवीयसंहितायांपूर्वभागेदक्षशिवगणयुद्धवर्णनं
नामैकोनविंशोऽध्यायः ॥ १९ ॥ वायुरुवाच ॥ इतिसंछिन्नभिन्नांगादेवाविष्णुरोगमाः ॥ क्षणात्कष्टांदशामेत्यत्रेसुः
स्तोकावशेषिताः ॥ १ ॥ त्रस्तांस्तान्समरेवीरावीरभद्रप्रचोदिताः ॥ प्रगृह्यचयथादोषंनिगडैरायसैर्दृढैः ॥ २ ॥ ब
बंधुःपाणिपादेषुकंधरेषूदरेषुच ॥ तस्मिन्नवसरेब्रह्माभद्रमद्रींद्रजानुगम् ॥ ३ ॥ ॥

॥ ११२ ॥ इतिश्रीशिवमहापुराणेवायवयिसंहिताटीकायांसारबोधिन्यांपूर्वभागेदक्षशिवगणयुद्धवर्णनंनामैकोनविंशोऽध्यायः ॥ १९ ॥ ॐनमःशिवाय ॥ ब्र ह्मादिभिःस्तुतोभद्रोदेवान्निन्येशिवांतिकं ॥ ब्रह्माशिवाज्ञयादक्षंछागास्यमकरोत्तदा ॥ १ ॥ अनुग्रहंचदेवेषुब्रह्माविष्णवर्षियाचितं ॥ कृत्वांतर्द्धानमगम त्तद्विंशेध्यायइतीर्यते ॥ २ ॥ स्तोकावशेषिताःअल्पावशिष्टाः ॥ १ ॥ तान्देवान् ॥ यथादोषमपराधानुसारेण ॥ २ ॥ ३ ॥ ॥

Indira Gandhi National Centre for the Arts

यदब्रवीत्तदाह ॥ अलमिति ॥ ४ ॥ रोमजैःरोमोद्भवैर्गणैः ॥ ५ ॥ तस्यब्रह्मणः॥ देवदेवस्यशिवस्य ॥ मंत्रिणस्तोतारः ॥ ६ ॥ ७ ॥ कालेति ॥ कालरूपेण कामांगंमनोभवशरीरंहरतीतितस्मै ॥ ८ ॥ आक्लिष्टकर्मणःसाहसकारिणः ॥ ९ ॥ १० ॥ निगडात्कारागृहबंधनात् ॥ ११ ॥ देवदेवस्यशिवस्य ॥ १२ ॥



सारथ्याल्लब्धवात्सल्यःप्रार्थयन्प्रणतोऽब्रवीत् ॥ अलंक्रोधेनभगवन्नष्टाश्चैतेदिवौकसः ॥ ४ ॥ प्रसीदक्षम्यतांस वैरोमजैःसहसुव्रत ॥ एवंविज्ञापितस्तेनब्रह्मणापरमेष्ठिना ॥ ५ ॥ शमंजगामसंप्रीतोगणपस्तस्यगौरवात् ॥ देवा श्चलब्धावसरादेवदेवस्यमंत्रिणः ॥ ६ ॥ धारयंतोंऽजलिंमूर्ध्नितुष्टुवुर्विविधैःस्तवैः ॥ देवाऊचुः ॥ नमःशिवायशांता ययज्ञहर्त्रेत्रिशूलिने ॥ ७ ॥ रुद्रभद्रायरुद्राणांपतयेरुद्रमूर्त्तये ॥ कालाग्निरुद्ररूपायकालकामांगहारिणे ॥ ८ ॥ दे वतानांशिरोहंत्रेदक्षस्यचदुरात्मनः ॥ संसर्गादस्यपापस्यदक्षस्याक्लिष्टकर्मणः ॥ ९ ॥ शासिताःसमरेवीरत्वयावयम निंदिताः ॥ दग्धाश्चामीवयंसर्वेत्वत्तोभीताश्चभोःप्रभो ॥ १० ॥ त्वमेवगतिरस्माकंत्राहिनःशरणागतान् ॥ तुष्टस्त्वे वंस्तुतोदेवान्विसृज्यनिगडात्प्रभुः ॥ ११ ॥ आनयद्देवदेवस्यसमीपममरानिह ॥ देवोपितत्रभगवानंतरिक्षेस्थितः प्रभुः ॥ १२ ॥ सगणःसर्वगःसर्वःसर्वलोकमहेश्वरः ॥ तंदृष्ट्वापरमेशानंदेवाविष्णुपुरोगमाः ॥ १३ ॥ प्रीताअपिच भीताश्चनमश्चक्रुर्महेश्वरम् ॥ दृष्ट्वातानमरान्भीतान्प्रणतान्प्रणतार्तिहा ॥ १४ ॥ इदमाहमहादेवःप्रहसन्प्रेक्ष्य पार्वतीम् ॥ माभैष्टत्रिदशायूयंक्षांतोस्माभिर्व्यतिक्रमः ॥ १५ ॥ क्रुद्धेष्वस्मासुयुष्माकंनस्थितिर्नचजीवितम् ॥ इत्यु क्तास्त्रिदशाःसर्वेशर्वेणामिततेजसा ॥ १६ ॥ सद्योविगतसंत्रासाननृतुर्विवशामुदा ॥ अथास्मिन्नंतरेब्रह्माप्राणिपत्य कृतांजलिः ॥ १७ ॥ एवंह्यवसरंप्राप्यव्यज्ञापयतशूलिने ॥ ब्रह्मोवाच ॥ जयदेवमहादेवप्रणतार्तिप्रभंजन ॥१८॥ ईदृशेष्वपराधेषुकोऽन्यस्त्वत्तःप्रसीदति ॥ लब्धात्मानोभविष्यंतियेसुरानिहतामृधे ॥ १९ ॥ प्रत्यापत्तिर्नकस्यस्या त्प्रसन्नेपरमेश्वरे ॥ यदिदंदेवदेवानांकृतमंगेषुदूषणम् ॥ २० ॥ तदिदंभूषणंमन्येतवांगीकारगौरवात् ॥ इतिविज्ञा प्यमानस्तुब्रह्मणापरमेष्ठिना ॥ २१ ॥ ॥ ॥ ॥

॥ १३ ॥ १४ ॥ व्यतिक्रमोवमाननं ॥ १५ ॥ ततोदेवाअभयप्राप्त्यास्वस्थाअभवन्नित्याह ॥ त्रिदशाइति ॥ विवशाःस्वतंत्राः ॥ १६ ॥ १७ ॥ १८ ॥ ॥ १९ ॥ प्रत्यात्पत्तिःपुनःसुखप्राप्तिः ॥ दूषणंव्रणादिरूपं ॥ २० ॥ २१ ॥ ॥ ॥



Indira Gandhi National Centre for the Arts

देव्याःगौर्याः ॥ २२ ॥ तेषांदेवानां ॥ २३ ॥ वागीशाद्याःसरस्वतीप्रभृतयः ॥ २४ ॥ २५ ॥ जरदिति ॥ शिवाज्ञयावृद्धच्छागमुखमेवदक्षस्यमुखंचक्रइत्यर्थः सोपिदक्षोपि ॥ २६ ॥ परमेश्वरंशिवं ॥ तंदक्षं ॥ २७ ॥ घृणानिधिःकरुणानिधिःशिवः ॥ तस्येति ॥ तस्यदक्षस्यापितुर्ब्रह्मणइत्यन्वयः ॥ २८ ॥ २९ ॥

विलोक्यवदनंदेव्यादेवदेवःस्मयन्निव ॥ पुत्रभूतस्यवात्सल्याद्ब्रह्मणःपद्मजन्मनः ॥ २२ ॥ प्रनष्टानांपुनस्तेषांप्रददौपूर्ववत्तनुम् ॥ ततःक्षणेनतेदेवाःशतक्रतुपुरोगमाः ॥ २३ ॥ प्रत्यापन्नशरीरांगाःप्रणेमुःपरमेश्वरं ॥ वागीशाद्याश्चयादेव्योदंडितादेवमातरः ॥ २४ ॥ तासामपियथापूर्वंतान्यंगानिददौभवः ॥ दक्षस्यभगवानेवस्वयंब्रह्मापितामहः ॥ २५ ॥ तत्पापानुगुणंचक्रेजरच्छागमुखंमुखम् ॥ सोऽपिसंज्ञांततोलब्ध्वासमुत्थायकृतांजलिः ॥ २६ ॥ प्रलपन्बहुधाभीतस्तुष्टावपरमेश्वरम् ॥ तंतथाव्याकुलंभीतंप्रलपंतंकृतागसम् ॥ २७ ॥ स्मयन्निवाऽवदत्प्रेक्ष्यमाभैरितिघृणानिधिः ॥ तथोक्त्वाब्रह्मणस्तस्यपितुःप्रियचिकीर्षया ॥ २८ ॥ गाणपत्यंददौतस्मैदक्षायाऽक्षयमीश्वरः ॥ ततोब्रह्मामहादेवमभिवंद्यकृतांजलिः ॥ २९ ॥ तुष्टावशुभयावाचादेवींचगिरिजामुमाम् ॥ ततोविष्णुस्ततोदेवास्ततःसर्वेमहर्षयः ॥ ३० ॥ तुष्टुवुर्देवदेवेशंदेवींचापिपृथक्पृथक् ॥ तदापार्श्वस्थितंप्रेक्ष्यभद्रमद्रींद्रजास्वयम् ॥ ३१ ॥ कृतात्मप्रेपणंपुत्रंगृहीत्वातंकृतांजलिं ॥ आकृष्यभद्रयासार्धमंकेसमुपवेश्यच ॥ ३२ ॥ सस्वजेगुहवद्गाढसमाजिघ्रच्चमूर्धनि ॥ ततःप्रीततरादेवीवीरभद्रायशूलिने ॥ ३३ ॥ प्रददौविविधानिष्टान्वरांश्चैवसहस्रधा ॥ अथतदाहरिशक्रपितामहप्रभृतयःसुरलोकमहेश्वराः ॥ ३४ ॥ सकललोकमहेश्वरमीश्वरंशरणमेत्यकृतांजलयोऽस्तुवन् ॥ सचपुनस्त्रिदशान्शरणागतान्परमकारुणिकःपरमेश्वरः ॥ ३५ ॥ अनुगतस्मितलक्षणयागिराशमितसर्वभयःसमभाषत ॥ यदिदमागइहाचरितंसुरैर्विधिनियोगवशादिवयंत्रितैः ॥ ३६ ॥ शरणमेत्यनतानवलोक्यवस्तदखिलंकिलविस्मृतमेवनः ॥ तदिहयूयमपिप्रकृतंमनस्यविगणय्यविमर्दमपत्रपाः ॥ ३७ ॥ ॥ ॥

॥ ३० ॥ अद्रींद्रजापार्वती ॥ ३१ ॥ अंकेउत्संगे ॥ ३२ ॥ गुहवत्स्कंदवत् ॥ ३३ ॥ वरानिति ॥ बरान्वरसहस्रदेतिपाठांतरं ॥ ३४ ॥ ३५ ॥ अनुगतेति ॥ अनुगतंसंबद्धंस्मितचिन्हंयस्यांसातयां ॥ शिवस्तदपराधानक्षमतेत्याह ॥ यदिदमिति ॥ विधिनियोगवशात्दैवाधीनतया ॥ ३६ ॥ विमर्दमविचारकृतंसंमर्दं ॥ अपत्रपाःलज्जारहिताः ॥ ३७ ॥ ॥ ॥ ॥

अक्रतुःदक्षयज्ञसंबधरहितः ॥ ३८ ॥ अनेकमुखंअनेकमार्गेणेतियावत् ॥ ३९ ॥ इतिश्रीशैवमहापुराणेवायवीयसंहिताटीकायांसारबोधिन्यांपूर्वभागेसुरवरप्रदानंनामविंशोऽध्यायः ॥ २० ॥ ओंनमःशिवाय ॥ मंदरोवर्णितःपूर्वयत्रसांबःसुखंस्थितः ॥ तत्रगौरीतपःकृत्वापरंशुंभनिशुंभयोः ॥ १ ॥ वधायसहसोत्सृज्यत्वक्कोशंगौर्यजायत ॥ कौशिकीतिचतद्वृत्तमेकविंशेत्रवर्ण्यते ॥ २ ॥ सानुचरःवीरभद्रादिगणसहितः ॥ रराम रेमे ॥ १ ॥ देवदेवस्याशिवस्य ॥ निवा



हरिविरंचिसुरेंद्रमुखाःसुखंव्रजतदेवपुरंप्रतिसंप्रति ॥ इतिसुरानभिधायसुरेश्वरोनिकृतदक्षकृतक्रतुरक्रतुः ॥ ३८ ॥ सगिरिजानुचरःसपरिच्छदःस्थितइवांऽबरतोंऽतरधीयत ॥ अथसुराअपितेविगतव्यथाःकथितभद्रसुभद्रपराक्रमाः ॥ सपदिखेनसुखेनयथासुखंययुरनेकमुखंमघवन्मुखाः ॥ ३९ ॥ इतिश्रीशिवमहापुराणेवायवीयसंहितायांपूर्वभागेविंशोऽध्यायः ॥ २० ॥ ऋषयऊचुः ॥ अंतर्धानगतोदेव्यासहसानुचरोहरः ॥ क्वयातःकुत्रवावासःकिंकृत्वाचररामच ॥ १ ॥ वायुरुवाच ॥ महीधरवरःश्रीमान्मंदरश्चित्रकंदरः ॥ दयितोदेवदेवस्यनिवासस्तपसोऽभवत् ॥ २ ॥ तपोमहत्कृतंतेनवोढुंस्वशिरसाशिवौ ॥ चिरेणलब्धंतत्पादपंकजस्पर्शजंसुखम् ॥ ३ ॥ तस्यशैलस्यसौंदर्यंसहस्रवदनैरपि ॥ नशक्यंविस्तराद्वक्तुंवर्षकोटिशतैरपि ॥ ४ ॥ शक्यमप्यस्यसौंदर्यंनवर्णयितुमुत्सहे ॥ पर्वतांतरसौंदर्यसाधारण्यावधारणात् ॥ ५ ॥ इदंतुशक्यतेवक्तुमेषपर्वतसुंदरः ॥ ऋत्ध्याकयापसौंदर्यमीश्वरावासयोग्यताम् ॥ ६ ॥ अतएवहिदेवेनदेव्याःप्रियचिकीर्षया ॥ अतीवरमणीयोयंगिरिरंतःपुरीकृतः ॥ ७ ॥ मेखलाभूमयस्तस्यविपुलोपलपादपाः ॥ शिवयोर्नित्यसान्निध्याच्यक्कुर्वंत्यखिलंजगत् ॥ ८ ॥ पितृभ्यांजगतोनित्यंस्थानपानोपयोगतः ॥ अवाप्तपुण्यसंस्कारःप्रसरद्भिरितस्ततः ॥ ९ ॥ लघुशीतलसंस्पर्शैरच्छाछैर्निर्झरांबुभिः ॥ आधिराज्यइवाद्रीणामद्रिरेषोभिषिच्यते ॥ १० ॥ निशासुशिखरप्रांतवर्तिनासशिलोच्चयः ॥ चंद्रेणाचलसाम्राज्यछत्रेणेवविराजते ॥ ११ ॥

सःवसातिस्थानं ॥ २ ॥ शिवौदेवीशंकरौ ॥ ३ ॥ तस्यमंदरस्य ॥ ४ ॥ नोत्सहइत्युक्तंतत्रहेतुमाह ॥ पर्वतांतरेति ॥ मेर्वादिसौंदर्यंतुल्यत्वनिश्चयादित्यर्थः॥ ॥ ५ ॥ ईश्वरेति ॥ ईश्वरनिवासयोग्यतारूपंसौंदर्यंप्रापेत्यर्थः ॥ ६ ॥ ७ ॥ न्यक्कुर्वंतितिरस्कुर्वंति ॥ ८ ॥ पितृभ्यामिति ॥ जगतःपितृभ्यांशिवाभ्यामित्यर्थः ॥ अवाप्तपुण्यसंस्कारःस्थानाद्युपयोगेनावाप्तःपुण्यसंस्कारोयेनसः॥ ९॥आधिराज्यइति अधिराजइवाद्रीणामित्यपिपाठः॥ १०॥शिलोच्चयःमंदरः ॥ ११॥



Indira Gandhi National Centre for the Arts

बालैःकेशैः ॥ १२ ॥ १३ ॥ १४ ॥ १५ ॥ १६ ॥ १७ ॥ १८ ॥ व्यात्तास्यैर्विवृतमुखैः ॥ अजीर्णलावण्यतया सदाभिनवसौंदर्यतया ॥ १९ ॥ तिर

सशैलश्चंचलीभूतैर्बालैश्चमरयोषितां ॥ सर्वपर्वतसाम्राज्यचामरैरिववीज्यते ॥ १२ ॥ प्रातरभ्युदितेभानौभूधरोर
त्नभूषितः ॥ दर्पणेदेहसौभाग्यंद्रष्टुकामइवस्थितः ॥ १३ ॥ कूजद्विहंगवाचालैर्वातोद्धूतलताभुजैः ॥ विमुक्तपुष्पैःस
ततंव्यालंबिमृदुपल्लवैः ॥ १४ ॥ लताप्रतानजटिलैस्तरुभिस्तापसैरिव ॥ जयाशिषासहाभ्यर्च्यनिषेव्यतइवाद्रि
राट् ॥ १५ ॥ अधोमुखैरूर्ध्वमुखैःशृंगैस्तिर्यङ्मुखैरपि ॥ प्रपतन्निवपातालेभूपृष्ठादुत्पतन्निव ॥१६॥ परीत्यसर्वतो
दिक्षुभ्रमन्निवविहायसि ॥ पश्यन्निवजगत्सर्वंनृत्यन्निवनिरंतरम् ॥१७॥ गुहामुखैःप्रतिदिनंव्यात्तास्यैर्विपुलोदरैः
॥ अजीर्णलावण्यतयाजृंभामिवसदाचरन् ॥ १८ ॥ ग्रसन्निवजगत्सर्वंपिबन्निवपयोनिधिम् ॥ वमन्निवतमोऽतस्थ
मदन्निवखमंबुदैः ॥ १९ ॥ निवासभूमयस्तास्तादर्पणप्रतिमोदराः ॥ तिरस्कृतातपस्निग्धाश्रमच्छायामहीरुहाः ॥
॥ २० ॥ सरित्सरस्तटाकादिसंपर्कशिशिरानिलाः ॥ तत्रतत्रनिषण्णाभ्यांशिवाभ्यांसफलीकृताः ॥ २१ ॥ तमिमं
पर्वतश्रेष्ठंस्मृत्वासांबस्त्रियंबकः ॥ रैभ्याश्रमसमीपस्थश्चांऽतर्धानंगतोययौ ॥ २२ ॥ तत्रोद्यानमनुप्राप्यदेव्यासह
महेश्वरः ॥ ररामरमणीयासुदिव्यांतःपुरभूमिषु ॥ २३ ॥ तथागतेषुकालेषुविवृत्धासुप्रजासुच ॥ दैत्यौशुंभनिशुंभा
ख्यौभ्रातरौसंबभूवतुः ॥ २४ ॥ ताभ्यांतपोबलाद्दत्तंब्रह्मणापरमेष्ठिना ॥ अवध्यत्वंजगत्यस्मिन्पुरुषैरखिलैरपि ॥
॥ २५ ॥ अयोनिजातुयाकन्याअंबिकांशसमुद्भवा ॥ अजातपुंस्पर्शरतिरविलंघ्यपराक्रमा ॥ २६ ॥ तयाऽस्तुनौव
धःसंख्येतस्यांकामाभिभूतयोः ॥ इतिचाभ्यर्थितोब्रह्माताभ्यांप्राहतथास्त्विति ॥ २७ ॥ ततःप्रभृतिशक्रादीन्वि
जित्यसमरेसुरान् ॥ निस्स्वाध्यायवषट्कारंजगच्चक्रतुरक्रमात् ॥ २८ ॥ ॥ ॥

स्कृतेति ॥ तिरस्कृताःशमिताआतपायैस्ते अतएवस्निग्धाआश्रमच्छायामहीरुहायासुताः ॥ २० ॥ २१ ॥ रैभ्येति ॥ रैभ्योनाममहर्षिः तदाश्रमसमी
पस्थइत्यर्थः ॥ २२ ॥ २३ ॥ २४ ॥ २५ ॥ शुंभनिशुंभाभ्यांयाचितंवरमाह ॥ अयोनिजेति ॥२६॥ संख्येरणे ॥ २७ ॥ अक्रमात् सद्धर्मव्यतिक्रमात् ॥२८॥

ma Gandhi National
entre for the Arts

देवेशंशिवम् यदभ्यर्थितवांस्तदाह ॥ विनिंद्येति ॥ २९ ॥ देव्यैनिवेदनीयंवस्तुशिवमभ्यर्थयते ॥ त्वद्वर्णेति ॥ अकामांपुंरतिरहिताम् ॥ सुरेभ्यःदेवहितार्थं ॥ ३० ॥ कालीति ॥ त्वंकालवर्णासीतिक्रोधोद्दीपनोक्तिः ॥ ३१ ॥ ३२ ॥ देवीयदब्रवीत्तदाह ॥ ईदृशइति ॥ एषारतिः नियम्यतेबलात्स्थाप्यते ॥ ३३ ॥ ३४॥३५ ॥ वृथैवेति ॥ भर्तुर्यस्यांमनश्चक्षुषोर्निर्बंधस्तस्यामृद्धिरित्यादिस्मरणात् ॥ ३६ ॥ भोगैकशेषःऐहिकपारलौकिकभोगमात्रफलः ॥ अन्यथाभूताभ

तयोर्वधायदेवेशंब्रह्माभ्यर्थितवान्पुनः ॥ विनिंद्यापिरहस्यंबांक्रोधयित्वायथातथा ॥ २९ ॥ त्वद्वर्णकोशजांशक्तिम
कामांकन्यकात्मिकाम् ॥ निशुंभशुंभयोर्हंत्रींसुरेभ्योदातुमर्हसि ॥ ३० ॥ एवमभ्यर्थितोधात्राभगवान्नीललोहितः॥
कालीत्याहरहस्यंबांनिंदयन्निवसस्मितः ॥ ३१ ॥ ततःक्रुद्धतरादेवीसुवर्णावर्णकारणात् ॥ स्मयंतीचाहभर्त्तारमस
माधेययागिरा ॥ ३२ ॥ देव्युवाच ॥ ईदृशेममवर्णेऽस्मिन्नरतिर्भवतोऽस्तिचेत् ॥ एतावंतंचिरंकालंकथमेषानियम्य
ते ॥ ३३ ॥ अरुच्यावर्तमानोपिकथंचरमसेमया ॥ नह्यशक्यंजगत्यस्मिन्नीश्वरस्यतवप्रभो ॥ ३४ ॥ स्वात्माराम
स्यभवतोरतिर्नसुखसाधनम् ॥ इतिहेतोःस्मरोयस्मात्प्रसभंभस्मसात्कृतः ॥ ३५ ॥ याचनाभिरताभर्तुरपिसर्वांग
सुंदरी ॥ सात्वृथैवहिजायेतसर्वैरपिगुणांतरैः ॥ ३६ ॥ भर्तुर्भोगैकशेषोहिसर्गएवैषयोषिताम् ॥ तथासत्यन्यथाभूता
नारीकुत्रोपयुज्यते ॥ ३७ ॥ तस्माद्वर्णमिमंत्यक्त्वात्वयारहसिनिंदितम् ॥ वर्णांतरंभजिष्येवानभविष्यामिवास्वय
म् ॥ ३८ ॥ इत्युक्त्वोत्थायशयनाद्देवीरोषात्सगद्गदम् ॥ ययाचेनुमतिंभर्तुस्तपसेकृतनिश्चया ॥ ३९ ॥ तथाप्रणयभं
गेनभीतोभूतपतिःस्वयम् ॥ पादयोःप्रणमन्नेवभवानींप्रत्यभाषत ॥ ४० ॥ ईश्वरउवाच ॥ अजानतीवक्रीडोक्तिंप्रि
येकिंकुपितासिमे॥रतिःकुतोवाजायेतत्वत्तश्चेदरतिर्मम ॥ ४१ ॥ मातात्वमस्यजगतःपिताहमधिपस्तथा ॥ कथंतदु
पपद्येतत्वत्तोनाभिरतिर्मम ॥ ४२ ॥ ॥ ॥ ॥

र्तुरप्रिया ॥ ३७ ॥ इमंवर्णंसुवर्णवर्णं ॥ वर्णांतरंकृष्णवर्णं ॥ ३८ ॥ अनुमतिमिति ॥ भर्त्राद्यनुज्ञयैवनार्यासर्वस्यकर्तव्यत्वादितिभावः ॥ यथाहमनुः ॥ बालयावायुवत्यावावृद्धयावापियोषिता ॥ नस्वातंत्र्येणकर्तव्यंकिंचित्कार्यंगृहेष्वपि ॥ बाल्येपितुर्वशेतिष्ठेत्पाणिग्राहस्ययौवने ॥ पुत्राणांभर्तरिप्रेतेनभजेत्स्त्रीस्वतंत्रतामिति ॥ ३९ ॥ प्रणयभंगेनप्रेमनाशेन ॥ प्रणमन्निति ॥ प्रपतन्नेवेतिपाठांतरं ॥ ४० ॥ त्वत्तइति ॥ त्वत्सकाशाद्यदिममारतिस्तर्हिरतिःकुतोभवेदित्यर्थः ॥ ४१ ॥ तज्जगन्मातापितृत्वं ॥ ४२ ॥ ॥ ॥ ॥



Indira Gandhi National Centre for the Arts

त्वत्प्रीतिर्मयिमन्मथकृतानेतिकाकाऽऽह ॥ आवयोरिति ॥ तत्रहेतुमाह ॥ यतइति॥यतःकामोत्पत्तेःप्रागेवत्वत्प्रीतिवशेनमयाजगदुत्पादितमतस्तत्नसंभवती त्यर्थः ॥ ४३ ॥ पृथग्जनानांमूर्खाणांनीचानांवा ॥ मूर्खनीचौपृथग्जनावित्यमरः ॥ कामात्मामन्मथः ॥ उपालब्धोवंचितः ॥ कामदाहाद्धेतोः ॥ ४४ ॥

आवयोरतिकामोपिकिमसौकामकारितः ॥ यतःकामसमुत्पत्तेःप्रागेवजगदुद्भवः ॥ ४३ ॥ पृथग्जनानांरतयेकामा त्माकल्पितोमया ॥ ततःकथमुपालब्धःकामदाहादहंत्वया ॥ ४४ ॥ ममत्रिदशसामान्यंमन्यमानोमनोभवः ॥ मना क्परिभवंकुर्वन्मयावैभस्मसात्कृतः ॥४५॥ विहारोप्यावयोरस्यजगतस्त्राणकारणात् ॥ ततस्तदर्थंत्वय्यद्यक्रीडोक्तिं कृतवानहम् ॥ ४६ ॥ सचाऽयमचिरादर्थस्तवैवाविष्करिष्यते ॥ क्रोधेनाऽलंमुधानेनत्वन्निष्ठंकिंनवेत्सिमाम् ॥ ४७ ॥ इत्येवमनुनीतापिभर्त्रागिरिवरात्मजा ॥ कालीतिविप्रियंवाक्यंहृदिकृत्वेदमब्रवीत् ॥ ४८ ॥ देव्युवाच ॥ श्रुतपूर्वाहि भगवंस्तवचाटूक्तयोमया ॥ याभिरेवमधीराहमितःप्रागपिवंचिता ॥ ४९ ॥ प्राणानप्यप्रियाभर्त्तुर्नारीयानपरित्य जेत् ॥ कुलांगनासुसासद्भिःकुत्सितैवहिगण्यते ॥ ५० ॥ भूयसीचतवाप्रीतिरगौरमितिमेवपुः ॥ क्रीडोक्तिरपिका लीतिघटतेकथमन्यथा ॥ ५१ ॥ सद्भिर्विगर्हितंतस्मात्स्त्रीषुकार्ष्ण्यमसत्कृतम् ॥ अनुत्सृज्यतपोयोगात्स्थातुमेवेह नोत्सहे ॥ ५२ ॥ देवउवाच ॥ यद्येवंव्यवसायस्तेतपसाकिंप्रयोजनम् ॥ ममेच्छयास्वेच्छयावावर्णांतरवतीभव ॥ ॥ ५३ ॥ देव्युवाच ॥ नेच्छामिभवतोवर्णंस्वयंवाकर्त्तुमन्यथा ॥ ब्रह्माणंतपसाराध्यततोगौरीभवाम्यहं ॥ ५४ ॥ ईश्वरउवाच ॥ मत्प्रसादात्पुराब्रह्माब्रह्मत्वंप्राप्तवान्परम् ॥ तमाहूयमहादेवितपसाकिंकरिष्यसि ॥ ५५ ॥ देव्युवाच ॥ त्वत्तोलब्धपदाएवसर्वेब्रह्मादयःसुराः ॥ तथाप्याराध्यतपसाब्रह्माणंत्वन्नियोगतः ॥ ५६ ॥ ॥

कामदाहेकारणमाह ॥ ममेति ॥ ४५ ॥ तदर्थंजगत्त्राणार्थं ॥ ४६ ॥ त्वन्निष्ठंत्वत्प्रीतियुक्तं ॥ क्वचित्त्वन्निघ्नामितिपाठः ॥ ४७ ॥ ४८ ॥ चाटूक्तयःप्रेम्णामिथ्याविकत्थनानि ॥ ४९ ॥ ५० ॥ देवीरोषेणाह ॥ भूयसीति ॥ ममवपुरगौरमितितवाप्रीतिःक्रीडोक्तिरपिचकालीतिविपरीतंकथंभवेदित्यर्थः ॥ ५१ ॥ ५२ ॥ शिवोयदब्रवीत्तदाह ॥ यद्येवामिति ॥ ५३ ॥ ५४ ॥ ५५ ॥ ५६ ॥ ॥ ॥ ॥

Indira Gandhi National Centre for the Arts

॥ ५७ ॥ ५८ ॥ ननिर्बंधयामासनप्रत्यबध्नात् ॥ ५९ ॥ नियम्यप्रसह्य ॥ ६० ॥ ६१ ॥ पितरंहिमालयं ॥ मातरंमेनां ॥ ६२ ॥ ६३ ॥ ६४ ॥ क्षणिकेत



पुराकिलसतीनाम्नादक्षस्यदुहिताऽभवम् ॥ जगतांपतिमेवत्वांपतिंप्राप्तवतीतथा ॥ ५७ ॥ एवमद्यापितपसातोष
यित्वापितामहम् ॥ गौरीभवितुमिच्छामिकोदोषःकथ्यतामिह ॥ ५८ ॥ एवमुक्तोमहादेव्यामहादेवःस्मयन्निव ॥
नतांनिर्बंधयामासदेवकार्यचिकीर्षया ॥ ५९ ॥ ततःप्रदक्षिणीकृत्यपतिमंबापतिव्रता ॥ नियम्यचवियोगार्त्तिंजगा
महिमवद्गिरिम् ॥ ६० ॥ तपःकृतवतीपूर्वंदेशेयस्मिन्सखीजनैः ॥ तमेवदेशंवृणुयात्तपसेप्रणयात्पुनः ॥ ६१ ॥ त
तःस्वपितरंदृष्ट्वामातरंचतयोर्गृहे ॥ प्रणम्यवृत्तंविज्ञाप्यताभ्यांचानुमतासती ॥ ६२ ॥ पुनस्तपोवनंगत्वाभूषणानि
विसृज्यच ॥ स्नात्वातपस्विनीवेषंकृत्वापरमपावनं ॥ ६३ ॥ संकल्प्यचमहत्तीव्रंतपःपरमदुश्चरम् ॥ सदामनसिसं
धायभर्तुश्चरणपंकजम् ॥ ६४ ॥ तमेवक्षणिकेलिंगेध्यात्वाबाह्यविधानतः ॥ त्रिसंध्यमभ्यर्चयंतीवन्यैःपुष्पैःफलादि
भिः ॥ ६५ ॥ सएवब्रह्मणोमूर्तिमास्थायतपसःफलम् ॥ प्रदास्यतिममेत्येवंनित्यंमत्वाऽकरोत्तपः ॥ ६६ ॥ तथातप
श्चरंतींतांकालेबहुतिथेगते ॥ दृष्ट्वाकश्चिन्महाव्याघ्रोदुष्टभावादुपागमत् ॥ ६७ ॥ तथैवोपगतस्यापितस्यातीवदुरा
त्मनः ॥ गात्रंचित्रार्पितमिवस्तब्धंतस्याःसकाशतः ॥ ६८ ॥ तंदृष्ट्वापितथाव्याघ्रंदुष्टभावादुपागतम् ॥ नष्टथग्जन
वद्देवीस्वप्रभावेनविव्यथे ॥ ६९ ॥ सतुविष्टब्धसर्वांगोबुभुक्षापरिपीडितः ॥ ममामिषमितोनान्यदितिमत्वानिरंतर
म् ॥ ७० ॥ निरीक्षमाणःसततंदेवीमेवतदाऽनिशम् ॥ अतिष्ठदग्रतस्तस्याउपासनमिवाचरन् ॥ ७१ ॥ देव्याश्च
हृदयेनित्यंममैवाऽयमुपासकः ॥ त्राताचदुष्टसत्वेभ्यइतिप्रववृतेकृपा ॥ ७२ ॥ ततएवकृपायोगात्सद्योनष्टमलत्रयः
॥ बभूवसमहाव्याघ्रोदेवींचबुबुधेतदा ॥ ७३ ॥ ॥ ॥ ॥



त्क्षणेप्रादुर्भूते ॥ तमेवभर्तारमेव ॥ बाह्यविधानतःस्नानादिबाह्यकर्मविधानेन ॥ ६५ ॥ तपःसमयेदेवीयदचिंतयत्तदाह ॥ सएवेति ॥ शिवएवेत्यर्थः ॥ ६६ ॥
॥ ६७ ॥ तस्याःदेव्याः ॥ ६८ ॥ ६९ ॥ सःव्याघ्रः ॥ इतःदेवीशरीरात ॥ ७० ॥ ७१ ॥ ७२ ॥ नष्टमलत्रयःनष्टकायिकादित्रिविधपापः ॥ ७३ ॥

Indira Gandhi National Centre for the Arts

दौरात्म्यमिति ॥ न्यवर्ततेतिसंबध्यते ॥७४॥ कार्तार्थ्यंकृतार्थताम् ॥ ७५ ॥ ७६ ॥ तीव्रतरात्मकंतीव्रादप्यतितीव्रं॥दैत्यनिर्बंधात्दैत्यकृतनिग्रहात् ॥ ७७ ॥
हेत्वाश्रयांकारणपूर्विकां ॥ ७८ ॥ ७९ ॥ ८० ॥ ८१ ॥ प्रत्युपचारोक्तिंप्रत्युपचाररूपामुक्तिं ॥ ८२ ॥ ८३ ॥ ८४ ॥ ८५ ॥ देवात्ब्रह्मरूपाच्छिवात् ॥ श्रूयतइ

न्यवर्ततबुभुक्षाचतस्यांगस्तंभनंतथा ॥ दौरात्म्यंजन्मसिद्धंचतृप्तिश्चसमजायत ॥ ७४ ॥ तदापरमभावेनज्ञात्वाका
र्तार्थ्यमात्मनः ॥ सत्योपासकएवैषसिषेवेपरमेश्वरीम् ॥ ७५ ॥ दुष्टानामपिसत्वानांतथाऽन्येषांदुरात्मनाम् ॥ सए
वद्रावकोभूत्वाविचचारतपोवने ॥ ७६ ॥ तपश्चवव्रधेदेव्यास्तीव्रंतीव्रतरात्मकम् ॥ देवाश्चदैत्यनिर्बंधाद्ब्रह्माणंशर
णंययुः ॥ ७७ ॥ सोपिदैत्यवधासक्तःकृत्वाहेत्वाश्रयांकथाम् ॥ सामरस्त्वरितोब्रह्माययौदेव्यास्तपोवनम् ॥ ७८ ॥
ददर्शचसुरश्रेष्ठःश्रेष्ठेतपसिनिष्ठिताम् ॥ प्रतिष्ठामिवविश्वस्यभवानींपरमेश्वरीम् ॥ ७९ ॥ ननामचाऽस्यजगतोमा
तरंस्वस्यचात्मनः ॥ रुद्रस्यचपितुर्भार्यामार्यामद्रीश्वरात्मजाम् ॥ ८० ॥ ब्रह्माणमागतंदृष्ट्वादेवीदेवगणैःसह ॥ अ
र्घ्यंतदर्हंदत्वाऽस्मैस्वागताद्यैरुपाचरत् ॥ ८१ ॥ तांचप्रत्युपचारोक्तिंपुरस्कृत्याभिनंद्यच ॥ पप्रच्छतपसोहेतुमजान
न्निवपद्मजः ॥ ८२ ॥ ब्रह्मोवाच ॥ तीव्रेणतपसाऽनेनदेव्याकिमिहसाध्यते ॥ तपःफलानांसर्वेषांत्वदधीनाहिसिद्ध
यः ॥ ८३ ॥ यश्चैवजगतांभर्तातमेवपरमेश्वरम् ॥ भर्तारमात्मनाप्राप्यप्राप्तंचतपसःफलं ॥ ८४ ॥ अथवासर्वमेवै
तत्क्रीडाविलसितंतव ॥ इदंतुचित्रंदेवस्यविरहंसहसेकथम् ॥ ८५ ॥ देव्युवाच ॥ सर्गादौभवतोदेवादुत्पत्तिःश्रूयते
यदा ॥ तदाप्रजानांप्रथमस्त्वंमेप्रथमजःसुतः ॥ ८६ ॥ यदापुनःप्रजावृद्धौललाटाद्भवतोभवः ॥ उत्पन्नोऽभूत्तदात्वं
मेगुरुःश्वशुरभावतः ॥ ८७ ॥ यदाचायंगिरींद्रस्तेपुत्रोममपितास्वयम् ॥ तदापितामहस्त्वंमेजातोलोकपितामह ॥
॥ ८८ ॥ तदीदृशस्यभवतोलोकयात्राविधायिनः ॥ वृत्तमंतःपुरेभर्त्राकथयिष्येकथंपुनः ॥ ८९ ॥ किमत्रबहुनादेहे
यश्चाऽयंममकालिमा ॥ त्यक्त्वेमंत्वद्विधानेनगौरीभवितुमुत्सहे ॥ ९० ॥ ॥ ॥

ति ॥ योब्रह्माणंविदधातिपूर्वमित्यादिवाक्येष्वितिभावः ॥ ८६॥ ८७ ॥ गिरींद्रःहिमालयः ॥ ८८ ॥ लोकयात्राविधायिनःजगदुत्पत्त्यादिकारिणः ॥ भर्त्रेति ॥
तत्तस्माद्भर्त्रासहयद्वृत्तमंतःपुरेतदीदृशस्यमान्यस्यभवतःकथंकथयिष्यइत्यन्वयः ॥ ८९ ॥ देवीस्वेप्सितमाह॥किमत्रेति ॥ त्वद्विधानेनतवप्रयत्नेन॥ ९० ॥

Indira Gandhi National Centre for the Arts

ब्रह्मागौरींप्रशंसन्यदब्रवीत्तदाह ॥ एतावतेति ॥ किमर्थेनकेनप्रयोजनेन ॥ ९१ ॥ अनयाक्रीडया ॥ ९२ ॥ लब्धःनिश्चितः ॥ ९३ ॥ त्वच्छलेनत्वत्स्वरूपमिषेण ॥ विसृज्यमानात्वयेतिशेषः ॥ तयोःशुंभनिशुंभयोः ॥ भविष्यतीति ॥ अनयाशक्त्येतिशेषः ॥ ९४ ॥ ९५ ॥ त्वक्कोशात्मनात्वक्कोशरूपेण ॥ ९६ ॥ त्रिशूलादीति ॥ आदिनाबाणमुसलघंटालांगलकार्मुकपरिग्रहः ॥ ९७ ॥ ९८ ॥ ९९ ॥ केसरीसिंहः ॥ वाहनत्वइति ॥ वाहनत्वेनमानसइतिपाठांतरम् ॥

ब्रह्मोवाच ॥ एतावताकिमर्थेनतीव्रंदेवितपःकृतम् ॥ स्वेच्छैवकिमपर्याप्ताक्रीडेयंहितवेदृशी ॥ ९१ ॥ क्रीडापिचजगन्मातस्तवलोकहितायवै ॥ अतोममेष्टमनयाफलंकिमपिसाध्यताम् ॥ ९२ ॥ निशुंभशुंभनामानौदैत्यौदत्तवरौमया ॥ दृप्तौदेवान्प्रबाधेतेत्वत्तोलब्धस्तयोर्वधः ॥ ९३ ॥ अलंविलंबनेनात्रत्वच्छलेनस्थितातव ॥ शक्तिर्विसृज्यमानाद्यतयोर्मृत्युर्भविष्यति ॥ ९४ ॥ ब्रह्मणाऽभ्यर्थिताचैवंदेवीगिरिवरात्मजा ॥ त्वक्कोशंसहसोत्सृज्यगौरीसासमजायत ॥ ९५ ॥ सात्वक्कोशात्मनोत्सृष्टाकौशिकीनामनामतः ॥ कालीकालांबुदप्रख्याकन्यकासमपद्यत ॥ ९६ ॥ सातुमायात्मिकाशक्तिर्योगनिद्राचवैष्णवी ॥ शंखचक्रत्रिशूलादिसायुधाष्टमहाभुजा ॥ ९७ ॥ सौम्याघोराचमिश्राचत्रिनेत्राचंद्रशेखरा ॥ अजातपुंस्पर्शरतिरधृष्याचातिसुंदरी ॥ ९८ ॥ दत्ताचब्रह्मणेदेव्याशक्तिरेषासनातनी ॥ शुंभस्यचनिशुंभस्यनिहंत्रीदैत्यसिंहयोः ॥ ९९ ॥ ब्रह्मणापिप्रहृष्टेनतस्यैपरमशक्तये ॥ प्रबलःकेसरीदत्तोवाहनत्वेसमागतः ॥ १०० ॥ विंध्येचवसतिंतस्याःपूजांचासवपूर्वकैः ॥ मांसैर्मत्स्यैरपूपैश्चनिर्वर्त्यासौसमादिशत् ॥ १०१ ॥ साचैवंसंमताशक्तिर्ब्रह्मणाविश्वकर्मणा ॥ प्रणम्यमातरंगौरींब्रह्माणंचानुपूर्वशः ॥ १०२ ॥ शक्तिभिःस्वात्मतुल्याभिःस्वात्मजाभिरनेकशः ॥ परीताप्रययौविंध्यंदैत्येंद्रौहंतुमुद्यता ॥ १०३ ॥ निहतौचतथातत्रसमरेदैत्यपुंगवौ ॥ तद्बाणैःकामबाणैश्चछिन्नभिन्नांगमानसौ ॥ १०४ ॥ इतिश्रीशिवमहापुराणेवायवीयसंहितायांपूर्वभागेएकविंशोऽध्यायः २१

१०० ॥ विंध्येविंध्यपर्वते ॥ आसवपूर्वकैःसुरापूर्वकैः ॥ मांसेनसुरयानृपेतिमार्कंडेयपुराणात् ॥ असौब्रह्मा ॥ समादिशदिति ॥ तस्यावसतिंसमादिशदित्यन्वयः ॥ ॥ १०१ ॥ १०२ ॥ दैत्येंद्रौशुंभनिशुंभौ ॥ १०३ ॥ तद्बाणैःतत्स्त्रीकटाक्षरूपैस्तयाधनुषोमुक्तैर्वाशरैः ॥ १०४ ॥ इतिश्रीशिवमहापुराणेवायवीयसंहिताटीकायांसारबोधिन्यांपूर्वभागेकौशिक्युत्पत्तिवर्णनंनामैकविंशोऽध्यायः ॥ २१ ॥ ॥ ॥ ॥



Indira Gandhi National Centre for the Arts

ओंनमःशिवाय ॥ दुर्वृत्ध्याप्यागतंव्याघ्रमनुजग्राहपार्वती ॥ तदाब्रह्मानुमत्यैवंह्याविंशेत्रनिरूप्यते ॥ १ ॥ तस्यव्याघ्रस्य ॥ १ ॥ २ ॥ ३ ॥ ४ ॥ एनंव्याघ्रं ॥ ५ ॥ मुग्धामिवअज्ञानामिव ॥ तस्यव्याघ्रस्य ॥ ६ ॥ मृगःव्याघ्ररूपःपशुः ॥ आशीविषमुखेसर्पमुखे ॥ ७ ॥ ८ ॥ अपर्यंताअनंताः ॥ भोक्त

वायुरुवाच ॥ उत्पाद्यकौशिकींगौरींब्रह्मणेप्रतिपाद्यच ॥ तस्यप्रत्युपकारायपितामहमथाब्रवीत् ॥१॥ देव्युवाच ॥
दृष्टःकिमेषभवताशार्दूलोमदुपाश्रयः ॥ अनेनदुष्टसत्वेभ्योरक्षितंमेतपोवनम् ॥ २ ॥ मय्यर्पितमनाएषभजतेमाम
नन्यधीः ॥ अस्यसंरक्षणादन्यत्प्रियंममनविद्यते ॥ ३ ॥ भवितव्यमनेनातोममांतःपुरचारिणा ॥ गणेश्वरपदंचाऽ
स्मैप्रीतोदास्यतिशंकरः ॥ ४ ॥ एनमग्रेसरंकृत्वासखीभिर्गंतुमुत्सहे ॥ प्रदीयतामनुज्ञामेप्रजानांपतिनात्वया ॥ ५ ॥
इत्युक्तःप्रहसन्ब्रह्मादेवींमुग्धामिवस्मयन् ॥ तस्यतीव्रैःपुरावृत्तैर्दौरात्म्यंसमवर्णयत् ॥६॥ ब्रह्मोवाच ॥ क्वाऽसौदे
विमृगःक्रूरःक्वचतेऽनुग्रहःशुभः ॥ आशीविषमुखेसाक्षादमृतंकिंनिषिच्यते ॥ ७ ॥ व्याघ्रमात्रंनखल्वेषदुष्टःकोपि
निशाचरः ॥ अनेनभक्षितागावोब्राह्मणाश्चतपोधनाः ॥ ८ ॥ अपर्यंतायथाकामंकामरूपीचरत्यसौ ॥ अवश्यंख
लुभोक्तव्यंफलंपापस्यकर्मणः ॥ ९ ॥ अतःकिंकृपयाकृत्यमीदृशेषुदुरात्मसु ॥ अनेनदेव्याःकिंकृत्यंप्रकृत्याकलुषा
त्मना ॥ १० ॥ देव्युवाच ॥ यदुक्तंभवतासर्वंतथ्यमस्त्वयमीदृशः ॥ तथापिमांप्रपन्नोभून्नत्यक्तोमामुपाश्रितः ॥ ११
ब्रह्मोवाच ॥ यस्यभक्तिमविज्ञायप्राग्वृत्तंतेनिवेदितम् ॥ भक्तिश्चेदस्यकिंपापैर्नतेभक्तःप्रणश्यति ॥ १२ ॥ पुण्यका
र्मापिकिंकुर्यात्त्वदीयाज्ञानपेक्षया ॥ आज्ञाप्रज्ञापुराणीचत्वमेवपरमेश्वरी ॥ १३ ॥ त्वदधीनाहिसर्वेषांबंधमोक्षव्य
वस्थितिः ॥ त्वामृतेपरमांशक्तिंसंसिद्धिःकस्यकर्मणः ॥ १४ ॥ त्वमेवविविधाशक्तिर्भावानामभवास्वयम् ॥ अश
क्तःकर्मकरणंकर्तावाकिंकरिष्यति ॥१५॥ विष्णोश्चममचाऽन्येषांदेवदानवरक्षसां ॥ तत्तदैश्वर्यसंप्राप्तौतवैवाज्ञाहिका
रणम् ॥ १६ ॥ अतीताःखल्वसंख्याताब्रह्माणोहरयोभवाः ॥ अनागतास्त्वसंख्यातास्त्वदाज्ञानुविधायिनः ॥१७॥

व्यमिति ॥ अमुनेतिशेषः ॥ ९ ॥ कलुषात्मनाकपटयुक्तमनसा ॥ १० ॥ नत्यक्तोमयेतिशेषः ॥ ११ ॥ यस्यव्याघ्रस्य ॥ १२ ॥ १३ ॥ सर्वेषांसर्वप्राणि नाम् ॥ १४ ॥ अभवाजन्मरहिता ॥ १५ ॥ १६ ॥ १७ ॥ ॥ ॥ ॥

Indira Gandhi National Centre for the Arts

पुरुषार्थचतुष्टयंधमार्थकाममोक्षरूपम् ॥ १८ ॥ ब्रह्मत्वंचैतन्यं ॥ सुकृतइति ॥ व्यत्यासोभवेदितिसंबध्यते ॥ १९ ॥ २० ॥ समस्तलोकयात्रार्थंसर्वलोक स्थितिनिर्वाहार्थं ॥ भावैःचेष्टाभिः ॥ २१ ॥ २२ ॥ आत्मनःस्वस्य ॥ भावमभिप्रायंशुंभनिशुंभवधादिविषयम् ॥ २३ ॥ २४ ॥ पितरौमेनाहिमालयौ ॥ देवीति ॥ देवीतपोवनवृक्षान्सखीभ्यःकथयंतीत्यग्रिमेणान्वयः ॥ २५ ॥ विप्रयोगशुचावियोगशोकेन ॥ पुष्पबाष्पंपुष्परूपंबाष्पं ॥ विमुंचतःत्यजतः

त्वामनाराध्यदेवेशिपुरुषार्थचतुष्टयम् ॥ लब्धुंनशक्यमस्माभिरपिसर्वैःसुरोत्तमैः ॥ १८ ॥ व्यत्यासोपिभवेत्सद्योब्रह्मत्वस्थावरत्वयोः ॥ सुकृतेदुष्कृतेचापित्वद्व्यवस्थापनंयतः ॥ १९ ॥ त्वंहिसर्वजगद्भर्तुःशिवस्यपरमात्मनः ॥ अनादिमध्यनिधनाशक्तिराद्यासनातनी ॥ २० ॥ समस्तलोकयात्रार्थंमूर्तिमाविश्यकामपि ॥ क्रीडसेविविधैर्भावैःकस्त्वांजानातितत्वतः ॥ २१ ॥ अतोदुष्कृतकर्मापिव्याघ्रोऽयंत्वदनुग्रहात् ॥ प्राप्नोतुपरमांसिद्धिमत्रकःप्रतिबंधकः ॥२२॥ इत्यात्मनःपरंभावंस्मारयित्वानुरूपतः ॥ ब्रह्मणाभ्यर्थितागौरीतपसोऽपिन्यवर्तत ॥ २३ ॥ ततोदेवीमनुज्ञाप्यब्रह्मण्यंतर्हितेसति ॥ देवीचमातरंदृष्ट्वामेनांहिमवतासह ॥ २४ ॥ प्रणम्याश्वास्यबहुधापितरौविरहासहौ ॥ ततःप्रणयिनोदेवीतपोवनमहीरुहान् ॥ २५ ॥ विप्रयोगशुचेवाग्रेपुष्पबाष्पंविमुंचतः ॥ तत्तच्छाखासमारूढविहगोदीरितैरुतैः ॥ २६ ॥ व्याकुलंबहुधादीनंविलापमिवकुर्वतः ॥ सखीभ्यःकथयंत्येवसत्वराभर्तृदर्शने ॥ २७ ॥ पुरस्कृत्यचतंव्याघ्रंस्नेहात्पुत्रमिवौरसम् ॥ देहस्यप्रभयाचैवदीपयंतीदिशोदश ॥ प्रययौमंदरंगौरीयत्रभर्त्तामहेश्वरः ॥२८॥ इतिश्रीशिवमहापुराणेवायवीयसंहितायांपूर्वभागेदेवीब्रह्मसंवादेद्वाविंशोऽध्यायः ॥ २२ ॥ ऋषयऊचुः ॥ कृत्वागौरंवपुर्दिव्यंदेवीगिरिवरात्मजा ॥ कथंददर्शभर्तारंप्रविष्टामंदरंसती ॥ १ ॥ प्रवेशसमयेतस्याभवनद्वारगोचरैः ॥ गणेशैःकिंकृतंदेवस्तांदृष्ट्वाकिंतदाकरोत् ॥ २ ॥ वायुरुवाच ॥ प्रवक्तुमंजसाऽशक्यस्तादृशःपरमोरसः ॥ येनप्रणयगर्भेणभावोभाववतांहृतः ॥ ३ ॥ ॥ ॥ ॥

॥ २६ ॥ २७ ॥ २८ ॥ इतिश्री शैवमहापुराणेवायवीयसंहिताटीकायांसारबोधिन्यांपूर्वभागेदेवीब्रह्मसंवादेद्वाविंशोऽध्यायः ॥ २२ ॥ ओंनमःशिवाय ॥ गौरीगत्वैवमावेद्यवृत्तंव्याघ्रंचकारयत ॥ सोमनंदीतिनामानंत्रयोविंशेतदुच्यते ॥ १ ॥ १॥ देवःशिवः ॥ २ ॥ परमोरसःचित्तद्रवः ॥ भावोऽभिप्रायः ॥ ३ ॥



Indira Gandhi National Centre for the Arts

तंशिवम् ॥ ४ ॥ प्रणयभावैःप्रेमप्रकारैः ॥ ५ ॥ ६ ॥ ७ ॥ विवृतैःविकसितैर्नेत्रैः ॥ त्रिनेत्रत्वाब्दहुवचनं ॥ तद्वक्त्रंगौरीमुखं ॥ ८ ॥ यस्यांदशायां ॥ नलभ्यतेनप्राप्यतेस्म ॥ ९ ॥ किंनलभ्यतेस्मतदाह ॥ स्वेच्छयेति ॥ १० ॥ स्वेच्छांगयोगतःस्वेच्छाबलेन ॥ ११ ॥ विप्रियस्यद्वेषस्य ॥ १२ ॥ १३ ॥१४॥

द्वास्थैःससंभ्रमैरेवदेवोदेव्यागमोत्सुकः ॥ शंकमानःप्रविष्टांतांतंचसासमपश्यत ॥ ४ ॥ तैस्तैःप्रणयभावैश्चभवनांतरवर्तिभिः ॥ गणेंद्रैर्वंदितावाचाप्रणनामत्रियंबकम् ॥ ५ ॥ प्रणम्यनोत्थितायावत्तावत्तांपरमेश्वरः ॥ प्रगृह्यदोर्भ्यामाश्लिष्यपरितःपरयामुदा ॥ ६ ॥ स्वांकेधर्तुंप्रवृत्तोपिसापर्यंकेन्यषीदत ॥ पर्यंकतोबलाद्देवींस्वांकमारोप्यसुस्मिताम् ॥ ७ ॥ सस्मितोविवृतैर्नेत्रैस्तद्वक्त्रंप्रपिबन्निव ॥ तयासंभाषणायेशःपूर्वभाषितमब्रवीत् ॥ ८ ॥ देवउवाच ॥ सादशाचव्यतीताकिंतवसर्वांगसुंदरि ॥ यस्यामनुनयोपायःकोपिकोपान्नलभ्यते ॥ ९ ॥ स्वेच्छयापिचकालीतिनान्यवर्णवतीतिच ॥ त्वत्स्वभावाहृतंचित्तंसुभ्रुचिंतावहंमम ॥ १० ॥ विस्मृतःपरमोभावःकथंस्वेच्छांगयोगतः ॥ नसंभवंतियेतत्रचित्तकालुष्यहेतवः ॥ ११ ॥ पृथग्जनवदन्योन्यंविप्रियस्यापिकारणम् ॥ आवयोरपियद्यस्तिनास्त्येवैतच्चराचरम् ॥ १२ ॥ अहमग्निशिरोनिष्ठस्त्वंसोमसिरसिस्थिता ॥ अग्नीषोमात्मकंविश्वमावाभ्यांसमधिष्ठितम् ॥ १३ ॥ जगद्धितायचरतोःस्वेच्छाधृतशरीरयोः ॥ आवयोर्विप्रयोगेहिस्यान्निरालंबनंजगत् ॥ १४ ॥ अस्तिहेत्वपरंचात्रशास्त्रयुक्तिविनिश्चितम् ॥ वागर्थमयमेवैतज्जगत्स्थावरजंगमम् ॥ १५ ॥ त्वंहिवागमृतंसाक्षादहमर्थामृतंपरम् ॥ द्वयमप्यमृतंकस्माद्वियुक्तमुपपद्यते ॥ १६ ॥ विद्याप्रत्यायिकात्वंमेवेद्योऽहंप्रत्ययात्तव ॥ विद्यावेद्यात्मनोरेवविश्लेषःकथमावयोः ॥ १७ ॥ नकर्मणासृजामीदंजगत्प्रतिसृजामिच ॥ सर्वस्याज्ञैकलभ्यत्वादाज्ञात्वंहिगरीयसी ॥ १८ ॥ आज्ञैकसारमैश्वर्यंयस्मात्स्वातंत्र्यलक्षणं ॥ आज्ञयाविप्रयुक्तस्यऐश्वर्यंममकीदृशम् ॥ १९ ॥

वागर्थमयं नामरूपात्मकं ॥ १५ ॥ १६ ॥ तवेति ॥ तवप्रत्ययातज्ज्ञानादहंवेद्यइत्यर्थः ॥ एतेनशाब्दज्ञानंशब्दप्रतीतिजन्यमित्युक्तं ॥ १७ ॥ कर्मणास्वव्यापारेण ॥ प्रतिसृजामिसंहरामि ॥ तत्रहेतुमाह ॥ सर्वस्येति ॥ सर्वस्यसर्गप्रतिसर्गरूपकर्मणः ॥ १८ ॥ १९ ॥ ॥

Indira Gandhi National Centre for the Arts

॥ २० ॥ परानुग्रहात्परोपकारात् ॥ प्रवृत्तिलक्षणंसृष्टिप्रवर्तनरूपं ॥ प्रवृत्तिकारणमितिपाठांतरं ॥ लीलाविलासः ॥ २१ ॥ २२ ॥ ततइति ॥ ततःकिंलो
करक्षार्थमितिपाठः ॥ यदिति ॥ यद्वस्तुभूतानामनर्थायभवतितत्त्वयिनास्तीत्यर्थः ॥ २३ ॥ प्रियंवदेप्रियंवदतिसति ॥ २४ ॥ कौशिकीवर्णनात्परंकौशिकी



नकदाचिदवस्थानमावयोर्विप्रयुक्तयोः ॥ तथापिविरहोवृत्तइत्यतोऽन्यत्किमद्भुतम् ॥ २० ॥ नपरानुग्रहादन्यत्प्रयो
जनमिहात्मनः ॥ प्रवृत्तिलक्षणंतस्माल्लीलापिनवृथाऽऽवयोः ॥ २१ ॥ देवानांकार्यमुद्दिश्यलीलोक्तिंकृतवानहम् ॥
त्वयाप्यविदितंनास्तिकथंकुपितवत्यसि ॥ २२ ॥ ततःस्त्रिलोकरक्षार्थेकोपोमय्यर्पितेकृतः ॥ यदनर्थायभूतानांनत
दस्तिखलुत्वयि ॥ २३ ॥ इतिप्रियंवदेसाक्षादीश्वरेपरमेश्वरी ॥ शृंगारभावसाराणांजन्मभूमिरकृत्रिमा ॥ २४ ॥
स्वभर्त्रालललितंतथ्यमुक्तंमत्वास्मितोत्तरं ॥ लज्जयानकिमप्यूचेकौशिकीवर्णनात्परम् ॥ २५ ॥ देव्युवाच ॥ किंदेवे
ननसादृष्टायासृष्टाकौशिकीमया ॥ तादृशीकन्यकालोकेनभूतानभविष्यति ॥ २६ ॥ तस्यावीर्यंबलंविंध्येनिलयंवि
जयंतथा ॥ शुंभस्यचनिशुंभस्यमारणंचरणेतयोः ॥ २७ ॥ प्रत्यक्षफलदानंचलोकायभजतेसदा ॥ देवानांरक्षणेश
श्वद्ब्रह्माविज्ञापयिष्यति ॥ २८ ॥ इतिसंभाषमाणायादेव्याएवाज्ञयातदा ॥ व्याघ्रःसख्यासमानीयपुरोऽवस्थापि
तस्तथा ॥ २९ ॥ तंप्रेक्ष्याहपुनर्देवीदेवानीतमुपायनम् ॥ व्याघ्रंपश्यनचाऽनेनसदृशोमदुपासकः ॥ ३० ॥ अनेन
दुष्टसत्वेभ्योरक्षितंमत्तपोवनम् ॥ अतीवममभक्तश्चविस्रब्धश्चस्वरक्षणात् ॥ ३१ ॥ स्वदेशंचपरित्यज्यप्रसादार्थं
समागतः ॥ यदिप्रीतिरभून्मत्तोयदिप्रीतिंकरोषिमे ॥ ३२ ॥ नित्यमंतःपुरद्वारिनियोगान्नंदिनःस्वयम् ॥ रक्षिभिः
सहतच्चिन्हैर्वर्ततामयमीश्वर ॥ ३३ ॥ मधुरंप्रणयोदर्कंश्रुत्वादेव्याःशुभंवचः ॥ प्रीतोऽस्मीत्याहतंदेवःसचादृश्यत
तत्क्षणात् ॥ ३४ ॥ बिभ्रद्वेत्रलतांहैमींरत्नचित्रंचकंचुकम् ॥ छुरिकामुरगप्रख्यांगणेशोरक्षवेषधृक् ॥ ३५ ॥

वर्णनादतिरिक्तम् ॥ २५ ॥ देवीयदब्रवीत्तदाह ॥ किमिति ॥ २६ ॥ विंध्येनिलयंविंध्यपर्वतेनिवासं ॥ २७ ॥ भजतेभक्ताय ॥ २८ ॥ इतीति ॥ इति
संभाषमाणायांदेव्यामवसरज्ञयेतिपाठांतरं॥ २९॥देवीयदाहतत्कथयति॥देवेति॥उपायनमुपदारूपं॥ ३०॥अनेनव्याघ्रेण॥स्वरक्षणात्ममरक्षणात् ॥ ३१॥ ३२॥
तच्चिन्हैःरक्षिचिन्हैःवेत्रलतादिभिः ॥ ३३ ॥ प्रणयोदर्कंप्रणयफलयुक्तं ॥ तंव्याघ्रं ॥ ३४ ॥ ३५ ॥ ॥ ॥

सोमनंदीतिनामप्रवृत्तिनिमित्तमाह ॥ यस्मादिति ॥ अनेनव्याघ्रेण ॥ समाख्ययानाम्ना ॥ ३६ ॥ तांगौरीं ॥ ३७ ॥ ३८॥ इतिश्रीशिवमहापुराणेवायवीयसंहिताटीकायांसारबोधिन्यांपूर्वभागेगौरीशिवसंवादोनामत्रयोविंशोऽध्यायः ॥ २३ ॥ ओंनमःशिवाय ॥ अग्नीषोमात्मकंविश्वमुमायैशंभुनेरितम् ॥ तत्प्रपंचोजगद्धेतुश्चतुर्विंशेत्रवर्ण्यते ॥ १ ॥ १ ॥ चोदितमिति ॥ आज्ञात्वंहिगरीयसीतिपूर्वमुक्तमित्यर्थः ॥ २ ॥ घोरेति ॥ तथाचश्रुतिः ॥ रुद्रोवाएषयदग्नि

यस्मात्सोमोमहादेवोनंदीचाऽनेननंदितः ॥ सोमनंदीतिविख्यातस्तस्मादेषसमाख्यया ॥ ३६ ॥ इत्थंदेव्याःप्रियंकृत्वादेवश्चार्धेंदुभूषणः ॥ भूषयामासतांदिव्यैर्भूषणैरत्नभूषितैः ॥ ३७ ॥ ततःसगौरीगिरिशोगिरींद्रजांसगौरवंसर्वमनोहरांहरः ॥ स्वमंकमारोप्यवरांगभूषणैर्विभूषयामासशशांकभूषणः ॥ ३८ ॥ इतिश्रीशिवमहापुराणेवायवीयसंहितायांपूर्वभागेत्रयोविंशोऽध्यायः ॥ २३ ॥ ऋषयऊचुः ॥ देवींसमादधानेनदेवेनेदंकिमीरितम् ॥ अग्नीषोमात्मकंविश्वंवागर्थात्मकमित्यपि ॥ १ ॥ आज्ञैकसारमैश्वर्यमाज्ञात्वमितिचोदितम् ॥ तदिदंश्रोतुमिच्छामोयथावदनुपूर्वशः ॥ २ वायुरुवाच ॥ अग्निरित्युच्यतेरौद्रीघोरायातैजसीतनुः ॥ सोमःशाक्तोमृतमयःशक्तेःशांतिकरीतनुः॥ ॥ ३ ॥ अमृतंयत्प्रतिष्ठासातेजोविद्याकलास्वयम् ॥ भूतसूक्ष्मेषुसर्वेषुतेएवरसतेजसी ॥ ४ ॥ विविधातेजसोवृत्तिःसूर्यात्माचानलात्मिका ॥ तथैवरसवृत्तिश्चसोमात्माचजलात्मिका ॥ ५ ॥ वैद्युतादिमयंतेजोमधुरादिमयोरसः ॥ तेजोरसविभेदैस्तुधृतमेतच्चराचरं ॥६॥ अग्नेरमृतनिष्पत्तिरमृतैरग्निरेधते ॥ अतएवहविःक्लृप्तमग्नीषोमंजगद्धितम् ॥ ७ ॥ हविषेसस्यसंपत्तिर्वृष्टिःसस्याभिवृद्धये ॥ वृष्टयेचहविस्तस्मादग्नीषोमधृतंजगत् ॥ ८ ॥

स्तस्यैतंतनुवौघोरान्याशिवान्येति ॥ शाक्तःशिवशक्तिमयःअमृतमयःअमृतरसमयःअतएवयमादित्याअंशुमाप्याययंतियमक्षितमाक्षितयःपिबंतीत्युक्तंवेदे ॥ ३ ॥ यत्प्रतिष्ठायस्मिन्नमृतेप्रतिष्ठास्थितिर्यस्याःसासौमीतेजसोविद्यायाश्चकला ॥ भूतसूक्ष्मेषुपृथिव्यादिपरमाणुषु ॥ तेएवपूर्वोक्तेएव ॥ ४ ॥ ५ ॥ ॥ ६ ॥ अमृतनिष्पत्तिःजलोत्पत्तिः ॥ अग्नेरापइतिश्रुतेः ॥ अमृतैःघृतादिभिः ॥ अमृतंवाआज्यमितिश्रुतेः ॥ हविरिति ॥ अग्नीषोममेतद्देवताकंहविर्जगद्धितंक्लृप्तमित्यन्वयः ॥ ७ ॥ ८ ॥ ॥ ॥ ॥ ॥

Indira Gandhi National Centre for the Arts

सौम्यंशांतं ॥ ९ ॥ तावताऽउर्ध्वंशक्तिमात्रेण ॥ आप्लावनमार्द्रीकरणं ॥ १० ॥ नन्वधःशक्तिंविनाकथमाप्लावनमतआह ॥ आधारेति ॥ शिवस्येतिशेषः ॥ ॥ ११ ॥ १२ ॥ वीर्यंसामर्थ्यं ॥ यदिति ॥ यतस्ततोग्नेर्भस्मातस्तद्वीर्यमित्यर्थः ॥ १३ ॥ भस्मस्नानमाहात्म्यमाह ॥ यश्चेति ॥ भस्मसाद्भावंजगतइति शेषः ॥ मंत्रैरिति ॥ अग्निरितिभस्मवायुरितिभस्मेत्यादिभिर्मंत्रैरित्यर्थः ॥ १४ ॥ सोमेनतत्संभवामृतेन ॥ अयोगयुक्त्यायोगसंबंधंविनाअधिकारायसृष्टि

अग्निरूर्ध्वंज्वलत्येषयावत्सौम्यंपरामृतं ॥ यावदग्न्यास्पदंसौम्यममृतंचस्रवत्यधः ॥ ९ ॥ अतएवहिकालाग्निर धस्ताच्छक्तिरूर्ध्वतः ॥ तावतादहनंचोर्ध्वमधश्चाप्लावनंभवेत् ॥ १० ॥ आधारशक्त्यैवधृतःकालाग्निरयमूर्ध्वगः ॥ तथैवनिम्नगःसोमःशिवशक्तिपदास्पदः ॥ ११ ॥ शिवश्चोर्ध्वमधःशक्तिरूर्ध्वंशक्तिरधःशिवः ॥ तदित्थंशिवशक्ति भ्यांनाव्याप्तमिहकिंचन ॥ १२ ॥ असकृच्चाग्निनादग्धंजगद्यद्भस्मसात्कृतम् ॥ अग्नेर्वीर्यमिदंप्राहुस्तद्वीर्यंभस्मय ततः ॥ १३ ॥ यश्चेत्थंभस्मसाद्भावंज्ञात्वास्नातिचभस्मना ॥ अग्निरित्यादिभिर्मंत्रैर्बद्धःपाशाद्विमुच्यते ॥१४॥ अ ग्नेर्वीर्यंतुतद्भस्मसोमेनाप्लावितंपुनः ॥ अयोगयुक्त्याप्रकृतेरधिकारायकल्पते ॥ १५ ॥ योगयुक्त्यातुतद्भस्मप्ला व्यमानंसमंततः ॥ शाक्तेनाऽमृतवर्षेणचाधिकारान्निवर्तयेत् ॥ १६ ॥ अतोमृत्युजयायेदममृतप्लावनंसताम् ॥ शि वशक्त्यमृतस्पर्शेलब्धएवकुतोमृतिः ॥ १७॥ योवेददहनंगुह्यंप्लावनंचयथोदितम् ॥ अग्नीषोमपुटंहित्वानसभूयो भिजायते ॥ १८ ॥ शिवाग्निनातनुंदग्ध्वाशक्तिसौम्यामृतेनयः ॥ प्लावयेद्योगमार्गेणसोऽमृतत्वायकल्पते ॥ १९ ॥

प्रवर्तनेविनियोगाय ॥ १५ ॥ शाक्तेनशक्तिसंभवेन ॥ निवर्तयेन्मोचयेत् ॥ १६ ॥ १७ ॥ यथोदितंशास्त्रोक्तं ॥ अग्नीषोमपुटंअग्नीषोममयं ॥ हित्वात्य क्त्वा ॥ १८ ॥ योगमार्गेणशैवागमादिप्रोक्ततेजोमृतयोजनमार्गेणसमाधिप्रकारेणवा ॥ १९ ॥ ॥ ॥ ॥



Indira Gandhi National Centre for the Arts

अग्नीषोमात्मकामिति ॥ लिंगपुराणेप्येतदुक्तं ॥ अग्नीषोमात्मकंसर्वंजगत्स्थावरजंगमं ॥ अहमग्निर्महातेजाःसोमश्चैषामहांबिका ॥ अहमग्निश्चसोमश्चप्रकृत्यापुरुषःस्वयामिति ॥ २० ॥ इतिश्रीशिवमहापुराणेवायवीयसंहिताटीकायांसारबोधिन्यांपूर्वभागेअग्नीषोमात्मकजगत्स्वरूपकथननामचतुर्विंशोऽध्यायः ॥ २४ ॥ ओंनमःशिवाय ॥ स्थूलसूक्ष्मादिभेदेनशब्दोर्थश्चत्रिधामतः ॥ तद्रूपंजगदित्येतत्पंचविंशेनिरूप्यते ॥ १ ॥ षडध्ववेदनंषण्णामध्वनांवेदनंबोधनम् ॥ १ ॥ अशब्दोऽर्थःशब्दरहितोऽर्थः ॥ समयेसंकेते ॥ नहिगवादौगवादिपदसंकेतस्यज्ञानंविनागवादिपदज्ञानाद्गवादिर्ज्ञातुंशक्यते ॥ सर्वार्थबोधकइति ॥

इममर्थंत्वदादिकृत्यदेवेनसमुदाहृतं ॥ अग्नीषोमात्मकंविश्वंजगदित्यनुरूपतः ॥ २० ॥ इतिश्रीशिवमहापुराणेवायवीयसंहितायांपूर्वभागेचतुर्विंशोऽध्यायः ॥ २४ ॥ वायुरुवाच ॥ अथवक्ष्यामिजगतोवागर्थात्मकतायथा ॥ षडध्ववेदनंसम्यक्समासान्नतुविस्तरात् ॥ १ ॥ नास्तिकश्चिदशब्दोऽर्थोनापिशब्दोनिरर्थकः ॥ ज्ञातेहिसमयेशब्दःसर्वःसर्वार्थबोधकः ॥ २ ॥ प्रकृतेःपरिणामोयंद्विधाशब्दार्थभावितः ॥ तामाहुःप्रकृतिंभूतिंशिवयोःपरमात्मनोः ॥ ३ ॥ शब्दात्मिकाविभूतिर्यासात्रिधाकथ्यतेबुधैः ॥ स्थूलासूक्ष्मापराचेतिस्थूलायाश्रुतिगोचरा ॥ ४ ॥ सूक्ष्माचिंतामयीप्रोक्ताचिंतयारहितापरा ॥ यापरासाक्रियाशक्तिःशिवतत्वसमाश्रया ॥ ५ ॥ ज्ञानशक्तिसमायोगादिच्छोपोद्वलितातथा ॥ सर्वशक्तिसमष्ट्यात्माशक्तितत्वसमाख्यया ॥ ६ ॥ समस्तकार्यजातस्यमूलप्रकृतितांगता ॥ सैवकुंडलिनीमायाशुद्धाध्वपरमासती ॥ ७ ॥ साविभागस्वरूपैवषडध्वात्माविजृंभते ॥ तत्रशब्दास्त्रयोध्वानस्त्रयश्चार्थाःसमीरिताः ॥ ८ ॥ सर्वेषामपितेपुंसानैजशुद्ध्यनुरूपतः ॥ लयभोगाधिकारायपर्याप्ताइतिनिश्चयः ॥ ९ ॥ ॥

सर्वेसर्वार्थवाचकाइत्युक्तेः ॥ २ ॥ शब्दार्थभावितःशब्दार्थरूपेणनिर्मितः ॥ भूतिर्विभूतिः ॥ ३ ॥ त्रैविध्यमाह ॥ स्थूलेति ॥ स्थूलायाःस्वरूपमाह ॥ श्रुतीति ॥ श्रावणप्रत्यक्षगोचरेत्यर्थः ॥ ४ ॥ चिंतामयीमननमयी ॥ ५ ॥ इच्छोपोद्वलिताईश्वरेच्छासहकृता ॥ शक्तितत्वेति ॥ शक्तितत्त्वनाम्नेत्यर्थः ॥ ६ ॥ तस्यानामांतराण्याह ॥ सैवेति ॥ सर्वशक्तिसमष्ट्यात्मैवेत्यर्थः ॥ शुद्धाध्वपरमाविशुद्धैकमार्गस्वरूपापि ॥ ७ ॥ विभागस्वरूपाविविक्तरूपा ॥ विजृंभतेप्रसरति ॥ षडध्वनआह ॥ तत्रेति ॥ ८ ॥ लयेति ॥ लयभोगयोर्विनियोगायेत्यर्थः ॥ ९ ॥ ॥ ॥

Indira Gandhi National Centre for the Arts

शब्दाध्वनआह ॥ मंत्राध्वेति ॥ मंत्रात्मकोध्वास्वविवेकद्वारामोक्षप्रापकोमार्गइत्यर्थः ॥ एवमग्रेपि ॥ अर्थाध्वनआह ॥ भुवनाध्वेति ॥ भुवनाध्वा चतुर्दशभुवनरूपः ॥ तत्त्वाध्वामहदादितत्त्वरूपः ॥ कलाध्वावक्ष्यमाणनिवृत्त्यादिपंचकरूपः ॥ १० ॥ सर्वेषांशब्दाध्वनामर्थाध्वनांचव्याप्यव्यापकताअ व्यभिचारेणस्थितिः ॥ यथासंभवमितिशेषः ॥ तामेवाह ॥ मंत्राइति ॥ व्याप्ताइति ॥ अत्रहेतुर्वाक्यभावादिति ॥ मंत्राणांवाक्यरूपत्वाद्वाक्यानांचपदसमू हरूपत्वादित्यर्थः ॥ पदानीति ॥ पदानिवर्णैर्व्याप्तानीत्याग्रिमेणसंबंधः ॥ ११ ॥ वर्णेति ॥ हियतोवर्णसमूहात्मकंपदमाहुः ॥ व्याप्ताइति ॥ भुवनैर्वर्णाव्या

मंत्राध्वाचपदाध्वाचवर्णाध्वाचेतिशब्दतः ॥ भुवनाध्वाचतत्त्वाध्वाकलाध्वाचार्थतःक्रमात् ॥१०॥ तत्राऽन्योन्यंचसर्वेषांव्याप्यव्यापकतोच्यते ॥ मंत्राःसर्वेपदैर्व्याप्तावाक्यभावात्पदानिच॥ ११ ॥वर्णैर्वर्णसमूहंहिपदमाहुर्विपश्चितः॥ वर्णास्तुभुवनैर्व्याप्तास्तेषांतेषूपलंभनात् ॥१२॥ भुवनान्यपितत्त्वौघैरंडस्यांतर्बहिःक्रमात्॥व्याप्तानिकारणैस्तत्त्वैरारब्धत्वादनेकशः॥१३॥अंतरंडस्थितानीहभुवनानितुकानिचित्॥पौराणिकानिचान्यानिविज्ञेयानिशिवागमे ॥१४॥ सांख्ययोगप्रसिद्धानितत्त्वान्यपिचकानिचित् ॥ शिवशास्त्रप्रसिद्धानिततोऽन्यान्यपिकृत्स्नशः ॥ १५॥ कलाभिस्तानितत्त्वानिव्याप्तान्येवयथातथम् ॥ परस्याःप्रकृतेरादौपंचधापरिणामतः ॥१६ ॥ कलाश्चतानिवृत्त्याद्याव्याप्ताःपंचयथोत्तरम् ॥ व्यापिकातःपराशक्तिरविभक्ताषडध्वनां ॥ १७ ॥ परप्रकृतिभावस्यतत्सत्त्वाच्छिवतत्त्वतः ॥ शक्त्यादिचपृथिव्यंतंशिवतत्त्वसमुद्भवम् ॥१८॥ व्याप्तमेकेनतेनैवमृदाकुंभादिकंयथा ॥ शैवंतत्परमंधामयत्प्राप्यंषड्भिरध्वभिः ॥ १९ ॥ प्रापिकाव्यापिकाशक्तिःपंचतत्त्वविशोधनात् ॥ निवृत्त्यारुद्रपर्यंतास्थितिरंडस्यशोध्यते ॥ २० ॥

प्तास्तत्रहेतुमाह ॥ तेषामिति ॥ तेषांवर्णानां॥तेषुभुवनेषु ॥ १२ ॥ अंडस्यब्रह्मांडस्य ॥ कुतोव्याप्तानितत्रहेतुमाह ॥ कारणैरिति ॥ १३ ॥ पौराणिकानिपुराणेषुप्रतिपादितानि ॥ १४॥ १५ ॥ कलाभिःवक्ष्यमाणनिवृत्त्यादिभिः ॥ १६ ॥ निवृत्त्याद्याःवक्ष्यमाणनिवृत्तिप्रतिष्ठाविद्याशांतिविशुद्धिरूपाः ॥ अतः पराउक्तकलाभ्यःपरातएवव्यापिका ॥ १७ ॥ तत्सत्वादिति ॥ परप्रकृतिभावस्यशिवतत्वतःशिवतत्वरूपेणतेषुषडध्वसुसत्वाद्विद्यमानत्वादित्यर्थः ॥ १८ ॥ तेनैवशिवतत्त्वेनैव ॥ १९ ॥ प्रापिकाशैवधाम्नइतिशेषः ॥ व्यापिकाऽव्यापिकेतिपाठांतरं ॥ शक्तिरिति ॥ ज्ञायतइतिशेषः ॥ कयाकलयाकिंक्रियतेतदाह ॥ निवृत्येति ॥ अंडस्यब्रह्मांडस्य ॥ २० ॥ ॥ ॥ ॥ ॥



Gandhi National Centre for the Arts

शोध्यतेमलरहिताक्रियते ॥ २१ ॥ २२ ॥ तत्रैवउक्तेषुपंचसुतत्त्वेष्वेव ॥ २३ ॥ एतस्यासाधनेदोषमाह ॥ अध्वेति ॥ विप्रलंभकःवंचकः ॥ २४ ॥ २५॥ तव्द्याप्तिःतत्त्वव्याप्तिः ॥ एवंतद्विशुद्धिश्च ॥ शक्तिस्वरूपमाह ॥ आज्ञेति ॥ चिद्रूपाज्ञानरूपा ॥ २६ ॥ एषाशक्तिःशिवस्यैवाधीनेत्याह ॥ नात्मनइति ॥ मायेति ॥ मिथ्यामायारूपेयंनेत्यर्थः ॥ २७ ॥ अव्यभिचारिणीनित्यसंबद्धा ॥ २८ ॥ तस्याशिवस्य ॥ विशेषतइति ॥ अशेषतइतिपाठांतरं ॥ २९ ॥

प्रतिष्ठयातदूर्ध्वंतुयावदव्यक्तगोचरम् ॥ तदूर्ध्वंविद्ययामध्येयावद्विद्येश्वरावधि ॥ २१ ॥ शांत्यातदूर्ध्वमध्वांतेविशुद्धिःशांत्यतीतया ॥ यामाहुःपरमंव्योमपरप्रकृतियोगतः ॥ २२ ॥ एतानिपंचतत्वानियैर्व्याप्तमखिलंजगत् ॥ तत्रैव सर्वमेवेदंद्रष्टव्यंखलुसाधकैः ॥ २३ ॥ अध्वव्याप्तिमविज्ञायशुद्धिंयःकर्तुमिच्छति ॥ सविप्रलंभकःशुद्धेर्नालंप्रापयितुंफलम् ॥ २४ ॥ वृथापरिश्रमस्तस्यनिरयायैवकेवलम् ॥ शक्तिपातसमायोगादृतेतत्वानितत्वतः ॥ २५ ॥ तद्व्याप्तिस्तद्विशुद्धिश्चज्ञातुमेवनशक्यते ॥ शक्तिराज्ञापराशैवीचिद्रूपापरमेश्वरी ॥ २६ ॥ शिवोधितिष्ठत्यखिलंयया करणभूतया ॥ नात्मानोनैवमायैषानविकारोविचारतः ॥ २७ ॥ नबंधोनापिमुक्तिश्चबंधमुक्तिविधायिनी ॥ सर्वैश्वर्यपराकाष्ठाशिवस्याव्यभिचारिणी ॥ २८ ॥ समानधर्मिणीतस्यतैस्तैर्भावैर्विशेषतः ॥ सतयैवगृहीसापितेनैवगृहिणीसदा ॥ २९ ॥ तयोरपत्यंयत्कार्यंपरप्रकृतिजंजगत् ॥ सकर्ताकरणंसेतितयोर्भेदोव्यवस्थितः ॥ ३० ॥ एकएव शिवःसाक्षाद्द्विधाऽसौसमवस्थितः ॥ स्त्रीपुंसभावेनतयोर्भेदइत्यपिकेचन ॥ ३१ ॥ अपरेतुपराशक्तिःशिवस्यसमवायिनी ॥ प्रभेवभानोश्चिद्रूपाभिन्नैवेतिव्यवस्थितिः ॥३२॥ तस्माच्छिवःपरोहेतुस्तस्याज्ञापरमेश्वरी ॥ तयैवप्रेरिता शैवीमूलप्रकृतिरव्यया ॥ ३३ ॥ महामायाचमायाचप्रकृतिस्त्रिगुणेतिच ॥ त्रिविधाकार्यभेदेनसाप्रसूतेषडध्वनः ॥३४

तयोरपत्यमिति ॥ अतएवपितृभ्यांजगतइत्युक्तम् ॥ कर्ताशिवःतद्रूपाशक्तिःकरणंव्यवस्थितःकल्पितः ॥ ३० ॥ एवंशक्तिशक्तिमतोर्भेदस्यप्रकारांतरमाह ॥ एकएवेति ॥ ३१ ॥ धर्मधर्मिरूपेणभेदवादिमतमाह ॥ अपरइति ॥ समवायिनीनित्यसंबद्धा ॥ ३२ ॥ सिद्धांतमाह ॥ तस्मादिति ॥ मूलप्रकृतिःगुणत्रयात्मिका ॥ ३३ ॥ तस्यानामान्याह ॥ महामायेति ॥ षडध्वनःपूर्वोक्तान्मार्गान् ॥ ३४ ॥ ॥ ॥

Indira Gandhi National Centre for the Arts

॥ ३५ ॥ इतिश्रीशैवमहापुराणेवायवीयसंहिताटीकायांसारबोधिन्यांपूर्वभागेषडध्वकथनंनामपंचविंशोऽध्यायः ॥ २५ ॥ ॐनमःशिवाय ॥ देवस्यात्यद्भु
तंवृत्तमनूद्यापिमहार्षिभिः ॥ नास्तिक्यक्षतयेकिंचित्पृष्टंषड्भिशईर्यते ॥ १ ॥ १ ॥ तत्वसंबोधेतत्त्वज्ञाने ॥ प्राकृतःप्रकृतिसंभवः ॥ २ ॥ ३ ॥ ४ ॥ मूर्तिम
त्तास्पदंशरीरयुक्तंकथंभवेदित्यर्थः ॥ मूर्तिमत्ताकथंभवेदितिपाठांतरं ॥ ५ ॥ मूलहेतुनाजगत्कारणरूपत्वेन ॥ कुतोनघटतेतदाह ॥ मूर्तेरिति ॥ तत्सिद्धिः

सवागर्थमयश्चाध्वाषड्विधोनिखिलंजगत् ॥ अस्यैवविस्तरंप्राहुःशास्त्रजातमशेषतः ॥ ३५ ॥ इतिश्रीशिवमहापुरा
णेवायवीयसंहितायांपूर्वभागेषडध्वकथनंनामपंचविंशोऽध्यायः॥ २५ ॥ ऋषयऊचुः ॥ चरित्राणिविचित्राणिगुह्या
निगहनानिच ॥ दुर्विज्ञेयानिदेवस्यमोहयंतिमनांसिनः ॥ १ ॥ शिवयोस्तत्त्वसंबोधेनदोषउपलभ्यते ॥ चरितैःप्रा
कृतोभावस्तयोरपिविभाव्यते ॥ २ ॥ ब्रह्मादयोपिलोकानांसृष्टिस्थित्यंतहेतवः ॥ निग्रहानुग्रहौप्राप्यशिवस्यवश
वर्तिनः ॥ ३ ॥ शिवःपुनर्नकस्यापिनिग्रहानुग्रहास्पदं ॥ अतोऽनतिशयैश्वर्यंतस्यैवेतिविनिश्चितम् ॥ ४ ॥ यच्चेदमी
दृगैश्वर्यंतत्तुस्वातंत्र्यलक्षणम् ॥ स्वभावसिद्धंचैतस्यमूर्तिमत्तास्पदंभवेत् ॥ ५ ॥ नमूर्तिश्चस्वतंत्रस्यघटतेमूलहेतुना ॥
मूर्तेरपिचकार्यत्वात्तत्सिद्धिःस्यादहैतुकी ॥ ६ ॥ सर्वत्रपरमोभावोभावोनान्यश्चकथ्यते ॥ परमापरमौभावौकथमे
कत्रसंगतौ ॥ ७ ॥ निष्कलोहिस्वभावोऽस्यपरमःपरमात्मनः ॥ सएवसकलःकस्मात्स्वभावोह्यविपर्ययः ॥ ८ ॥
स्वभावोपिविपर्यस्येत्स्वतंत्रस्येच्छयायदि ॥ नकरोतिकिमीशानोनित्यानित्यविपर्ययम् ॥ ९ ॥ मूर्त्यात्मासकलःकश्चि
त्सचाऽन्योनिष्कलाच्छिवात् ॥ शिवेनाधिष्ठितश्चेतिसर्वत्रखलुकथ्यते ॥ १० ॥ मूर्त्यात्मैवतदामूर्त्तिःशिवस्यास्यभ
वेदिति ॥ तस्यांमूर्तौमूर्तिमतःपारतंत्र्यंहिनिश्चितम् ॥ ११ ॥ ॥ ॥ ॥

मूर्तिसिद्धिः ॥ अहैतुकीति ॥ अकारणिकेत्यर्थः ॥ इष्टापत्तौत्वात्माश्रयत्वादिदूषणंस्यादितिभावः ॥ ६ ॥ परमोभावःनिर्गुणस्वरूपंअपरमःसगुणस्वरूपं
॥ ७ ॥ निष्कलःनिर्गुणःसकलःसगुणः ॥ ८ ॥ विपर्ययोविपर्यासः ॥ ९ ॥ निर्गुणात्सगुणोभियतइत्याहुः ॥ मूर्त्यात्मेति ॥ सर्वत्रवेदादौ ॥ १० ॥ मू
र्तिःस्वरूपं ॥ मूर्तिमतःशिवस्य ॥ पारतंत्र्यमिति ॥ निग्रहानुग्रहसामर्थ्यस्यमूर्ताविवसंभवादितिभावः ॥ ११ ॥ ॥





Indira Gandhi National Centre for the Arts

अन्यथामूर्तिपारतंत्र्याभावे ॥ निरपेक्षेणेति ॥ मूर्त्यपेक्षारहितेनकथंमूर्तिःस्वीक्रियतइत्यर्थः ॥ मूर्तीति ॥ तस्मान्मूर्तिसाध्यफलेप्सयामूर्तिस्वीकरणमा वश्यकमित्यर्थः ॥१२॥ ननुस्वेच्छयैवभगवतामूर्तेरुत्पादितत्वान्नतत्पारतंत्र्यमित्याशंक्याह ॥नहीति॥स्वेच्छाशरीरत्वंस्वेच्छामात्रलब्धदेहत्वं ॥ तस्यस्वातं त्र्यानुपपत्तौबीजमाह ॥ स्वेच्छैवेति ॥ १३ ॥ १४ ॥ अणिमादीति ॥ एतत्कृतवशीकारातिक्रमेदेहनिर्मित्यसंभवादितिभावः ॥ १५ ॥ विश्वरूपमिति

अन्यथानिरपेक्षेणमूर्तिःस्वीक्रियतेकथम् ॥ मूर्तिस्वीकरणंतस्मान्मूर्तिसाध्यफलेप्सया ॥ १२ ॥ नहिस्वेच्छाशरीर त्वंस्वातंत्र्यायोपपद्यते ॥ स्वेच्छैवतादृशीपुंसांयस्मात्कर्मानुसारिणी ॥ १३ ॥ स्वीकर्तुंस्वेच्छयादेहंहातुंचप्रभवंत्युत ॥ ब्रह्मादयःपिशाचांताःकिंतेकर्मातिवर्तिनः ॥ १४ ॥ इच्छयादेहनिर्माणमिंद्रजालोपमंविदुः ॥ अणिमादिगुणैश्वर्य वशीकारानतिक्रमात् ॥ १५ ॥ विश्वरूपंदधद्विष्णुर्दधीचेनमहर्षिणा ॥ युध्यतासमुपालब्धस्तद्रूपंदधतास्वयम् ॥ ॥ १६ ॥ सर्वस्मादधिकस्यापिशिवस्यपरमात्मनः ॥ शरीरवत्तयान्यात्मसाधर्म्यंप्रतिभातिनः ॥ १७॥ सर्वानुग्राह कंप्राहुःशिवंपरमकारणम् ॥ सनिगृण्हातिदेवादीन्सर्वानुग्राहकःकथम् ॥ १८ ॥ बिभेदबहुशोदेवोब्रह्मणःपंचमं शिरः ॥ विष्णोरपिनृसिंहस्यरभसाशरभाकृतिः ॥ १९ ॥ बिभेदपद्भ्यामाक्रम्यहृदयंनखरैःखरैः ॥ देवस्त्रीषुचदेवेषुद क्षस्याऽध्वरकारणात् ॥ २० ॥ वीरभद्रेणवीरेणनहिकश्चिददंडितः ॥ पुरत्रयंचसस्त्रीकंसदैत्यंसहबालकैः ॥ २१ ॥ क्षणेनैकेनदेवेननेत्राग्नेरिंधनीकृतम् ॥ प्रजानांरतिहेतुश्चकामोरतिपतिःस्वयम् ॥ २२ ॥ क्रोशतामेवदेवानांहुतोने त्रहुताशने ॥ गावश्चकाश्चिद्दुग्धौघंस्रवंत्योमूर्ध्निखेचराः ॥ २३ ॥ सरुषाप्रेक्ष्यदेवेनतत्क्षणाद्भस्मसात्कृताः ॥ जलं धरासुरोदीर्णश्चक्रीकृत्यजलंपदा ॥ २४ ॥ बध्वानंतेनयोविष्णुंचिक्षेपशतयोजनम् ॥ तमेवजलसंधायीशूलेनैवज घानसः ॥ २५ ॥ तच्चक्रंतपसालब्ध्वालब्धवीर्योहरिःसदा ॥ जिघांसतेसुरारीणांकुलंनिर्घृणचेतसां ॥ २६ ॥

॥ इयंकथालिंगपुराणादौप्रसिद्धा ॥ १६ ॥ १७ ॥ १८ ॥ बहुशःकल्पभेदेनबहुवारं ॥ १९ ॥ देवस्त्रीष्विति ॥ देवस्त्रीषुदेवेषुचसंनिहितेषुसत्स्वपि ॥ दक्षस्ययागहेतोर्नकोप्यदंडितइत्यर्थः ॥ २० ॥ २१ ॥ २२ ॥ क्रोशतामिति ॥ अनादरेषष्ठी ॥ २३ ॥ जलंधरेति ॥ इयंकथालिंगपुराणादौप्रसिद्धा देवेनशिवेन ॥ २४ ॥ अनंतेनशेषेण ॥ तंजलंधरासुरम् ॥ सःशिवः ॥ २५ ॥ २६ ॥ ॥ ॥ ॥

शिखिनावन्हिना ॥ कालांगनांकालरूपांर्वी ॥ २७ ॥ २८ ॥ स्कांदेस्कंदपुराणे ॥ २९ ॥ विहारातिप्रसंगतःविहारव्यग्रतातिशयापत्त्या ॥ ३० ॥ देवींगौरीम् ॥ ३१ ॥ अविसृज्येति ॥ अतिदुर्वहत्वमविसर्गेहेतुः ॥ गंगादिष्विति ॥ आदिशब्देनस्वाहादिकं ॥ ३२ ॥ स्वाहयाअग्निपत्न्या ॥ कृत्तिकारूपात्कृ

त्रिशूलेनांधकस्योरःशिखिनेवोपतापितं ॥ कंठात्कालांगनांसृष्ट्वादारुकोपिनिपातितः ॥ २७ ॥ कौशिकींजनयित्वातु गौर्यास्त्वक्कोशगोचराम् ॥ शुंभःसहनिशुंभेनप्रापितोमरणंरणे ॥ २८ ॥ श्रुतंचमहदाख्यानंस्कांदेस्कंदसमाश्रयम् ॥ वधार्थेतारकाख्यस्यदैत्येंद्रस्येंद्रविद्विषः ॥ २९ ॥ ब्रह्मणाभ्यर्थितोदेवोमंदरांतःपुरंगतः ॥ विहृत्यसुचिरंदेव्याविहारातिप्रसंगतः ॥ ३० ॥ रसांरसातलंनीतामिवकृत्वाभिघाततः ॥ देवींचवंचयंस्तस्यांस्ववीर्यमतिदुर्वहम् ॥ ३१ ॥ अविसृज्यविसृज्याग्नौहविःपूतमिवामृतम् ॥ गंगादिष्वपिनिक्षिप्यवन्हिद्वारातदंशतः ॥ ३२ ॥ तत्समाहृत्यशनकैःस्तोकंस्तोकमितस्ततः ॥ स्वाहयाकृत्तिकारूपात्स्वभर्त्रारममाणया ॥ ३३ ॥ सुवर्णीभूतयान्यस्तंमेरौशरवणेक्वचित् ॥ संदीपयित्वाकालेनतस्यभासादिशोदश ॥ ३४ ॥ रंजयित्वागिरीन्सर्वान्कांचनीकृत्यमेरुणा ॥ ततश्चिरेणकालेनसंजातेतत्रतेजसि ॥ ३५ ॥ कुमारेसुकुमारांगेकुमाराणांनिदर्शने ॥ तच्छैशवंस्वरूपंचतस्यदृष्ट्वामनोहरम् ॥ ॥ ३६ ॥ सहदेवासुरैर्लोकैर्विस्मितेचविमोहिते ॥ देवोपिस्वयमायातःपुत्रदर्शनलालसः ॥ ३७ ॥ सहदेव्यांकमारोप्यतत्तस्यस्मेरमाननम् ॥ पीत्वामृतमिवस्नेहविवशेनांऽतरात्मना ॥ ३८ ॥ देवेष्वपिचपश्यत्सुवीतरागैस्तपस्विभिः ॥ स्वस्यवक्षःस्थलेरंगेनर्तयित्वाकुमारकं ॥ ३९ ॥ अनुभूयचतत्क्रीडांसंभाष्यचपरस्परम् ॥ स्तन्यमाज्ञापयद्देव्याःपाययित्वाऽमृतोपमम् ॥ ४० ॥ तवावतारोजगतांहितायेत्यनुशास्यच ॥ स्वयंदेवश्चदेवीचनतृप्तिमुपजग्मतुः ॥ ॥ ४१ ॥ ततःशक्रेणसंधायबिभ्यतातारकासुरात् ॥ कारयित्वाभिषेकंचसैनापत्येदिवौकसां ॥ ४२ ॥

त्तिकारूपंपरिगृह्येत्यर्थः ॥ ३३ ॥ किंकृत्वान्यस्तंतदाह ॥ संदीपयित्वेति ॥ ३४ ॥ ३५ ॥ ३६ ॥ देवःशिवः ॥ ३७ ॥ ३८ ॥ तपस्विभिःसहदेवेषुपश्यत्स्वित्यन्वयः ॥ ३९ ॥ तत्क्रीडांकुमारक्रीडां ॥ परस्परमिति ॥ देवोदेव्यासहपरस्परंसंभाष्यस्तन्यमाज्ञापयदित्यन्वयः ॥ ४० ॥ देवःकुमारमाह ॥ तवेति ॥ ४१ ॥ संधायसंमंत्र्य ॥ अभिषेकमिति ॥ पुत्रस्येतिशेषः ॥ ४२ ॥ ॥ ॥ ॥



Indira Gandhi National Centre for the Arts

देवेनेति ॥ देवेनशिवेनपुत्रमंतरतःकृत्वाद्द्वारभूतंकृत्वाक्रौंचभेदिन्याक्रौंचपर्वतभेदिन्यातच्छक्त्यापुत्रशक्त्याशक्रभियासहतारकस्यापिशिरश्छेदितमित्यग्रिमेणान्वयः ॥ अत्रसहोक्तिरलंकारः ॥ ४३ ॥ ४४ ॥ ४५ ॥ तदागःरावणापराधं ॥ ममज्जेति ॥ रावणइतिसंबध्यते ॥ ४६ ॥ बटोरिति ॥ कस्याचिद्वटोर्मार्कंडेयस्यान्यस्यवार्थेनप्राणरक्षणरूपप्रयोजनेनत्वरयागत्यदेवेनपादांतमंतकोगमितइत्यन्वयः ॥ ४७ ॥ स्ववाहनमिति ॥ वृषेंद्रंस्ववाहनमविज्ञायवडवानलएवतद्रुत्ध्यासगलग्रहंकंठग्रहणपूर्वकंयथाभवातितथाऽऽनीतइत्यर्थः ॥ एकोदकंकेवलोदकमयं ॥ बभूवेतिशेषः ॥४८॥ अंगहारोऽगंविक्षेपः ॥ ४९ ॥

पुत्रमंतरतःकृत्वादेवेनत्रिपुरद्विषा ॥ स्वयमंतर्हितेनैवस्कंदमिंद्राभिरक्षितम् ॥ ४३ ॥ तच्छक्त्याक्रौंचभेदिन्यायुधि कालाग्निकल्पया ॥ छेदितंतारकस्यापिशिरःशक्रभियासह ॥ ४४ ॥ तथारक्षोधिपःसाक्षाद्रावणोबलगर्वितः ॥ उद्धरन्स्वभुजैर्दीर्घैःकैलासंगिरिमात्मनः ॥ ४५ ॥ तदागोऽसहमानस्यदेवदेवस्यशूलिनः ॥ पादांगुष्ठपरिस्पंदान्ममज्जमृदितोभुवि ॥ ४६ ॥ बटोःकस्यचिदर्थेनस्वाश्रितस्यगतायुषः ॥ त्वरयागत्यदेवेनपादांतंगमितोऽतकः ॥ ४७ ॥ स्ववाहनमविज्ञायवृषेंद्रंवडवानलः ॥ सगलग्रहमानीतस्ततस्त्वेकोदकंजगत् ॥४८॥ अलोकविदितैस्तैस्तैर्नृत्यैरानंदसुंदरैः ॥ अंगहारवशेनेदमसकृच्चलितंजगत् ॥ ४९ ॥ शांतएवसदासर्वमनुगृण्हातिचेच्छिवः ॥ सर्वान्युगपदेवैषकथंशक्तोनमोचयेत् ॥ ५० ॥ अनादिकर्मवैचित्र्यमपिनात्रनियामकं ॥ कारणंखलुकर्मापिभवेदीश्वरकारितम् ॥ ॥ ५१ ॥ किमत्रबहुनोक्तेननास्तिक्यंहेतुकारितम् ॥ यथाऽस्मासुनिवर्तेततथाकथयमारुत ॥ ५२ ॥ इतिश्रीशिवमहापुराणेवायवीयसंहितायांपूर्वभागेषड्विंशोऽध्यायः ॥ २६ ॥ वायुरुवाच ॥ स्थानेसंशयितंविप्राभवद्भिर्हेतुचोदितैः ॥ जिज्ञासाहिननास्तिक्यंसाधयेत्साधुबुद्धिषु ॥ १ ॥ ॥ ॥ ॥

॥ ५० ॥ ननुप्रारब्धकर्मयुक्ताःकथंसर्वेमुक्ताभवेयुरतआहुः ॥ अनादीति ॥ अत्रदुःखप्राप्तौ ॥ ५१ ॥ हेतुकारितंकेवललौकिकयुक्तिसाधितं ॥ ५२ ॥ इतिश्रीशिवमहापुराणेवायवीयसंहिताटीकायांसारबोधिन्यांपूर्वभागेशिवचरित्रवर्णनंनामषड्विंशोऽध्यायः ॥ २६ ॥ ओंनमःशिवाय ॥ ऋषिप्रश्नानुसारेण शिवतत्त्वंसविस्तरं ॥ मोक्षबीजंचयज्ज्ञानंसप्तविंशेतदुच्यते ॥ १ ॥ साधयेदिति ॥ जिज्ञासामात्रंनास्तिक्यंनिवर्तयेत्किमुतज्ञानमितिभावः ॥ १ ॥

Indira Gandhi National Centre for the Arts

अन्यथाभावःमोहप्राप्तिः ॥ २ ॥ ३ ॥ स्वभावःपरिपूर्णत्वरूपः ॥ ४ ॥ पत्युःशिवस्य ॥ आज्ञासमन्वयःआज्ञायाःसमन्वयःसमनुवर्तनंयस्मिन्सः ॥ ५ ॥ अर्थस्वीकारेउक्तप्रयोजनस्वीकारे ॥ तदित्थमर्थस्वीकारइतिपाठांतरं ॥ ६ ॥ अनुग्राह्येति ॥ हियस्मात्कारणात्कश्चिदप्यनुग्रहःअनुग्राह्यानपेक्षोनास्तीत्यर्थः ॥ ७ ॥ तस्यपरतंत्रत्वेहेतुमाह ॥ अनुग्रहादिति ॥ ८ ॥ मूर्त्यात्मानःब्रह्मादयः ॥ शिवाज्ञाननिवर्तनात् शिवतत्वज्ञानाभावनिवर्तनात् ॥ इहजगति

प्रमाणमत्रवक्ष्यामिसतांमोहनिवर्तकम् ॥ असतांत्वन्यथाभावःप्रसादेनविनाप्रभोः ॥ २ ॥ शिवस्यपरिपूर्णस्यपरानुग्रहमंतरा ॥ नकिंचिदपिकर्तव्यमितिसाधुविनिश्चितम् ॥ ३ ॥ स्वभावएवपर्याप्तःपरानुग्रहकर्मणि ॥ अन्यथानिःस्वभावेननाकिमप्यनुगृह्यते ॥ ४ ॥ परंसर्वमनुग्राह्यंपशुपाशात्मकंजगत् ॥ परस्यानुग्रहार्थस्तुपत्युराज्ञासमन्वयः ॥ ५ ॥ पतिराज्ञापकःसर्वमनुगृण्हातिसर्वदा ॥ तदर्थमर्थस्वीकारेपरतंत्रःकथंशिवः ॥ ६ ॥ अनुग्राह्यानपेक्षोस्तिनहिकश्चिदनुग्रहः ॥ अतःस्वातंत्र्यशब्दार्थोनानपेक्षत्वलक्षणः ॥ ७ ॥ यत्तत्पुनरनुग्राह्यंपरतंत्रंतदिष्यते ॥ अनुग्रहादृतेतस्यभुक्तिमुक्त्योरनन्वयात् ॥ ८ ॥ मूर्त्यात्मानोप्यनुग्राह्याःशिवाज्ञाननिवर्तनात् ॥ अज्ञानाधिष्ठितंशंभोर्नकिंचिदिहविद्यते ॥ ९ ॥ येनोपलभ्यतेऽस्माभिःसकलेनातिनिष्कलः ॥ समूर्त्यात्माशिवस्यैवमूर्त्तिरित्युपचर्यते ॥ ॥ १० ॥ नह्यसौनिष्कलःसाक्षाच्छिवःपरमकारणम् ॥ स्वाकारेणानुभाव्येनकेनाप्यनुपलक्षितः ॥ ११ ॥ प्रमाणगम्यतामात्रंतत्स्वभावोपपादकम् ॥ नतावतात्रापेक्षाधीरुपलक्षणमंतरा ॥ १२ ॥ आत्मोपलक्षणंसाक्षान्मूर्तिरेवहिकाचन ॥ शिवस्यमूर्तिर्मूर्त्यात्मायतस्तस्योपलक्षणम् ॥ १३ ॥ यथाकाष्ठाद्यनारूढोनवन्हिरुपलभ्यते ॥ एवंशिवोपिमूर्त्यात्मन्यनारूढइतिस्थितिः ॥ १४ ॥ यथाग्निमानयेत्युक्तेज्वलत्काष्ठादृतेस्वयम् ॥ नाग्निरानीयतेतद्वत्पूज्योमूर्त्यात्मनाशिवः ॥ १५ ॥ अतएवहिपूजादौमूर्त्यात्मपरिकल्पनं ॥ मूर्त्यात्मनिकृतंसाक्षाच्छिवएवकृतंयतः ॥ १६ ॥

॥ ९ ॥ सकलेनरूपेणयेन ॥ १० ॥ स्वाकारेणसच्चिदानंदस्वरूपेण ॥ ११ ॥ प्रमाणगम्यतामात्रंश्रवणमननादिलभ्यत्वमात्रं तत्स्वरूपस्यसाधकं ॥ उपलक्षणंप्रत्यक्षवद्दर्शनं ॥ १२ ॥ तदेवाह ॥ आत्मेति ॥ १३ ॥ अनारूढःअविद्यमानोनोपलभ्यतेकिंतुविद्यमानएवेत्यर्थः ॥ १४ ॥ १५ ॥ १६ ॥



Indira Gandhi National Centre for the Arts

अर्चायांप्रतिमायां ॥ १७ ॥ परमेष्ठिनानिर्गुणेनशिवेन ॥ पशवोजिवाः ॥ १८ ॥ सदाशिवादयः शिवविभूतिविशेषाः ॥ १९ ॥ २० ॥ तत्त्वानिकारणानि अतत्त्वानिकार्याणि ॥ २१ ॥ कर्मविपाकात्माकर्मफलात्मकः ॥ २२ ॥ अनिग्रहेहेतुमाह ॥ निगृण्हतामिति ॥ २३ ॥ कथंतर्हिब्रह्मादयोनिगृण्हंतितत्राह ॥ येपुनरिति ॥ २४ ॥ अंडस्यब्रह्मांडस्य ॥ २५ ॥ देवाद्याःब्रह्मादयः ॥ २६ ॥ प्रशस्यतइति ॥ तदुक्तंमनुना ॥ दंडःशास्तिप्रजाःसर्वादंडएवाभिरक्षति ॥ दंडः

लिंगादावपितत्कृत्यमर्चायांचविशेषतः ॥ तत्तन्मूर्त्यात्मभावेनशिवोऽस्माभिरुपास्यते ॥ १७ ॥ यथानुगृह्यतेसोपि मूर्त्यात्मापरमेष्ठिना ॥ तथामूर्त्यात्मनिष्ठेनशिवेनपशवोवयम् ॥ १८ ॥ लोकानुग्रहणायैवशिवेनपरमेष्ठिना ॥ सदाशिवादयःसर्वेमूर्त्यात्मानोप्यधिष्ठिताः ॥ १९ ॥ तेहिमूर्त्यात्मभावेनलब्ध्वास्वयमनुग्रहम् ॥ अन्यात्मनोऽनुगृण्हंति शिवेनसमधिष्ठिताः ॥ २० ॥ आत्मनामेवभोगायमोक्षायचविशेषतः ॥ तत्वातत्वस्वरूपेषुमूर्त्यात्मसुशिवान्वयः ॥ ॥ २१ ॥ भोगःकर्मविपाकात्मासुखदुःखात्मकोयतः ॥ नचकर्मशिवेऽस्तीतितस्यभोगःकिमात्मकः ॥ २२ ॥ सर्वंशिवोऽनुगृण्हातिननिगृण्हातिकिंचन ॥ निगृण्हतांतुयेदोषाःशिवेतेषामसंभवात् ॥ २३ ॥ येपुनर्निग्रहाःकेचिद्ब्रह्मादिषुनिदर्शिताः ॥ तेपिलोकहितायैवकृताःश्रीकंठमूर्तिना ॥ २४ ॥ अंडस्याप्याधिपत्यंहिश्रीकंठस्यनसंशयः ॥ श्रीकंठाख्यांशिवोमूर्तिंक्रीडंतीमधितिष्ठति ॥ २५ ॥ सदोषाएवदेवाद्यानिगृहीतायथोचितम् ॥ ततस्तेपिविपाप्मानःप्रजाश्चविगतज्वराः ॥ २६ ॥ निग्रहोपिस्वरूपेणविदुषांनजुगुप्सितः ॥ अतएवहिदंडयेषुदंडोराज्ञांप्रशस्यते २७ ॥ यत्सिद्धिरीश्वरत्वेनकार्यवर्गस्यकृत्स्नशः ॥ नसचेदीशतांकुर्याज्जगतःकथमीश्वरः ॥ २८ ॥ ईशताचविधातृत्वंविधिराज्ञापनंपरं ॥ आज्ञाचेत्थमिदंकुर्यान्नकुर्यादितिशासनम् ॥ २९ ॥ तच्छासनानुवर्तित्वंसाधुभावस्यलक्षणम् ॥ विपरीतमसाधुस्यान्नसर्वंतत्तुदृश्यते ॥ ३० ॥ ॥ ॥ ॥ ॥

सुप्तेषुजागर्तिदंडंधर्मंविदुर्बुधाइति ॥ २७ ॥ यत्सिद्धिर्यस्येश्वरत्वेनसिद्धिःजगतईशतानचेत्कुर्यात्कथमीश्वरइत्यन्वयः ॥ २८ ॥ अनेकपर्यायैरीशतायाःस्वरूपंव्यनक्ति ॥ विधातृत्वमिति ॥ विध्यात्मकंनिषेधात्मकंचाज्ञास्वरूपंक्रमेणाह ॥ इत्थमिति ॥ २९ ॥ तत्त्विति ॥ तत्साधुसर्वंनदृश्यतइत्यर्थः ॥ ३० ॥

Indira Gandhi National Centre for the Arts

विनिवर्त्तनइति ॥ असाधोर्विनिवृत्ताविल्यर्थः ॥ सामादेः सामदानभेदरूपोपायत्रयस्य ॥ अंतइति ॥ तदुक्तंमनुना ॥ साम्नादानेनभेदेनसमस्तैरुतवापृथक्
विजेतुंप्रयतेतारीन्युद्धेननकदाचनेति ॥ ३१ ॥ विपरीतंसामादिप्रयोगरहितं ॥ ३२ ॥ निदर्शनंदृष्टांतः ॥ असतांदुष्टानां ॥ ३३ ॥ किमयुक्तंतदाह ॥ यदि
ति ॥ ३४ ॥ ॥ ३५ ॥ माध्यस्थेनअन्यतरपक्षाभिनिवेशराहित्येनापि ॥ ३६ ॥ अन्ययानैर्घृण्याभावे ॥ ३७ ॥ माध्यस्थानांनिर्घृणत्वमयुक्तमित्यभि

साधुसंरक्षणीयंचेद्विनिवर्त्यमसाधुयत् ॥ विनिवर्तनेचसामादेरंतेदंडोहिसाधनम् ॥ ३१ ॥ हितार्थलक्षणंचेदंदंडांत
मनुशासनम् ॥ अतोऽन्यद्विपरीतंतदहितंसंप्रचक्षते ॥ ३२ ॥ हितेसदानिषण्णानामीश्वरःस्यान्निदर्शनम् ॥ सकथं
दूष्यतेसद्भिरसतामेवनिग्रहात् ॥ ३३ ॥ अयुक्तकारिणोलोकेगर्हणीयाविवेकिना ॥ यदुद्वेजयतेलोकंतदयुक्तंप्रच
क्षते ॥ ३४ ॥ सर्वोपिनिग्रहोलोकेनचविद्वेषपूर्वकः ॥ नहिद्वेष्टिपितापुत्रंयोनिगृह्यापिशिक्षयेत् ॥ ३५ ॥ माध्यस्थे
नापिनिग्राह्यान्योनिगृण्हातिमार्गतः ॥ तस्याप्यवश्यंयत्किंचिन्नैर्घृण्यमनुवर्तते ॥ ३६ ॥ अन्यथानहिनस्त्येवसदो
षानप्यसौपरान् ॥ हिनस्तिचायमप्यज्ञान्परंमाध्यस्थमाचरन् ॥ ३७ ॥ तस्माद्दुःखात्मिकांहिंसांकुर्वाणोयःसनि
र्घृणः ॥ इतिनिर्बंधयंत्येकेनियमोनेतिचापरे ॥ ३८ ॥ निदानज्ञस्यभिषजोरुग्णेहिंसांप्रयुंजतः ॥ नकिंचिदपिनैर्घृ
ण्यंघृणैवाऽत्रप्रयोजिका ॥ ३९ ॥ घृणापिनगुणायैवहिंस्रेषुप्रतियोगिषु ॥ तादृशेषुघृणीभ्रांत्याघृणांतरितनिर्घृणः
॥ ४० ॥ उपेक्षापिहिदोषायरक्ष्येषुप्रतियोगिषु ॥ शक्त्यांसत्यामुपेक्षातोरक्ष्यःसद्योविपद्यते ॥ ४१ ॥ सर्पस्यास्यग
तंपश्यन्यस्तुरक्ष्यमुपेक्षते ॥ दोषाभासात्समुत्प्रेक्ष्यःफलतःसोपिनिर्घृणः ॥ ४२ ॥ तस्माद्घृणागुणायैवसर्वथेतिनसं
मतम् ॥ संमतंप्राप्तकारित्वंसर्वंत्वन्यदसंमतम् ॥ ४३ ॥ मूर्त्यात्मस्वपिरागाद्यादोषाःसंत्येववस्तुतः ॥ तथापितेषा
मेवैतेनशिवस्यतुसर्वथा ॥ ४४ ॥ ॥ ॥ ॥

प्रेत्यमतांतरमाह ॥ नियमइति ॥ ३८ ॥ निदानज्ञस्यमूलकारणज्ञस्य ॥ भिषजोवैद्यस्य ॥ ३९ ॥ घृणीति ॥ तादृशेषुघृणावान्भ्रांत्याघृणयाअंतरितो
विरहितःसन्निर्घृणएवभवतीत्यर्थः ॥ ४० ॥ प्रतियोगिषुविरोधिषु ॥ ४१ ॥ दोषाभासाद्वफलतःसोपिनिघृणमेवसमुत्प्रेक्ष्यः ॥ ४२ ॥ ४३ ॥ ४४ ॥



Indira Gandhi National Centre for the Arts

सकालिकंसकलंकं ॥ ४५ ॥ ४६ ॥ एवमिति ॥ एवंशोध्यउक्तरीत्यात्मसंसर्गान्शोधयित्वेत्यर्थः ॥ शोध्यात्माशोध्यआत्मायत्यसः ॥ ४७ ॥ मूर्त्यमूर्त्यात्मनोर्वैधर्म्येदृष्टांतमाह ॥ अयसीत्यादिना ॥ अत्मानांजीवानां ॥ ४८ ॥ ४९ ॥ ५० ॥ मैत्र्यादयोगुणाःमैत्रीक्षमादाक्षिण्यप्रभृतयः ॥ गौणाइति ॥ नतमुख्याइत्यर्थः ॥ उपरक्तानामिति ॥ यस्मात्तेचित्तवृत्तयोऽतस्तैर्गुणैरुपरक्तानांजीवानांतेदोषायगुणायचभवंतीत्यर्थः ॥ चित्तस्याविद्यापरिणामरूपत्वादि

अग्नावपिसमाविष्टंताम्रंखलुसकालिकं॥इतिनाग्निरसौदुष्येत्ताम्रसंसर्गकारणात् ॥४५॥ नाग्नेरशुचिसंसर्गादशुचित्वमुपेयते॥अशुचेस्त्वग्निसंयोगाच्छुचित्वमपिजायते ॥४६॥ एवंशोध्यात्मसंसर्गान्नह्यशुद्धःशिवोभवेत्॥शिवसंसर्गतस्त्वेवशोध्यात्मैवहिशुद्ध्यति॥४७॥अयस्यग्नौसमाविष्टेदाहोऽग्नेरेवनायसः॥मूर्त्यात्मन्येवमैश्वर्यमीश्वरस्यैवनात्मनाम्॥४८॥नहिकाष्ठंज्वलत्यूर्ध्वमग्निरेवज्वलत्यसौ ॥ काष्ठस्यांगारतानाग्नेरेवमत्रापियोज्यताम्॥४९॥अतएवजगत्यस्मिन्काष्ठपाषाणमृत्स्वपि॥शिवावेशवशादेवशिवत्वमुपचर्यते॥५०॥ मैत्र्यादयोगुणागौणायस्मात्तेचित्तवृत्तयः॥तैर्गुणैरुपरक्तानांदोषायचगुणायच ॥५१॥ यत्तुगौणमगौणंचतत्सर्वमनुगृण्हतः॥नगुणायनदोषायशिवस्यगुणवृत्तयः ॥ ॥ ५२ ॥ नचानुग्रहशब्दार्थंगौणमाहुर्विपश्चितः ॥ संसारमोचनंकिंतुशैवमाज्ञामयंहितम् ॥ ५३ ॥ हितंतदाज्ञाकरणंयद्धितंतदनुग्रहः ॥ सर्वंहितेनियुंजानःसर्वानुग्राहकःशिवः ॥ ५४ ॥ यस्तूपकारशब्दार्थस्तमप्याहुरनुग्रहम् ॥ तस्यापिहितरूपत्वाच्छिवःसर्वोपकारकः ॥ ५५ ॥ हितेसदानियुक्तंतुसर्वंचिदचिदात्मकम् ॥ स्वभावप्रतिबद्धंतत्समंनलभतेहितम् ॥ ५६ ॥ यथाविकासंयांत्येवरवेःपद्मानिभानुभिः ॥ समंनविकसंत्येवस्वस्वभावानुरोधतः॥५७॥ स्वभावोपिहिभावानांभाविनोर्थस्यकारणम् ॥ नहिस्वभावतोऽसंतमर्थंकर्तैषुसाधयेत् ॥ ५८ ॥ सुवर्णमेवनांगारंद्रावयत्यग्निसंगमः ॥ एवंपक्वमलानेवमोचयेन्नशिवःपरान् ॥ ५९ ॥ ॥ ॥

तिभावः ॥ ५१ ॥ गुणवृत्तयइति ॥ यत्तुगौणमगौणंवातत्सर्वमनुगृण्हतः शिवस्यगुणवृत्तिरूपत्वान्मायाविलासरूपत्वान्नगुणायनापिदोषायभवतीत्यर्थः ॥ ५२ ॥ अनुग्रहेति ॥ संसारमोचनरूपमनुग्रहशब्दार्थमित्यर्थः ॥ ५३ ॥ तदाज्ञाकरणंशिवाज्ञापालनम् ॥ नियुंजानःनियोजयन् ॥ ५४ ॥ ५५ ॥ समंतुल्यं॥५६॥एतदपिस्वभावादेवेत्यत्रदृष्टांतमाह॥यथेति॥५७॥भावानांपदार्थानां॥एषुभावेषु॥५८ ॥पक्वमलान्पूर्णदोषान् ॥ परान्अपक्वमलान् ॥ ५९ ॥

Indira Gandhi National Centre for the Arts

भावनयाचेतनक्रिययाविनानभवेदित्यन्वयः ॥ ६० ॥ स्वभावविमलःशिवः ॥ ६१ ॥ अन्यथाईश्वरवैपरीत्येन ॥ अस्यजीवस्यसंसारःकर्ममायानुबंधः कर्ममायामूलकः ॥ ६२ ॥ अनुबंधःकर्ममायारूपोस्यैवजीवस्यैवहेतुमान्सकारणइत्यर्थः॥ सइति ॥ आत्मनांजीवानाम् ॥ निजःस्वाभाविकः॥ आगंतुकःऔपाधिकः ॥ ६३ ॥ तस्यापि मलस्यापि ॥ अयंपूर्वोक्तः ॥ ६४ ॥ तच्छक्तिभेदःईशशक्तिभेदः ॥ ६५ ॥ हेतोर्वैचित्र्यमाह ॥ आत्मतायाइति॥बद्धाइति ॥

यद्यथाभवितुंयोग्यंतत्तथानभवेत्स्वयम् ॥ विनाभावनयाकर्तास्वतंत्रःसंततोभवेत् ॥ ६० ॥ स्वभावविमलोयद्वत्सर्वानुग्रहकारकः ॥ स्वभावमलिनास्तद्वदात्मानोजीवसंज्ञिताः ॥ ६१ ॥ अन्यथासंसरंत्येतेनियमान्नशिवःकथम् ॥ कर्ममायानुबंधोऽस्यसंसारःकथ्यतेबुधैः ॥ ६२ ॥ अनुबंधोयमस्यैवनशिवस्येतिहेतुमान् ॥ सहेतुरात्मनामेवनिजोनागंतुकोमलः ॥ ६३ ॥ आगंतुकत्वेतस्यापिभाव्यंकेनापिहेतुना ॥ योऽयंहेतुरसावेकःकल्पतेनेकशक्तिकः ॥ ६४ ॥ कार्यभेदोपितच्छक्तिभेदोनात्रोपपद्यते ॥ कर्ममायानुबंधोयःसविचित्रःस्वभावतः ॥ ६५ ॥ आत्मतायाःसमत्वेपिबद्धामुक्ताःपरेयतः ॥ बद्धेष्वेवपुनःकेचिल्लयभोगाधिकारतः ॥ ६६ ॥ ज्ञानैश्वर्यादिवैषम्यंभजंतेसोत्तराधराः ॥ केचिन्मूर्त्यात्मतांयांतिकेचिदासन्नगोचराः ॥ ६७ ॥ मूर्त्यात्मसुशिवाःकेचिदध्वनांमूर्द्धसुस्थिताः ॥ मध्येमहेश्वरारुद्रास्त्वर्वाचीनपदेस्थिताः ॥ ६८ ॥ आसन्नेपिसमावेशेपरस्तात्कारणत्रयम् ॥ तत्राप्यात्मास्थितोऽधस्तादंतरात्मातुमध्यतः ॥ ६९ ॥ परस्तात्परमात्मेतिब्रह्मविष्णुमहेश्वराः॥ वर्ततेपशवःकेचित्परमात्मपदाश्रयाः ॥ ७०॥ अंतरात्मपदेकेचित्केचिदात्मपदेतथा ॥ शांत्यर्तातपदेशैवाःशांतोमाहेश्वरामताः ॥ ७१ ॥ ॥

केचिदितिशेषः ॥ लयंति ॥ केचिल्लयाधिकारतःकेचिद्भोगाधिकारतश्चेत्यर्थः ॥ ६६ ॥ वैषम्यंतारतम्यम् ॥ सोत्तराधराः उच्चनीचभावसहिताः ॥ मूर्त्यात्मताम् मूर्तिरूपतां ॥ आसन्नगोचराःसमीपवर्तिनः ॥ ६७ ॥ अध्वनामिति ॥ पूर्वोक्तानांषण्णामध्वनामित्यर्थः ॥ मध्यइति ॥ अध्वनांस्थिताइत्यनुषज्यते ॥ एवमग्रेपि ॥ अर्वाचीनपदेअधोभागे ॥ ६८ ॥ आसन्नइति प्रत्यासन्नत्वेपीत्यर्थः ॥ ६९ ॥ पशवोजीवाः ॥ ७० ॥ शांत्यतीतिपदे पूर्वोक्ते ॥ ७१ ॥

ब्रह्मांगयोनयोब्रह्मपुत्राः ॥ ७२ ॥ देवयोन्यष्टकंउक्ताब्रह्मांगयोनिपर्यंतादेवयोनयस्तेषामष्टकं ॥ पश्वादयःआदिनापक्षिसर्पक्रिमिदंशाः ॥ ७३ ॥ संसारि
णःजीवस्य ॥ ७४ ॥ ७५ ॥ एकेति ॥ एकमलाःसत्वप्रधानाःद्विमलाःसत्वरजःप्रधानाःत्रिमलाःसत्वरजस्तमःप्रधानाः ॥७६॥ अधितिष्ठंतिनियच्छंति ॥

विद्यायांतुतथारौद्राःप्रतिष्ठायांतुवैष्णवाः ॥ निवृत्तौचतथात्मानोब्रह्माब्रह्मांगयोनयः ॥ ७२ ॥ देवयोन्यष्टकंमुख्यं
मानुष्यमथमध्यमम् ॥ पश्वादयोऽधमाःपंचयोनयस्ताश्चतुर्दश ॥ ७३ ॥ उत्तराधरभावोऽपिनैजःसंसारिणोमलः
॥ यथामभावोभुक्तस्यपूर्वंपश्चात्तुपक्वता ॥७४॥ मलोप्यामश्चपक्वश्चभवेत्संसारकारणं ॥ आमेत्वधरतापुंसांपक्वे
तूत्तरताक्रमात् ॥ ७५ ॥ पश्वात्मानस्त्रिधाभिन्नाएकद्वित्रिमलाःक्रमात् ॥ तत्रोत्तराह्येकमलाद्विमलामध्यमामताः ॥
॥ ७६ ॥ त्रिमलास्त्वधमाज्ञेयायथोत्तरमधिष्ठिताः ॥ त्रिमलानधितिष्ठंतिद्विमलैकमलाःक्रमात् ॥ ७७ ॥ एकद्वित्रि
मलान्सर्वान्छिवएकोधितिष्ठति ॥ अशिवात्मकमप्येतच्छिवेनाधिष्ठितंयथा ॥ ७८ ॥ अरुद्रात्मकमप्येवंरुद्रैर्जग
दधिष्ठितम् ॥ अंडांताहिमहाभूमिःशतरुद्राद्यधिष्ठिता ॥ ७९ ॥ मायांतमंतरिक्षंतुअमरेशादिभिःक्रमात् ॥ अंगुष्ठ
मात्रपर्यंतैःसमंतात्संततंततम ॥८०॥ महामायावसानाद्यौर्वामाद्यैर्भुवनाधिपैः ॥ अनाश्रितातैरध्वांतर्वर्तिभिःसम
धिष्ठिता ॥ ८१ ॥ तेहिसाक्षाद्दिविषदस्त्वंतरिक्षसदस्तथा ॥ पृथिवीषदइत्येवंदेवादेवव्रतैःस्तुताः ॥ ८२ ॥ एवंत्रि
भिर्मलैरामैःपक्वैरेवपृथक्पृथक् ॥ निदानभूतैःसंसाररोगःपुंसांप्रवर्तते ॥ ८३ ॥ अस्यरोगस्यभैषज्यंज्ञानमाज्ञौष
धोद्भवम् ॥ भिषगाज्ञापकःशंभुःशिवःपरमकारणम् ॥ ८४ ॥ अदुःखेनापिशक्तश्चेत्पशून्मोचयितुंशिवः ॥ कथंदुः
खंकरोतीतिनात्रकार्याविचारणा ॥ ८५ ॥ दुःखमेवहिसर्वोपिसंसारइतिनिश्चितं ॥ कथंदुःखमदुःखंस्यात्स्वभावोह्य
पिपर्ययः ॥ ८६ ॥ नहिरोगोह्यरोगःस्याद्भिषग्भैषज्यकारणात् ॥ रोगार्ततुभिषग्रोगाद्भैषज्यैःसुखमुद्धरेत् ॥ ८७ ॥
एवंस्वभावमलिनान्स्वभावाद्दुःखिनःपशून् ॥ स्वाज्ञौषधविधानेनदुःखान्मोचयतेशिवः ॥ ८८ ॥ ॥

॥ ७७ ॥ एतज्जगत् ॥ ७८ ॥ ७९ ॥ अमरेशादिभिःअधिष्ठितं ॥ अंगुष्ठमात्रपर्यंतैःपुरुषैरितिशेषः ॥ ८० ॥ वामाद्यैर्देवविशेषैः ॥ अनाश्रिताअसंबद्धा
पि ॥ अध्वांतर्वर्तिभिःपूर्वोक्ताध्वसुस्थितैः ॥ ८१ ॥ ८२ ॥ ८३ ॥ ८४ ॥ अदुःखेनअनायासेन ॥ ८५ ॥ ८६ ॥ ८७ ॥ ८८ ॥ ॥

Indira Gandhi National Centre for the Arts

प्राकृतभिषजःशिवेवैषम्यमाशंक्याह ॥ नेति ॥ अस्यशिवस्य ॥ ८९॥ दुःखस्यस्वभावसंसिद्धेर्हेतोर्नकल्पतइत्यन्वयः ॥९०॥ अंतरामलमध्येतटस्थवत्सा क्षित्वमात्रप्रयोजकमित्यर्थः ॥ ९१ ॥ ९२ ॥ ९३ ॥ इहजगति ॥ तत्प्रेरितंशिवप्रेरितं ॥ सःशिवः ॥ ९४ ॥ तयाशक्त्या ॥ ९५ ॥ अनिदंप्रथममिति ॥ नेदमेववस्तुप्रथमंयस्मिंस्तत् ॥ यतश्चक्रवद्भ्रमतीतिभावः ॥ ईशनादिति ॥ यद्यपीशनात्सईश्वरइत्यर्थः ॥ ९६ ॥ ९७ ॥ श्रौतीवैदिकी ॥ तांवाचमाह ॥

नभिषक्कारणंरोगेशिवःसंसारकारणम् ॥ इत्येतदपिवैषम्यंनदोषायास्यकल्पते ॥ ८९ ॥ दुःखस्वभावसंसिद्धेःकथं तत्कारणंशिवः ॥ स्वाभाविकोमलःपुंसांसहिसंसारयत्यमून् ॥ ९० ॥ संसारकारणंयत्तुमलंमायाद्यचेतनम् ॥ त त्स्वयंसंप्रवर्तेतशिवसान्निध्यमंतरा ॥ ९१ ॥ यथामणिरयस्कांतःसान्निध्यादुपकारकः ॥ अयसश्चलतस्तद्वच्छिवो प्यस्येतिसूरयः ॥९२॥ ननिवर्त्तयितुंशक्यंसान्निध्यंसहकारणम् ॥ अधिष्ठाताततोनित्यमज्ञातोजगतःशिवः॥९३॥ नशिवेनविनाकिंचित्प्रवृत्तमिहविद्यते ॥ तत्प्रेरितमिदंसर्वंतथापिसनदुष्यति ॥ ९४ ॥ शक्तिराज्ञात्मिकातस्यनियं त्रीविश्वतोमुखी ॥ तयाततमिदंशश्वत्तथापिसनदुष्यति ॥ ९५ ॥ अनिदंप्रथमंसर्वमीशितव्यंसईश्वरः ॥ ईशनाच्च तदीयाज्ञातथापिसनदुष्यति ॥ ९६ ॥ योन्यथामन्यतेमोहात्सविनश्यतिदुर्मतिः ॥ तच्छक्तिवैभवादेवतथापिसन दुष्यति ॥ ९७ ॥ एतस्मिन्नंतरेव्योम्निश्रौतीवागशरीरिणी ॥ सत्यमोमममृतंसत्यमित्याविरभवत्स्फुटम् ॥ ९८ ॥ ततोहृष्टतराःसर्वेविनष्टाशेषसंशयाः ॥ मुनयोविस्मयाविष्टाःप्रणेमुःपवनंप्रभुम् ॥ ९९ ॥ तथाविगतसंदेहान्कृत्वा पिपवनोमुनीन् ॥ नैतेप्रतिष्ठितज्ञानाइतिमत्वैवमब्रवीत् ॥ १०० ॥ वायुरुवाच ॥ परोक्षमपरोक्षंचद्विविधंज्ञानमि ष्यते ॥ परोक्षमस्थिरंप्राहुरपरोक्षंतुसुस्थिरम् ॥ १०१ ॥ हेतूपदेशगम्यंयत्तत्परोक्षंप्रचक्षते ॥ अपरोक्षंपुनःश्रेष्ठाद नुष्ठानाद्भविष्यति ॥ १०२ ॥ नापरोक्षादृतेमोक्षइतिकृत्वाविनिश्चयम् ॥ श्रेष्ठानुष्ठानसिद्ध्यर्थंप्रयतध्वमतंद्रिताः ॥ ॥ १०३ ॥ इतिश्रीशिवमहापुराणेवायवीयसंहितायांपूर्वभागेशिवतत्वकथनंनामसप्तविंशतितमोऽध्यायः ॥ २७ ॥

सत्यामिति ॥ ९८ ॥ ९९ ॥ १०० ॥ परोक्षंश्रवणादिसाध्यं ॥ अपरोक्षंवक्ष्यमाणोपायलभ्यं ॥ १०१ ॥ तदेवाह ॥ हेत्विति ॥ क्षित्यंकुरादिकंसकर्तृकंकार्य त्वादित्याद्यनुमानैस्तद्विजिज्ञासस्वतद्ब्रह्मेत्याद्युपदेशैश्चगम्यमित्यर्थः ॥ अनुष्ठानात् वक्ष्यमाणलक्षणात् ॥ १०२ ॥ १०३ ॥ इतिश्रीशैवमहापुराणेवाय वीयसंहिताटीकायांसारबोधिन्यांपूर्वभागेशिवतत्त्वकथनंनामसप्तविंशोऽध्यायः ॥ २७ ॥ ॥ ॥

ओंनमःशिवाय ॥ क्रियातपःप्रभृतिभिःशैवधर्मैरवाप्यते ॥ ज्ञानंपाशुपतंमुक्तिरष्टाविंशइतीर्यते ॥ १ ॥ अपरोक्षितःअपरोक्षीकृतोभवेत् ॥ १ ॥ २ ॥ पर्वभिःखंडैः ॥ अनुत्तरैःकेवलैः ॥ ३ ॥ सोत्तरैःउत्कृष्टधर्मांतरसहितैः ॥ ४ ॥ श्रुतिरेवेति ॥ वेदोखिलोधर्ममूलमितिमन्वादिस्मरणात् ॥ ५ ॥ योगपर्यंतःपा

ऋषयऊचुः ॥ किंतच्छ्रेष्ठमनुष्ठानंमोक्षोयेनाऽपरोक्षितः ॥ तत्तस्यसाधनंचाद्यवक्तुमर्हसिमारुत ॥ १ ॥ वायुरुवाच ॥
शैवोहिपरमोधर्मःश्रेष्ठानुष्ठानशब्दितः ॥ यत्रापरोक्षंलक्ष्येतसाक्षान्मोक्षप्रदःशिवः ॥ २ ॥ सतुपंचविधोज्ञेयःपंचभिः
पर्वभिःक्रमात् ॥ क्रियातपोजपध्यानज्ञानात्मभिरनुत्तरैः ॥ ३ ॥ तैरेवसोत्तरैःसिद्धोधर्मस्त्वपरमोमतः ॥ परोक्षमप
रोक्षंचज्ञानंयत्रचमोक्षदम् ॥ ४ ॥ परमोपरमश्चोभौधर्मौहिश्रुतिचोदितौ ॥ धर्मशब्दाभिधेयेर्थेप्रमाणंश्रुतिरेवनः ॥
॥ ५ ॥ परमोयोगपर्यंतोधर्मःश्रुतिशिरोगतः ॥ धर्मस्त्वपरमस्तद्वदधःश्रुतिमुखेस्थितः ॥६॥ अपश्वात्माधिकारःस्या
द्योधर्मःपरमोमतः ॥ साधारणस्ततोन्यस्तुसर्वेषामधिकारतः ॥ ७ ॥ सचायमपरोधर्मःपरधर्मस्यसाधनं ॥ धर्म
शास्त्रादिभिःसम्यक्सांगएवोपबृंहितः ॥ ८ ॥ तत्राद्योयःपरोधर्मःश्रेष्ठानुष्ठानशब्दितः ॥ इतिहासपुराणाभ्यांकथं
चिदुपबृंहितः ॥ ९ ॥ शैवागमैस्तुसपुनःसहांगोपांगविस्तरः ॥ ससंस्काराधिकारश्चसम्यगेवोपबृंहितः ॥ १० ॥
शैवागमोपिद्विविधःश्रौतोऽश्रौतश्चसस्मृतः ॥ श्रुतिसारमयःश्रौतःस्वतंत्रइतरोमतः ॥ ११ ॥ स्वतंत्रोदशधापूर्वंत
थाऽष्टादशधापुनः ॥ कामिकादिसमाख्याभिःसिद्धःसिद्धांतसंज्ञितः ॥ १२ ॥ श्रुतिसारमयोयस्तुशतकोटिप्रविस्त
रः ॥ परंपाशुपतंयत्रव्रतंज्ञानंचकथ्यते ॥ १३ ॥ युगावर्तेषुशिष्येषुयोगाचार्यस्वरूपिणा ॥ तत्रतत्रावतीर्णेनशिवे
नैवप्रवर्त्यते ॥ १४ ॥ संक्षिप्यास्यप्रवक्तारःचत्वारःपरमर्षयः ॥ रुरुर्दधीचोऽगस्त्यश्चउपमन्युर्महायशाः ॥ १५ ॥
तेचपाशुपताज्ञेयाःसंहितानांप्रवर्तकाः ॥ तत्संततीयागुरवःशतशोऽथसहस्रशः ॥ १६ ॥ ॥

शुपतयोगांतः ॥ श्रुतिशिरोगतःउपनिषद्भागेस्थितः ॥ श्रुतिमुखेवेदपूर्वभागेस्थितोयागादिः ॥ ६ ॥ अपश्वात्माधिकारःअपशवोमायापाशरहितायआत्मानस्तेषामेवाधिकारोयत्र ॥७॥ उपबृंहितःपुष्टीकृतः ॥ ८ ॥ ९ ॥ संस्कारःशैवदीक्षाग्रहणादिः ॥ १० ॥ इतरःअश्रौतः ॥ ११ ॥ सिद्धइति ॥ शैवागमइतिसंबध्यते ॥ एतत्सर्वंतत्रशैवागमादौप्रसिद्धम् ॥ १२ ॥ १३ ॥ युगेति ॥ युगेयुगआवर्तमानेष्ववतीर्णेष्वित्यर्थः ॥ १४ ॥ १५ ॥ १६ ॥

॥१७॥१८॥ प्रज्ञापरोक्षंज्ञानं ॥१९॥ परमंज्ञानंब्रह्मापरोक्षज्ञानम् ॥२०॥ संसारकारणेनमलेन ॥ वियुज्यतइति ॥ ज्ञानादेवतुकैवल्यमित्याद्युक्तेः॥२१॥नामाष्टकमाह॥शिवइति॥२२॥२३॥आद्यमिति ॥ पितामहांतमित्यर्थः ॥ शांत्यतीतेति ॥ शांत्यतीतपदेशैवाइत्युक्तक्रमादित्यर्थः ॥ पंचोपाधयःशांत्यतीतादयः ॥२४॥तन्मोक्षरूपं॥२५॥तस्यनित्यत्वेहेतुमाह ॥ पदानामिति॥अन्यपदानां॥परिवृत्तौपरिवर्तनेजातेसति॥ उपाधिनामायारूपेण॥२६॥त्रितयंसंसारवैद्यइत्या

तत्रोक्तःपरमोधर्मश्चर्याद्यात्माचतुर्विधः ॥ तेषुपाशुपतोयोगःशिवंप्रत्यक्षयेद्दृढम् ॥ १७ ॥ तस्माच्छ्रेष्ठमनुष्ठानंयोगःपाशुपतोमतः ॥ तत्राप्युपायःकोप्युक्तोब्रह्मणासतुकथ्यते ॥ १८ ॥ नामाष्टकमयोयोगःशिवेनपरिकल्पितः ॥ तेनयोगेनसहसाशैवीप्रज्ञाप्रजायते ॥ १९ ॥ प्रज्ञयापरमंज्ञानमचिराल्लभतेस्थिरम् ॥ प्रसीदतिशिवस्तस्ययस्यज्ञानंप्रतिष्ठितम् ॥ २० ॥ प्रसादात्परमोयोगोयःशिवंचापरोक्षयेत् ॥ शिवापरोक्षात्संसारकारणेनवियुज्यते ॥ २१ ॥ ततःस्यान्मुक्तसंसारोमुक्तःशिवसमोभवेत् ॥ शिवोमहेश्वरश्चैवरुद्रोविष्णुःपितामहः ॥ २२ ॥ संसारवैद्यःसर्वज्ञःपरमात्मेतिमुख्यतः ॥ नामाष्टकमिदंनित्यंशिवस्यप्रतिपादकम् ॥ २३ ॥ आद्यंतुपंचकंतत्रशांत्यतीताद्यनुक्रमात् ॥ संज्ञासदाशिवादीनांपंचोपाधिपरिग्रहात् ॥ २४ ॥ उपाधिविनिवृत्तौतुयथास्वंविनिवर्तते ॥ पदमेवहितन्नित्यमनित्याःपदिनःस्मृताः ॥ २५ ॥ पदानांपरिवृत्तौतुमुच्यंतेपदिनोयतः ॥ परिवृत्त्यंतरेभूयःपदप्राप्तिरुपाधिना ॥ २६ ॥ आत्मांतराभिधानंस्याद्यदाद्यंनामपंचकम् ॥ अन्यत्तुत्रितयंनाम्नामुपादानादियोगतः ॥ २७ ॥ त्रिविधोपाधिवचनाच्छिवएवानुवर्तते ॥ अनादिमलसंश्लेषप्रागभावात्स्वभावतः ॥ २८ ॥ अत्यंतपरिशुद्धात्मेत्यतोयंशिवउच्यते ॥ अथवाशेषकल्याणगुणैकघनईश्वरः ॥ २९ ॥ शिवइत्युच्यतेसद्भिःशिवतत्त्वार्थवेदिभिः ॥ त्रयोविंशतितत्त्वेभ्यःपराप्रकृतिरुच्यते ॥ ३० ॥ प्रकृतेस्तुपरंप्राहुःपुरुषंपंचविंशकम् ॥ यंवेदादौस्वरंप्राहुर्वाच्यवाचकभावतः ॥ ३१ ॥

दिकं ॥ उपादानादियोगतःमायावलंबनादिवशात् ॥ त्रिविधोपाधयःसंसारवैद्यत्वसर्वज्ञत्वपरमात्मत्वरूपाः॥२७॥शिवइति ॥ शिवेनाम्नांत्रितयमनुवर्ततइति संबंधः॥उक्तशिवादिनामानिक्रमेणनिरुच्यंते॥अनादीति ॥२८॥२९॥ त्रयोविंशतितत्त्वेभ्यःमहदादिभ्यः ॥३०॥ वेदादौवेदारंभे ॥ स्वरंप्रणवात्मकं ॥३१॥



Indira Gandhi National Centre for the Arts

वेदांतेउपनिषदि ॥ ओमित्येकाक्षरंब्रह्मेत्यादौ ॥ भोक्तापुरुषः ॥ ३२ ॥ महेश्वरइति ॥ तथाचनारायणीयोपनिषदि ॥ योवेदादौस्वरःप्रोक्तोवेदांतेचप्रतिष्ठितः ॥ तस्यप्रकृतिलीनस्ययःपरःसमहेश्वरइति ॥ तदधीनप्रवृत्तित्वात्महेश्वराधीनप्रवृत्तित्वात् ॥ ३३ ॥ प्रकारांतरेणमहेश्वरस्वरूपमाह ॥ अथवेति ॥ ३४ ॥ अनंतोनारायणःपुरुषः ॥ रुद्रशब्दार्थमाह ॥ रुदिति ॥ द्रावयतिनाशयति ॥ ३५ ॥ ३६ ॥ पितामहशब्दार्थमाह ॥ जगतइति पितृभूतानांब्रह्मादीनाम्

वेदैकवेद्ययाथात्म्याद्वेदांतेचप्रतिष्ठितः ॥ सएवप्रकृतौलीनोभोक्तायःप्रकृतेर्मतः ॥ ३२ ॥ तस्यप्रकृतिलीनस्ययः परःसमहेश्वरः ॥ तदधीनप्रवृत्तित्वात्प्रकृतेःपुरुषस्यच ॥ ३३ ॥ अथवात्रिगुणंतत्वंमायेयमिदमव्ययम् ॥ मायां तुप्रकृतिंविद्यान्मायिनंतुमहेश्वरम् ॥ ३४ ॥ मायाविक्षोभकोऽनंतोमहेश्वरसमन्वयात् ॥ रुद्दुःखंदुःखहेतुर्वातद्द्रावय तिनःप्रभुः ॥ ३५ ॥ रुद्रइत्युच्यतेसद्भिःशिवःपरमकारणम् ॥ शिवतत्वादिभूम्यंतंशरीरादिघटादिच ॥ ३६ ॥ व्या प्याधितिष्ठतिशिवस्ततोरुद्राइतस्ततः ॥ जगतःपितृभूतानांशिवोमूर्त्यात्मनामपि ॥ ३७ ॥ पितृभावेनसर्वेषांपि तामहउदीरितः ॥ निदानज्ञोयथावैद्योरोगस्यविनिवर्तकः ॥ ३८ ॥ उपायैर्भेषजैस्तद्वल्लयभोगाधिकारतः ॥ संसा रस्येश्वरोनित्यंसमूलस्यनिवर्तकः ॥ ३९ ॥ संसारवैद्यइत्युक्तःसर्वतत्त्वार्थवेदिभिः ॥ दशार्थज्ञानसिद्ध्यर्थमिंद्रिये ष्वेपुसत्स्वपि ॥ ४० ॥ त्रिकालभाविनोभावान्स्थूलान्सूक्ष्मानशेषतः ॥ अणवोनैवजानंतिमायाणवमलावृताः ॥ ४१ ॥ असत्स्वपिचसर्वेषुसर्वार्थज्ञानहेतुषु ॥ यद्यथावस्थितंवस्तुतत्तथैवसदाशिवः ॥ ४२ ॥ अयत्नेनैवजानातित स्मात्सर्वज्ञउच्यते ॥ सर्वात्मापरमैरेभिर्गुणैर्नित्यसमन्वयात् ॥ ४३ ॥ स्वस्मात्परात्मविरहात्परमात्माशिवःस्वय म् ॥ नामाष्टकमिदंचैवलब्ध्वाचार्यप्रसादतः ॥ ४४ ॥

॥ ३७ ॥ ३८ ॥ उपायैःप्रकृतेकर्मज्ञानरूपैः॥लयेति ॥ मुमुक्षूणांकामुकानांचक्रमेणलयेमोक्षेभोगेचाधिकारानुसारेणेत्यर्थः ॥ ३९ ॥ एवंसंसारवैद्यशब्दार्थमु क्त्वासर्वज्ञशब्दार्थमाह ॥ दशेति॥दशार्थाःशब्दादयोविषयास्तज्ज्ञानसिद्ध्यर्थमित्यर्थः ॥ इंद्रियेषुज्ञानेंद्रियेषुकर्मेंद्रियेषुच ॥ ४० ॥ अणवोजीवाः मानवानैवेति पाठांतरं ॥ आणवोजैवोमलः ॥ मायानवमलेतिपाठांतरं ॥ ४१ ॥ शिवेतद्वैलक्षण्यमाह ॥ असत्स्विति ॥ ४२ ॥ परमात्मशब्दार्थमाह ॥ सर्वात्मेति ॥ एभिः सर्वज्ञत्वादिभिः ॥ ४३ ॥ ४४ ॥ ॥ ॥ ॥ ॥

Indira Gandhi National Centre for the Arts

यथास्वमिति ॥ स्वस्वाधिष्ठानक्रमेणेत्यर्थः ॥ ४५ ॥ गुणितैःआवर्तितैःपंचनामभिरितिसंबध्यते ॥ सोद्घातैःप्राणवायुनाऽपानाभिघातेनाभिमूलात्प्रे रितस्यवायोर्विरिच्यमानस्याशिरस्यभिहननमुद्घातइत्युच्यते ॥ प्राणेनप्रेर्यमाणेनअपानःपीड्यतेयदि ॥ गत्वाचोर्ध्वंनिवर्तेतएतदुद्घातलक्षणमितिवचनात् ॥ तत्सहितैःसोद्घातैःतद्रहितैर्निरुद्घातैः ॥ हृदिति ॥ हृदादिसमन्बितान्निबृत्यादिकळाग्रंथीनित्यन्वयः ॥ ४६ ॥ पुर्यष्टकेति ॥ भूतेंद्रियमनोबुद्धिवासनाकर्मवा यवः ॥ अविद्याचाष्टकंप्रोक्तंपुर्यष्टम्रषिसत्तमैरित्युक्तपुर्यष्टकमाकारोयस्यतं ॥ सुषुम्नयामध्यमनाड्या ॥ तत्स्वरूपमाम्नातंक्षुरिकोपनिषदि ॥ एकोत्तरंनाडिशतं

निवृत्त्यादिकलाग्रंथीन्शिवाद्यैःपंचनामभिः ॥ यथास्वंक्रमशःस्मृत्वाशोधयित्वायथागुणम् ॥ ४५ ॥ गुणितैरेवसो द्घातैर्निरुद्घातैरथापिवा ॥ हृत्कंठतालुभ्रूमध्यब्रह्मरंध्रसमन्वितान् ॥ ४६ ॥ भित्वापुर्यष्टकाकारंस्वात्मानंचसुषुम्न या ॥ द्वादशांतःस्थितस्येंदोर्नीत्वापरिशिवौजसि ॥ ४७ ॥ संप्लुत्यवानवापश्चाद्यथास्वंकारणेलयात् ॥ शाक्ते नाम्रतवर्षेणसंसिक्तायांतनौपुनः ॥ ४८ ॥ अवतार्यस्वमात्मानममृतात्माकृतिंहृदि ॥ द्वादशांतस्थितस्येंदोःप रस्ताच्छ्वेतपंकजे ॥ ४९ ॥ अर्धनारीश्वरंदेवंनिर्मलंमधुराकृतिं ॥ शुद्धस्फटिकसंकाशंप्रसन्नंशीतलद्युतिं ॥ ५० ॥ ध्यात्वानामाष्टकेनैवभावपुष्पैःसमर्चयेत् ॥ अभ्यर्चनांतेतुपुनःप्राणानायम्यमानवः ॥ ५१ ॥ सम्यक्चित्तंसमाधाय सार्थंनामाष्टकंजपेत् ॥ नाभौचाष्टाहुतीर्हुत्वापूर्णाहुत्वानमस्ततः ॥ ५२ ॥ अष्टपुष्पप्रदानेनकृत्वाभ्यर्चनमंतिमं ॥ निवेदयेत्स्वमात्मानंचुलकोदकवर्त्मना ॥ ५३ एवंकृत्वाचिरादेवज्ञानंपाशुपतंशुभम् ॥ लभेततत्प्रतिष्ठांचव्रतंचानुत्त मंतथा ॥ ५४ ॥ योगंचपरमंलब्ध्वामुच्यतेनात्रसंशयः ॥ ५५ ॥ इतिश्रीशिवमहापुराणेवायवीयसंहितायांपूर्वभा गेऽष्टाविंशतितमोऽध्यायः ॥ २८ ॥ ॥ ॥ ॥ ॥

तासांमध्येवरास्मृता ॥ सुषुम्नातुपरेलीनाविरजाब्रह्मरूपिणी ॥ इडातिष्ठतिवामेनपिंगलादक्षिणेनत्विति ॥ द्वादशेति ॥ द्वादशदलस्यहृत्कमलस्यांतर्मध्येस्थि तस्येंदोरुपरिशिवौजसिस्वमात्मानंनीत्वेतिसंबंधः ॥ ॥ ४७ ॥ ४८ ॥ ४९ ॥ ५० ॥ भावपुष्पैःभक्तिरूपैःपुष्पैः ॥ ५१ ॥ नाभाविति ॥ नामाष्टकेनेत्यर्थः पूर्णापूर्णाहुतिम् ॥ ॥ नमइति ॥ नमस्कुर्यादित्यर्थः ॥ ५२ ॥ चुलकोदकवर्त्मनाहस्तोदकप्रक्षेपमार्गेण ॥ ५३ ॥ ५४ ॥ ५५ ॥ इतिश्रीशैवमहापुराणेवायवी यसंहिताटीकायांसारबोधिन्यांपूर्वभागेनामाष्टकवर्णनंनामाष्टाविंशोऽध्यायः ॥ २८ ॥ ॥ ॥ ॥



Indira Gandhi National Centre for the Arts

व्रतंपाशुपतंसांगंवायुनासमुदीरितम् ॥ भस्ममाहात्म्यसहितमेकोनत्रिंशईर्यते ॥ १ ॥ १ ॥ अथर्वशिरशिअथर्ववेदोपनिषदि ॥ २ ॥ चित्रापौर्णमासी चैत्रमासस्यपौर्णमासी ॥ शिवपरिग्रहःशिवलिंगादियुतः ॥ ३ ॥ व्रतविधिमाह ॥ तत्रेति ॥ ४ ॥ ५ ॥ ६ ॥ ७ ॥ तदर्धषडब्दं ॥ पुनस्तदर्धंत्र्यब्दम् ॥

ऋषयऊचुः ॥ भगवन्श्रोतुमिच्छामोव्रतंपाशुपतंपरम्॥ब्रह्मादयोपियत्कृत्वासर्वेपाशुपताःस्मृताः ॥१॥ वायुरुवाच॥ रहस्यंवःप्रवक्ष्यामिसर्वपाशनिकृंतनं ॥ व्रतंपाशुपतंश्रौतमथर्वशिरसिश्रुतं ॥ २ ॥ कालश्चित्रापौर्णमासीदेशःशिव परिग्रहः ॥ क्षेत्रारामादिरन्योवाप्रशस्तःशुभलक्षणः ॥ ३ ॥ तत्रपूर्वंत्रयोदश्यांसुस्नातःसुकृतान्हिकः ॥ अनुज्ञा प्यस्वमाचार्यंसंपूज्यप्रणिपत्यच ॥ ४ ॥ पूजांवैशेषिकींकृत्वाशुक्लांबरधरःस्वयम् ॥ शुक्लयज्ञोपवीतीचशुक्लमाल्यानु लेपनः ॥ ५ ॥ दर्भासनेसमासीनोदर्भमुष्टिंप्रगृह्यच ॥ प्राणायामत्रयंकृत्वाप्राङ्मुखोवाप्युदङ्मुखः ॥ ६ ॥ ध्या त्वादेवंचदेवींचतद्विज्ञापनवर्त्मना ॥ व्रतमेतत्करोमीतिभवेत्संकल्प्यदीक्षितः ॥ ७ ॥ यावच्छरीरपातंवाद्वादशाब्दम थापिवा ॥ तदर्धंवातदर्धंवामासद्वादशकंतुवा ॥ ८ ॥ तदर्धंवातदर्धंवामासमेकमथापिवा ॥ दिनद्वादशकंवाथदिन षट्कमथापिवा ॥ ९ ॥ तदर्धदिनमेकंवाव्रतसंकल्पनावधि ॥ अग्निमाधायविधिवद्विरजाहोमकारणात् ॥ १० ॥ हुत्वाज्येनसमिद्भिश्चचरुणाचयथाक्रमं ॥ पूर्णाद्याःपुरतोभूयस्तत्वानांशुद्धिमुद्दिशन् ॥११॥ जुहुयान्मूलमंत्रेणतैरेवस मिदादिभिः ॥ तत्वान्येतानिमद्देहेशुध्यंतामित्यनुस्मरन् ॥ १२ ॥ पंचभूतानितन्मात्राःपंचकर्मेंद्रियाणिच ॥ ज्ञान कर्मविभेदेनपंचपंचविभागशः ॥ १३ ॥ त्वगादिधातवःसप्तपंचप्राणादिवायवः ॥ मनोबुद्धिरहंख्यातिर्गुणाःप्रकृति पूरुषौ ॥ १४ ॥ रागोविद्याकलाचैवनियतिःकालएवच ॥ मायाचशुद्धविद्याचमहेश्वरसदाशिवौ ॥ १५ ॥ शक्तिश्च शिवतत्वंचतत्वानिक्रमशोविदुः ॥ मंत्रैस्तुविरजैर्हुत्वाहोतासौविरजोभवेत् ॥ १६ ॥ अथगोमयमादायपिंडीकृत्या भिमंत्र्यच ॥ न्यस्याग्नौतच्चसंरक्ष्यदिनेतस्मिन्हविष्यभुक् ॥ १७ ॥

॥ ८ ॥ ९ ॥ विरजाहोमःप्राणापानव्यानोदानेत्यादिकैर्नारायणोक्तैर्मंत्रैःक्रियमाणः ॥ १० ॥ पूर्णाहुत्याद्याःहुत्वेतिसंबंधः ॥ ११ ॥ मूलमंत्रेणपंचाक्षरेण ॥ १२ ॥ तत्त्वान्याह ॥ पंचेति ॥ १३ ॥ १४ ॥ १५ ॥ होताहोमकर्ता ॥ विरजःनिर्दोषः ॥ १६ ॥ १७ ॥ ॥

Indira Gandhi National Centre for the Arts

॥ १८ ॥ उपसंहृत्यशमयित्वा ॥ १९ ॥ २० ॥ २१ ॥ २२ ॥ ॥ २३ ॥ २४ ॥ २५ ॥ २६ ॥ २७ ॥ विभवइति ॥ ऐश्वर्येसतीत्यर्थः ॥ अस्यपूर्वे



प्रभातेतुचतुर्दश्यांकृत्वासर्वंपुरोदितम् ॥ दिनेतस्मिन्निराहारःकालशेषंसमापयेत् ॥ १८ ॥ प्रातःपर्वणिचाप्येवंकृत्वा
होमावसानतः ॥ उपसंहृत्यरुद्राग्निंगृण्हीयाद्भस्मयत्नतः ॥ १९ ॥ ततस्तुजटिलोमुंडःशिखैकजटएववा ॥ भूत्वास्नात्वा
पुनर्वीतलज्जश्चेत्स्याद्दिगंबरः ॥ २० ॥ अन्यःकाषायवसनश्चर्मचीरांबरोथवा ॥ एकांबरोवल्कलीवाभवेद्दंडीचमेख
ली ॥ २१ ॥ प्रक्षाल्यचरणौपश्चाद्द्विराचम्यात्मनस्तनुम् ॥ संकलीकृत्यतद्भस्मविरजानलसंभवम् ॥ २२ ॥ अग्नि
रित्याभिर्मंत्रैःषड्भिराथर्वणैःक्रमात् ॥ विमृज्यांगानिमूर्धादिचरणांतंचसंस्पृशेत् ॥ २३ ॥ ततस्तेनक्रमेणैवसमुद्धृत्य
चभस्मना ॥ सर्वांगोद्धूलनंकुर्यात्प्रणवेनशिवेनवा ॥ २४ ॥ ततस्त्रिपुंड्रंरचयेत्त्रियायुषसमाव्हयम् ॥ शिवभावंसमा
गम्यशिवयोगंसमाचरेत् ॥ २५ ॥ कुर्यात्त्रिसंध्यमप्येवमेतत्पाशुपतंव्रतम् ॥ पूजनीयोमहादेवोलिंगमूर्तिःसनातनः
॥ २६ ॥ पद्ममष्टदलंहैमंनवरत्नैरलंकृतम् ॥ कर्णिकाकेसरोपेतमासनंपरिकल्पयेत् ॥ २७ ॥ विभवेतदभावेतुरक्तं
सितमथापिवा ॥ पद्मंतस्याप्यभावेतुकेवलंभावनामयं ॥ २८ ॥ तत्पद्मकर्णिकामध्येकृत्वालिंगंकनीयसं ॥ स्फाटि
कंपीठिकोपेतंपूजयेद्विततःक्रमात् ॥ २९ ॥ प्रतिष्ठाप्यविधानेनतल्लिंगंकृतशोधनम् ॥ परिकल्प्यासनंमूर्तिंपंचवक्त्र
प्रकारतः ॥ ३० ॥ पंचगव्यादिभिःपुण्यैर्यथाविभवविस्तरैः ॥ स्नापयेत्कलशैःपूर्णैःसहस्रादिषुसंभवैः ॥ ३१ ॥ गं
धद्रव्यैःसकर्पूरैश्चंदनाद्यैःसकुंकुमैः ॥ सवेदिकंसमालिप्यलिंगंभूषणभूषितम् ॥ ३२ ॥ बिल्वपत्रैश्चपद्मैश्चरक्तश्वे
तैस्तथोत्पलैः ॥ नीलोत्पलैस्तथान्यैश्चपुष्पैस्तैस्तैःसुगंधिभिः ॥ ३३ ॥ पुण्यैश्चशतपत्रैश्चचित्रैर्दूर्वाक्षतादिभिः ॥
समभ्यर्च्ययथालाभंमहापूजाविधानतः ॥ ३४ ॥ धूपंदीपंतथाचार्घ्यंनैवेद्यंचसमादिशेत् ॥ निवेदयित्वाविभवेकल्या
णंचसमाचरेत् ॥ ३५ ॥ इष्टानिचविशिष्टानिन्यायेनोपार्जितानिच ॥ सर्वद्रव्याणिदेयानिव्रतेतस्मिन्विशेषतः ॥
॥ ३६ ॥ श्रीपत्रोत्पलपद्मानांसंख्यासाहस्त्रिकीमता ॥ प्रत्येकमपरासंख्याशतमष्टोत्तरंद्विजाः ॥ ३७ ॥



णान्वयः ॥ २८ ॥ २९ सहस्रादिषुएतदाख्यस्थलविशेषेषु ॥ ३० ॥ ३१ ॥ ३२ ॥ ३३ ॥ ३४ ॥ ३५ ॥ ३६ ॥ ३७ ॥ ॥

Gandhi National Centre for the Arts

॥ ३८ ॥ ३९ ॥ ४० ॥ सद्येसद्योजाताख्ये ॥ ४१ ॥ मुखेवामदेवाख्ये ॥ ४२ ॥ सौगंधिकंकल्हारमयं ॥ ४३ ॥ ४४ ॥ ४५ ॥ आवरणपूजामाह ॥ प्रथमेति ॥ ४६ ॥ भवाद्यावक्ष्यंते ॥ ४७ ॥ दशदिक्पतयःइंद्रादयः ॥ ४९ ॥ ५० ॥ ५१ ॥ ५२ ॥ सव्यंजनंशाकादियुतम् ॥ ५३ ॥ ५४ ॥

तत्रापिचविशेषेणनत्यजेद्बिल्वपत्रकं ॥ हैममेकंपरंप्राहुःपद्मंपद्मसहस्रकात् ॥ ३८ ॥ नीलोत्पलादिष्वप्येतत्समानं
बिल्वपत्रकैः ॥ पुष्पांतराण्यनियमाद्यथालाभंनिवेदयेत् ॥ ३९ ॥ अष्टांगमर्घ्यमुत्कृष्टंधूपालेपौविशेषतः ॥ कृष्णागुरु
मघोराख्येवक्त्रेसद्येमनःशिलां ॥ ४० ॥ चंदनंवामदेवाख्येहरितालंचपौरुषे ॥ ईशानेभस्मितंकेचिदालेपनमितीदृशं ॥
॥ ४१ ॥ नधूपइतिमन्यंतेधूपांतरविधानतः ॥ सितागुरुमघोराख्येमुखेकृष्णागुरुंपुनः ॥ ४२ ॥ पौरुषेगुग्गुलुंसद्येसौ
म्येसौगंधिकंमुखे ॥ ईशानेपिउशीरादिदद्याद्धूपंविशेषतः ॥ ४३ ॥ शर्करामधुकर्पूरकपिलाघृतसंयुतम् ॥ चंदनागु
रुकाष्ठाद्यंसामान्यंसंप्रचक्षते ॥ ४४ ॥ कर्पूरवर्तिराज्याढ्यादेयादीपावलीततः ॥ अर्घ्यमाचमनंदेयंप्रतिवक्त्रमतःप
रम् ॥ ४५ ॥ प्रथमावरणेपूज्यौक्रमाद्धेरंबषण्मुखौ ॥ ब्रह्मांगानिततश्चैवंप्रथमावरणेऽर्चिते ॥ ४६ ॥ द्वितीयावरणे
पूज्याविघ्नेशाश्चक्रवर्तिनः ॥ तृतीयावरणेपूज्याभवाद्याश्चाष्टमूर्तयः ॥ ४७ ॥ महादेवादयस्तत्रतथैकादशमूर्तयः ॥
चतुर्थावरणेपूज्याःसर्वएवगणेश्वराः ॥ ४८ ॥ बहिरेवतुपद्मस्यपंचमावरणेक्रमात् ॥ दशदिक्पतयःपूज्याःसास्त्राः
सानुचरास्तथा ॥ ४९ ॥ ब्रह्मणोमानसाःपुत्राःसर्वेपिज्योतिषांगणाः ॥ सर्वेदेवाश्चदेव्यश्चसर्वाःसर्वेपिखेचराः ॥
॥ ५० ॥ पातालवासिनश्चान्येसर्वेमुनिगणाअपि ॥ योगिनोमुख्यतःसर्वेपंचमेमातरस्तथा ॥ ५१ ॥ क्षेत्रपालश्चसग
णःसर्वंचैतच्चराचरम् ॥ अथावरणपूजांतेसंपूज्यपरमेश्वरम् ॥ ५२ ॥ साज्यंसव्यंजनंत्वद्यंहविर्भक्त्यानिवेदयेत् ॥
मुखवासादिकंदत्वातांबूलंसोपदंशकम् ॥ ५३ ॥ अलंकृत्यचभूयोपिनानापुष्पविभूषणैः ॥ नीराजनांतेविस्तीर्णे
पूजाशेषंसमापयेत् ॥ ५४ ॥ चंद्रसंकाशहारंचशयनीयेसमर्पयेत् ॥ आढ्यंनृपोचितंत्वद्यंतत्सर्वमनुरूपतः ॥ ५५ ॥
कृत्वाचकारयित्वाचहुत्वाचप्रतिपूजनम् ॥ स्तोत्रंव्यपोहनंजप्त्वाविद्यांपंचाक्षरींजपेत् ॥ ५६ ॥ ॥

शयनीयेशयनस्थाने ॥ तत्सर्वंशय्यादिकं ॥ ५५ ॥ कारयित्वाऋत्विग्द्वारेतिशेषः ॥ व्यपोहनंप्रार्थनाम् ॥ ५६ ॥ ॥ ॥

Indira Gandhi National Centre for the Arts

॥ ५५ ॥

आत्मानंपरमात्मानं ॥ ५७ ॥ उद्वास्यविसृज्य ॥ ५८ ॥ ५९ ॥ ६० ॥ भक्तान्शिवभक्तान् ॥ ६१ ॥ एकाशनः एकभक्तः ॥ युक्ताशनोनियताशनः

प्रदक्षिणांप्रणामंचकृत्वात्मानंसमर्चयेत्॥ततःपुरस्ताद्देवस्यगुरुंविद्येचपूजयेत्॥५७॥दत्वार्घ्यमष्टौपुष्पाणिदेवमुद्वा
स्यलिंगतः ॥ अग्नेश्चाग्निंसुसंरक्ष्यउद्वास्यचतमप्युत ॥ ५८ ॥ प्रत्यहंजनइत्येवंकुर्यात्सर्वंपुरोदितम् ॥ ततस्तत्सां
बुजंलिंगंसर्वोपकरणान्वितम्॥ ५९ ॥ समर्पयेत्स्वगुरवेस्थापयेद्वाशिवालये ॥ संपुज्यचगुरूनन्यान्व्रतिनश्चविशेष
तः ॥ ६० ॥ भक्तान्द्विजांश्चशक्तश्चेद्दीनानाथांश्चतोषयेत् ॥ स्वयंचानशनप्रायःफलमूलाशनोऽथवा ॥ ६१ ॥
पयोव्रतीवाभिक्षाशीभवेदेकाशनस्तथा ॥ नक्तंयुक्ताशनोनित्यंभूशय्यानिरतःशुचिः ॥ ६२ ॥ भस्मशायीतृणेशायी
चीराजिनशयोथवा ॥ ब्रह्मचर्यरतोनित्यंव्रतमेतत्समाचरेत्॥६३॥अर्कवारेतथार्द्रायांपंचदश्यांचपक्षयोः ॥ अष्टम्यां
चचतुर्दश्यांशक्तस्तूपवसेदपि॥६४॥पाषंडपतितोदक्यासूतिकांत्यजपूर्वकान् ॥ वर्जयेत्सर्वयत्नेनमनसाकर्मणागिरा
॥६५॥क्षमादानदयासत्याहिंसाशीलःसदाभवेत् ॥ संतुष्टश्चप्रशांतश्चतपोध्यानरतःसदा ॥६६॥ कुर्यात्त्रिषवणस्ना
नंभस्मस्नानमथापिवा ॥ पूजांवैशेषिकींचैवमनसाकर्मणागिरा ॥ ६७ ॥ बहुनात्रकिमुक्तेननाचरेदशिवंव्रती ॥ प्र
मादात्तुतथाचारेनिरूप्यगुरुलाघवम् ॥ ६८ ॥ उचितांनिष्कृतिंकुर्यात्पूजाहोमजपादिभिः ॥ आसमाप्तेर्व्रतस्यैवमा
चरेन्नप्रमादतः ॥ ६९ ॥ गोदानंचवृषोत्सर्गंकुर्यात्पूजांजपंसदा ॥ सामान्यमेतत्कथितंव्रतस्यास्यसमासतः ॥ ७० ॥
प्रतिमासंविशेषंचप्रवक्ष्यामियथाक्रमम् ॥ वैशाखेवज्रलिंगंतुज्येष्ठेमारकतंशुभम् ॥७१॥ आषाढेमौक्तिकंविद्याच्छ्रा
वणेनीलनिर्मितम् ॥ मासेभाद्रपदेचैवपद्मरागमयंपरम् ॥ ७२ ॥ आश्वयुज्यांचविधिवद्गोमेदकमयंशुभम् ॥
कार्तिक्यांवैद्रुमंलिंगंवैडूर्यंमार्गशीर्षके ॥ ७३ ॥ पुष्परागमयंपौषेमाघेद्युमणिजंतथा ॥ फाल्गुन्यांचंद्रकांतोत्थंचैत्रे
तद्व्यत्ययोऽथवा ॥ ७३ ॥ सर्वमासेषुरत्नानामलाभेहैममेववा ॥ हैमाभावेराजतंवाताम्रंशैलजमेववा ॥ ७५ ॥

॥ ६२ ॥ ६३ ॥ ६४ ॥ ६५ ॥ त्रिषवणस्नानंत्रिकास्नानं ॥ ६६ ॥ अशिवंकल्याणं ॥ निरूप्यविचार्य ॥ ६७ ॥ ६८ ॥ ६९ ॥ ७० ॥ वज्रलिंगंही
रकमयलिंगं ॥ ७१ ॥ ७२ ॥ ७३ ॥ द्युमणिजंसूर्यकांतमयं ॥ ७४ ॥ शैलंशिलामयं क्षणिकंवक्ष्यते ॥ ७५ ॥ ॥ ॥

॥ ७६ ॥ ७७ ॥ देशिकेनआचार्येण ॥ ७८ ॥ मूलंमूलमंत्रम् ॥ ७९ ॥ व्रतोत्सर्गविधिमाह ॥ समुत्सृजामीति ॥ ८० ॥ ८१ ॥ ८२ ॥ अत्याश्रमी

मृन्मयंवायथालाभंक्षणिकंचान्यदेववा ॥ सर्वगंधमयंवाथलिंगंकुर्याद्यथारुचि ॥ ७६ ॥ व्रतावसानसमयेसमाचरितनैत्यकः ॥ कृत्वावैशेषिकींपूजांहुत्वाचैवयथापुरा ॥ ७७ ॥ संपूज्यचसदाचार्यंव्रतिनश्चविशेषतः ॥ देशिकेनाभ्यनुज्ञातःप्राङ्मुखोवाप्युदङ्मुखः ॥ ७८ ॥ दर्भासनोदर्भपाणिःप्राणापानौनियम्यच ॥ जपित्वाशक्तितोमूलंध्यात्वासांबंत्रियंबकम् ॥ ७९ ॥ अनुज्ञाप्ययथापूर्वंनमस्कृत्यकृतांजलिः ॥ समुत्सृजामिभगवन्व्रतमेतत्त्वदाज्ञया ॥ ८० ॥ इत्युक्त्वालिंगमूलंतुदर्भानुत्तरतस्त्यजेत् ॥ ततोदंडजटाचीरमेखलाद्यपिचोत्सृजेत् ॥ ८१ ॥ पुनराचम्यविधिवत्पंचाक्षरमुदीरयेत् ॥ यःकृत्वात्यंतिकींदीक्षामादेहांतमनाकुलः ॥ ८२ ॥ व्रतमेतत्प्रकुर्वीतसतुवैनैष्ठिकःस्मृतः ॥ सोत्याश्रमीचविज्ञेयोमहापाशुपतस्तथा ॥ ८३ ॥ सएवतपतांश्रेष्ठःसएवचमहाव्रती ॥ नतेनसदृशःकश्चित्कृतकृत्योमुमुक्षुषु ॥ ८४ ॥ यतिर्योनैष्ठिकोजातस्तमाहुर्नैष्ठिकोत्तमम् ॥ योनश्चन्द्वादशाहंवाव्रतमेतत्समाचरेत् ॥ ८५ ॥ सोपिनैष्ठिकतुल्यःस्यात्तीव्रव्रतसमन्वयात् ॥ घृताक्तोयश्चरेदेतद्व्रतंव्रतपरायणः ॥ ८६ ॥ द्वित्रैकदिवसंवापिसचकश्चननैष्ठिकः ॥ कृत्यमित्येवनिष्कामोयश्चरेद्व्रतमुत्तमम् ॥ ८७ ॥ शिवार्पितात्मासततंनतेनसदृशःक्वचित् ॥ भस्मच्छन्नोद्विजोविद्वान्महापातकसंभवैः ॥ ८८ ॥ पापैर्विमुच्यतेसद्योमुच्यतेनात्रसंशयः ॥ रुद्राग्नेर्यत्परंवीर्यंतद्भस्मपरिकीर्तितम् ॥ ८९ ॥ तस्मात्सर्वेषुकालेषुवीर्यवान्भस्मसंयुतः ॥ भस्मनिष्ठस्यदह्यंतेदोषाभस्माग्निसंगमात् ॥ ९० ॥ भस्मस्नानविशुद्धात्माभस्मनिष्ठइतिस्मृतः ॥ भस्मनादिग्धसर्वांगोभस्मदीप्तत्रिपुंड्रकः ॥ ९१ ॥ भस्मशाय्याचपुरुषोभस्मकल्मषभक्षणात् ॥ भूतिर्भूतिकरीपुंसांरक्षारक्षाकरीपरम् ॥ ९२ ॥ किमन्यदिहवक्तव्यंभस्ममाहात्म्यकारणम् ॥ व्रतीचभस्मनास्नातःस्वयंदेवोमहेश्वरः ॥ ९३ ॥ ॥ ॥ ॥

सर्वाश्रमिषुश्रेष्ठः ॥ ८३ ॥ ८४ ॥ ८५ ॥ घृताक्तःघृतलिप्तांगः ॥ ८६ ॥ ८७ ॥ भस्ममाहात्म्यमाह ॥ द्विजइति ॥ ८८ ॥ ८९ ॥ ९० ॥ दिग्धसर्वांगःलिप्तसर्वावयवः ॥ भस्मेति ॥ भस्मकल्मषेति ॥ भस्मनापापनाशनाद्भस्मनिभवतीत्यर्थः ॥ ९१ ॥ ९२ ॥ ९३ ॥ ॥ ॥

धौम्याग्रजस्यउपमन्योः ॥ १४ ॥ धनवदिति ॥ गोप्यत्वेनेतिभावः ॥ १५ ॥ इतिश्रीशिवमहापुराणेवायवीयसंहिताटीकायांसारबोधिन्यांपूर्वभागेशिवपू
जाविधानंनामैकोनत्रिंशोऽध्यायः ॥ २९ ॥ ओंनमःशिवाय ॥ कुमारेणतपस्तप्तंक्षीरार्थमुपमन्युना ॥ प्राप्तःक्षीराब्धिरित्येतत्त्रिंशेऽध्यायेनिरूप्यते ॥ १ ॥

परमास्त्रंचशैवानांभस्मैतत्पारमेश्वरम् ॥ धौम्याग्रजस्यतपसिह्यापदोयन्निवारिताः ॥ १४ ॥ तस्मात्सर्वप्रयत्नेनकृ
त्वापाशुपतंव्रतम् ॥ धनवद्भस्मसंगृह्यभस्मस्नानरतोभवेत् ॥ १५ ॥ इतिश्रीशिवमहापुराणेवायवीयसंहितायांपूर्व
भागेपूजाविधिनिरूपणंनामैकोनत्रिंशोऽध्यायः ॥ २९ ॥ ॥ छ ॥ ॥ ऋषयऊचुः ॥
धौम्याग्रजेनशिशुनाक्षीरार्थंहितपःकृतम् ॥ यस्मात्क्षीरार्णवोदत्तस्तस्मैदेवेनशूलिना ॥ १ ॥ सकथंशिशुको
लेभेशिवशास्त्रप्रवक्तृताम् ॥ कथंवाशिवसद्भावंज्ञात्वातपसिनिष्ठितः ॥ २ ॥ कथंचलब्धंविज्ञानंतपश्चरणपर्वणि
॥ रुद्राग्नेर्यत्परंवीर्यंलेभेभस्मस्वरक्षकम् ॥ ३ ॥ वायुरुवाच ॥ नह्येषशिशुकःकश्चित्प्राकृतःकृतवांस्तपः ॥ मुनिव
र्यस्यतनयोव्याघ्रपादस्यधीमतः ॥ ४ ॥ जन्मांतरेणसंसिद्धःकेनापिखलुहेतुना ॥ स्वपदप्रच्युतोदिष्ट्याप्राप्तोमुनिकु
मारताम् ॥ ५ ॥ महादेवप्रसादस्यभाग्यायत्तस्यभाविनः ॥ दुग्धाभिलाषप्रभवंद्वारतामगमत्तपः ॥ ६ ॥ अतएवग
णेशत्वंकुमारत्वंचशाश्वतम् ॥ सहदुग्धाब्धिनातस्मैप्रददौशंकरःस्वयम् ॥ ७ ॥ तस्माज्ज्ञानागमोऽप्यस्यप्रसादादेव
शांकरात् ॥ कौमारंहिपरंसाक्षाज्ज्ञानंशक्तिमयंविदुः ॥ ८ ॥ शिवशास्त्रप्रवक्तृत्वमपितस्यहितत्कृतं ॥ कुमारमुख
तोलब्धज्ञानाब्धेरिवनंदिनः ॥ ९ ॥ दृष्टंतुकारणंत्वस्यशिवज्ञानसमन्वये ॥ स्वमातृवचनंसाक्षाच्छोकजंक्षीरकारणा
त् ॥ १० ॥ साऽवदत्किलशोचंतीसहसादुःसहंवचः ॥ क्वदुग्धंसाधुनोवत्सक्ववयंवनवासिनः ॥ ११ ॥ कृच्छ्रभावेन
दारिद्र्यान्मयातेभाग्यहीनया ॥ मिथ्यादुग्धमिदंदत्तंपिष्टमालोड्यवारिणा ॥ १२ ॥ त्वंमातुलगृहेस्वल्पंपीत्वादु
ग्धंपयःशृतम् ॥ ज्ञातास्वादस्त्वपर्याप्तस्तज्जातीयमनुस्मरन् ॥ १३ ॥ ॥ ॥

॥ १ ॥ २ ॥ तपश्चरणपर्वणितपश्चर्याकालेलेभेकथमित्यनुवर्तते ॥ ३ ॥ ४ ॥ ५ ॥ दुग्धेति ॥ दुग्धाभिलाषात्प्रभवोयस्यतत्तपोमहादेवप्रसादस्यद्वारता
मगमत् अस्येतिशेषः ॥ ६ ॥ ७ ॥ शक्तिमयमिति ॥ ग्रहणधारणसामर्थ्यस्यतत्राधिक्यादितिभावः ॥ ८ ॥ तत्कृतंकौमारज्ञानकृतं ॥ कुमारमुखतःस्कं
दात् ॥ ९ ॥ १० ॥ मातृवचनमाह ॥ क्वदुग्धमिति ॥ ११ ॥ १२ ॥ १३ ॥ ॥ ॥ ॥



Indira Gandhi National Centre for the Arts

॥ १४ ॥ १५ ॥ पयइति ॥ लब्धमितिशेषः ॥ १६ ॥ अनुतपन्पश्चात्तापंकुर्वन् ॥ १७ ॥ १८ ॥ १९ ॥ २० ॥ २१ ॥ २२ ॥ तस्मिन्नेवशि

दत्तंनपयइत्युक्तारुदन्दुःखाकरोषिमाम् ॥ प्रसादेनविनाशंभोःपयस्तवनविद्यते ॥ १४ ॥ पादपंकजयोस्तस्यसां
बस्यसगणस्यच ॥ भक्त्यासमर्पितंयत्तत्कारणंसर्वसंपदाम् ॥ १५॥ धनाद्युद्दिश्यनाऽस्माभिरितःप्रागर्चितःशिवः ॥
अतोदरिद्राःसंजातावयंतस्मान्नतत्पयः ॥ १६ ॥ इतिमातृवचःश्रुत्वातथ्यंशोकादिसूचकम् ॥ बालोप्यनुतपन्नंतः
प्रगल्भमिदमब्रवीत् ॥ १७॥ उपमन्युरुवाच ॥ शोकेनालमितोमातःसांबोयद्यस्तिशंकरः ॥ तत्प्रसादेनदुग्धाब्धिं
साधयिष्यामिशाश्वतं ॥ १८ ॥ मातोवाच ॥ यद्यस्तीतिनवक्तव्यंपुत्रसंदिग्धकंवचः ॥ सर्वस्मादधिकोऽस्त्येवशिवः
परमकारणम् ॥ १९ ॥ तत्कृतंहिजगत्सर्वंब्रह्माद्यास्तस्यकिंकराः ॥ तत्प्रसादकृतैश्वर्यादासास्तस्यवयंप्रभो ॥ २० ॥
अन्यान्देवान्परित्यज्यकामयेमनसागिरा ॥ तमेवसांबंसगणंभजेभावपुरःसरम् ॥ २१ ॥ तस्यदेवाधिदेवस्यशि
वस्यशिवदायिनः ॥ साक्षान्नमःशिवायेतिमंत्रोऽयंवाचकःस्मृतः ॥ २२ ॥ सप्तकोटिमहामंत्राःसर्वेसप्रणवाःपरे ॥
तस्मिन्नेवविलीयंतेपुनस्तस्माद्विनिर्गताः ॥ २३ ॥ सुप्रसादाश्चतेमंत्राःस्वाधिकारव्यपेक्षया ॥ सर्वाधिकारस्त्वेकोयं
मंत्रएवेश्वराज्ञया ॥ २४ ॥ यथानिकृष्टानुत्कृष्टान्सर्वानप्यात्मनःशिवः ॥ क्षमतेरक्षितुंतद्वन्मंत्रोऽयमपिसर्वदा ॥
॥ २५ ॥ प्रबलश्चतथाचाऽयंमंत्रोमंत्रांतरादपि ॥ सर्वरक्षाक्षमोह्येषनापरःकश्चिदिष्यते ॥ २६ ॥ तस्मान्मंत्रांतरं
त्यक्तापंचाक्षरपरोभव ॥ तस्मिन्जिह्वांतरगतेनकिंचिद्दुर्लभंमतम् ॥ २७ ॥ अघोरास्त्रंचशैवानांरक्षाहेतुरनुत्तमम्
॥ तच्चतत्प्रभवंमत्वातत्परोभवनान्यथा ॥ २८ ॥ भस्मेदंतुमयालब्धंपितुरेवतवोत्तमम् ॥ विरजानलसंसिद्धंमहाव्या
पन्निवारणम् ॥ २९ ॥ मंत्रंचतेमयादत्तंगृहाणमदनुज्ञया ॥ अनेनैवाशुजप्तेनरक्षातवभविष्यति ॥ ३० ॥ एवंमात्रा
समादिश्यशिवंतेस्त्वित्युदीर्यच ॥ विसृष्टस्तद्वचोमूर्ध्निकुर्वन्नेवसदामुनिः ॥ ३१ ॥ ॥ ॥

वएव ॥ २३ ॥ स्वाधिकारव्यपेक्षयास्वाधिकारस्यविशिष्टापेक्षयासंतीत्यर्थः ॥ अयंपंचाक्षरः ॥ २४ ॥ २५ ॥ २६ ॥ तस्मिन्पंचाक्षरमंत्रे ॥ २७ ॥
तत्प्रभवंपंचाक्षरप्रभवम् ॥ २८ ॥ २९ ॥ ३० ॥ ३१ ॥ ॥ ॥ ॥

प्रचक्रमइति ॥ मुनिरितिसंबध्यते ॥ ३२ ॥ तयामात्रा ॥ ३३ ॥ ३४ ॥ ३५ ॥ ३६ ॥ ३७ ॥ ३८ ॥ ३९ ॥ ४० ॥ सःहरिः ॥ ४१ ॥ ४२ ॥



तांप्रणम्यैवमुक्त्वाचतपःकर्तुंप्रचक्रमे ॥ तमाहचतदामाताशुभंकुर्वंतुतेसुराः ॥ ३२ ॥ अनुज्ञातस्तत्रतयातपस्तेपेसु
दुश्चरम् ॥ हिमवत्पर्वतंप्राप्यवायुभक्षःसमाहितः ॥ ३३ ॥ अष्टेष्टकाभिःप्रासादंकृत्वालिंगंचमृन्मयम् ॥ तत्रावा
ह्यमहादेवंसांबंसगणमव्ययम् ॥ ३४ ॥ भक्त्यापंचाक्षरेणैवपत्रैःपुष्पैर्वनोद्भवैः ॥ समभ्यर्च्यपरंकालंचचारपरमं
तपः ॥ ३५ ॥ तथातपश्चरंतंतंबालमेकाकिनंकृशम् ॥ पुरामरीचिनाशप्ताःकेचिन्मुनिपिशाचकाः ॥ ३६ ॥ संपी
ड्यराक्षसैर्भावैस्तपसोविघ्नमाचरन् ॥ सचतैःपीड्यमानोपितपःकुर्वन्कथंचन ॥ ३७ ॥ सदानमःशिवायेतिक्रोश
तिस्मार्तनादवत् ॥ तन्नादश्रवणादेवतपसोविघ्नकारिणः ॥ ३८ ॥ तत्तद्भावंसमुत्सृज्यमुनयस्तमुपाचरन् ॥ तपसा
तस्यविप्रस्यप्रदीपितमभूज्जगत् ॥ ३९ ॥ प्रणम्याहुश्चतत्सर्वंहरयेदेवसत्तमाः ॥ श्रुत्वातेषांतदावाक्यंभगवान्पुरु
षोत्तमः ॥ ४० ॥ किमिदंत्वितिसंचिंत्यज्ञात्वातत्कारणंचसः ॥ जगाममंदरंतूर्णंमहेश्वरदिदृक्षया ॥ ४१ ॥ दृष्ट्वादेवं
प्रणम्यैवंप्रोवाचकृतांजलिः ॥ भगवन्ब्राह्मणःकश्चिदुपमन्युरितिश्रुतः ॥ ४२ ॥ क्षीरार्थमदहत्सर्वंतपसातंनि
वारय ॥४३॥ एतस्मिन्नंतरेदेवःपिनाकीपरमेश्वरः ॥ शक्रस्यरूपमास्थायगंतुंचक्रेमतिंतदा ॥ ४४ ॥ अथजगाममुने
स्तुतपोवनंगजवरेणसितेनतदाशिवः ॥ सहसुरासुरसिद्धमहोरगैरमरराजतनुंस्वयमास्थितः ॥ ४५ ॥ रराजभग
वान्सोमःशक्ररूपीतदाशिवः ॥ तेनातपत्रेणयथाचंद्रबिंबेनमंदरः ॥ ४६ ॥ आस्थायैवंहिशक्रस्यस्वरूपंपरमेश्व
रः ॥ जगामानुग्रहंकर्त्तुमुपमन्योस्तमाश्रमम् ॥ ४७ ॥ तंदृष्ट्वापरमेशानंशक्ररूपधरंशिवम् ॥ प्रणम्यशिरसाप्राह
मुनिर्मुनिवरःस्वयम् ॥ ४८ ॥ उपमन्युरुवाच ॥ पावितश्चाश्रमःसोयंममदेवेश्वरस्वयम् ॥ प्राप्तःशक्रोजगन्नाथो
भगवान्भानुसप्रभः ॥४९॥ एवमुक्त्वास्थितंप्रेक्ष्यकृतांजलिपुटंद्विजम् ॥ प्राहगंभीरयावाचाशक्ररूपधरोहरः ॥५०॥ ॥ ५७ ॥

सर्वजगत् ॥ ४३ ॥ गजवरेणऐरावतेन ॥ ४४ ॥ ४५ ॥ ४६ ॥ ४७ ॥ ४८ ॥ मुनिनायदुक्तंतदाह ॥ पावितइति ॥ ४९ ॥ ५० ॥

Indira Gandhi National Centre for the Arts

॥ ५१ ॥ ५२ ॥ स्वगुणाभासैःकल्पितैःस्वगुणैः ॥५३॥५४॥ तस्माच्छिवात् ॥५५॥५६॥५७॥ नंदीआनंदयुक्तः ॥५८॥५९॥ आहतःव्याप्तः ॥ ६० ॥

तुष्टोऽस्मितेवरंब्रूहितपसानेनसुव्रत ॥ ददामिचेप्सितान्सर्वान्धौम्याग्रजमहामुने ॥ ५१ ॥ एवमुक्तस्तदातेनशक्रे
णमुनिसत्तमः ॥ वरयामिशिवेभक्तिमित्युक्तातपतेपुनः ॥ ५२ ॥ तस्यतीव्रंतपोज्ञात्वाशक्ररूपधरोहरः ॥ आगत्यस्व
गुणाभासैःस्वमात्मानमनिंदत ॥ ५३ ॥ मुनिस्तुतमविज्ञायशक्ररूपधरंहरम् ॥ शिवनिंदाश्रुतेत्येवमर्तुंव्यवसितः
स्वयम् ॥ ५४ ॥ क्षीरेवांछामपित्यक्त्वानिहंतुंशक्रमुद्यतः ॥ भस्मादायतदाघोरमघोरास्त्राभिमंत्रितम् ॥ ५५ ॥ वि
सृज्यशक्रमुद्दिश्यस्वदेहंदग्धुमुद्यतः ॥ आग्नेयींधारणांबिभ्रदुपमन्युरवस्थितः ॥५६ ॥ तांतस्यधारणांदेवोनिरीक्ष्या
वारयत्स्वयम् ॥ तद्विसृष्टमघोरास्त्रंनंदीश्वरनियोगतः ॥ ५७ ॥ जगृहेमध्यतःक्षिप्रंनंदीशंकरवल्लभः ॥ ददृशेथम
हादेवोदेव्यासार्धंवृषोपरि ॥ ५८ ॥ गणेश्वरैस्त्रिशूलाद्यैर्दिव्यास्त्रैरपिसंवृतः ॥ देवदुंदुभयोनेदुःपुष्पवृष्टिःपपातच
॥५९॥ ब्रह्मेंद्रविष्णुप्रमुखैर्देवैश्छन्नादिशोदश ॥ अथोपमन्युरानंदसमुद्रोर्मिभिराहतः ॥६०॥ पपातदंडवद्भूमौभक्ति
निघ्ननचेतसा ॥ एह्येहीतितमाहूयशिवःशीतांशुभूषणः ॥ ६१ ॥ मूर्ध्न्याघ्रायसुतस्तेयमितिदेव्यैन्यवेदयत् ॥ देवी
चगुहवत्प्रीत्यामूर्ध्नितस्यकरांबुजम् ॥ ६२ ॥ विन्यस्यप्रददौतस्मैकुमारपदमव्ययम् ॥ क्षीराब्धिरथसाकारःक्षीरं
स्वादुकरेदधत् ॥ ६३ ॥ उपस्थायददौतस्मैपिंडीभूतमनश्वरम् ॥ समृद्धिंधनदस्तद्वद्ददावाप्रलयस्थिताम् ॥ ६४ ॥
ततःसमृद्धमभवद्धनैर्धान्यैस्तपोवनम् ॥ व्रतंपाशुपतंज्ञानंव्रतयोगंचतत्वतः ॥ ६५ ॥ दत्वातस्मैप्रवक्तृत्वंपादुकेच
चिरंपरम् ॥ सर्वज्ञत्वपदंदत्वादेवश्चांतरधीयत ॥ ६६ ॥ इतिश्रीशिवमहापुराणेवायवीयसंहितायांपूर्वभागेत्रिंशो
ऽध्यायः ॥ ३० ॥ ॥ ॥ वायुसंहितायाःपूर्वभागःसमाप्तिमगमत् ॥ ॥ छ ॥

तंमुनिं ॥ ६१ ॥ देव्यैपार्वत्यै ॥ ६२ ॥ कुमारपदंकुमारस्यस्कंदस्येवपदंस्थानम् ॥ ६३ ॥ ६४ ॥ ६५ ॥ तस्मैउपमन्यवे ॥ देवःशिवः ॥ ६६ ॥ इतिश्री
शैवमहापुराणेवायवीयसंहिताटीकायांसारबोधिन्यांपूर्वभागेउपमन्युतपोवर्णननामत्रिंशोऽध्यायः ॥ ३० ॥ ॥ शुभंभवतु ॥ पूर्वभागःसमाप्तः ॥

Indira Gandhi National Centre for the Arts

## ॥ अथ वायुसंहितायामुत्तरभागः प्रारभ्यते ॥

Indira Gandhi National Centre for the Arts




Indira Gandhi National
Centre for the Arts

श्रीगणेशायनमः ॥ श्रीसांबसदाशिवायनमः ॥ वायुसंहितायाउत्तरभागस्यारंभः ॥ ॐनमःशिवाय ॥ श्रीशंकरायामितवैभवायपिनाकहस्तायजगन्नियंत्रे ॥ विधायिनेभक्तसुमंगलानामाव्याधिनीनांपतयेनमस्ते ॥ १ ॥ सूतःप्रयागेसंपृष्टःशिवमाहात्म्यमब्रवीत् ॥ वायुर्यच्छ्रुतकल्पेतदाद्यध्यायेनिरूप्यते ॥ १ ॥ निर्विघ्नपरिसमाप्त्यर्थंभगवान्वेदव्यासोमंगलमाचरति ॥ नमइति ॥ शिवायमंगलप्रदायविशुद्धित्वरूपायेतिवाप्रधानपुरुषेशायप्रधानंप्रकृतिःपुरुषोनारायणस्तयो

श्रीगणेशायनमः ॥ श्रीसांबसदाशिवायनमः ॥ अथवायुसंहितायाउत्तरभागस्यारंभः ॥ नमःशिवायसोमायसगणायससूनवे ॥ प्रधानपुरुषेशायसर्गस्थित्यंतहेतवे ॥ १ ॥ शक्तिरप्रतिघायस्यऐश्वर्यंचापिसर्वगं ॥ स्वामित्वंचविभुत्वंचस्वभावंसंप्रक्षते ॥ २ ॥ तमजंविश्वकर्माणंशाश्वतंशिवमद्वयम् ॥ महादेवंमहात्मानंव्रजामिशरणंशिवं ॥ ३ ॥ धर्मक्षेत्रेमहातीर्थेगंगाकालिंदिसंगमे ॥ प्रयागेनैमिषारण्येब्रह्मलोकस्यवर्त्मनि ॥ ४ ॥ मुनयःसंशितात्मानःसत्यव्रतपरायणाः ॥ महौजसोमहाभागामहासत्रंवितेनिरे ॥ ५ ॥ तत्रसत्रंसमाकर्ण्यतेषामक्लिष्टकर्मणाम् ॥ साक्षात्सत्यवतीसूनोर्वेदव्यासस्यधीमतः ॥ ६ ॥ शिष्योमहात्मामेधावीत्रिषुलोकेषुविश्रुतः ॥ पंचावयवयुक्तस्यवाक्यस्यगुणदोषवित् ॥ ७ ॥ उत्तरोत्तरवक्ताचब्रुवतोपिबृहस्पतेः ॥ मधुरश्रवणानांचमनोज्ञपदपर्वणाम् ॥ ८ ॥ कथानांनिपुणोवक्ताकालविन्नयवित्कविः ॥ आजगामसतंदेशंसूतःपौराणिकोत्तमः ॥ ९ ॥ तंदृष्ट्वासूतमायातंमुनयोत्दृष्टमानसाः ॥ तस्मैसामचपूजांचयथावत्प्रत्यपादयन् ॥ १० ॥ प्रतिगृह्यसतांपूजांमुनिभिःप्रतिपादिताम् ॥ उद्दिष्टमासनंभेजेनियुक्तोयुक्तमात्मनः ॥ ११ ॥ ततस्तत्संगमादेवमुनीनांभावितात्मनाम् ॥ सोत्कंठमभवच्चित्तंश्रोतुंपौराणिकीःकथाः ॥ १२ ॥ तदातमनुकूलाभिर्वाग्भिःपूज्यमहर्षयः ॥ अतीवाभिमुखंकृत्वावचनंचेदमब्रुवन् ॥ १३ ॥

रीशाय ॥ १ ॥ अप्रतिघाअकुंठिताशक्तिःऐश्वर्यादिकंचयस्याशिवस्यस्वभावामित्यन्वयः ॥ २ ॥ ३ ॥ कालिंदीयमुना ॥ नैमिषारण्येनैमिषारण्यसमीपे तत्तुल्येवा ॥ ब्रह्मलोकस्यवर्त्मनिब्रह्मलोकस्यप्रापकेमार्गइत्यर्थः ॥ ४ ॥ मुनयःशौनकादयः ॥ ५ ॥ ६ ॥ पंचेति ॥ पंचावयवाःप्रतिज्ञाहेतूदाहरणोपनयनिगमनरूपास्तद्युक्तस्य ॥ ७ ॥ उत्तरेति ॥ अत्युत्तमवक्ताउत्कृष्टंयदुत्तरंतस्यवक्तेतिवा ॥ मनोज्ञपदपर्वणांमनोज्ञपदानिपर्वसुमध्येमध्येयासां ॥ ८ ॥ ॥ ९ ॥ सामसांत्वनं ॥ १० ॥ उद्दिष्टंदत्तं ॥ नियुक्तःप्रार्थितः ॥ ११ ॥ तत्संगमात्सूतसंगमात् ॥ १२ ॥ तंसूतं ॥ १३ ॥ ॥ ॥



Indira Gandhi National Centre for the Arts

भाग्यगौरवात् शुभकर्मबाहुल्यात् ॥ १४ ॥ रत्नानांकौस्तुभादीनां ॥ १५ ॥ १६ ॥ १७ ॥ अपवर्गफलैकांतंअपवर्गफलंमोक्षफलंएकंमुख्यमंतंय स्यतत् ॥ १८ ॥ १९ ॥ २० ॥ इतिचोदितःएतत्प्रकारेणपृष्टःविब्रूयांविशेषेणवदेयं ॥ २१ ॥ २२ ॥ ब्रह्मसंमितंवेदसंमितं ॥ २३ ॥ आगमार्थैर्वेदा

ऋषयऊचुः ॥ रोमहर्षणसर्वज्ञभवान्वैभाग्यगौरवात् ॥ पुराणविद्यामखिलांव्यासात्प्रत्यक्षमीयिवान् ॥ १४ ॥ त
स्मादाश्चर्यभूतानांकथानांत्वंहिभाजनं ॥ रत्नानामुरुसाराणांरत्नाकरइवार्णवः ॥ १५ ॥ यच्चभूतंचभव्यंचयच्चान्य
द्वस्तुवर्तते ॥ नतवाविदितंकिंचित्त्रिषुलोकेषुविद्यते ॥ १६ ॥ त्वमदृष्टवशादस्मद्दर्शनार्थमिहागतः ॥ अकुर्वन्किम
पिश्रेयोनवृथागंतुमर्हसि ॥ १७ ॥ तस्माच्छ्राव्यतमंपुण्यंसत्कथाज्ञानसंहितम् ॥ अपवर्गफलैकांतमनाचारबहि
ष्कृतम् ॥ १८ ॥ जगतःसृष्टिसंहारस्थितिहेतुप्रदर्शकं ॥ वेदांतसारसर्वस्वंपुराणंश्रावयाशुनः ॥ १९ ॥ एवमभ्य
र्थितःसूतोमुनिभिर्वेदवादिभिः ॥ श्लक्ष्णांचन्यायसंयुक्तांप्रत्युवाचशुभांगिरं ॥ २० ॥ सूतउवाच ॥ पूजितोनुगृहीत
श्चभवद्भिरितिचोदितः ॥ कस्मात्सम्यङ्नविब्रूयांपुराणमृषिपूजितम् ॥ २१ ॥ अभिवंद्यमहादेवंदेवींस्कंदंविनाय
कं ॥ नंदिनंचतथासाक्षाद्व्यासंसत्यवतीसुतम् ॥ २२ ॥ वक्ष्यामिपरमंपुण्यंपुराणंब्रह्मसंमितम् ॥ शिवज्ञानार्णवंसा
क्षाद्भुक्तिमुक्तिफलप्रदं ॥ २३ ॥ शब्दार्थन्यायसंयुक्तैरागमार्थैर्विभूषितम् ॥ श्वेतकल्पेप्रसंगेनवायुनाकथितंपुरा ॥
२४ ॥ विद्यास्थानानिसर्वाणिपुराणानुक्रमंतथा ॥ पुराणस्यास्यचोत्पत्तिंब्रुवतोमेनिबोधत ॥ २५ ॥ अंगानिवेदाश्च
त्वारोमीमांसान्यायविस्तरः ॥ एतद्वःकथितंसर्वंकृष्णस्याक्लिष्टकर्मणः ॥ २६ ॥ महर्षेर्ज्ञानलाभश्चपुत्रलाभश्चशंक
रात् ॥ यइदंकीर्तयेन्नित्यंशृणुयाच्छ्रावयेत्तथा ॥ २७ ॥ सविष्णोर्ज्ञानमासाद्यतेनैवसहमुच्यते ॥ २८ ॥ इतिश्री
शिवमहापुराणेवायवीयसंहितायामुत्तरभागेप्रथमोऽध्यायः ॥ १ ॥ ॥ ॥ ॥

र्थैः ॥ २४ ॥ अस्यशैवस्य ॥ २५ ॥ २६ ॥ महर्षेःउपमन्योःसकाशात् ॥ २७ ॥ मुच्यतइति ॥ मोदतइतिपाठांतरम् ॥ २८ ॥ इतिश्रीशिवमहापुराणे वायवीयसंहिताटीकायांसारबोधिन्यामुत्तरभागेसूतर्षिसंवादोनामप्रथमोऽध्यायः ॥ १ ॥ ॥ ॥ ॥

Indira Gandhi National Centre for the Arts

ओंनमःशिवाय ॥ उक्तंपाशुपतंज्ञानंश्रीकृष्णायोपमन्युना ॥ वायुनारब्धमाख्यातुंतद्द्वितीयेनिरूप्यते ॥१ ॥ १ ॥ २ ॥ सुरादीनामिति ॥ आदिशब्देनमनुष्यादयः ॥३॥४॥५॥ देवेनशिवेन ॥ अस्यशिवस्य ॥६॥७॥८॥९॥ मलेति ॥ मलमविद्या ॥१०॥ मायेति ॥ मायाकृतकर्मगुणाइत्यर्थः॥ ११॥ कथ्यंतइति ॥ विशेषेण

ऋषयऊचुः ॥ किंतत्पाशुपतंज्ञानंकथंपशुपतिःशिवः ॥ कथंधौम्याग्रजःपृष्टःकृष्णेनाद्भुतकर्मणा ॥१॥ वायुरुवाच ॥
पुरासाक्षान्महेशेनश्रीकंठाख्येनमंदरे ॥ देव्यैदेवेनकथितंज्ञानंपाशुपतंपरम् ॥ २ ॥ तदेवपृष्टंकृष्णेनविष्णुनावि
श्वयोनिना ॥ पशुत्वंचसुरादीनांपतित्वंचशिवस्यच ॥ ३ ॥ यथोपदिष्टंकृष्णायमुनिनाप्युपमन्युना ॥ तथासमासतो
वक्ष्येतच्छृणुध्वमतंद्रिताः ॥ ४ ॥ पुरोपमन्युमासीनंविष्णुःकृष्णवपुर्धरः ॥ प्रणिपत्ययथान्यायमिदंवचनमब्रवीत् ॥
॥ ५ ॥ श्रीकृष्णउवाच ॥ भगवन्छ्रोतुमिच्छामिदेव्यैदेवेनभाषितम् ॥ दिव्यंपाशुपतंज्ञानंविभूतिंचास्यकृत्स्नशः ॥
॥ ६ ॥ कथंपशुपतिर्देवःपशवःकेप्रकीर्तिताः ॥ कैःपाशैःस्तेनिबध्यंतेविमुच्यंतेचतेकथम् ॥ ७ ॥ इतिसंचोदितः
श्रीमानुपमन्युर्महामनाः ॥ प्रणम्यदेवंदेवींचप्राहपृष्टोयथातथा ॥ ८ ॥ उपमन्युरुवाच ॥ ब्रह्माद्याःस्थावरांताश्चदे
वदेवस्यशूलिनः ॥ पशवःपरिकीर्त्यंतेसंसारवशवर्तिनः ॥ ९ ॥ तेषांपतित्वाद्देवेशःशिवःपशुपतिःस्मृतः ॥ मलमा
यादिभिःपाशैःसबध्नातिपशून्पतिः ॥ १० ॥ सएवमोचकस्तेषांभक्तानांसमुपासितः ॥ चतुर्विंशतितत्त्वानिमायाक
र्मगुणाअमी ॥ ११ ॥ विषयाइतिकथ्यंतेपाशाजीवनिबंधनाः ॥ ब्रह्मादिस्तंबपर्यंतान्पशून्बध्वामहेश्वरः ॥१२ ॥
पाशैरेतैःपतिर्देवःकार्यंकारयतिस्वकम् ॥ तस्याज्ञयामहेशस्यप्रकृतिःपुरुषोचिताम् ॥ १३ ॥ बुद्धिंप्रसूतेसाबुद्धिरहं
कारमहंकृतिः ॥ इंद्रियाणिदशैकंचतन्मात्रापंचकंतथा ॥ १४ ॥ शासनाद्देवदेवस्यशिवस्यशिवदायिनः ॥ तन्मात्रा
ण्यपितस्यैवशासनेनमहीयसा ॥ १५ ॥ ॥ ॥ ॥

विविधंवाबध्नंतितेविषयाइत्यन्यर्थतयोच्यंतइत्यर्थः ॥ अतएवाह ॥ पाशाइति ॥ नन्वचेतनानांतेषांकथंबंधनसामर्थ्यमतआह ॥ ब्रह्मादीति ॥ १२ ॥ कथं
कारयतितदाह ॥ तस्येति ॥ पुरुषोचितांपुरुषभोगभोग्यां ॥ १३ ॥ अहंकारमिति ॥ प्रसूतइतिसंबध्यते ॥ एवमग्रेपि ॥ दशपूर्वोक्तानिज्ञानकर्मेंद्रिणि ॥ ए
कंमनः ॥ तन्मात्रापंचकंसूक्ष्मकलात्मकशब्दस्पर्शरूपरसगंधरूपं ॥ १४ ॥ १५ ॥ ॥ ॥



Indira Gandhi National Centre for the Arts

भावयंतिउत्पादयंति ॥ अनुपूर्वशःआकाशाद्यनुक्रमेण ॥ १६ ॥ बुध्यादेर्व्यापारमाह ॥ अध्यवस्यतीति ॥ निश्चयात्मकवृत्तिरूपाभवतीत्यर्थः ॥ अभिमन्यतेअहंकर्ताभोक्तास्मीत्याकारकोभवति ॥ १७ ॥ ज्ञानेंद्रियाणांव्यापारमाह ॥ श्रोत्रादीनिति ॥ आदिशब्देनत्वक्चक्षूरसनाघ्राणानि ॥ १८ ॥ कर्मेंद्रियाणांव्यापारमाह ॥ वागादीनीति ॥ आदिशब्देनपाणिपादपायूपस्थानि ॥ १९ ॥ विषयाणांव्यापारंक्रमेणाह ॥ शब्दादयइति ॥ आदिशब्देनस्पर्शरूपरस

महाभूतान्यशेषाणिभावयंत्यनुपूर्वशः ॥ब्रह्मादीनांतृणांतानांदेहिनांदेहसंगतिम् ॥१६॥ महाभूतान्यशेषाणिजनयंतिशिवाज्ञया ॥ अध्यवस्यतिवैबुद्धिरहंकारोभिमन्यते ॥१७॥ चित्तंचेतयतेचापिमनःसंकल्पयत्यपि ॥ श्रोत्रादीनिचगृण्हंतिशब्दादीन्विषयान्पृथक् ॥ १८ ॥ स्वानेवनान्यान्देवस्यदिव्येनाज्ञाबलेनवै ॥ वागादीन्यपियान्यासंस्तानिकर्मेंद्रियाणिच ॥ १९ ॥ यथास्वंकर्मकुर्वंतिनान्यत्किंचिच्छिवाज्ञया ॥ शब्दादयोपिगृह्यंतेक्रियंतेवचनादयः ॥ २० ॥ अविलंघ्याहिसर्वेषामाज्ञाशंभोर्गरीयसी ॥ अवकाशमशेषाणांभूतानांसंप्रयच्छति ॥ २१ ॥ आकाशःपरमेशस्यशासनादेवसर्वगः ॥ प्राणाद्यैश्चतथानामभेदैरंतर्बहिर्जगत् ॥ २२ ॥ बिभर्तिसर्वंशर्वस्यशासनेचप्रभंजनः ॥ हव्यंवहतिदेवानांकव्यंकव्याशिनामपि ॥ २३ ॥ पाकाद्यंचकरोत्यग्निःपरमेश्वरशासनात् ॥ संजीवनाद्यंसर्वस्यकुर्वंत्यापस्तदाज्ञया ॥ २४ ॥ विश्वंभराजगन्नित्यंधत्तेविश्वेश्वराज्ञया ॥ देवान्पात्यसुरान्हंतित्रिलोकमभिरक्षति ॥ ॥ २५ ॥ आज्ञयातस्यदेवेंद्रःसर्वैर्देवैरलंघ्यया ॥ जीवानांव्याधिभिःपीडांमृतानांचैवयातनाम् ॥२६॥ अधार्मिकाणांधर्मेशःकरोतिशिवशासनात् ॥ निर्ऋतिर्विधिहीनानांफलंहरतिकर्मणाम् ॥ २७ ॥ निशाचराधिपत्यंचकुरुतेशंकराज्ञया ॥ आधिपत्यमपांनित्यंकुरुतेवरुणोमुने ॥ २८ ॥ पाशैर्बध्नातिवध्यांश्चपरमेश्वरशासनात् ॥ ददातिनित्यंयक्षेंद्रोद्रविणंद्रविणेश्वरः ॥ २९ ॥ ॥ ॥ ॥ ॥

गंधाः ॥ वचनादयइति ॥ वचनंभाषणं ॥ आदिशब्देनादानादिचलनमलमूत्रोत्सर्गाः ॥ २० ॥ सर्वेषांप्रकृत्यादीनां ॥ २१ ॥ प्राणाद्यैःआद्यशब्देनअपानव्यानोदानसमानाः ॥ २२ ॥ प्रभंजनःवायुःप्राणाद्यैर्भेदैर्जगद्बिभर्तीतिपूर्वेणान्वयः ॥ कव्याशिनांपितॄणाम् ॥ २३ ॥ २४ ॥ विश्वंभरापृथिवी ॥ २५ ॥ ॥ २६ ॥ धर्मेशःधर्मराजः ॥ निर्ऋतीराक्षसः ॥ २७ ॥ २८ ॥ यक्षेंद्रःकुबेरः ॥ द्रविणंधनं ॥ २९ ॥ ॥ ॥

Indira Gandhi National Centre for the Arts

ननुकुबेरःसर्वेभ्यःकथंबहुधनंनददातीत्यतआह ॥ पुण्येति ॥ ३० ॥ ३१ ॥ अंतकरीमिति ॥ प्राणिलयकारिणींहरेर्मूर्तिमित्यर्थः ॥ ३२ ॥ पातीति ॥ चतुराननइतिसंबध्यते ॥ ३३ ॥ सृजतइति ॥ विष्णुरितिसंबध्यते ॥ ३४ ॥ रक्षतीति ॥ अनेनत्रयाणामपित्रिषुकार्येषुपरस्परसाहाय्यंदर्शितम् ॥ मुख्यगौणभावस्तुशिवप्रेरितकालकृतएवेतिव्यक्तीकृत्याह ॥ कालइति ॥ ३५ ॥ आदिशन्अतिसृजन् ॥ ३६ ॥ ३७ ॥ ३८ ॥ ३९ ॥ ४० ॥ ४१ ॥



पुण्यानुरूपंभूतेभ्यःपुरुषस्यानुशासनात् ॥ करोतिसंपदःशश्वज्ज्ञानंचैवसुमेधसाम् ॥ ३० ॥ निग्रहंचाप्यसाधूनामीशानःशिवशासनात् ॥ धत्तेतुधरणींमूर्ध्नाशेषःशिवनियोगतः ॥ ३१ ॥ यामाहुस्तामसींरौद्रींमूर्तिमंतकरींहरेः ॥ सृजत्यशेषमीशस्यशासनाच्चतुराननः ॥ ३२ ॥ तिसृभिर्मूर्तिभिःस्वाभिःपातिचांतेनिहंतिच ॥ विष्णुःपालयतेविश्वंविश्वेश्वरनियोगतः ॥ ३३ ॥ सृजतेग्रसतेचापिस्वकाभिस्तनुभिस्तथा ॥ हरत्यंतेजगत्सर्वंहरस्तस्यैवशासनात् ॥ ३४ ॥ सृजत्यपिचविश्वात्मात्रिधाभिन्नस्तुरक्षति ॥ कालःकरोतिसकलंकालःसंहरतिप्रजाः ॥ ३५ ॥ कालःपालयतेविश्वंकालकालस्यशासनात् ॥ त्रिभिरंशैर्जगद्बिभ्रत्तेजोभिर्वृष्टिमादिशन् ॥ ३६ ॥ दिविवर्षत्यसौभानुर्देवदेवस्यशासनात् ॥ पुष्णात्योषधिजातानिभूतानिल्हादयत्यपि ॥ ३७ ॥ देवैश्चपीयतेचंद्रश्चंद्रभूषणशासनात् ॥ आदित्यावसवोरुद्राअश्विनौमरुतस्तथा ॥ ३८ ॥ खेचराऋषयःसिद्धाभोगिनोमनुजामृगाः ॥ पशवःपक्षिणश्चैवकीटाद्याःस्थावराणिच ॥ ३९ ॥ नद्यःसमुद्रागिरयःकाननानिसरांसिच ॥ वेदाःसांगाश्चशास्त्राणिमंत्राःस्तोममखादयः ॥ ॥४०॥ कालाग्न्यादिशिवांतानिभुवनानिसहाधिपैः ॥ ब्रह्मांडान्यप्यसंख्यानितेषामावरणानिच ॥४१॥ वर्तमानान्यतीतानिभविष्यंत्यपिकृत्स्नशः ॥ दिशश्चविदिशश्चैवकालभेदाःकलादयः ॥ ४२ ॥ यच्चकिंचिज्जगत्यस्मिन्दृश्यतेश्रूयतेपिवा ॥ तत्सर्वंशंकरस्याज्ञाबलेनसमधिष्ठितम् ॥ ४३ ॥ आज्ञाबलात्तस्यधरास्थितेहधराधरावारिधराःसमुद्राः ॥ ज्योतिर्गणाःशक्रमुखाश्चदेवाःस्थिरंचरंवाचिदचिद्यदस्ति ॥ ४४ ॥ इतिश्रीशिवमहापुराणवायवीयसंहितायामुत्तरभागेद्वितीयोऽध्यायः ॥ २ ॥ ॥ ॥ ॥ ॥

कलादयःआदिशब्देनकाष्ठामुहूर्तप्रभृतयः ॥ ४२ ॥ ४३ ॥ धराधराःपर्वताः ॥ इहअस्मिन्ब्रह्मांडे ॥ चिच्चेतनंअचिज्जडं ॥ ४४ ॥ इतिश्रीशैवमहापुराणेवायवीयसंहिताटीकायांसारबोधिन्यामुत्तरभागेपाशुपतज्ञाननिरूपणंनामद्वितीयोऽध्यायः ॥ २ ॥ ॥ ॥



Indira Gandhi National Centre for the Arts

ऒंनमःशिवाय ॥ ईश्वराज्ञाबलात्सर्वंनिश्चितंचेष्टतेजगत् ॥ एतत्कथाप्रसंगेनसुरेंद्राद्याःपरीक्षिताः ॥ १ ॥ हृतदैत्यश्रियोप्येतेपरंबहुतृणीकृताः ॥ ईश्वरेणै
तदाख्यानंतृतीयेत्रनिरूप्यते ॥ २ ॥ श्रुतिमुखेवेदादौ ॥१॥ इत्युतेति ॥ अनेनप्रकारेणविबदंतआसन्नित्यर्थः ॥ २ ॥ अवरवेषधृक् निकृष्टवेषधारी॥स्वल
क्षणैःईश्वरलक्षणैः ॥ ३ ॥ ४ ॥ एनंयक्षं ॥ ५ ॥ शक्यतेस्म ॥ तेनेतिशेषः ॥ यथायद्यपि ॥ ६ ॥ तत्तृणरूपं ॥ पपातेति ॥ इंद्रवज्रंपतितमित्यर्थः ॥ ७ ॥

उपमन्युरुवाच ॥ अत्याश्चर्यमिदंकृष्णशंभोरमितकर्मणः ॥ आज्ञाकृतंशृणुष्वैतच्छ्रुतंश्रुतिमुखेमया ॥ १ ॥ पुराकि
लसुराःसेंद्राविवदंतःपरस्परम् ॥ असुरान्समरेजित्वाजेताहमहमित्युत ॥ २ ॥ तदामहेश्वरस्तेषांमध्यतोवरवेष
धृक् ॥ स्वलक्षणैर्विहीनांगःस्वयंयक्षइवाभवत् ॥ ३ ॥ सतानाहसुरानेकंतृणमादायभूतले ॥ यएतद्विकृतंकर्तुंक्षमेत
सतुदैत्यजित् ॥ ४ ॥ यक्षस्यवचनंश्रुत्वावज्रपाणिःशचीपतिः ॥ किंचित्क्रुद्धोविहस्यैनंतृणमादातुमुद्यतः ॥ ५ ॥ नत
तृणमुपादातुंमनसापिचशक्यते ॥ यथातथापितच्छेत्तुंवज्रंवज्रधरोसृजत् ॥ ६ ॥ तद्वज्रंनिजवज्रेणसंसृष्टमिवसर्व
तः ॥ तृणेनाभिहतंतेनतिर्यगग्रेपपातह ॥ ७ ॥ ततस्तथान्येसुसंरब्धालोकपालामहाबलाः ॥ ससृजुस्तृणमुद्दिश्य
स्वायुधानिसहस्रशः ॥ ८ ॥ प्रजज्वालमहावन्हिःप्रचंडःपवनोववौ ॥ प्रवृद्धोपांपतिर्यद्वत्प्रलयेसमुपस्थिते ॥ ९ ॥
एवंदेवैःसमारब्धंतृणमुद्दिश्ययत्नतः ॥ व्यर्थमासीदहोकृष्णयक्षस्याज्ञाबलेनवै ॥ १० ॥ तदाहयक्षंदेवेंद्रःकोभवा
नित्यमर्षितः ॥ ततःसपश्यतामेवतेषामंतरधीयत ॥ ११ ॥ तदंतरेहैमवतीदेवीदिव्यविभूषणा ॥ आविरासीन्नभो
रंगेशोभमानाशुचिस्मिता ॥ १२ ॥ तांदृष्ट्वाविस्मयाविष्टादेवाःशक्रपुरोगमाः ॥ प्रणम्ययक्षंपप्रच्छुःकोसौयक्षोवि
लक्षणः ॥ १३ ॥ साब्रवीत्सस्मितंदेवीसयुष्माकमगोचरः ॥ तेनेदंभ्राम्यतेचक्रंसंसाराख्यंचराचरम् ॥ १४ ॥ ते
नादौक्रियतेविश्वंतेनसंह्रियतेपुनः ॥ नतस्यनियमःकश्चित्तेनसर्वंनियम्यते ॥ १५ ॥ इत्युक्त्वासामहादेवीतत्रैवांतर
धीयत ॥ देवाश्चविस्मिताःसर्वेतांप्रणम्यादिवंययुः ॥ १६ ॥ ॥ ॥

अन्येअग्न्यादयः ॥ ८ ॥ अपांपतिःवरुणः ॥ ९ ॥ १० ॥ सःयक्षः ॥ पश्यतामिति ॥ अनादरेषष्ठी ॥ ११ ॥ तदंतरेतदा ॥ हैमवतीहिरण्मयी ॥ हिमाल
यपुत्रीवा ॥ १२ ॥ यक्षमिति ॥ यक्षविषयेइतितात्पर्यम् ॥ १३ ॥ तेनयक्षेण ॥ १४ ॥ १५ ॥ १६ ॥ ॥ ॥

इतिश्रीशिवमहापुराणेवायवीयसंहिताटीकायांसारबोधिन्यामुत्तरभागेईश्वराज्ञावलवर्णनंनामतृतीयोऽध्यायः ॥ ३॥ ओंनमःशिवाय ॥ शिवस्यमूर्तयःसर्वाब्र
ह्मविष्णुहरादयः ॥ ईशानपुरुषाद्याश्चवर्ण्यंतेत्रतुरीयके ॥ १ ॥ ततंव्याप्तं ॥ मूर्त्यात्मभिःमूर्तिस्वरूपैः ॥ १ ॥ २ ॥ ३ ॥ ब्रह्मसमाव्हयाःब्रह्मरूपत्वाद्ब्रह्मा
ख्याः ॥ ४ ॥ मूर्तीराह ॥ ईशानइति ॥ ५ ॥ मूर्तीनांशक्तिमाह ॥ ईशानेति ॥ प्रकृतेःभोक्तारंक्षेत्रज्ञमात्मानंसाक्षादधितिष्ठतीत्यर्थः ॥ ६ ॥

इतिश्रीशिवमहापुराणेवायवीयसंहितायामुत्तरभागेतृतीयोऽध्यायः ॥३॥ उपमन्युरुवाच॥ शृणुकृष्णमहेशस्यशिव
स्यपरमात्मनः ॥मूर्त्यात्मभिस्ततंकृत्स्नंजगदेतच्चराचरं ॥१ ॥ सशिवःसर्वमेवेदंस्वकीयाभिश्चमूर्तिभिः ॥ अधितिष्ठत्य
मेयात्मायत्तत्सर्वंततःस्मृतः ॥ २ ॥ ब्रह्माविष्णुस्तथारुद्रोमहेशानःसदाशिवः ॥ मूर्तयस्तस्यविज्ञेयायाभिर्विश्वमि
दंततं ॥ ३ ॥ अथान्याश्चापितनवःपंचब्रह्मसमाव्हयाः ॥ तनुभिस्ताभिरव्याप्तमिहकिंचिन्नविद्यते ॥ ४॥ ईशानः
पुरुषोघोरोवामःसद्यस्तथैवच ॥ ब्रह्मण्येतानिदेवस्यमूर्तयःपंचविश्रुताः ॥ ५ ॥ ईशानाख्यातुयातस्यमूर्तिराद्याग
रीयसी ॥ भोक्तारंप्रकृतेःसाक्षात्क्षेत्रज्ञमधितिष्ठति ॥ ६ ॥ स्थाणोस्तत्पुरुषाख्यायामूर्तिर्मूर्तिमतःप्रभोः ॥ गुणाश्र
यात्मकंभोग्यमव्यक्तमधितिष्ठति ॥ ७ ॥ धर्माद्यष्टांगसंयुक्तंबुद्धितत्त्वंपिनाकिनः ॥ अधितिष्ठतिघोराख्यामूर्तिरत्यं
तपूजिता ॥ ८ ॥ वामदेवाव्हयामूर्तिर्महादेवस्यवेधसः ॥ अहंकृतेरधिष्ठात्रीमाहुरागमवेदिनः ॥ ९ ॥ सद्योजाता
व्हयामूर्तिःशंभोरमितवर्चसः ॥ मनसःसमधिष्ठात्रींमतिमंतःप्रचक्षते ॥ १० ॥ श्रोत्रस्यवाचःशब्दस्यविभोर्व्योम्न
स्तथैवच ॥ ईश्वरीमीश्वरस्यैवतामीशाख्यांविदुर्बुधाः ॥ ११ ॥ त्वक्पाणिस्पर्शवायूनामीश्वरींमूर्तिमैश्वरीम् ॥ पुरु
षाख्यांविदुःसर्वेपुराणार्थविशारदाः ॥ १२ ॥ चक्षुषश्चरणस्यापिरूपस्याग्नेस्तथैवच ॥ अघोराख्यामधिष्ठात्रींमू
र्तिमाहुर्मनीषिणः ॥ १३ ॥ रसनायाश्चपायोश्चरसस्यापांतथैवच ॥ ईश्वरींवामदेवाख्यांमूर्तितन्निरताविदुः ॥१४॥
घ्राणस्यचैवोपस्थस्यगंधस्यचभुवस्तथा ॥ सद्योजाताव्हयांमूर्तिमीश्वरींसंप्रचक्षते ॥ १५ ॥ मूर्तयःपंचदेवस्यवंद
नीयाःप्रयत्नतः ॥ श्रेयोर्थिभिर्नरैर्नित्यंश्रेयसामेवहेतवः ॥ १६ ॥ ॥ ॥ ॥

स्थाणोःशिवस्य ॥ गुणाश्रयात्मकंसत्त्वादिगुणवत् ॥ अव्यक्तंप्रकृतिम् ॥ तृतीयमूर्तेःशक्तिमाह ॥ धर्माद्येति ॥ धर्मादीनामष्टांगंवक्ष्यते ॥ ८ ॥ ९ ॥ १० ॥
॥ ११ ॥ १२ ॥ १३ ॥ १४ ॥ १५ ॥ एतदुपासनाफलमाह ॥ मूर्तयइति ॥ हेतवइति ॥ यतइतिशेषः ॥ १६ ॥ ॥ ॥



Indira Gandhi National Centre for the Arts

तस्मिन्मूर्त्यष्टके ॥ १७ ॥ मूर्त्यभिमानिदेवतानामान्याह ॥ शर्वइति ॥ १८ ॥ १९ ॥ विश्वंभरात्मिकापृथिवीरूपा ॥ २० ॥ २१ ॥ २२ ॥ २३ ॥ २४ ॥ २५ ॥ २६ ॥ २७ ॥ व्यापिकेति ॥ इतरमूर्तीनामात्मनोष्टमीमूर्तिर्व्यापिकेत्यन्वयः ॥ २८ ॥ २९ ॥ ३० ॥ ईश्वरस्यस्वभक्तेपुत्रवत्प्रीति

तस्यदेवाधिदेवस्यमूर्त्यष्टकमयंजगत् ॥ तस्मिन्व्याप्यस्थितंविश्वंसूत्रेमणिगणाइव ॥ १७ ॥ शर्वोभवस्तथारुद्रउग्रोभीमःपशोःपतिः ॥ ईशानश्चमहादेवोमूर्तयश्चाष्टविश्रुताः ॥ १८ ॥ भूम्यंभोग्निमरुद्व्योमक्षेत्रज्ञार्कनिशाकराः ॥ अधिष्ठितामहेशस्यशर्वाद्यैरष्टमूर्तिभिः ॥ १९ ॥ चराचरात्मकंविश्वंधत्तेविश्वंभरात्मिका ॥ शार्वीशर्वाव्हयामूर्तिरिति शास्त्रस्यनिश्चयः ॥ २० ॥ संजीवनंसमस्तस्यजगतःसलिलात्मकम् ॥ भवइत्युच्यतेमूर्तिर्भवस्यपरमात्मनः ॥ २१ ॥ बहिरंतर्जगद्विश्वंव्याप्यतेजोमयीशुभा ॥ रौद्रीरुद्राव्हयामूर्तिरास्थिताघोररूपिणी ॥ २२ ॥ स्पंदयन्पवनोविश्वं बिभर्तिस्पंदतेस्वयम् ॥ उग्रइत्युच्यतेसद्भिर्मूर्तिरुग्रस्यवेधसः ॥ २३ ॥ सर्वावकाशदासर्वव्यापिकागगनात्मिका ॥ मूर्तिर्भीमस्यभीमाख्याभूतवृंदस्यभेदिका ॥ २४ ॥ सर्वात्मनामधिष्ठात्रीसर्वक्षेत्रनिवासिनाम् ॥ मूर्तिःपशुपतेर्ज्ञेया पशुपाशनिकृंतनी ॥ २५ ॥ दीपयंतीजगत्सर्वंदिवाकरसमाव्हया ॥ ईशानाख्यामहेशस्यमूर्तिर्दिविविसर्पति ॥ २६ ॥ आप्याययतियोविश्वममृतांशुर्निशाकरः ॥ महादेवस्यसामूर्तिर्महादेवसमाव्हया ॥ २७ ॥ आत्मनश्चाष्टमीमूर्तिः शिवस्यपरमात्मनः ॥ व्यापिकेतरमूर्तीनांविश्वंतस्माच्छिवात्मकम् ॥ २८ ॥ वृक्षमूलस्यसेकेनशाखाःपुष्यंतिवैयथा ॥ शिवस्यपूजयातद्वत्पुष्यत्यस्यवपुर्जगत् ॥ २९ ॥ सर्वाभयप्रधानंचसर्वानुग्रहणंतथा ॥ सर्वोपकारकरणंशिवस्याराधनंविदुः ॥ ३० ॥ यथेहपुत्रपौत्रादेःप्रीत्याप्रीतोभवेत्पिता ॥ तथासर्वस्यसंप्रीत्याप्रीतोभवतिशंकरः ॥ ३१ ॥ देहिनोयस्यकस्यापिक्रियतेयदिनिग्रहः ॥ अनिष्टमष्टमूर्तेस्तत्कृतमेवनसंशयः ॥ ३२ ॥ अष्टमूर्त्यात्मनाविश्वमधिष्ठायस्थितंशिवम् ॥ भजस्वसर्वभावेनरुद्रंपरमकारणम् ॥ ३३ ॥ इतिश्रीशिवमहापुराणेवायवीयसंहितायामुत्तरभागेचतुर्थोऽध्यायः ॥ ४ ॥

भवतीत्याह ॥ यथेति ॥ ३१ ॥ अतएवपरनिग्रहःकदापिनकर्तव्यइत्याह ॥ देहिनइति ॥ ३२ ॥ एवंशिवतत्त्वमुक्त्वाशिवभक्तिरेवमुख्यंसाधनमित्युपदिशति ॥ अष्टमूर्तीति ॥ ३३ ॥ इतिश्रीशैवमहापुराणेवायवीयसंहिताटीकायांसारबोधिन्यामुत्तरभागेशिवतत्त्वकथनंनामचतुर्थोऽध्यायः ॥ ४ ॥

Indira Gandhi National Centre for the Arts

ओंनमःशिवाय ॥ उमामहेश्वराभ्यांयत्स्त्रीपुंभावात्मकंजगत ॥ विस्तृतंकथमित्येतत्पंचमेत्रनिरूप्यते ॥ १ ॥ १ ॥ इदंजगत् ॥ २ ॥ विभूतिमैश्वर्यम् ॥
भवेनाशिवेन ॥ ३ ॥ ४ ॥ अचिद्रूपंजडं ॥ चिदात्मकंचेतनस्वरूपं ॥५॥ अशुद्धमाह॥यदिति॥समन्वितंसंसृष्टम् ॥ इतरत्अचिदसंसृष्टंचिच्चक्रम् ॥ ६ ॥

श्रीकृष्णउवाच ॥ भगवन्परमेशस्यसर्वस्यामिततेजसः ॥ मूर्तिभिर्विश्वमेवेदंयथाव्याप्तंतथाश्रुतम् ॥ १ ॥ अथैत
ज्ज्ञातुमिच्छामियाथात्म्यंपरमेशयोः ॥ स्त्रीपुंभावात्मकंचेदंताभ्यांकथमधिष्ठितम् ॥२॥ उपमन्युरुवाच ॥ श्रीमद्वि
भूतिंशिवयोर्याथात्म्यंचसमासतः ॥ वक्ष्येतद्विस्तराद्वक्तुंभवेनापिनशक्यते ॥ ३ ॥ शक्तिःसाक्षान्महादेवीमहादेवः
सशक्तिमान् ॥ तयोर्विभूतिलेशोवैसर्वमेतच्चराचरम् ॥ ४ ॥ वस्तुकिंचिदचिद्रूपंकिंचिद्वस्तुचिदात्मकम् ॥ द्वयंशुद्ध
मशुद्धंचपरंचापरमेवच ॥ ५ ॥ यत्संसरतिचिच्चक्रमचिच्चक्रसमन्वितम् ॥ तदेवाशुद्धमपरमितरत्तुपरंशुभम् ॥ ६ ॥
अपरंचपरंचैवद्वयंचिदचिदात्मकं ॥ शिवस्यचशिवायाश्चस्वात्म्यंचैतत्स्वभावतः ॥ ७ ॥ शिवयोर्वैवशेविश्वंनविश्व
स्यवशेशिवौ ॥ ईशितव्यमिदंयस्मात्तस्माद्विश्वेश्वरौशिवौ ॥ ८ ॥ यथाशिवस्तथादेवीयथादेवीतथाशिवः ॥ नान
योरंतरंविद्याच्चंद्रचंद्रिकयोरिव ॥९॥ चंद्रोनखलुभात्येषयथाचंद्रिकयाविना ॥ नभातिविद्यमानोपितथाशक्त्यावि
नाशिवः ॥ १० ॥ प्रभयाहिविनायद्वद्भानुरेषनविद्यते ॥ प्रभाचभानुनातेनसुतरांतदपाश्रया ॥ ११ ॥ एवंपरस्प
रापेक्षाशक्तिशक्तिमतोःस्थितिः ॥ नशिवेनविनाशक्तिर्नशक्त्याचविनाशिवः ॥ १२ ॥ शक्तोयययाशिवोनित्यंभुक्तौमु
क्तौचदेहिनाम् ॥ आद्यासैकापराशक्तिश्चिन्मयीशिवसंश्रया ॥ १३ ॥ यामाहुरखिलेशस्यतैस्तैरनुगुणैर्गुणैः ॥ समा
नधर्मिणीमेवशिवस्यपरमात्मनः ॥ १४ ॥ सैकापराचचिद्रूपाशक्तिःप्रसवधर्मिणी ॥ विभज्यबहुधाविश्वंविदधाति
शिवेच्छया ॥ १५ ॥ सामूलप्रकृतिर्मायात्रिगुणात्रिविधास्मृता ॥ शिवयाचविपर्यस्तंययाततमिदंजगत् ॥ १६ ॥
एकधाचद्विधाचैवतथाशतसहस्रधा ॥ शक्तयःखलुभिद्यंतेबहुधाव्यवहारतः ॥१७॥ शिवेच्छयापराशक्तिःशिवतत्त्वै
कतांगता ॥ ततःपरिस्फुरत्यादौसर्गेतैलंतिलादिव ॥ १८ ॥ ॥ ॥ ॥

स्वात्म्यंतादात्म्यं ॥ ७ ॥ शिवयोरुमामहेश्वरयोः ॥ ८ ॥ अंतरंभेदं ॥ ९ ॥ १० ॥ तदपाश्रयातद्रहितानेत्यर्थः ॥ ११ ॥ १२ ॥ ययाशक्त्या ॥ १३ ॥
॥ १४ ॥ १५ ॥ ययाशिवयाशिवरूपया ॥ १६ ॥ १७ ॥ १८ ॥ ॥ ॥ ॥



Indira Gandhi National Centre for the Arts

शक्तिकृतंसर्गक्रममाह ॥ ततइति ॥ तस्यांक्रियाशक्तौ ॥ १९ ॥ २० ॥ २१ ॥ वर्णस्वरूपेणअआइत्यादिरूपेण ॥ विजृंभतेप्रसरति ॥ नियतिंदेवं ॥

ततःक्रियाख्ययाशक्त्याशक्तौशक्तिमदुत्थया ॥ तस्यांविक्षोभ्यमाणायामादौनादःसमुद्बभौ ॥ १९ ॥ नादाद्विनिःसृ
तोबिंदुर्बिंदोर्देवःसदाशिवः ॥ तस्मान्महेश्वरोजातःशुद्धाविद्यामहेश्वरात् ॥ २० ॥ सावाचामीश्वरीशक्तिर्वागीशा
ख्याहिशूलिनः ॥ यासावर्णस्वरूपेणमातृकेतिविजृंभते ॥ २१ ॥ अथानंतसमावेशान्मायाकालमवासृजत् ॥ नि
यतिंचकलांविद्यांकलातोरागपूरुषौ ॥२२॥ मायातःपुनरेवाभूदव्यक्तंत्रिगुणात्मकं॥ त्रिगुणाच्चततोऽव्यक्ताद्विभक्ताः
स्युस्त्रयोगुणाः ॥ २३ ॥ सत्वंरजस्तमश्चेतियैर्व्याप्तमखिलंजगत् ॥ गुणेभ्यःक्षोभ्यमाणेभ्योगुणेशाख्यास्त्रिमूर्तयः
॥ २४ ॥ अभवन्महदादीनितत्वानिचयथाक्रमम् ॥ तेभ्यःस्युरंडपिंडानित्वसंख्यानिशिवाज्ञया ॥ २५ ॥ अधिष्ठि
तान्यनंताद्यैर्विद्येशैश्चक्रवर्तिभिः ॥ शरीरांतरभेदेनशक्तेर्भेदाःप्रकीर्तिताः ॥२६॥ नानारूपास्तुविज्ञेयाःस्थूलसूक्ष्म
विभेदतः ॥ रुद्रस्यरौद्रीसाशक्तिर्विष्णोर्वैवैष्णवीमता ॥ २७ ॥ ब्रह्माणीब्रह्मणःप्रोक्ताइंद्रस्यैंद्रीतिकथ्यते ॥ किमत्र
बहुनोक्तेनयद्विश्वमितिकीर्तितम् ॥ २८ ॥ शक्त्यात्मनैवतद्व्याप्तंयथादेहोंतरात्मना ॥ तस्माच्छक्तिमयंसर्वंजगत्स्था
वरजंगमं ॥ २९ ॥ कलयापरमाशक्तिःकथितापरमात्मनः ॥ एवमेषापराशक्तिरीश्वरेच्छानुयायिनी ॥ ३० ॥ स्थि
रंचरंचयद्विश्वंसृजतीतिविनिश्चयः ॥ ज्ञानक्रियाचिकीर्षाभिस्तिसृभिःस्वात्मशक्तिभिः ॥ ३१ ॥ शक्तिमानीश्वरःश
श्वद्विश्वंव्याप्याधितिष्ठति ॥ इदमित्थमिदंनेत्थंभवेदित्येवमात्मिका॥३२॥ इच्छाशक्तिर्महेशस्यनित्याकार्यनियामि
का ॥ ज्ञानशक्तिस्तुतत्कार्यंकारणंकरणंतथा ॥३३॥ प्रयोजनंचतत्त्वेनबुद्धिरूपाध्यवस्यति ॥ यथेप्सितंक्रियाशक्तिर्य
थाध्यवसितंजगत्॥३४॥कल्पयत्यखिलंकार्यंक्षणात्संकल्परूपिणी॥यथाशक्तित्रयोत्थानंशक्तिःप्रसवधर्मिणी॥३५॥

रागोभिलाषः ॥ २१ ॥ २२ ॥ २३ ॥ २४ ॥ २५ ॥ २६ ॥ २७ ॥ २८ ॥ २९ ॥ कलयाअंशेन ॥ ३० ॥ एवंक्रियाशक्तेर्व्यापारमुक्त्वाइच्छा
शक्तिव्यापारमाह ॥ इदमिति ॥ ३१ ॥ ३२ ॥ ज्ञानशक्तिमाह ॥ तदिति ॥ तत्कार्यमिच्छाशक्तिकार्यं ॥ ३३ ॥ ३४ ॥ ३५ ॥

Indira Gandhi National Centre for the Arts

शक्त्यापरमयानुन्नाप्रसूतेसकलंजगत् ॥ एवंशक्तिसमायोगाच्छक्तिमानुच्यतेशिवः ॥ ३६ ॥ शक्तिशक्तिमदुत्थंतुशा
क्तंशैवमिदंजगत् ॥ यथानजायतेपुत्रःपितरंमातरंविना ॥ ३७॥ तथाभवंभवानींचविनानैतच्चराचरं ॥ स्त्रीपुंसप्रभ
वंविश्वंस्त्रीपुंसात्मकमेवच ॥ ३८ ॥ स्त्रीपुंसयोर्विभूतिश्चस्त्रीपुंसाभ्यामधिष्ठितम् ॥ परमात्माशिवःप्रोक्तःशिवासाचप्र
कीर्तिता ॥३९॥शिवःसदाशिवःप्रोक्तःशिवासाचमनोन्मनी ॥ शिवोमहेश्वरोज्ञेयःशिवामायेतिकथ्यते ॥ ४०॥ पुरुषः
परमेशानःप्रकृतिःपरमेश्वरी ॥ रुद्रोमहेश्वरःसाक्षाद्रुद्राणीरुद्रवल्लभा ॥ ४१ ॥ विष्णुर्विश्वेश्वरोदेवोलक्ष्मीर्विश्वेश्व
रप्रिया ॥ ब्रह्माब्रह्मशिरोहर्ताब्रह्माणीब्रह्मणःप्रिया ॥ ४२ ॥ भास्करोभगवान्शंभुःप्रभाभगवतीशिवा ॥ महेंद्रो
मन्मथारातिःशर्चीशैलेंद्रकन्यका ॥ ४३ ॥ जातवेदामहादेवःस्वाहाशर्वार्द्धदेहिनी ॥ यमस्त्रियंबकोदेवस्तत्प्रियागि
रिकन्यका ॥ ४४ ॥ निर्ऋतिर्भगवानीशोनिर्ऋतिर्नगनंदिनी ॥ वरुणोभगवान्रुद्रोगौरीगिरिवरात्मजा ॥४५॥ बा
लेंदुशेखरोवायुःशिवाशिवमनोहरा ॥ यक्षोयज्ञशिरोहर्ताऋद्धिर्हिमगिरिप्रजा ॥ ४६ ॥ चंद्रार्धशेखरश्चंद्रोरोहि
णीरुद्रवल्लभा ॥ ईशानःपरमेशानस्तदार्यापरमेश्वरी ॥ ४७ ॥ अनंतवलयोनंतोह्यनंतानंतवल्लभा ॥ कालाग्निरु
द्रकालारिःकालीकालांतकप्रिया ॥ ४८ ॥ पुरुषाख्योमनुःशंभुःशतरूपाशिवप्रिया ॥ दक्षःसाक्षान्महादेवःप्रसूतिः
परमेश्वरी ॥ ४९ ॥ रुचिर्भवोभवानीचबुधैराकूतिरुच्यते ॥ भृगुर्भगाक्षहादेवःख्यातिस्त्रिनयनप्रिया ॥ ५० ॥ म
रीचिर्भगवान्रुद्रःसंभूतिःशर्ववल्लभा ॥ गंगाधरोंगिराज्ञेयःस्मृतिःसाक्षादुमास्मृता ॥ ५१ ॥ पुलस्त्यःशशभृन्मौ
लिःप्रीतिःकांतापिनाकिनः ॥ पुलहस्त्रिपुरध्वंसीतत्प्रियातुशिवप्रिया ॥ ५२ ॥ क्रतुध्वंसीक्रतुःप्रोक्तासंनतिर्दयिताविभोः ॥ त्रिनेत्रोऽत्रिरुमासाक्षादनसूयास्मृताबुधैः ॥ ५३ ॥ ॥ ॥ ॥ ॥६॥



Indira Gandhi National Centre for the Arts

देवमाताअदितिः ॥ ५४ ॥ एवंमहतांशिवतादात्म्यमुक्त्वासर्ववस्तुसाधारण्येनतदाह ॥ शंकरइत्यादिना ॥ तयोरेवाशिवयोरेव ॥ ५५ ॥ विषयीभोक्ताविषयो भोगसाधनंवस्तुमात्रं ॥ तदेवविशिष्याह ॥ श्राव्यमित्यादिना ॥ ५६ ॥ बालेति ॥ बालचंद्रोवतंसःशिरोभूषणंयस्यसः ॥ ५७ ॥ ५८ ॥ रसयितारसस्य

कश्यपःकालहादेवोदेवमातामहेश्वरी ॥ वसिष्ठोमन्मथारातिर्देवीसाक्षादरुंधती ॥ ५४ ॥ शंकरःपुरुषाःसर्वेस्त्रियः सर्वामहेश्वरी ॥ सर्वेस्त्रीपुरुषास्तस्मात्तयोरेवविभूतयः ॥ ५५ ॥ विषयीभगवानीशोविषयःपरमेश्वरी ॥ श्राव्यंसर्वमुमारूपंश्रोताशूलवरायुधः ॥ ५६ ॥ स्प्रष्टव्यंवस्तुजातंतुधत्तेशंकरवल्लभा ॥ स्प्रष्टासएवविश्वात्माबालचंद्रावतंसकः ॥ ५७ ॥ द्रष्टव्यंवस्तुरूपंतुबिभर्तिभववल्लभा ॥ द्रष्टाविश्वेश्वरोदेवःशशिखंडशिखामणिः ॥ ५८ ॥ रसजातंमहादेवीदेवोरसयिताशिवः ॥ प्रियजातंचगिरिजाप्रीतश्चैवगराशनः ॥ ५९ ॥ मंतव्यवस्तुतांधत्तेमहादेवीमहेश्वरी ॥ मंतासएवविश्वात्मामहादेवोमहेश्वरः ॥ ६० ॥ बोद्धव्यंवस्तुरूपंतुबिभर्तिभववल्लभा ॥ देवःसएवभगवान्बोद्धामुग्धेंदुशेखरः ॥ ६१ ॥ प्राणःपिनाकीसर्वेषांप्राणिनांभगवान्प्रभुः ॥ प्राणस्थितिस्तुसर्वेषामंबिकाचांबुरूपिणी ॥ ६२ ॥ बिभर्तिक्षेत्रतांदेवीत्रिपुरांतकवल्लभा ॥ क्षेत्रज्ञत्वंतदाधत्तेभगवानंतकांतकः ॥ ६३ ॥ अहःशूलायुधोदेवःशूलपाणिप्रियानिशा ॥ आकाशःशंकरोदेवःपृथिवीशंकरप्रिया ॥ ६४ ॥ समुद्रोभगवानीशोवेलाशैलेंद्रकन्यका ॥ वृक्षोवृषध्वजोदेवोलताविश्वेश्वरप्रिया ॥ ६५ ॥ पुल्लिंगमखिलंधत्तेभगवान्पुरशासनः ॥ स्त्रीलिंगंचाखिलंधत्तेदेवीदेवमनोरमा ॥ ६६ ॥ शब्दजालमशेषंतुधत्तेशर्वस्यवल्लभा ॥ अर्थस्वरूपमखिलंधत्तेमुग्धेंदुशेखरः ॥ ६७ ॥ यस्ययस्यपदार्थस्ययायाशक्तिरुदाहृता ॥ सासाविश्वेश्वरीदेवीससस्सर्वोमहेश्वरः ॥ ६८ ॥ यत्परंयत्पवित्रंचयत्पुण्यंयच्चमंगलम् ॥ तत्तदाहुर्महाभागास्तयोस्तेजोविजृंभितम् ॥ ६९ ॥ यथादीपस्यदीप्तस्यशिखादीपयतेगृहं ॥ तथातेजस्तयोरेतद्व्याप्यदीपयतेजगत् ॥ ७० ॥ ॥ ॥ ॥ ॥

भोक्ता ॥ गराशनःविषाशनः ॥ ५९ ॥ मंतव्यवस्तुतांमननीयपदार्थजातं ॥ ६० ॥ ६१ ॥ अंबुरूपिणीति ॥ आपोमयःप्राणइतिश्रुतेः ॥ ६२ ॥ क्षेत्रतांशरीरजातं ॥ ६३ ॥ ६४ ॥ ६५ ॥ ६६ ॥ शब्दजातमितिपाठांतरं ॥ ६७ ॥ सःशक्तिमान्पदार्थः ॥ ६८ ॥ तयोःशिवयोः ॥ ६९ ॥ ७० ॥

Indira Gandhi National Centre for the Arts

सन्निकर्षेति ॥ तयोःशिवयोःसान्निध्यक्रमवशादित्यर्थः ॥ ७१ ॥ ७२ ॥ इयत्तयापरिच्छिन्नतया ॥ ७३ ॥ महतांब्रह्मादीनाम् ॥ ७४ ॥ अनन्यानांशिवा तिरिक्तसेव्यरहितानां ॥ ७५ ॥ प्राकृतीप्रकृतिसंभवा ॥ ७६ ॥ ७७ ॥ परमंधाम इष्टंधाम ॥ काष्ठाअवधिः ॥ ७८ ॥ जितश्वासाइति ॥ यथोक्तंगर्भकारा

तृणादिशिवमूर्त्यंतंविश्वस्यातिशयक्रमः ॥ सन्निकर्षक्रमवशात्तयोरितिपराश्रुतिः ॥ ७१ ॥ सर्वाकारात्मकावेतौसर्व श्रेयोविधायिनौ ॥ पूजनीयौनमस्कार्यौचिंतनीयौचसर्वदा ॥ ७२ ॥ यथाप्रज्ञमिदंकृष्णयाथात्म्यंपरमेशयोः ॥ क थितंहिमयातेद्यनतुतावदियत्तया ॥ ७३ ॥ तत्कथंशक्यतेवक्तुंयाथात्म्यंपरमेशयोः ॥ महतामपिसर्वेषांमनसोपि बहिर्गतम् ॥ ७४ ॥ अंतर्गतमनन्यानामीश्वरार्पितचेतसाम् ॥ अन्येषांबुद्ध्यनारूढमारूढंवातथैवतत् ॥ ७५ ॥ ये यमुक्ताविभूतिर्वैप्राकृतीसाऽपरामता ॥ अप्राकृतींपरामन्यांगुह्यांगुह्यविदोविदुः ॥ ७६ ॥ यतोवाचोनिवर्ततेमन साचेंद्रियैःसह ॥ अप्राकृतीपरासैषाविभूतिःपारमेश्वरी ॥ ७७ ॥ सैवेहपरमंधामसैवेहपरमागतिः ॥ सैवेहपरमा काष्ठाविभूतिःपरमेष्ठिनः ॥ ७८ ॥ तांप्राप्तुंप्रयतंतेत्रजितश्वासाजितेंद्रियाः ॥ गर्भकारागृहद्वारंनिश्छिद्रंघटितंय था ॥ ७९ ॥ संसाराशीविषालीढमृतसंजीवनौषधं ॥ विभूतिंशिवयोर्विद्वान्नबिभेतिकुतश्चन ॥ ८० ॥ यःपरामप रांचैवविभूतिंवेत्तितत्त्वतः ॥ सोपरांभूतिमुल्लंघ्यपरांभूतिंसमश्नुते ॥ ८१ ॥ एतत्तेकथितंकृष्णयाथात्म्यंपरमात्मनोः ॥ रहस्यमपियोग्योसिभवभक्तोभवानिति ॥ ८२ ॥ नाशिष्येभ्यःशठेभ्योवानाभक्तेभ्यःकदाचन ॥ व्याहरेदीदृशान र्थानितिवेदानुशासनम् ॥ ८३ ॥ तस्मात्त्वमपिकल्याणपरेभ्यःकथयेर्यदि ॥ त्वादृशेभ्योनुरूपेभ्यःकथयैतन्नचान्य था ॥ ८४ ॥ विभूतिमेतांशिवयोर्योग्येभ्योयःप्रदापयेत् ॥ संसारसागरान्मुक्तःशिवसायुज्यमाप्नुयात् ॥ ८५ ॥

गृहद्वारंसंप्राप्यप्राणिनोजितश्वासाभवंतितद्वद्योगिनस्तांविभूतिंप्राप्तुंप्रयतंतइत्यर्थः ॥ ७९ ॥ संसारेति ॥ संसारसर्पदष्टायेमृताजीवास्तेषांसंजीवनौषधरूपां विभूतिमित्यर्थः ॥ ८० ॥ ८१ ॥ एवमुक्तोपमन्युःशिवयाथात्म्यकथनमुपसंहरति ॥ एतदिति ॥ याथात्म्यंसगुणस्वरूपं ॥ रहस्यंवेदांतप्रतिपाद्यंनिर्गुणस्व रूपंश्रोतुमितिशेषः ॥ ८२ ॥ ८३ ॥ ॥ ८४ ॥ प्रदापयेत् कथयेदित्यर्थः ॥ ८५ ॥ ॥ ॥ ॥



Indira Gandhi National Centre for the Arts

अस्याशिवस्य ॥ समभ्यस्तेपुनःपुनःकीर्तितेसति ॥ ८६ ॥ ८७ ॥ ८८ ॥ पूर्वैःसंचितादिभिः ॥ ८९ ॥ इतिश्रीशैवमहापुराणेवायवीयसंहिताटीकायांसारबोधिन्यामुत्तरभागेशिवतत्त्वकथनंनामपंचमोऽध्यायः ॥ ५ ॥ ओंनमःशिवाय ॥ परापरादिभेदेनब्रह्मरूपंद्विधामतम् ॥ वस्तुतस्त्वेकमेवैतदितिषष्ठेनिरूप्यते ॥ ॥ १ ॥ विग्रहंशरीरं ॥ पाशगौरवादविद्याबाहुल्यात् ॥ १ ॥ तंदेवदेवम् ॥ अविकल्पंभ्रमराहितम् ॥ २ ॥ केचिदिति ॥ यथोक्तमहादेवमेवापरंब्रह्मरूपंत

कीर्तनादस्यनश्यंतिमहांतःपातकोत्तमाः ॥ त्रिश्चतुर्वासमभ्यस्तेविनश्यंतिततोधिकाः ॥ ८६ ॥ नश्यंत्यरिष्टरिपवोवर्धंतेसुहृदस्तथा ॥ विद्याचवर्धतेशैवीमतिःसत्येप्रवर्तते ॥ ८७ ॥ भक्तिःपराशिवेसांबेसानुगेसपरिच्छदे ॥ यद्यदिष्टतमंचान्यत्तत्तदाप्नोत्यसंशयं ॥ ८८ ॥ अतःशुचिःशिवेभक्तोविश्रब्धःकीर्तयेद्यदि ॥ प्रबलैःकर्मभिःपूर्वैःफलंचेत्प्रतिबध्यते ॥ पुनःपुनःसमभ्यस्येत्तस्यनास्तीहदुर्लभम् ॥ ८९ ॥ इतिश्रीशिवमहापुराणेवायवीयसंहितायामुत्तरभागेशिवतत्त्वकथनंनामपंचमोध्यायः ॥ ५ ॥ उपमन्युरुवाच ॥ विग्रहंदेवदेवस्यविश्वमेतच्चराचरं ॥ तदेवनविजानंतिपशवःपाशगौरवात् ॥ १ ॥ तमेकमेवबहुधावदंतियदुनंदन ॥ अजानंतःपरंभावमविकल्पंमहर्षयः ॥ २ ॥ अपरंब्रह्मरूपंचपरब्रह्मात्मकंतथा ॥ केचिदाहुर्महादेवमनादिनिधनंपरम् ॥ ३ ॥ भूतेंद्रियांतःकरणप्रधानविषयात्मकं ॥ अपरंब्रह्मनिर्दिष्टंपरंब्रह्मचिदात्मकम् ॥ ॥ ४ ॥ बृहत्वाद्बृंहणत्वाच्चपरमित्यभिधीयते ॥ उभेतेब्रह्मणीरूपेब्रह्मणोधिपतेःप्रभोः ॥ ५ ॥ विद्याविद्यास्वरूपीतिकैश्चिदीशोनिगद्यते ॥ विद्येतिचेतनांप्राहुस्तथाऽविद्यामचेतनां ॥ ६ ॥ विद्याविद्यात्मकंचैवविश्वंविश्वगुरोर्विभोः ॥ रूपमेवनसंदेहोविश्वंतस्यवशेयतः ॥ ७ ॥ भ्रांतिर्विद्यापरंचेतिशार्वंरूपंपरेविदुः ॥ अयथाबुद्धिरर्थेषुबहुधाभ्रांतिरुच्यते ॥ ८ ॥ यथार्थाकारसंवित्तिर्विद्येतिपरिकीर्त्यते ॥ विकल्परहितंतत्त्वंपरमित्यभिधीयते ॥ ९ ॥ तत्त्रयंशांकरंरूपंतदाज्ञाधिष्ठितंयतः ॥ सदसद्रूपइत्याहुःसदसत्पतिरित्यपि ॥ १० ॥

थापरब्रह्मात्मकंचाहुरित्यन्वयः ॥ ३ ॥ सिद्धांतमाह ॥ भूतेति ॥ भूतादिप्रधानांतायेविषयास्तदात्मकमित्यर्थः ॥ चिदात्मकंज्ञानस्वरूपं ॥ ४ ॥ वृहत्वाद्धर्मानत्वात् ॥ बृंहणत्वाद्व्यापकत्वात् ॥ प्रभोःशिवस्य ॥ ५ ॥ ६ ॥ ७ ॥ भ्रांतिलक्षणमाह ॥ अयथेति ॥ अतस्मिंस्तत्त्वबुद्धिरित्यर्थः ॥ ८ ॥ विद्यालक्षणमाह ॥ यथार्थेति ॥ तस्मिंस्तत्त्वबुद्धिरित्यर्थः ॥ परलक्षणमाह ॥ विकल्पेति ॥ भ्रांतिरहितंब्रह्मतत्त्वमित्यर्थः ॥ ९ ॥ १० ॥ ॥

Indira Gandhi National Centre for the Arts

विपरीतेअसत्येअसाधौच ॥ ११ ॥ १२ ॥ तयोःसदसतोः ॥ १३ ॥ कूटस्थःचिदात्मा ॥ १४ ॥ १५ ॥ १६ ॥ तदिच्छांतदिच्छायाः ॥ तयोरुक्तरूपयोः ॥ १७ ॥ कारणार्थविदःकारणशब्दार्थज्ञानिनः ॥ १८ ॥ यत्गोत्वादिरूपं ॥ पिंडेषुपांचभौतिकविकारेषु ॥ व्यावृत्तरूपंतत्तत्पिंडमात्रस्वरूपं ॥ १९ ॥



सत्येसाधौचसच्छब्दःसद्भिरेवप्रयुज्यते ॥ विपरीतेत्वसच्छब्दःकथ्यतेवेदवादिभिः ॥ ११ ॥ सच्चासच्चजगद्विश्वंशरीरंपरमेष्ठिनः ॥ यदिदंसदितिप्रोक्तंयच्चासदितिकथ्यते ॥ १२ ॥ तयोःपतित्वात्तुशिवःसदसत्पतिरुच्यते ॥ क्षराक्षरात्मकंप्राहुःक्षराक्षरपरंपरे ॥ १३ ॥ क्षरःसर्वाणिभूतानिकूटस्थोक्षरउच्यते ॥ उभेतेपरमेशस्यरूपंतस्यवशेयतः ॥ ॥ १४ ॥ तयोःपरःशिवःशांतःक्षराक्षरपरःस्मृतः ॥ समष्टिव्यष्टिरूपंचसमष्टिव्यष्टिकारणम् ॥ १५ ॥ वदंतिमुनयःकेचिच्छिवंपरमकारणम् ॥ समष्टिमाहुरव्यक्तंव्यष्टिंव्यक्तंतथैवच ॥ १६ ॥ तेरूपेपरमेशस्यतदिच्छामनुवर्तनात् ॥ तयोःकारणभावेनशिवंपरमकारणम् ॥ १७ ॥ कारणार्थविदःप्राहुःसमष्टिव्यष्टिकारणं ॥ जातिव्यक्तिस्वरूपीतिकथ्यतेकैश्चिदीश्वरः ॥ १८ ॥ यत्पिंडेष्वनुवर्तेतसाजातिरितिकथ्यते ॥ व्यक्तिर्व्यावृत्तरूपंतत्पिंडजातसमाश्रितम् ॥ १९ ॥ जातयोव्यक्तयश्चैवतदाज्ञापरिपालिताः ॥ यतस्ततोमहादेवोजातिव्यक्तिवपुःस्मृतः ॥ २० ॥ प्रधानपुरुषव्यक्तकालात्माकथ्यतेशिवः ॥ प्रधानंप्रकृतिंप्राहुःक्षेत्रज्ञंपुरुषंतथा ॥ २१ ॥ त्रयोविंशतितत्त्वानिव्यक्तमाहुर्मनीषिणः ॥ कालःकार्यप्रपंचस्यपरिणामैककारणम् ॥ २२ ॥ एषामीशोधिपोधाताप्रवर्तकनिवर्तकः ॥ आविर्भावतिरोभावहेतुरेकःस्वराडजः ॥ २३ ॥ तस्मात्प्रधानपुरुषव्यक्तकालस्वरूपवान् ॥ हेतुर्नेताधिपस्तेषांधाताचोक्तोमहेश्वरः ॥ २४ ॥ विराट्हिरण्यगर्भात्माकैश्चिदीशोनिगद्यते ॥ हिरण्यगर्भोलोकानांहेतुर्विश्वात्मकोविराट् ॥ ॥ २५ ॥ अंतर्यामीपरश्चेतिकथ्यतेकविभिःशिवः ॥ प्राज्ञतैजसविश्वात्मेत्यपरेसंप्रचक्षते ॥ २६ ॥ मातामानंचमेयंचमितिंचाहुरथापरे ॥ कर्ताक्रियाचकार्यंचकरणंकारणंपरे ॥ २७ ॥ ॥ ॥

॥ २० ॥ व्यक्तंमहदादिकं ॥ २१ ॥ तदेवाह ॥ त्रयोविंशतीति ॥ २२ ॥ एषांप्रधानादीनां ॥ आविर्भावउत्पत्तिः ॥ तिरोभावोध्वंसः ॥ २३ ॥ २४ ॥ हिरण्यगर्भोब्रह्मा ॥ २५ ॥ प्राज्ञेति ॥ मांडूक्योपनिषदिस्पष्टमेतत् ॥ २६ ॥ २७ ॥ ॥ ॥ ॥



Indira Gandhi National Centre for the Arts

तुरीयंप्राज्ञविश्वतैजसातिरिक्तं ॥ २८ ॥ २९ ॥ अस्वतंत्रंमायाधीनं ॥ घोरंक्रूरं ॥ ३० ॥ ३१ ॥ ध्रुवंनिश्चलम् ॥ ३२ ॥ ३३ ॥ ३४ ॥ ज्ञानात्मकंपरोक्षज्ञानरूपं ॥ विज्ञानमपरोक्षज्ञानरूपम् ॥ ३५ ॥ ३६ ॥ विकल्प्यमानंविसंवाद्यमानम् ॥ अध्यवस्यंति निश्चिन्वंति ॥ तत्रहेतुमाह ॥ नानेति ॥ नानाविधरूपदर्शनाद्धेतोरित्यर्थः ॥ ३७ ॥ ३८ ॥ अनीशंनेशोयस्यतं ॥ चक्रनेमिभ्रमेण चक्रनेमितुल्यभ्रमेणयुक्तइत्यर्थः ॥ ३९ ॥ पश्यंतंसर्वसाक्षिणं ॥ रुक्म

जाग्रत्स्वप्नसुषुप्त्यात्मेत्यपरेसंप्रचक्षते ॥ तुरीयमपरेप्राहुस्तुर्यातीतमितीतरे ॥ २८ ॥ तमाहुर्विगुणंकेचिद्गुणवंतंपरेविदुः ॥ केचित्संसारिणंप्राहुस्तमसंसारिणंपरे ॥ २९ ॥ स्वतंत्रमपरेप्राहुरस्वतंत्रंपरेविदुः ॥ घोरमित्यपरेप्राहुः सौम्यमेवपरेविदुः ॥ ३० ॥ रागवंतंपरेप्राहुर्वीतरागंतथापरे ॥ निष्क्रियंत्वपरेप्राहुःसक्रियंचेतरेजनाः ॥ ३१ ॥ निरिंद्रियंपरेप्राहुःसेंद्रियंचतथापरे ॥ ध्रुवमित्यपरेप्राहुस्तमध्रुवमितीतरे ॥ ३२ ॥ अरूपंकेचिदाहुर्वैरूपवंतंपरेविदुः ॥ अदृश्यमपरेप्राहुर्दृश्यमित्यपरेविदुः ॥ ३३ ॥ वाच्यमित्यपरेप्राहुरवाच्यमितिचापरे ॥ शब्दात्मकंपरेप्राहुः शब्दातीतमथापरे ॥ ३४ ॥ केचिच्चिंतामयंप्राहुश्चिंतयारहितंपरे ॥ ज्ञानात्मकंपरेप्राहुर्विज्ञानमितिचापरे ॥ ३५॥ केचिज्ज्ञेयमितिप्राहुरज्ञेयमितिचापरे ॥ एकेतमेकमेवाहुरनेकंचतथापरे ॥ ३६ ॥ एवंविकल्प्यमानंतद्याथात्म्यंपरमेष्ठिनः ॥ नाध्यवस्यंतिमुनयोनानाप्रत्ययकारणात् ॥ ३७ ॥ येपुनःसर्वभावेनप्रपन्नाःपरमेश्वरम् ॥ तेहिजानंत्ययत्नेनशिवंपरमकारणं ॥ ३८ ॥ यावत्पशुर्नैवपश्यत्यनीशंकविंपुराणंभुवनस्येशितारं ॥ तावद्दुःखेवर्ततेबद्धपाशः संसारेस्मिंश्चक्रनेमिभ्रमेण ॥ ३९ ॥ यदापश्येत्पश्यंतंरुक्मवर्णंकर्तारमीशंपुरुषंब्रह्मयोनिं ॥ तदाविद्वान्पुण्यपापेविधूयनिरंजनःपरममुपैतिसाम्यं ॥ ४० ॥ इतिश्रीशिवमहापुराणेवायवीयसंहितायामुत्तरभागेषष्ठोऽध्यायः ॥ ६ ॥

उपमन्युवाच ॥ नशिवस्याणवोबंधःकार्मोमायेयएववा ॥ प्राकृतोवाथबौद्धोवाह्यहंकारात्मकस्तथा ॥ १ ॥

वर्णमिति ॥ हिरण्यवर्णायहिरण्यरूपायेतिश्रुतेः ॥ ब्रह्मयोनिंवेदानांप्रकाशकं ॥ निरंजनःनिष्कल्मषः ॥ साम्यंशिवतादात्म्यं ॥ ४० ॥ इतिश्रीशैवमहापुराणेवायवीयसंहिताटीकायांसारबोधिन्यामुत्तरभागेशिवतत्त्वकथनंनामषष्ठोऽध्यायः ॥ ६ ॥ ओंनमःशिवाय ॥ रूपमप्राकृतंशंभोःप्रणवात्मकतातथा ॥ प्रणवस्यस्वरूपंचसप्तमेत्रनिगद्यते ॥ १ ॥ आणवःअणवोजीवास्तत्कृतः कार्मःकर्मकृतःमायेयःमायाकृतः बौद्धःबुद्धिकृतः ॥ १ ॥ ॥

चेत्तःचित्तसंबंधी संकल्पात्मकंमनःचैतन्यलक्षणंचित्तं ॥ इंद्रियात्मकःश्रोत्राद्यात्मकः ॥ तन्मात्रेति ॥ शब्दाद्यात्मकइत्यर्थः ॥ भूतबंधःआकाशाद्यात्मकः
॥ २ ॥ ३ ॥ अभिनिवेशआग्रहःतद्विपाकःजात्यायुर्भोगरूपः ॥ ४ ॥ आशयैःविपाकानुगुणवासनाभिः ॥ ५ ॥ अंतरंमध्यः ॥ ६ ॥ ७ ॥ नचबंधनमि
ति ॥ एतत्सर्वमभिप्रेत्योक्तंपतंजलिनाक्लेशकर्मविपाकाशयैरपरामृष्टःपुरुषविशेषईश्वरइति ॥ ८ ॥ अस्यशिवस्य ॥ तत्रहेतुमाह ॥ परमात्मेति ॥ ९ ॥

नैवास्यमानसोबंधोनचैत्तोनेंद्रियात्मकः ॥ नचतन्मात्रबंधोपिभूतबंधोनकश्चन ॥ २ ॥ नचकालःकलाचैवनाविद्या
नियतिस्तथा ॥ नरागोनचविद्वेषःशंभोरमिततेजसः ॥ ३ ॥ नचाप्यभिनिवेशोस्यकुशलाकुशलान्यपि ॥ कर्माणि
तद्विपाकश्चसुखदुःखेचतत्फले ॥ ४ ॥ आशयैर्नास्यसंबंधःसंस्कारैःकर्मणामपि ॥ भोगैश्चभोगसंस्कारैःकालत्रित
यगोचरैः ॥ ५ ॥ नतस्यकारणंकर्तानादिरंतस्तथांतरं ॥ नकर्मकरणंवापिनाकार्यंकार्यमेवच ॥ ६ ॥ नास्यबंधुर्नचा
रिर्वानियंताप्रेरकोपिवा ॥ नपतिर्नगुरुर्भ्रातानाधिकोनसमस्तथा ॥ ७ ॥ नजन्ममरणेतस्यनकांक्षितमकांक्षितं ॥
नविधिर्ननिषेधश्चनमुक्तिर्नचबंधनं ॥ ८ ॥ नास्तियद्यदकल्याणंतत्तदस्यकदाचन ॥ कल्याणंसकलंचास्तिपरमा
त्माशिवोयतः ॥ ९ ॥ सशिवःसर्वमेवेदमधिष्ठायस्वशक्तिभिः ॥ अप्रच्युतस्वतोभावःस्थितःस्थाणुरतःस्मृतः ॥ १०
॥ शिवेनाधिष्ठितंयस्माज्जगत्स्थावरजंगमं ॥ सर्वरूपःस्मृतःशर्वस्तथाज्ञात्वानमुह्यति ॥ ॥ ११ ॥ शर्वोरुद्रोनमस्त
स्मैपुरुषःसन्परोमहान् ॥ हिरण्यबाहुर्भगवान्हिरण्यपतिरीश्वरः ॥ १२ ॥ अंबिकापतिरीशानःपिनाकीवृषवाह
नः ॥ एकोरुद्रःपरंब्रह्मपुरुषःकृष्णपिंगलः ॥ १३ ॥ बालाग्रमात्रोहृन्मध्येविचिंत्योदहरांतरे ॥ हिरण्यकेशःप
द्माक्षोप्यरुणस्ताम्रएवच ॥ १४ ॥ योवसर्पत्यसौदेवोनीलग्रीवोहिरण्मयः ॥ सौम्योघोरस्तथामिश्रश्चाक्षरश्चा
मृतोऽव्ययः ॥ १५ ॥ सपुंविशेषःपरमोभगवानंतकांतकः ॥ चेतनाचेतनोन्मुक्तःप्रपंचाच्चपरात्परः ॥ १६ ॥ लोकेसा
तिशयत्वेनज्ञानैश्वर्येविलोकिते ॥ शिवेऽनतिशयत्वेनास्थितेप्राहुर्मनीषिणः ॥ १७ ॥ ॥ ॥

इदंजगत् ॥ १० ॥ ११ ॥ १२ ॥ १३ ॥ दहरांतरे हृदाकाशमध्ये ॥ स्पष्टंचैतदुत्तरमीमांसायांदहराधिकरणे ॥ १४ ॥ अरुणइति ॥ तदुक्तंरुद्रा
ध्याये ॥ असौयस्ताम्रोअरुणःअसौयोवसर्पतिनीलग्रीवोविलोहितइति ॥ १५ ॥ १६ ॥ १७ ॥ ॥ ॥



Indira Gandhi National Centre for the Arts

कालावच्छेदवर्तिनांकालावच्छेदेनकल्पादिकालपरिच्छेदेनस्थायिनाम् ॥ १८ ॥ १९ ॥ सिद्धिरिति ॥ शुद्धेतिपाठांतरं ॥ २० ॥ अप्रतिद्वंद्वंसजातीयद्वितीयरहितं ॥ २१ ॥ २२ ॥ प्रणवःओंकारःवाचकःबोधकःपरःश्रेष्ठः ॥ २३ ॥ भावनात्भावनया तज्जपात्प्रणवजपात् तदुक्तंपतंजलिनातज्जपस्तदर्थभावनामिति ॥ २४ ॥ एकाक्षरंप्रणवात्मकं ॥ आहुरिति ॥ ओमित्येकाक्षरंब्रह्मेत्यादिश्रुतेरितिभावः ॥ २५ ॥ अस्यप्रणवस्यमात्राःविविक्तावयवरूपाः ॥ २६ ॥

प्रतिसर्गेप्रसूतानांब्रह्मणांशास्त्रविस्तरम् ॥ उपदेष्टासएवादौकालावच्छेदवर्तिनाम् ॥ १८ ॥ कालावच्छेदयुक्ता
नांगुरूणामप्यसौगुरुः ॥ सर्वेषामेवसर्वेशःकालावच्छेदवर्जितः ॥ १९ ॥ सिद्धिःस्वाभाविकीतस्यशक्तिःसर्वाति
शायिनी ॥ ज्ञानमप्रतिमंनित्यंवपुरत्यंतनिर्मलम् ॥ २० ॥ ऐश्वर्यमप्रतिद्वंद्वंसुखमात्यंतिकंबलं ॥ तेजःप्रभावोवीर्यं
चक्षमाकारुण्यमेवच ॥२१॥ परिपूर्णस्यसर्गाद्यैर्नात्मनोस्तिप्रयोजनं ॥ परानुग्रहएवास्यफलंसर्वस्यकर्मणः ॥२२॥
प्रणवोवाचकस्तस्यशिवस्यपरमात्मनः ॥ शिवरुद्रादिशब्दानांप्रणवोहिपरःस्मृतः ॥ २३ ॥ शंभोःप्रणववाच्यस्य
भावनात्तज्जपादपि ॥ यासिद्धिःसापराप्राप्याभवत्येवनसंशयः ॥ २४ ॥ तस्मादेकाक्षरंदेवमाहुरागमपारगाः
॥ वाच्यवाचकयोरैक्यंमन्यमानामनस्विनः ॥ २५ ॥ अस्यमात्राःसमाख्याताश्चतस्रोवेदमूर्धनि ॥ अकारश्चा
प्युकारश्चमकारोनादइत्यपि ॥ २६ ॥ अकारंबह्वृचंप्राहुरुकारोयजुरुच्यते ॥ मकारःसामनादोस्यश्रुतिराथर्व
णीस्मृता ॥ २७ ॥ अकारश्चमहाबीजंरजःस्रष्टाचतुर्मुखः ॥ उकारःप्रकृतिर्योनिःसत्वंपालयिताहरिः ॥ २८ ॥
मकारःपुरुषोबीजंतमःसंहारकोहरः ॥ नादःपरःपुमानीशोनिर्गुणोनिष्क्रियःशिवः ॥ २९ ॥ एवंतिसृभिरेवैषमात्रा
भिर्निखिलंत्रिधा ॥ अभिधायशिवात्मानंबोधयत्यर्धमात्रया ॥ ३० ॥ यस्मात्परंनापरमस्तिकिंचिद्यस्मान्नाणीयो
नचज्यायोस्तिकश्चित् ॥ वृक्षइवस्तब्धोदिवितिष्ठत्येकस्तेनेदंपूर्णंपुरुषेणसर्वम् ॥ ३१ ॥ इतिश्रीशिवमहापुराणे
वायवीयसंहितायामुत्तरभागेसप्तमोऽध्यायः ॥ ७ ॥ ॥ छ ॥ ॥ छ ॥

॥ श्रुतिर्वेदः ॥ २७ ॥ २८ ॥ २९ ॥ प्रणवोवाचकस्तस्येतियदुक्तंतत्प्रपंचयति ॥ एवमिति ॥ एषप्रणवः निखिलंजगदभिधायार्धमात्रयामकाररूपया शिवात्मानंबोधयतीत्यन्वयः ॥ ३० ॥ तस्यैवशिवात्मनोनारायणोपनिषदिप्रतिपादितंस्वरूपमाह ॥ यस्मादिति ॥ इदंजगत् ॥ ३१ ॥ इतिश्रीशैवमहापुराणेवायवीयसंहिताटीकायांसारबोधिन्यामुत्तरभागेप्रणवात्मशिवतत्त्वकथनंनामसप्तमोऽध्यायः ॥ ७ ॥ ॥ ॥

Gandhi National
for the Arts

ओंनमःशिवाय ॥ भक्त्यादिसाधनैर्देवोनरैःप्राप्योयथातथा ॥ सविस्तरंचतद्वृत्तमष्टमेत्रनिरूप्यते ॥ १ ॥ तस्यशिवस्य ॥ १ ॥ तस्याविद्याशक्तेः ॥ वन्हेरिति
॥ यथावन्हेर्व्युच्चरंतिस्फुलिंगाइतिश्रुतेः ॥ २ ॥ ३ ॥ तस्याःप्रकृतेः ॥ ४ ॥ ५ ॥ ६ ॥ ७ ॥ ८ ॥ ९ ॥ सप्तविंशत्प्रकारयासप्तविंशतितत्त्वस्वरूपयाअत्रअ

उपमन्युरुवाच ॥ शक्तिःस्वाभाविकीतस्यविद्याविश्वविलक्षणा ॥ एकानेकस्वरूपेणभातिभानोरिवप्रभा ॥ १ ॥
अनंताःशक्तयस्तस्याइच्छाज्ञानक्रियादयः ॥ मायाद्याश्चाभवन्वन्हेर्विस्फुलिंगायथातथा ॥ २ ॥ सदाशिवेश्वरा
द्याश्चनानाविद्येश्वरादयः ॥ अभवन्पुरुषाश्चास्याःप्रकृतिश्चपरात्परा ॥ ३ ॥ महदादिविशेषांताअजाद्याश्चापिमू
र्तयः ॥ यच्चान्यदपितत्सर्वंतस्याःकार्यंनसंशयः ॥ ४ ॥ साशक्तिःसर्वगासूक्ष्माप्रबोधानंदरूपिणी ॥ शक्तिमानुच्य
तेदेवःशिवःशीतांशुभूषणः ॥ ५ ॥ वेद्यःशिवःशिवाविद्याप्रज्ञाचैवश्रुतिःस्मृतिः ॥ धृतिरेषास्थितिर्निष्ठाज्ञानेच्छाक
र्मशक्तयः ॥ ६ ॥ आज्ञाचैवपरंब्रह्मद्वेविद्येचपरापरे ॥ शुद्धविद्याशुद्धकलासर्वंशक्तिकृतंयतः ॥ ७ ॥ मायाचप्रकृति
र्जीवोविकारोविकृतिस्तथा ॥ असच्चसच्चयत्किंचित्तयासर्वमिदंततं ॥ ८ ॥ सादेवीमाययासर्वंब्रह्मांडंसचराचरम् ॥
मोहयत्यप्रयत्नेनमोचयत्यपिलीलया ॥ ९ ॥ अनयासहसर्वेशःसप्तविंशत्प्रकारया ॥ विश्वंव्याप्यस्थितस्तस्मान्मु
क्तिरत्रप्रवर्तते ॥ १० ॥ मुमुक्षवःपुराकेचिन्मुनयोब्रह्मवादिनः ॥ संशयाविष्टमनसोविमृशंतियथातथं ॥ ११ ॥ किं
कारणंकुतोजाताजीवामःकेनवावयं ॥ क्वचास्माकंसंप्रतिष्ठाकेनवाधिष्ठितावयं ॥ १२ ॥ केनवर्तामहेशश्वत्सुखे
ष्वन्येषुचानिशम् ॥ अनिर्लंघ्याचविश्वस्यव्यवस्थाकेनवाकृता ॥ १३ ॥ कालःस्वभावोनियतिर्यदृच्छानात्रयुज्यते
॥ भूतानियोनिःपुरुषोयोगश्चैषांपरोथवा ॥ १४ ॥ अचेतनत्वात्कालादेश्चेतनत्वेपिचात्मनः ॥ सुखदुःखाभिभूतत्वा
दनीशत्वंविचार्यच ॥ १५ ॥ तेध्यानयोगानुगताःप्रापश्यंञ्छक्तिमैश्वरीम् ॥ पाशविच्छेदिकांसाक्षान्निगूढांस्वगुणैर्भृ
शं १६ ॥ तयाविच्छिन्नपाशास्तेसर्वकारणकारणं ॥ शक्तिमंतंमहादेवमपश्यन्दिव्यचक्षुषा ॥ १७ ॥ यःकार
णान्यशेषाणिकालात्मसहितानिच ॥अप्रमेयोनययाशक्त्यासाकमेकोधितिष्ठति ॥ १८ ॥ ॥ ॥

स्मिन्सेविते ॥ १० ॥ विमृशंतिविचारयंतिस्म ॥ ११ ॥ संप्रतिष्ठालयःस्थितिर्वा ॥ १२ ॥ वर्तामहेवर्तनंकुर्मः ॥ अन्येषुदुःखेषु ॥ १३ ॥ नियतिर्दैवं ॥
योनिःप्रकृतिः ॥ १४ ॥ आत्मनःजीवस्य ॥ १५ ॥ स्वगुणैरात्मगुणैः ॥ १६ ॥ १७ ॥ यमपश्यंस्तत्स्वरूपमाह ॥ यइति ॥ १८ ॥ ॥ ॥



Indira Gandhi National Centre for the Arts

प्रसादयोगेनईश्वरानुग्रहेण ॥ योगेनचित्तवृत्तिनिरोधेन ॥ १९ ॥ २० ॥ निर्वृतिःनिरतिशयसुखंद्वयोर्ज्ञानकर्मणोरित्यन्वयः ॥ २१ ॥ विमुक्तौमुक्तिप्राप्तौज्ञानकर्मणोःक्रमोनविवक्षितः ॥ प्रसादेशिवप्रसादे ॥ २२ ॥ २३ ॥ २४ ॥ २५ ॥ विविधान्मलान्विविधपापानिनिगृह्यपरित्यज्य ॥ २६॥ अवस्थाभेदंअधिकारभेदं

ततःप्रसादयोगेनयोगेनपरमेणच ॥ दृढेनभक्तियोगेनदिव्यांगतिमवाप्नुवन् ॥ १९ ॥ तस्मात्सहतयाशक्त्याहृदिप
श्यंतियेशिवं ॥ तेषांशाश्वतिकीशांतिर्नेतरेषामितिश्रुतिः ॥ २० ॥ नहिशक्तिमतःशक्त्याविप्रयोगोस्तिजातुचित् ॥
तस्माच्छक्तेःशक्तिमतःप्रसादान्निर्वृतिर्द्वयोः ॥ २१ ॥ क्रमोऽविवक्षितोनूनंविमुक्तौज्ञानकर्मणोः ॥ प्रसादेसतिसामु
क्तिर्यस्मात्करतलेस्थिता ॥ २२ ॥ देवोवादानवोवापिपशुर्वाविहगोपिवा ॥ कीटोथवाकृमिर्वापिमुच्यतेतत्प्रसाद
तः ॥ २३ ॥ गर्भस्थोजायमानोवाबालोवातरुणोपिवा ॥ वृद्धोवाम्रियमाणोवास्वर्गस्थोवाथनारकी ॥ ॥ २४ ॥ प
तितोवापिधर्मात्मापंडितोमूढएववा ॥ प्रसादेतत्क्षणादेवमुच्यतेनात्रसंशयः ॥ २५ ॥ अयोग्यानांचकारुण्याद्भक्ता
नांपरमेश्वरः ॥ प्रसीदतिनसंदेहोनिगृह्यविविधान्मलान् ॥२६॥ प्रसादादेवसाभक्तिःप्रसादोभक्तिसंभवः ॥ अव
स्थाभेदमुत्प्रेक्ष्यविद्वांस्तत्रनमुह्यति ॥ २७॥ प्रसादपूर्विकायेयंभक्तिर्मुक्तिविधायिनी ॥ नैवसाशक्यतेप्राप्तुंनरैरे
केनजन्मना ॥ २८॥ अनेकजन्मसिद्धानांश्रौतस्मार्तानुवर्तिनां ॥ विरक्तानांप्रबुद्धानांप्रसीदतिमहेश्वरः ॥ २९ ॥
प्रसन्नेसतिदेवेशेपशोस्तस्मिन्प्रवर्तते ॥ अस्तिनाथोममेत्यल्पाभक्तिर्बुद्धिपुरःसरा ॥ ३० ॥ तपसाविवशःशैवैर्धर्मैःसं
युज्यतेनरः ॥ तत्प्रयोगेतदभ्यासस्ततोभक्तिःपराभवेत् ॥ ३१ ॥ परयाचतयाभक्त्याप्रसादोलभ्यतेपरः ॥ प्रसा
दात्सर्वपाशेभ्योमुक्तिर्भक्तिःसुनिर्वृतिः ॥ ३२ ॥ अल्पभावोपियोमर्त्यःसोपिजन्मत्रयात्परं ॥ नयोनियंत्रपीडांवै
लभतेत्रनसंशयः ॥ ३३ ॥ सांगानंगाचयासेवासाभक्तिरितिकथ्यते ॥ सापुनर्भिद्यतेत्रेधामनोवाक्कायसाधनैः ॥३४॥

॥ २७ ॥ २८ ॥ श्रौतस्मार्तेति ॥ अनेनकर्मभिश्चित्तशुद्धिंसंपाद्यसंपन्नसाधनचतुष्टयेनपुरुषेणाशिवःप्रसादनीयइतिसूचितम् ॥ २९ ॥ ३० ॥ तत्प्रयोगेतदनुष्ठाने ॥ तदभ्यासःशैवधर्माचरणाभ्यासः ॥ ३१ ॥ ३२ ॥ अल्पभावःअल्पभक्तिः ॥ ३३ ॥ भक्तेर्लक्षणमाह ॥ सांगेति ॥ सांगाबाह्योपचारयुताअनंगामानसी ॥ ३४ ॥

॥ ॥ ॥ ॥ ॥

Indira Gandhi National Centre for the Arts

३५ ॥ ३६ ॥ ३७ ॥ ३८ ॥ ननुशिवागमोनप्रमाणमित्यतआह ॥ श्रीकंठेनेति ॥ शिवागमंप्रशंसति ॥ श्रेयसामिति ॥ ३९ ॥ ४० ॥ इतिश्रीशैवमहापुराणेवायवीयसंहिताटीकायांसारबोधिन्यामुत्तरभागेशिवभक्तिवर्णनंनामाष्टमोऽध्यायः ॥ ८ ॥ ॐनमःशिवाय ॥ शंकरोवेदसारंयज्ज्ञानंब्रह्मादिकांस्तथा ॥ देवींचोपादिशत्सर्वंनवमेतन्निगद्यते ॥ १ ॥ १ ॥ अयुक्तानांयोगशून्यानांदशार्धैःपंचभिःसर्गादभिःअप्राज्ञनिंदितमिति ॥ गूढत्वादेवेतिभावः ॥ २ ॥ वि



शिवरूपादिचिंतायासासेवामानसीस्मृता ॥ जपादिर्वाचिकीसेवाकर्मपूजादिकायिकी ॥ ३५ ॥ सेयंत्रिसाधनासेवाशिवधर्मश्चकथ्यते ॥ सतुपंचविधःप्रोक्तःशिवेनपरमात्मना ॥ ३६ ॥ तपःकर्मजपोध्यानंज्ञानंचेतिसमासतः ॥ कर्मलिंगार्चनाद्यंचतपश्चांद्रायणादिकम् ॥ ३७ ॥ जपस्त्रिधाशिवाभ्यासश्चिताध्यानंशिवस्यतु ॥ शिवागमोक्तंयज्ज्ञानंतदत्रज्ञानमुच्यते ॥ ३८ ॥ श्रीकंठेनशिवेनोक्तःशिवायैचशिवागमः ॥ शिवाश्रितानांकारुण्याछ्रेयसामेकसाधनम् ॥ ३९ ॥ तस्माद्विवर्धयेद्भक्तिंशिवेपरमकारणे ॥ त्यजेच्चविषयासंगंश्रेयोर्थीमतिमान्नरः ॥ ४० ॥ इतिश्रीशिवमहापुराणेवायवीयसंहितायामुत्तरभागेऽष्टमोऽध्यायः ॥ ८ ॥ ॥ श्रीकृष्णउवाच ॥ भगवन्छ्रोतुमिच्छामिशिवेनपरिभाषितं ॥ वेदसारंशिवज्ञानंस्वाश्रितानांविमुक्तये ॥ १ ॥ अभक्तानामबुद्धानामयुक्तानामगोचरम् ॥ अर्थैर्दशार्धैःसंयुक्तंगूढमप्राज्ञनिंदितं ॥ २ ॥ वर्णाश्रमकृतैर्धर्मैर्विपरीतंक्वचित्समं ॥ वेदात्षडंगादुद्धृत्यसांख्ययोगाच्चकृत्स्नशः ॥ ३ ॥ शतकोटिप्रमाणेनविस्तीर्णग्रंथसंख्यया ॥ कथितंपरमेशेनतत्रपूजाकथंप्रभो ॥ ४ ॥ कस्याधिकारःपूजादौज्ञानयोगादयःकथं ॥ तत्सर्वंविस्तरादेववक्तुमर्हसिसुव्रत ॥ ५ ॥ उपमन्युरुवाच ॥ शैवंसंक्षिप्यवेदोक्तंशिवेनपरिभाषितं ॥ स्तुतिनिंदादिरहितंसद्यःप्रत्ययकारकम् ॥ ६ ॥ गुरुप्रसादजंदिव्यमनायासेनमुक्तिदं ॥ कथयिष्येसमासेनतस्यशक्योनविस्तरः ॥ ७ ॥ सिसृक्षयापुराऽव्यक्ताच्छिवःस्थाणुर्महेश्वरः ॥ सत्कार्यकारणोपेतःस्वयमाविरभूत्प्रभुः ॥ ८ ॥ जनयामासचतदाऋषिर्विश्वाधिकःप्रभुः ॥ देवानांप्रथमंदेवंब्रह्माणंब्रह्मणःपतिः ॥ ९ ॥

परीतंविषमंदुरवगाहमित्यर्थः ॥ ३ ॥ ग्रंथसंख्ययाअनुष्टुप्श्लोकसंख्यया ॥ ४ ॥ ५ ॥ प्रत्ययोविश्वासः ॥ ६ ॥ ७ ॥ सत्कार्यकारणोपेतःसदेवयत्कार्यंकारणात्मनास्थितंतदुपेतः ॥ अनेनसत्कार्यवादोदर्शितः ॥ ८ ॥ ऋषिःशिवः ॥ ९ ॥ ॥ ॥ ॥



Indira Gandhi National Centre for the Arts

१० ॥ आसौब्रह्मा ॥ ११ ॥ १२ ॥ रुद्राध्यायेननमस्तेरुद्रइत्यादिना ॥ १३ ॥ तेषांब्रह्मादीनां ॥ तंशिवम् ॥ १४ ॥ वर्तामिवर्ते ॥ १५ ॥ १६ ॥

ब्रह्मापिपितरंदेवंजायमानोन्ववैक्षत ॥ तंजायमानंजनकोदेवःप्रापश्यदाज्ञया ॥ १० ॥ दृष्टोरुद्रेणदेवोसावसृजद्वि
श्वमीश्वरः ॥ वर्णाश्रमव्यवस्थांचचकारसपृथक्पृथक् ॥११ ॥ सोमंससर्जयज्ञार्थेसोमात्द्यौःसमजायत ॥ धराचव
न्हिःसूर्यश्चयज्ञोविष्णुःशचीपतिः ॥ १२ ॥ तेचान्येचसुरारुद्रंरुद्राध्यायेनतुष्टुवुः ॥ प्रसन्नवदनस्तस्थौदेवानामग्र
तःप्रभुः ॥ १३ ॥ अपहृत्यस्वलीलार्थंतेषांज्ञानंमहेश्वरः ॥ तमपृच्छंस्ततोदेवाःकोभवानितिमोहिताः ॥ १४ ॥
सोब्रवीद्भगवान्रुद्रोह्यहमेकःपुरातनः ॥ आसंप्रथममेवाहंवर्तामिचसुरोत्तमाः ॥ १५ ॥ भविष्यामिचमत्तोन्योव्य
तिरिक्तोनकश्चन ॥ अहमेवजगत्सर्वंतर्पयामिस्वतेजसा ॥ १६ ॥ मत्तोधिकःसमोनास्तिमांयोवेदसमुच्यते ॥ इत्यु
क्त्वाभगवान्रुद्रस्तत्रैवांतरधीयत ॥ १७ ॥ नापश्यंश्चततोदेवंदेवाविष्णुपुरोगमाः ॥ अथर्वशिरसारुद्रमस्तुवंश्चो
र्ध्वबाहवः ॥ १८ ॥ त्वरिताख्येनरुद्रेणरुद्रेणब्रह्मभिस्तथा ॥ स्तोत्रैश्चविविधैरन्यैसूक्तैःशैवैश्चनामभिः ॥ १९ ॥ व्रतं
पाशुपतंकृत्वाह्यथर्वशिरसिस्थितं ॥ भस्मसंछन्नसर्वांगाबभूवुरमरास्तदा ॥ २० ॥ अथतेषांप्रसादार्थंपशूनांपति
रीश्वरः ॥ सगणश्चांबयासार्धंसान्निध्यमकरोत्प्रभुः ॥ २१ ॥ यंविनिद्राजितश्वासायोगिनोदग्धकिल्बिषाः ॥ हृ
दिपश्यंतितंदेवंददृशुर्देवपुंगवाः ॥ २२ ॥ यामाहुःपरमांशक्तिमीश्वरेच्छानुवर्तिनीं ॥ तामश्यन्महेशस्यवामांगेवाम
लोचनां ॥ २३ ॥ येविनिर्धूतसंसाराःप्राप्ताःशैवंपरंपदं ॥ नित्यसिद्धाश्चयेचान्येतेचदृष्टागणेश्वराः ॥ २४ ॥ अथ
तंतुष्टुवुर्देवादेव्यासहमहेश्वरम् ॥ स्तोत्रैर्माहेश्वरैर्दिव्यैःस्तोत्रैःपौराणिकैरपि ॥ २५ ॥ देवोपिदेवानालोक्यकृप
यावृषभध्वजः ॥ तुष्टोस्मीत्याहसंप्रीतःस्वभावमधुरांगिरं ॥ २६ ॥ अथतंप्रीतमनसंप्रणिपत्यवृषध्वजं ॥ अर्थम
र्थ्यतमंदेवाःपप्रच्छुरिममादरात् ॥ २७ ॥ ॥ ॥ ॥ ॥

१७ ॥ १८ ॥ १९ ॥ पाशुपतंपूर्वोक्तं ॥ २० ॥ तेषांब्रह्मादीनां ॥ २१ ॥ विनिद्राइति ॥ विनिद्राविगतानिद्रायेषांतइत्यर्थः ॥ २२ ॥ २३ ॥ २४ ॥
॥ २५ ॥ २६ ॥ अर्थ्यतमंप्रार्थनीयतमं ॥ २७ ॥ ॥ ॥ ॥ ॥

Indira Gandhi National Centre for the Arts

मार्गेणप्रकारणे ॥ २८ ॥ २९ ॥ स्वरूपमाह ॥ सर्वेति ॥ ग्रहैःआदित्यादिभिः ॥ ३० ॥ ३१ ॥ तन्मयंशिवमयंभूतमयंवा ॥ ३२ ॥ ३३ ॥ ३४ ॥



देवाउचुः ॥ भगवन्केनमार्गेणपूजनीयोसिभूतले ॥ कस्याधिकारःपूजायांवक्तुमर्हसितत्वतः ॥२८॥ ततःसस्मितमा
लोक्यदेवींदेववरोहरः ॥ स्वरूपंदर्शयामासघोरंसूर्यात्मकंपरम् ॥२९॥ सर्वाश्चर्यगुणोपेतंसर्वतेजोमयंपरं ॥ शक्ति
भिर्मूर्तिभिःस्वाभिर्ग्रहैर्देवैश्चसंवृतं ॥ ३० ॥ अष्टबाहुंचतुर्वक्त्रमर्धनारीकमद्भुतं ॥ दृष्ट्वैवमद्भुताकारंदेवाविष्णुपुरोगमाः
३१॥बुध्वादिवाकरंदेवंदेवींचैवनिशाकरं॥पंचभूतान्यशेषाणितन्मयंचचराचरं॥३२॥ एवमुक्त्वानमश्चक्रुस्तस्मैचार्घ्यं
प्रदायवै ॥ ३३ ॥ सिंदूरवर्णायसुमंडलायसुवर्णवज्राभरणायतुभ्यं ॥ पद्माभनेत्रायसपंकजायब्रह्मेंद्रनारायणकार
णाय ॥ ३४ ॥ सुरत्नपूर्णंससुवर्णतोयंसुकुंकुमाढ्यंसकुशंसपुष्पं ॥ प्रदत्तमादायसहेमपात्रंप्रशस्तमर्घ्यंभगवन्प्र
सीद ॥३५॥ नमःशिवायसांबायसगणायादिहेतवे ॥ रुद्रायविष्णवेतुभ्यंब्रह्मणेसूर्यमूर्तये ॥३६॥ यःशिवंमंडलेसौ
रेसंपूज्यैवंसमाहितः ॥ प्रातर्मध्यान्हसायान्हेप्रदद्यादर्घ्यमुत्तमं ॥३७॥ प्रणमेद्वापठेदेतत्स्तोत्रंस्तुतिशतोत्तमम् ॥
नतस्यदुर्लभंकिंचिद्भक्तश्चेन्मुच्यतेदृढं ॥ ३८ ॥ तस्माद्भक्त्यार्चयेन्नित्यंशिवमादित्यरूपिणं ॥ धर्मकामार्थमुक्त्यर्थंम
नसाकर्मणागिरा ॥ ३९ ॥ अथदेवान्समालोक्यमंडलस्थोमहेश्वरः ॥ सर्वागमोत्तरंदत्त्वाशास्त्रमंतरधीयत ॥४०॥
तत्रपूजाधिकाराद्यंब्रह्मक्षत्रविशामिति ॥ ज्ञात्वाप्रणम्यदेवेशंदेवाजग्मुर्यथागतं ॥ ४१ ॥ अथकालेनमहतातस्मि
न्शास्त्रेतिरोहिते ॥ भर्तारंपरिपप्रच्छतदंकस्थामहेश्वरी ॥ ४२ ॥ तयासंचोदितोदेवोदेव्याचंद्रार्धभूषणः ॥ अवद
त्सारमुद्धृत्यशास्त्रंसर्वागमोत्तरं ॥ ४३ ॥ प्रवर्तितंचतल्लोकेनियोगात्परमेष्ठिनः ॥ मयागस्त्येनगुरुणादधीचेनमह
र्षिणा ॥ ४४ ॥ स्वयमप्यवतीर्योर्व्यांयुगावर्तेषुशूलधृक् ॥ स्वाश्रितानांविमुक्त्यर्थंकुरुतेज्ञानसंततिं ॥ ४५॥ ऋभुः
सत्योभार्गवश्चअंगिराःसविताद्विजाः ॥ मृत्युःशतक्रतुर्धर्मोवसिष्ठोमुनिपुंगवः ॥ ४६ ॥ ॥

अर्घ्यमंत्रमाह ॥ सुरत्नेति ॥ ३५ ॥ ३६ ॥ सौरेसूर्यसंबंधिनि ॥ ३७ ॥ ३८ ॥ ३९ ॥ सर्वागमोत्तरंसर्ववेदेषुश्रेष्ठम् ४० ॥ ४१ ॥ भर्तारंशिवम् ॥ ४२ ॥
॥ ४३ ॥ ४४ ॥ युगावर्तेषुप्रतियुगं ॥ स्वाश्रितानाह ॥ ऋभुरिति ॥ ४५ ॥ ४६ ॥ ॥ ॥



Indira Gandhi National Centre for the Arts

॥ ४७ ॥ ४८ ॥ ४९ ॥ ५० ॥ लैंगेलिंगपुराणेसप्तमाध्यायएतेश्लोकाउक्ताइतिभावः ॥ एतच्छ्लोकपंचकंक्कचित्पुस्तकेनदृश्यते ॥ तिष्येकलौ ॥ ५१ ॥ चत्वारइति ॥ तेचानुपदंवक्ष्यंते ॥ तेषांपूर्वोक्तानामृषीणाम् ॥ ५२ ॥ ५३ ॥ इतिश्रीशिवमहापुराणेवायवीयसंहिताटीकायांसारबोधिन्यामुत्तरभागेशैव

सारस्वतस्त्रिधामाचत्रिवृतोमुनिपुंगवः ॥ शततेजाःस्वयंधर्मोनारायणइतिश्रुतः ॥ ४७ ॥ स्वरक्षश्चारुणिर्धीमांस्तथा चैवकृतंजयः ॥ मामतेयोभरद्वाजोगौतमःकविसत्तमः ॥ ४८ ॥ वाचःश्रवामुनिःसाक्षात्तथासूक्ष्मायणिःशुचिः ॥ तृणबिंदुर्मुनिःकृष्णशक्तिःशाक्तयउत्तरः ॥ ४९ ॥ जातूकर्ण्योहरिःसाक्षात्कृष्णद्वैपायनोमुनिः ॥ व्यासास्त्वेतेचशृ ण्वंतुकल्पयोगेश्वरान्क्रमात् ॥ ५० ॥ लैंगेव्यासावताराणिद्वापरांतेषुसुव्रत ॥ योगाचार्यावताराणितथातिष्येतु शूलिनः ॥ ५१ ॥ तत्रतत्रविभोःशिष्याश्चत्वारःस्युर्महौजसः ॥ शिष्यास्तेषांप्रशिष्याश्चशतशोथसहस्रशः ॥ ५२ ॥ तेषांसंभाषणाल्लोकेसेवाज्ञाकरणादिभिः ॥ भाग्यवंतोविमुच्यंतेभक्त्याचात्यंतभाविताः ॥ ५३ ॥ इतिश्रीशि वमहापुराणेवायवीयसंहितायामुत्तरभागेनवमोऽध्यायः ॥ ९ ॥ ॥ छ ॥ श्रीकृष्णउवाच ॥ युगावर्तेषुसर्वे षुयोगाचार्यछलेनतु ॥ अवताराणिशर्वस्यशिष्यांश्चभगवन्वद ॥ १ ॥ उपमन्युरुवाच ॥ श्वेतःसुतारोमदनःसुहोत्रः कंकएवच ॥ लौगाक्षिश्चमहामायोजैगीषव्यस्तथैवच ॥ २ ॥ दधिवाहश्चऋषभोमुनिरुग्रोत्रिरेवच ॥ सुबालकोगौ तमश्चतथावेदशिरामुनिः ॥ ३ ॥ गोकर्णश्चगुहावासीशिखंडीचापरःस्मृतः ॥ जटामालीचाट्टहासोदारुकोलांगली तथा ॥ ४ ॥ महाकालश्चशूलीचदंडीमुंडीसएवच ॥ सहिष्णुःसोमशर्माचनकुलीश्वरएवच ॥ ५ ॥ एतेवाराहक ल्पेस्मिन्सप्तमस्यांतरेमनोः ॥ अष्टाविंशतिसंख्यातायोगाचार्यायुगक्रमात् ॥ ६ ॥ शिष्याःप्रत्येकमेतेषांचत्वारःशां तचेतसः ॥ श्वेतादयश्चरुष्यांतास्तान्ब्रवीमियथाक्रमं ॥ ७ ॥ श्वेतःश्वेतशिखश्चैवश्वेताश्वःश्वेतलोहितः ॥ दुंदुभिः शतरूपश्चऋचीकःकेतुमांस्तथा ॥ ८ ॥ विकोशश्चविकेशश्चविपाशःपाशनाशनः ॥ सुमुखोदुर्मुखश्चैवदुर्दमोदुरतिक्रमः ९

धर्मकथनंनामनवमोऽध्यायः ॥ ९ ॥ ओंनमःशिवाय ॥ कल्पयोगेश्वराःप्रोक्ताःशतंचद्वादशोत्तरम् ॥ शर्वावताररूपायेवर्ण्यंतेदशमेशुभाः ॥ १ ॥ १ ॥ तेषां नामान्याह ॥ श्वेतइति ॥ २ ॥ ३ ॥ ४ ॥ ५ ॥ सप्तमस्यवैवस्वतस्य ॥ ६ ॥ शिष्याइति ॥ एतेषामधुनोक्तानांप्रत्येकमेकैकस्यचत्वारश्चत्वारः शिष्याइत्य र्थः ॥ ७ ॥ तान्क्रमेणाह ॥ श्वेतइत्यादिना ॥ ८ ॥ ९ ॥ ॥ ॥ ॥ ॥

Indira Gandhi National Centre for the Arts

॥ १० ॥ ११ ॥ १२ ॥ १३ ॥ १४ ॥ १५ ॥ १६ ॥ १७ ॥ १८ ॥ १९ ॥ २० ॥ २१ ॥ २२ ॥ २३ ॥ २४ ॥ सर्वेद्वंद्वसहाःशीतोष्णादिद्वंद्वसहिष्णवः



सनत्कुमारःसनकःसनंदश्चसनातनः॥सुधामाविरजश्चैवशंखपाद्वैरजस्तथा ॥ १० ॥ सारस्वतश्चमेघश्चमेघवाहःसुवाहकः ॥ कपिलश्चासुरिःपंचशिखोबाष्कलएवच ॥ ११ ॥ पराशरश्चगर्गश्चभार्गवश्चांगिरास्तथा ॥ बलबंधुर्निरामित्रःकेतुशृंगस्तपोधनः ॥ १२ ॥ लंबोदरश्चलंबश्चलंबाक्षोलंबकेशकः ॥ सर्वज्ञःसमबुद्धिश्चसाध्यबुद्धिस्तथैवच ॥ १३ ॥ सुधामाकाश्यपश्चैववसिष्ठोविरजास्तथा ॥ अत्रिरुग्रोगुरुश्रेष्ठःश्रवणोथश्रविष्ठकः ॥ १४ ॥ कुणिश्चकुणिबाहुश्चकुशरीरःकुनेत्रकः ॥ कश्यपोह्युशनाचैवच्यवनश्चबृहस्पतिः ॥ १५ ॥ उतथ्योवामदेवश्चमहाकालोमहानिलः ॥ वाचश्रवाःसुवीरश्चश्यावाश्वश्चयतीश्वरः ॥ १६ ॥ हिरण्यनाभःकौशल्योलोकाक्षिःकुथुमिस्तथा ॥ सुमंतुर्जैमिनिश्चैवकबंधःकुशकंधरः ॥१७॥ प्लक्षोदार्भायणिश्चैवकेतुमान्गौतमस्तथा ॥ भल्लवीमधुपिंगश्चश्वेतकेतुस्तथैवच ॥१८॥ उशिजोबृहदश्वश्चदेवलःकविरेवच ॥ शालिहोत्रःसुवेषश्चयुवनाश्वःशरद्वसुः ॥ १९ ॥ छगलःकुंडकर्णश्चकुंभश्चैवप्रबाहुकः ॥ उलूकोविद्युतश्चैवशंबुकश्चाश्वलायनः ॥२०॥ अक्षपादःकणादश्चउलूकोवत्सएवच ॥ कुशिकश्चैवगर्गश्चमित्रकोरुष्यएवच ॥ २१ ॥ एतेशिष्यामहेशस्ययोगाचार्यस्वरूपिणः ॥ संख्याचशतमेतेषांसहद्वादशसंख्यया ॥ २२ ॥ सर्वेपाशुपताःसिद्धाभस्मोद्धूलितविग्रहाः ॥ सर्वशास्त्रार्थतत्त्वज्ञावेदवेदांगपारगाः ॥ २३ ॥ शिवाश्रमरताःसर्वेशिवज्ञानपरायणाः ॥ सर्वसंगविनिर्मुक्ताःशिवैकासक्तचेतसः ॥ २४ ॥ सर्वद्वंद्वसहाधीराःसर्वभूतहितेरताः ॥ ऋजवोमृदवःस्वस्थाजितक्रोधाजितेंद्रियाः ॥ २५ ॥ रुद्राक्षमालाभरणास्त्रिपुंड्रांकितमस्तकाः ॥ शिखाजटाःसर्वजटाअजटामुंडशीर्षकाः ॥ २६ ॥ फलमूलाशनप्रायाःप्राणायामपरायणाः ॥ शिवाभिमानसंपन्नाःशिवध्यानैकतत्पराः ॥ २७ ॥ समुन्मथितसंसारविषवृक्षांकुरोद्गमाः ॥ प्रयातुमेवसन्नद्धाःपरंशिवपुरंप्रति ॥ २८ ॥



॥ २५ ॥ शिखाजटाःशिखामात्रजटाः ॥ २६ ॥ शिवाभिमानसंपन्नाःशैवमार्गाभिमानयुक्ताः ॥ २७ ॥ शिवपुरंकैलासम् ॥ २८ ॥ ॥

Indira Gandhi National Centre for the Arts

स्वदेशिकान्स्वाचार्यान् ॥ इमान्पूर्वोक्तान्श्वेतादीन् ॥ २९ ॥ इतिश्रीशैवमहापुराणेवायवीयसंहिताटीकायांसारबोधिन्यामुत्तरभागेयोगाचार्यकथनं नामदशमोऽध्यायः ॥ १० ॥ ओंनमःशिवाय ॥ देवींप्रतिशिवेनोक्तःशैवधर्मोयथाविधि ॥ सर्ववर्णोचितःसोयमेकादशइहस्थितः ॥ १ ॥ षडाननसमप्रख्य

स्वदेशिकानिमान्मत्वानित्यंयःशिवमर्चयेत् ॥ सयातिशिवसायुज्यंनात्रकार्याविचारणा ॥२९॥ इतिश्रीशिवमहापु
राणेवायवीयसंहितायामुत्तरभागेदशमोऽध्यायः ॥१०॥ ॥छ॥ श्रीकृष्णउवाच ॥ भगवन्सर्वयोगींद्रगणे
श्वरमुनीश्वर ॥ षडाननसमप्रख्यसर्वज्ञाननिधेगुरो ॥१॥ प्रायस्त्वमवतीर्णोर्व्यांपाशविच्छित्तयेनृणाम् ॥ महर्षिव
पुरास्थायस्थितोसिपरमेश्वरः ॥२॥ अन्यथाहिजगत्यस्मिन्देवोवादानवोपिवा ॥ त्वत्तोन्यःपरमंभावंकोजानीया
च्छिवात्मकं ॥३॥ तस्मात्तवमुखोद्गीर्णंसाक्षादिवपिनाकिनः ॥ शिवज्ञानामृतंपीत्वानमेतृप्तमभून्मनः ॥४॥ सा
क्षात्सर्वजगत्कर्तुर्भर्तुरंकंसमाश्रिता ॥ भगवन्किंनुपप्रच्छभर्तारंपरमेश्वरी ॥५॥ उपमन्युरुवाच ॥ स्थानेपृष्टंत्वया
कृष्णतद्वक्ष्यामियथातथं ॥ भवभक्तस्ययुक्तस्यतवकल्याणचेतसः ॥६॥ महीधरवरेदिव्येमंदरेचारुकंदरे ॥ देव्या
सहमहादेवोदिव्योद्यानगतोभवत् ॥७॥ तदादेव्याःप्रियसखीसुस्मितास्याशुभावती ॥ फुल्लान्यतिमनोज्ञानिपु
ष्पाणिसमुपाहरत् ॥८॥ ततःस्वमंकमारोप्यदेवींदेववरोहरः ॥ अलंकृत्यचतैःपुष्पैरास्तेत्द्दष्टतरःस्वयं ॥९॥
अथांतःपुरचारिण्योदेव्योदिव्यविभूषणाः ॥ अंतरंगागणेंद्राश्चदेवंदेवींसिषेविरे ॥१०॥ ततःप्रियाःकथावृत्तावि
नोदायमहेशयोः ॥ त्राणायचनृणांलोकेयेशिवंशरणंगताः ॥११॥ तदावसरमालोक्यसर्वलोकमहेश्वरी ॥ भर्तारंप
रिपप्रच्छसर्वलोकमहेश्वरं ॥१२॥ देव्युवाच ॥ केनवश्योमहादेवोमर्त्यानांमंदचेतसां ॥ अल्पसत्त्वाल्पशक्तीनाम
ल्पानामकृतात्मनां ॥१३॥ ईश्वरउवाच ॥ नकर्मणानतपसानजपैर्नसमाधिभिः ॥ नज्ञानेननचान्येनवश्योहं
श्रद्धयाविना ॥१४॥ ॥ ॥ ॥ ॥ ॥

स्कंदतुल्यबुद्धे ॥ १ ॥ पाशविच्छित्तयेमायापाशनिवृत्तये ॥ २ ॥ ३ ॥ ४ ॥ परमेश्वरीगौरी ॥ ५ ॥ स्थानेयोग्यावसरे ॥ ६ ॥ ७ ॥ ८ ॥ ९ ॥ १० ॥ महेशयोःशिवयोः ॥ केतेनरस्तानाह ॥ यइति ॥ ११ ॥ १२ ॥ मनोबलंसत्त्वंशारीरंशक्तिः अकृतात्मनामकृतबुद्धीनां ॥ १३ ॥ श्रद्धाआस्तिक्यबुद्धिः ॥ १४ ॥

Indira Gandhi National Centre for the Arts

संभाष्यइति ॥ अहमित्यनुषज्यते ॥ १५ ॥ १६ ॥ वर्णधर्मःउपनयनादिःआश्रमधर्मोब्रह्मचर्यादिः ॥ १७ ॥ आम्नायसिद्धंवेदसिद्धम् ॥ धर्मयागादिरूपं ॥ कल्पितमिति ॥ विद्धीतिशेषः ॥ १८ ॥ सोपिधर्मोनात्यंतिकश्रेयोहेतुरित्याह ॥ नेति ॥ १९ ॥ तथापिश्रद्धासिद्धयेयथाशक्तिसोनुष्ठेयइत्याह ॥ तेनेति ॥

श्रद्धामय्यस्तिचेत्पुंसांयेनकेनापिहेतुना ॥ वश्यःस्पृश्यश्चदृश्यश्चपूज्यःसंभाष्यएवच ॥ १५ ॥ साध्यातस्मान्मयि श्रद्धामांवशीकर्तुमिच्छता ॥ श्रद्धाहेतुःस्वधर्मस्यरक्षणंवर्णिनामिह ॥१६॥ स्ववर्णाश्रमधर्माभ्यांवर्ततेयस्तुमानवः॥ तस्यैवभवतिश्रद्धामयिनान्यस्यकस्यचित् ॥ १७ ॥ आम्नायसिद्धमखिलंधर्ममाश्रमिणामिह ॥ ब्रह्मणाकल्पितंपूर्वं ममैवाज्ञापुरःसरम् ॥ १८ ॥ सतुपैतामहोधर्मोबहुवित्तक्रियान्वितः ॥ नात्यंतफलभूयिष्ठःक्लेशायाससमन्वितः ॥ ॥ १९ ॥ तेनधर्मेणमहताश्रद्धांप्राप्यसुदुर्लभां ॥ वर्णिनोयेप्रपद्यंतेमामनन्यसमाश्रयाः ॥ २० ॥ तेषांसुखेनमार्गेणधर्मकामार्थमुक्तये ॥ वर्णाश्रमसमाचारोमयाभूयःप्रकल्पितः ॥ २१ ॥ तस्मिन्भक्तिमतामेवमदीयानांतुवर्णिनां ॥ अधिकारोनचान्येषामित्याज्ञानैष्ठिकीमम ॥ २२ ॥ मदाज्ञप्तेनमार्गेणवर्णिनोमदुपाश्रयाः ॥ मलमायादिपाशेभ्योविमुक्तामत्प्रसादतः ॥ २३ ॥ पुरंमदीयमासाद्यपुनरावृत्तिदुर्लभं ॥ परमंममसाधर्म्यंप्राप्यनिर्वृतिमाप्नुयुः ॥ २४ ॥ तस्माल्लब्ध्वाप्यलब्ध्वावावर्णधर्मंमयेरितं ॥ आश्रित्यममभक्तश्चेत्स्वात्मनात्मानमुद्धरेत् ॥ २५ ॥ अलब्धाल्लब्धएवैषकोटिकोटिगुणाधिकः ॥ तस्मान्मन्मुखतोलब्ध्वावर्णधर्मंसमाचरेत् ॥ २६ ॥ ममावताराणिशुभेयोगाचार्यछलेनतु ॥ सर्वांतरेषुसंत्यार्येसंततिश्चसहस्रशः ॥ २७ ॥ ॥ ॥

वर्णिनोब्राह्मणादयः ॥ २० ॥ २१॥ तस्मिन्वर्णाश्रमसमाचारे ॥ नैष्ठिकीनिश्चयवती ॥ २२ ॥ मलमविद्या ॥ २३ ॥ पुरंकैलासंदिव्यशरीरंवा ॥ २४ ॥ आश्रित्येति ॥ मयेरितंवर्णधर्मंलब्ध्वाऽलब्ध्वापिवामामाश्रित्यममभक्तोजातश्चेदात्मनात्मानमुद्धरेदित्यर्थः ॥ २५ ॥ अलब्धादज्ञाताद्धर्मात् ॥ २६ ॥ सर्वांतरेषुसर्वमन्वंतरेषु ॥ २७ ॥ ॥ ॥ ॥ ॥ ॥



Indira Gandhi National Centre for the Arts

मदवतारसंततिज्ञानंमद्भक्तानामेवसुलभमित्याह ॥ अयुक्तानामिति ॥ २८ ॥ २९ ॥ कोसौमोक्षस्यप्रापकोधर्मस्तमाह ॥ ज्ञानमिति ॥ ३० ॥ ज्ञानादीनांस्वरूपाण्याह ॥ पशुपाशेति ॥ एतदेवज्ञानंश्रेयस्करंनान्यदितिभावः ॥ षडध्वेति ॥ पूर्वोक्तषण्मार्गशुद्धिविधिनाक्रियमाणेत्यर्थः ॥ गुर्वधीनागुरूपदिष्टतपोजपादिसाध्या ॥ ३१ ॥ चर्याआचरणं ॥ ३२ ॥ वृत्त्यंतरनिरोधःचित्तवृत्तिनिरोधः ॥ ३३ ॥ योगंप्रशंसति ॥ अश्वमेधेति ॥ ३४ ॥ योगाधिकारिणमाह ॥

अयुक्तानामबुद्धानामभक्तानांसुरेश्वरि ॥ दुर्लभंसंततिज्ञानंततोयत्नात्समाश्रयेत् ॥ २८ ॥ साहानिस्तन्महच्छिद्रंसमोहःसांधमूकता ॥ यदन्यत्रश्रमंकुर्यान्मोक्षमार्गबहिष्कृतः ॥ २९ ॥ ज्ञानंक्रियाचचर्याचयोगश्चेतिसुरेश्वरि ॥ चतुष्पादःसमाख्यातोममधर्मःसनातनः ॥ ३० ॥ पशुपाशपतिज्ञानंज्ञानमित्यभिधीयते ॥ षडध्वशुद्धिर्विधिनागुर्वधीनाक्रियोच्यते ॥ ३१ ॥ वर्णाश्रमप्रयुक्तस्यमयैवविहितस्यच ॥ ममार्चनादिधर्मस्यचर्याचर्येतिकथ्यते ॥ ३२ ॥ मदुक्तेनैवमार्गेणमय्यवस्थितचेतसः ॥ वृत्त्यंतरनिरोधोयोयोगइत्यभिधीयते ॥ ३३ ॥ अश्वमेधशताच्छ्रेष्ठंदेविचित्तप्रसाधनम् ॥ मुक्तिदंचतथाप्येतदसाध्यंविषयैषिणाम् ॥ ३४ ॥ विजितेंद्रियवर्गस्ययमेननियमेनच ॥ सर्वपापहरोयोगोविरक्तस्यैवकथ्यते ॥ ३५ ॥ वैराग्याज्जायतेज्ञानंज्ञानाद्योगःप्रवर्तते ॥ योगज्ञःपतितोवापिमुच्यतेनात्रसंशयः ॥ ३६ ॥ दयाकार्याथसततमहिंसाज्ञानसंग्रहं ॥ सत्यमस्तेयमास्तिक्यंश्रद्धाचेंद्रियनिग्रहः ॥ ३७ ॥ अध्यापनंचाध्ययनंयजनंयाजनंतथा ॥ ध्यानमीश्वरभावश्चसततंज्ञानशलिता ॥ ३८ ॥ यएवंवर्ततेविप्रोज्ञानयोगस्यसिद्धये ॥ अचिरादेवविज्ञानंलब्ध्वायोगंचविंदति ॥ ३९ ॥ दग्ध्वादेहमिमंज्ञानीक्षणाज्ज्ञानाग्निनाप्रिये ॥ प्रसादान्ममयोगज्ञःकर्मबंधंप्रहास्यति ॥ ४० ॥ पुण्यापुण्यात्मकंकर्ममुक्तेस्तत्प्रतिबंधकं ॥ तस्मान्नियोगतोयोगीपुण्यापुण्यंविवर्जयेत् ॥ ४१ ॥ फलकामनयाकर्मकरणात्प्रतिबध्यते ॥ नकर्ममात्रकरणात्तस्मात्कर्मफलंत्यजेत् ॥ ४२ ॥

विजितेति ॥ ३५ ॥ ३६ ॥ ज्ञानयोगसाधनान्याह ॥ दयेति ॥ ३७ ॥ ईश्वरभावःईश्वरभक्तिः ॥ ३८ ॥ लब्ध्वेति ॥ एवंवर्तमानःशीघ्रमेवविज्ञानंलब्ध्वायोगंलभतइत्यर्थः ॥ ३९ ॥ ४० ॥ ४१ ॥ फलेति ॥ अतएवगीतायामुक्तं सर्वकर्मफलत्यागंप्राहुस्त्यागंविचक्षणाइति ॥ नकर्मेति ॥ तदप्युक्तंगीतायाम् ॥ नहिदेहभृताशक्यंत्यक्तुंकर्माण्यशेषतः ॥ यस्तुकर्मफलत्यागीसत्यागीत्यभिधीयतइति ॥ ४२ ॥ ॥ ॥ ॥

Indira Gandhi National Centre for the Arts

ज्ञानयज्ञरतःश्रवणादितत्परः ॥ ४३ ॥ ४४ ॥ ४५ ॥ तदर्हकायतस्तावन्मात्रकरणयोग्याः ॥ ४६ ॥ आंतरमेवेति ॥ बाह्यादांतरमेवभजनंमुख्यमित्यर्थः ॥ यथावक्ष्यतिबाह्यादाभ्यंतरंश्रेष्ठमिति ॥ ४७ ॥ ४८ ॥ अन्यात्मविदितंपरैर्ज्ञातं ॥ ४९ ॥ मत्प्रवणमिति ॥ एतदेवयोग्यंमनइत्यर्थः ॥ एवंवागादीनां सार्थक्यमाह ॥ मन्नामेति ॥ इतरामन्नामरहिता ॥ ५० ॥ इतरःपूर्वोक्तलिंगादिरहितः ॥ ५१ ॥ बाह्यंमदर्चारहितं ॥ देहसंशोषइति ॥ सएवयोग्यंतपइ

प्रथमंकर्मयज्ञेनबहिःसंपूज्यमांप्रिये ॥ ज्ञानयज्ञरतोभूत्वापश्चाद्योगंसमभ्यसेत् ॥ ४३ ॥ विदितेममयाथात्म्येकर्मयज्ञेनदेहिनः ॥ नयजंतिहिमांयुक्ताःसमलोष्ठाश्मकांचनाः ॥ ४४ ॥ नित्ययुक्तोमुनिश्रेष्ठोमद्भक्तश्चसमाहितः ॥ ज्ञानयोगरतोयोगीममसायुज्यमाप्नुयात् ॥ ४५ ॥ अथाविरक्तचित्तायेवर्णिनोमदुपाश्रयाः ॥ ज्ञानचर्याक्रियास्वेवतेधिकुर्युस्तदर्हकाः ॥ ४६ ॥ बाह्यमाभ्यंतरंचैवबाह्याद्यांतरमेवच ॥ वाङ्मनःकायभेदाच्चत्रिधामद्भजनंविदुः ॥ ४७ ॥ जपःकर्मतपोध्यानंज्ञानंचेत्यनुपूर्वशः ॥ पंचधाकथ्यतेसद्भिस्तदेवभजनंपुनः ॥ ४८ ॥ अन्यात्मविदितंबाह्यमस्मदभ्यर्चनादिकं ॥ तदेवतुस्वसंवेद्यमाभ्यंतरमुदाहृतं ॥ ४९ ॥ मनोमत्प्रवणंचित्तंनमनोमात्रमुच्यते ॥ मन्नामनिरतावाणीवाङ्मताममनेतरा ॥ ५० ॥ लिंगैर्मच्छासनादिष्टैस्त्रिपुंड्रादिभिरंकितः ॥ ममोपचारनिरतःकायःकायोनचेतरः ॥ ५१ ॥ मदर्चाकर्मविज्ञेयंबाह्यंयागादिनोच्यते ॥ मदर्थेदेहसंशोषस्तपःकृच्छ्रादिनोमतं ॥ ५२ ॥ जपःपंचाक्षराभ्यासःप्रणवाभ्यासएवच ॥ रुद्राध्यायादिकाभ्यासोनवेदाध्ययनादिकं ॥ ५३ ॥ ध्यानंमद्रूपचिंताद्यंनात्माद्यर्थंसमाधयः ॥ ममागमार्थविज्ञानंज्ञानंनान्यार्थवेदनं ॥ ५४ ॥ बाह्येवाभ्यंतरेवाथयत्रस्यान्मनसोरतिः ॥ प्राग्वासनावशाद्देवितत्रनिष्ठांसमाचरेत् ॥ ५५ ॥ बाह्यादाभ्यंतरंश्रेष्ठंभवेच्छतगुणाधिकं ॥ असंकटत्वाद्दोषाणांदृष्टानामप्यसंभवात् ॥ ५६ ॥ शौचमाभ्यंतरंविद्यान्नबाह्यंशौचमुच्यते ॥ अंतःशौचवियुक्तात्माशुचिरप्यशुचिर्यतः ॥ ५७ ॥ बाह्यमाभ्यंतरंचैवभजनंभावपूर्वकम् ॥ नभावरहितंदेविविप्रलंभैककारणं ॥ ५८ ॥ ॥ ॥

त्यर्थः ॥ ५२ ॥ वेदाध्ययनादिकंपूर्वोक्तपंचाक्षरादिरहितं ॥ ५३ ॥ आत्मेति ॥ मद्रूपातिरिक्तात्माद्यर्थेत्यर्थः ॥ अन्यार्थवेदनंमदागमव्यतिरिक्तार्थज्ञानं ॥ ५४ ॥ ॥ ५५ ॥ आभ्यंतरस्यश्रेष्ठत्वेहेतुमाह ॥ असंकटत्वादिति ॥ सुकरत्वाद्बहिर्दृष्टानांदोषाणामप्यसंभवाच्चेत्यर्थः ॥ ५६ ॥ ५७ ॥ भावरहितंभजनमित्यनुषज्यते ॥ ५८ ॥



Indira Gandhi National Centre for the Arts

॥ ५९ ॥ ६० ॥ लघुः अल्पसुखकरःतस्यलघुत्वेहेतुमाह ॥ फलार्थीति ॥ तदभावेफलाभावे ॥ ६१ ॥ ६२ ॥ ६३ ॥ अविचिंत्येति ॥ इदंसफलमिदमफलमि त्यविचार्येत्यर्थः ॥ ६४ ॥ नपरइति ॥ भक्तप्रियत्वादितिभावः ॥ ६५ ॥ ६६ ॥ ६७ ॥ ६८ ॥ उपजीवतिआश्रयति ॥ ६९ ॥ सम्लेच्छः ॥ ७० ॥ देयं

कृतकृत्यस्यतृप्तस्यममकिंक्रियतेनरैः ॥ बहिर्वाभ्यंतरेवाथमयाभावोहिगृह्यते ॥ ५९ ॥ भावैकात्माक्रियादेविमम धर्मःसनातनः ॥ मनसाकर्मणावाचाप्यनपेक्ष्यफलंक्वचित् ॥ ६० ॥ फलोद्देशेनदेवेशिलघुर्ममसमाश्रयः ॥ फला र्थीतदभावेमांपरित्यक्तुंक्षमोयतः ॥ ६१ ॥ फलार्थिनोपियस्यैवमयिचित्तंप्रतिष्ठितं ॥ भावानुरूपफलदस्तस्याप्यहम निंदिते ॥ ६२ ॥ फलानपेक्षयायेषांमनोमत्प्रवणंभवेत् ॥ प्रार्थयेयुःफलंपश्चाद्भक्तास्तेपिममप्रियाः ॥ ६३ ॥ प्राक्सं स्कारवशादेवयेऽविचिंत्यफलाफले ॥ विवशामांप्रपद्यंतेममप्रियतमामताः ॥ ६४ ॥ मल्लाभान्नपरोलाभस्तेषामस्ति यथातथं ॥ ममापिलाभस्तल्लाभान्नपरःपरमेश्वरि ॥ ६५ ॥ मदनुग्रहतस्तेषांभावोमयिसमर्पितः ॥ फलंपरमनिर्वाणं प्रयच्छतिबलादिव ॥ ६६ ॥ महात्मनामनन्यानांमयिविन्यस्तचेतसां ॥ अष्टधालक्षणंप्राहुर्ममधर्माधिकारिणां ॥ ॥ ६७ ॥ मद्भक्तजनवात्सल्यंपूजायांचानुमोदनं ॥ स्वयमभ्यर्चनंचैवमदर्थेचांगचेष्टितं ॥ ६८ ॥ मत्कथाश्रवणेभक्तिः स्वरनेत्रांगविक्रियाः ॥ ममानुस्मरणंनित्यंयश्चमामुपजीवति ॥ ६९ ॥ एवमष्टविधंचिन्हंयस्मिन्म्लेच्छेपिवर्तते ॥ सविप्रेंद्रोमुनिःश्रीमान्सयतिःसचपंडितः ॥ ७० ॥ नमेप्रियश्चतुर्वेदीमद्भक्तःश्वपचोपियः ॥ तस्मैदेयंततोग्राह्यंसचपू ज्योयथाह्यहं ॥ ७१ ॥ पत्रंपुष्पंफलंतोयंयोमेभक्त्याप्रयच्छति ॥ तस्याहंनप्रणश्यामिसचमेनप्रणश्यति ॥ ७२ ॥ अथवक्ष्यामिदेवेशिभक्तानामधिकारिणां ॥ विदुषांद्विजमुख्यानांवर्णधर्मंसमासतः ॥ ७३ ॥ त्रिस्नानंचाग्निकार्यं चलिंगार्चनमनुत्तमं ॥ दानमीश्वरभावश्चदयासर्वत्रसर्वदा ॥ ७४ ॥ सत्यंसंतोषमास्तिक्यमहिंसासर्वजंतुषु ॥ ह्रीः श्रद्धाऽध्यापनंयोगःसदाध्ययनमेवच ॥ ७५ ॥ व्याख्यानंब्रह्मचर्यंचश्रवणंचतपःक्षमा ॥ शौचंशिखोपवीतंचउष्णी षंचोत्तरीयकं ॥ ७६ ॥ ॥ ॥ ॥ ॥ ॥

ज्ञानादिकमितिशेषः ॥ ७१ ॥ ग्राह्यमाह ॥ पत्रमिति ॥ ७२ ॥ ७३ ॥ त्रिस्नानंत्रिकालस्नानं ॥ ७४ ॥ ७५ ॥ व्याख्यानंवेदादीनामितिशेषः ॥ ७६ ॥

Indira Gandhi National Centre for the Arts

निषिद्धासेवनं कलंजभक्षणादिवर्जनं ॥ ७७ ॥ ब्रह्मकूर्चस्यब्रह्मकूर्चविधिनासंस्कृतस्यपंचगव्यस्य ॥ ७८ ॥ वर्जनमिति ॥ परगृहइतिशेषः ॥ ७९ ॥
नैवेद्यस्यमह्यमर्पितस्य ॥८०॥८१॥८२॥८३॥ एवंविप्रधर्मानुक्त्वाक्षत्रियादिधर्मानाह ॥ अध्यापनमिति ॥ विधीयतेअनुज्ञायते॥८४॥८५॥ अविश्वासइति
॥ नविश्वसेदविश्वस्तामित्युक्तेः ॥ कालेष्विति ॥ षोडशर्तुर्निशाःस्त्रीणांतासुयुग्मासुसंविशेदितियाज्ञवल्क्याद्युक्तकालेष्वित्यर्थः ॥ ८६ ॥ चारैर्गूढपुरुषैः ॥

निषिद्धासेवनंचैवभस्मरुद्राक्षधारणं ॥ पर्वण्यभ्यर्चनंदेविचतुर्दश्यांविशेषतः ॥ ७७ ॥ पानंचब्रह्मकूर्चस्यमासिमा
सियथाविधि ॥ अभ्यर्चनंविशेषेणतेनैवस्नाप्यमांप्रिये ॥७८॥ सर्वक्रियान्नसंत्यागःश्राद्धान्नस्यचवर्जनं ॥ तथापर्यु
षितान्नस्ययावकस्यविशेषतः ॥ ७९ ॥ मद्यस्यमद्यगंधस्यनैवेद्यस्यचवर्जनं ॥ सामान्यंसर्ववर्णानांब्राह्मणानांविशे
षतः ॥ ८० ॥ क्षमाशांतिश्चसंतोषःसत्यमस्तेयमेवच ॥ ब्रह्मचर्यममज्ञानंवैराग्यंभस्मसेवनं ॥ ८१ ॥ सर्वसंगनिवृ
त्तिश्चदशैतानिविशेषतः ॥ लिंगानियोगिनांभूयोदिवाभिक्षाशनंतथा ॥ ८२ ॥ वानप्रस्थाश्रमस्थानांसमानमिदमि
ष्यते ॥ रात्रौनभोजनंकार्यंसर्वेषांब्रह्मचारिणां ॥ ८३ ॥ अध्यापनंयाजनंचक्षत्रियस्यप्रतिग्रहः ॥ वैश्यस्यचविशे
षेणमयानात्रविधीयते ॥ ८४ ॥ रक्षणंसर्ववर्णानांयुद्धेशत्रुवधस्तथा ॥ दुष्टपक्षिमृगाणांचदुष्टानांशातनंनृणां ॥८५॥
अविश्वासश्चसर्वत्रविश्वासोममयोगिषु ॥ स्त्रीसंसर्गश्चकालेषुचमूरक्षणमेवच ॥ ८६ ॥ सदासंचारितैश्चारैर्लोकवृ
त्तांतवेदनं ॥ सदास्त्रधारणंचैवभस्मकंचुकधारणं ॥ ८७ ॥ राज्ञांममाश्रमस्थानामेषधर्मस्यसंग्रहः ॥ गोरक्षणंचवा
णिज्यंकृषिर्वैश्यस्यकथ्यते ॥ ८८ ॥ शुश्रूषेतरवर्णानांधर्मःशूद्रस्यकथ्यते ॥ उद्यानकरणंचैवममक्षेत्रसमाश्रयः ॥
॥ ८९ ॥ धर्मपत्न्यास्तुगमनंगृहस्थस्यविधीयते ॥ ब्रह्मचर्यंवनस्थानांयतीनांब्रह्मचारिणां ॥ ९० ॥ स्त्रीणांतुभर्तृशु
श्रूषाधर्मोनान्यःसनातनः ॥ ममार्चनंचकल्याणिनियोगोभर्तुरस्तिचेत् ॥ ९१ ॥ यानारीभर्तृशुश्रूषांविहायव्रतत
त्परा ॥ सानारीनरकंयातिनात्रकार्याविचारणा ॥ ९२ ॥ ॥ ॥

॥ ८७ ॥ ८८ ॥ क्षेत्रसमाश्रयइति ॥ धर्मःशूद्रस्येत्यादिसंबध्यते ॥ ८९ ॥ ९० ॥ स्त्रीणामिति ॥ तदुक्तंमनुनापि ॥ नास्तिस्त्रीणांपृथग्यज्ञोनव्रतंनाप्यु
पोषितं ॥ पतिंशुश्रूषतेयेनतेनस्वर्गेमहीयतइति ॥ ९१ ॥ तदेवाह ॥ यानारीति ॥ ९२ ॥ ॥ ॥ ॥



Indira Gandhi National Centre for the Arts

॥ ९३ ॥ संविभागःदुष्टेभ्योविविक्तता ॥ ९४ ॥ ९५ ॥ ९६ ॥ ९७ ॥ ९८ ॥ भावातिशयसंपन्नाःभक्त्यतिशययुताः ॥ ९९ ॥ १०० ॥ दुःखंदुःखकरं ॥ १०१ ॥ अतस्तान्प्रत्याह ॥ नास्तीति ॥ १०२ ॥ साध्यंप्राप्यं ॥ १०३ ॥ कथंतर्हितादृशामानवाजाताअतआह ॥ मद्भक्तानामिति ॥ १०४ ॥

अथभर्तृविहीनायावक्ष्येधर्मंसमासतः ॥ व्रतंदानंतपःशौचंभूशय्यानक्तभोजनं ॥ ९३ ॥ ब्रह्मचर्यंसदास्नानंभस्मना सलिलेनवा ॥ शांतिर्मौनंक्षमानित्यंसंविभागोयथाविधि ॥ ९४ ॥ अष्टम्यांचचतुर्दश्यांपौर्णमास्यांविशेषतः ॥ एकादश्यांचविधिवदुपवासोममार्चनं ॥ ९५ ॥ इतिसंक्षेपतःप्रोक्तममाश्रमनिषेवणं ॥ ब्रह्मक्षत्रविशांदेवियतीनांब्रह्मचारिणां ॥ ९६ ॥ तथैववानप्रस्थानांगृहस्थानांचसुंदरि ॥ शूद्राणामथनारीणांधर्मएषसनातनः ॥ ९७ ॥ ध्येयस्त्वयाहंदेवेशिसदाजाप्यःषडक्षरः ॥ वेदोक्तमखिलंधर्ममितिधर्मार्थसंग्रहः ॥ ९८ ॥ अथयेमानवालोकेस्वेच्छयाधृतविग्रहाः ॥ भावातिशयसंपन्नाःपूर्वसंस्कारसंयुताः ॥ ९९ ॥ विरक्ताश्चानुरक्तावास्त्रियादिविषयेष्वपि ॥ पापैर्नतेविलिप्यंतेपद्मपत्रमिवांभसा ॥ १०० ॥ तेषांममात्मविज्ञानंविशुद्धानांविवेकिनां ॥ मत्प्रसादाद्विशुद्धानांदुःखमाश्रमरक्षणं ॥ १०१ ॥ नास्तिकृत्यमकृत्यंचसमाधिर्वापरायणं ॥ नविधिर्ननिषेधश्चतेषांममयथातथा ॥ १०२ ॥ यथेहपरिपूर्णस्यसाध्यंममनविद्यते ॥ तथैवकृतकृत्यानांतेषामपिनसंशयः ॥ १०३ ॥ मद्भक्तानांहितार्थायमानुषंभावमाश्रिताः ॥ रुद्रलोकात्परिभ्रष्टास्तेरुद्रानात्रसंशयः ॥ १०४ ॥ ममानुशासनंयद्वद्ब्रह्मादीनांप्रवर्तकं ॥ तथानराणामन्येषांतन्नियोगःप्रवर्तकः ॥ १०५ ॥ ममाज्ञाधारभावेनमद्भावातिशयेनच ॥ तदालोकनमात्रेणसर्वपापक्षयोभवेत् ॥ ॥ १०६ ॥ प्रत्ययाश्चप्रवर्तंतेप्रशस्तफलसूचकाः ॥ मयिभाववतांपुंसांप्रागदृष्टार्थगोचराः ॥ १०७ ॥ कंपःस्वेदोश्रुपातश्चकंठेचस्वरविक्रिया ॥ आनंदाद्युपलब्धिश्चभवेदाकस्मिकीमुहुः ॥ १०८ ॥ एतैर्व्यस्तैःसमस्तैर्वालिंगैरव्यभिचारिभिः ॥ मंदमध्योत्तमैर्भावैर्विज्ञेयास्तेनरोत्तमाः ॥ १०९ ॥ ॥ ॥ ॥

॥ १०५ ॥ सर्वपापक्षयइति ॥ नराणामितिसंबध्यते ॥ १०६ ॥ प्रत्ययाःचिन्हानि ॥ १०७ ॥ प्रत्ययानाह ॥ कंपइति ॥ १०८ ॥ अव्यभिचारिभिःसदास्थितैः ॥ १०९ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

अयःलोहम् ॥ ११० ॥ १११ ॥ आवहेत्प्रापयेत् ॥ नराणामितिशेषः ॥ ११२ ॥ तूलायतेलघुभवति ॥ ११३ ॥ ११४ ॥ ११५ ॥ संग्रहइति ॥ एषएवसंग्रहोयो



यथाऽयोग्निसमावेशान्नायोभवतिकेवलं ॥ तथैवममसान्निध्यान्नतेकेवलमानुषाः ॥ ११० ॥ हस्तपादादिसाधर्म्या
द्रुद्रान्मर्त्यवपुर्धरान् ॥ प्राकृतानिवमन्वानोनावजानीतपंडितः ॥ १११ ॥अवज्ञानंकृतंतेषुनरैर्व्यामूढचेतनैः ॥ आ
युःश्रियंकुलंशीलंहत्वानिरयमावहेत् ॥ ११२ ॥ ब्रह्मविष्णुसुरेशानामपितूलायतेपदं ॥ मत्तोन्यदनपेक्षाणामुद्धृता
नांमहात्मनां ॥ ११३ ॥ अशुद्धंबौद्धमैश्वर्यंप्राकृतंपौरुषंतथा ॥ गुणेशानामतस्त्याज्यंगुणातीतपदैषिणां ॥ ११४ ॥
अथकिंबहुनोक्तेनश्रेयःप्राप्त्येकसाधनम् ॥ मयिचित्तसमासंगोयेनकेनापिहेतुना ॥ ११५ ॥ उपमन्युरुवाच ॥ इ
त्थंश्रीकंठनाथेनशिवेनपरमात्मना ॥ हितायजगतामुक्तोज्ञानसारार्थसंग्रहः ॥ ११६ ॥ विज्ञानसंग्रहश्चायंवेदशा
स्त्राणिकृत्स्नशः ॥ सेतिहासपुराणानिविद्याव्याख्यानविस्तरः ॥ ११७ ॥ ज्ञानंज्ञेयमनुष्ठेयमधिकारोथसाधनं ॥
साध्यंचेतिषडर्थानांसंग्रहस्त्वेषसंग्रहः ॥ ११८ ॥ गुरोरधिगतंज्ञानंज्ञेयःपाशःपशुःपतिः ॥ लिंगार्चनाद्यनुष्ठेयंभक्त
स्त्वधिकृतोद्विजः ॥ ११९ ॥ साधनंशिवमंत्राद्यंसाध्यंशिवसमानता ॥ षडर्थसंग्रहस्यास्यज्ञानात्सर्वज्ञतोच्यते ॥
॥ १२० ॥ प्रथमंकर्मयज्ञाद्यैर्भक्त्यावित्तानुसारतः ॥ बाह्येभ्यर्च्यशिवंपश्चादंतर्यागरतोभवेत् ॥ १२१ ॥ रतिरभ्यं
तरेयस्यनबाह्येपुण्यगौरवात् ॥ नकर्मकरणीयंहिबहिस्तस्यमहात्मनः ॥ १२२ ॥ ज्ञानामृतेनतृप्तस्यभक्त्याचैवशि
वात्मनः ॥ नांतर्नचबहिःकृष्णकृत्यमस्तिकदाचन ॥ १२३ ॥ तस्मात्क्रमेणसंत्यज्यबाह्यमाभ्यंतरंतथा ॥ ज्ञानेनज्ञे
यमालोक्यज्ञानंचापिपरित्यजेत् ॥ १२४ ॥ नैकाग्र्यंचेच्छिवेचित्तंकिंकृतेनापिकर्मणा ॥ एकाग्र्यमेवचेच्चित्तमकृतेनापि
कर्मणा ॥ १२५ ॥ तस्मात्कर्माण्यकृत्वावाकृत्वावांतर्बहिःक्रमात् ॥ येनकेनाप्युपायेनशिवेचित्तंनिवेशयेत् ॥ १२६ ॥

ग्यइतिभावः ॥ ११६ ॥ ११७ ॥ ज्ञानादीनर्थानाह ॥ ज्ञानमिति ॥ ११८ ॥ ११९ ॥ १२० ॥ १२१ ॥ १२२ ॥ १२३ ॥ १२४ ॥ किंकृतेनेति
॥ नकिमपीत्यर्थः ॥ १२५ ॥ १२६ ॥ ॥ ॥ ॥ ॥ ॥



Indira Gandhi National Centre for the Arts

॥ १२७ ॥ सःमंत्रः ॥ १२८ ॥ इतिश्रीशैवमहापुराणवायवीयसंहिताटीकायांसारबोधिन्यामुत्तरभागेशैवधर्मकथनंनामैकादशोऽध्यायः ॥ ११ ॥
ॐनमःशिवाय ॥ शैवःपंचाक्षरोमंत्रस्तत्स्वरूपंसविस्तरं ॥ तन्माहात्म्यंविशेषेण द्वादशेत्रनिरुप्यते ॥ १ ॥ १ ॥ २ ॥ षडक्षरइति ॥ प्रणवसहितत्त्वादि

शिवेनिविष्टचित्तानांप्रतिष्ठितधियांसतां ॥ परत्रेहचसर्वत्रनिर्वृतिःपरमाभवेत् ॥ १२७ ॥ इहोंनमःशिवायेतिमंत्रे
णानेनसिद्धयः ॥ सतस्माद्धिगंतव्यःपरावरविभूतये ॥ १२८ ॥ इतिश्रीशिवमहापुराणेवायवीयसंहितायामुत्तर
भागेएकादशोऽध्यायः ॥ ११ ॥ ॥ छ ॥ श्रीकृष्णउवाच ॥ महर्षिवरसर्वज्ञसर्वज्ञानमहोदधे ॥ पंचाक्षरस्यमाहा
त्म्यंश्रोतुमिच्छामितत्त्वतः ॥ १ ॥ उपमन्युरुवाच ॥ पंचाक्षरस्यमाहात्म्यंवर्षकोटिशतैरपि ॥ अशक्यंविस्तराद्वक्तुं
तस्मात्संक्षेपतःशृणु ॥ २ ॥ वेदेशिवागमेचायमुभयत्रषडक्षरः ॥ मंत्रःस्थितःसदामुख्योलोकेपंचाक्षरःस्मृतः ॥ ३ ॥
सर्वमंत्राधिकश्चायमोंकाराद्यःषडक्षरः ॥ सर्वेषांशिवभक्तानामशेषार्थप्रसाधकः ॥ ४ ॥ तदल्पाक्षरमर्थाढ्यंवेदसा
रंविमुक्तिदं ॥ आज्ञासिद्धमसंदिग्धंवाक्यमेतच्छिवात्मकं ॥ ५ ॥ नानासिद्धियुतंदिव्यंलोकचित्तानुरंजकं ॥ सुनि
श्चितार्थगंभीरंवाक्यंतत्पारमेश्वरं ॥ ६ ॥ मंत्रंसुखमुखोच्चार्यमशेषार्थप्रसिद्धये ॥ प्राहोंनमःशिवायेतिसर्वज्ञःसर्वदे
हिनां ॥ ७ ॥ तद्बीजंसर्वविद्यानांमंत्रमाद्यंषडक्षरं ॥ अतिसूक्ष्मंमहार्थंचज्ञेयंतद्वटबीजवत् ॥ ८ ॥ देवोगुणत्रयाती
तःसर्वज्ञःसर्वकृत्प्रभुः ॥ ओमित्येकाक्षरेमंत्रेस्थितःसर्वगतःशिवः ॥ ९ ॥ ईशानाद्यानिसूक्ष्माणिब्रह्माण्येकाक्षराणि
तु ॥ मंत्रेनमःशिवायेतिसंस्थितानियथाक्रमं ॥ १० ॥ मंत्रेषडक्षरेसूक्ष्मेपंचब्रह्मतनुःशिवः ॥ वाच्यवाचकभावेनस्थि
तःसाक्षात्स्वभावतः ॥ ११ ॥ वाच्यःशिवःप्रमेयत्वान्मंत्रस्तद्वाचकःस्मृतः ॥ वाच्यवाचकभावोयमनादिःसंस्थितस्त
योः ॥ १२ ॥ यथानादिःप्रवृत्तोयंघोरसंसारसागरः ॥ शिवोपिहितथानादिःसंसारान्मोचकःस्थितः ॥ १३ ॥

तिभावः ॥ ३ ॥ तदेवाह ॥ सर्वेति ॥ ४ ॥ तत्पंचाक्षरमंत्ररूपं ॥ ५ ॥ ६ ॥ सुखमुखोच्चार्यसुखंयथातथामुखेनोच्चार्य ॥ सर्वज्ञःशिवः ॥ ७ ॥ ८ ॥ ९ ॥
ईशानाद्यानिईशानतत्पुरुषाघोरवामदेवसद्योजाताख्यानि ॥ १० ॥ पंचब्रह्मतनुःपंचमंत्रात्मकः ॥ ११ ॥ १२ ॥ १३ ॥ ॥

ननुशिवाराधनमतिक्लेशसाध्यमतस्तत्कर्तुंप्रवृत्तिर्नभवेदतआह ॥ व्याधीनामिति ॥ प्रतिपक्षःशत्रुःअतःकथमपितदाराधनंकर्तव्यमेवेतिभावः ॥ १४ ॥ १५ ॥ पुरुषस्यादिजीवस्य ॥ १६ ॥ सांख्यादिमतंखंडयन्नाह ॥ प्रधानेति ॥ १७ ॥ १८ ॥ १९ ॥ २० ॥ २१ ॥ तस्यशिवस्य ॥ सःशिवः ॥ २२ ॥ २३ ॥





व्याधीनांभेषजंयद्वत्प्रतिपक्षःस्वभावतः ॥ तद्वत्संसारदोषाणांप्रतिपक्षःशिवःस्मृतः ॥ १४ ॥ असत्यस्मिन्जगन्ना थेतमोभूतमिदंभवेत् ॥ आदित्येनयथाहीनंनिरालोकमिदंजगत् ॥ १५ ॥ अभावादीश्वरस्येयंजगत्सृष्टिःकथंभवे त् ॥ अचेतनत्वात्प्रकृतेरज्ञत्वात्पुरुषस्यच ॥ १६ ॥ प्रधानपरमाण्वादियावत्किंचिदचेतनं ॥ नतत्कर्तृस्वयंदृष्टंबुद्धि मत्कारणंविना ॥ १७ ॥ धर्माधर्मोपदेशश्चबंधमोक्षविचारणा ॥ नसर्वज्ञंविनापुंसामादिसर्गेप्रसिध्यति ॥ १८ ॥ वैद्यंविनानिरानंदाःक्लिश्यंतेरोगिणोयथा ॥ शिवंविनानिरानंदंक्लिश्यतेहिजगत्तथा ॥ १९ ॥ तस्मादनादिःसर्वज्ञः परिपूर्णःसदाशिवः ॥ अस्तिनाथःपरित्रातापुंसांसंसारसागरात् ॥ २० ॥ आदिमध्यांतनिर्मुक्तःस्वभावविमलःप्र भुः ॥ सर्वज्ञःपरिपूर्णश्चशिवोज्ञेयःशिवागमे ॥ २१ ॥ तस्याभिधानमंत्रोयमभिधेयश्चसस्मृतः ॥ अभिधानाभिधे यत्वान्मंत्रःसिद्धःपरःशिवः ॥ २२ ॥ एतावत्तुशिवज्ञानमेतावत्परमंपदं ॥ यदोंनमःशिवायेतिशिववाक्यंषडक्षरं ॥ ॥ २३ ॥ विधिवाक्यमिदंशैवंनार्थवादंशिवात्मकं ॥ यःसर्वज्ञःससंपूर्णःस्वभावविमलःशिवः ॥ २४ ॥ लोकानुग्रह कर्ताचसमृषार्थंकथंवदेत् ॥ यद्यथावस्थितंवस्तुगुणदोषैःस्वभावतः ॥ २५ ॥ यावत्फलंचयत्पुण्यंसर्वज्ञस्तुतथावदेत् ॥ रागाज्ञानादिभिर्दोषैर्ग्रस्तत्वादनृतंवदेत् ॥ २६ ॥ तेचेश्वरेनविद्यंतेब्रूयात्सकथमन्यथा ॥ अजातादोषदोषेणसर्वज्ञे नशिवेनयत् ॥ २७ ॥ प्रणीतममलंवाक्यंतत्प्रमाणंनसंशयः ॥ तस्मादीश्वरवाक्यानिश्रद्धेयानिविपश्चिता ॥ २८ ॥ यथार्थपुण्यपापेषुतदश्रद्धोव्रजत्यधः ॥ स्वर्गापवर्गसिध्यर्थंभाषितंयत्सुशोभनं ॥ २९ ॥ वाक्यंमुनिवरैःशांतैस्तद्वि ज्ञेयंसुभाषितं ॥ रागद्वेषानृतक्रोधकामतृष्णानुसारियत् ॥ ३० ॥ ॥ ॥



अर्थवादंकेवलस्तुतिरूपं ॥ तत्रहेतुमाह ॥ सर्वज्ञइति ॥ २४ ॥ २५ ॥ २६ ॥ तेचरागादयः ॥ अजाताइति ॥ दोषाणामेवदोषेणानुत्पन्नाइत्यर्थः ॥ ॥ २७ ॥ २८ ॥ २९ ॥ ३० ॥ ॥ ॥ ॥ ॥

Indira Gandhi National Centre for the Arts

मृदुनाकोमलाक्षरयुतेन ॥ ३१ ॥ ३२ ॥ विरूपंकठिनाक्षरादियुतं ॥ ३३ ॥ ३४ ॥ ३५ ॥ भिन्नःसंभिन्नःअभिन्नइतिवा ॥ सूत्रमिति ॥ सूत्रंवृत्यात्मनाविव

वाक्यंनिरयहेतुत्वात्तद्दुर्भाषितमुच्यते ॥ सत्कृतेनापिकिंतेनमृदुनाललितेनवा ॥ ३१ ॥ अविद्यारागवाक्येनसंसार क्लेशहेतुना ॥ यच्छ्रुत्वाजायतेश्रेयोरागादीनांचसंक्षयः ॥ ३२ ॥ विरूपमपितद्वाक्यंविज्ञेयमतिशोभनं ॥ बहुत्वेपिहि मंत्राणांसर्वज्ञेनशिवेनयत् ॥ ३३ ॥ प्रणीतममलंमंत्रंनतेनसदृशंक्वचित् ॥ सांगानिवेदशास्त्राणिसंस्थितानिषडक्ष रे ॥ ३४ ॥ नतेनसदृशस्तस्मान्मंत्रोन्योस्तिपरःक्वचित् ॥ सप्तकोटिमहामंत्रैरुपमंत्रैरनेकधा ॥ ३५ ॥ मंत्रःषडक्ष रोभिन्नःसूत्रंवृत्यात्मनायथा ॥ शिवज्ञानानियावंतिविद्यास्थानानियानिच ॥ ३६ ॥ षडक्षरस्यसूत्रस्यतानिभाष्यं समासतः ॥ किंतस्यबहुभिर्मंत्रैःशास्त्रैर्वाबहुविस्तरैः ॥ ३७ ॥ यस्योंनमःशिवायेतिमंत्रोयंहृदिसंस्थितः ॥ तेनाधी तंश्रुतंतेनकृतंसर्वमनुष्ठितं ॥ ३८ ॥ येनोंनमःशिवायेतिमंत्राभ्यासःस्थिरीकृतः ॥ नमस्कारादिसंयुक्तंशिवायेत्यक्षर त्रयं ॥ ३९ ॥ जिव्हाग्रेवर्ततेयस्यसफलंतस्यजीवितं ॥ अंत्यजोवाधमोवापिमूर्खोवापंडितोपिवा ॥ ४० ॥ पंचाक्षर जपेनिष्ठोमुच्यतेपापपंजरात् ॥ इत्युक्तंपरमेशेनदेव्यापृष्टेनशूलिना ॥ ४१ ॥ हितायसर्वमर्त्यानांतिष्यजानांविशेष तः ॥ देव्युवाच ॥ कलौकलुषितेकालेदुर्जयेदुरतिक्रमे ॥ ४२ ॥ अपुण्यतमसाच्छन्नेलोकेधर्मपराङ्मुखे ॥ क्षीणेव र्णसमाचारेसंकरेसमुपस्थिते ॥ ४३ ॥ सर्वाधिकारेसंदिग्धेनिश्चितेवाविपर्यये ॥ तदोपदेशेविहतेगुरुशिष्यक्रमेग ते ॥ ४४ ॥ केनोपायेनमुच्यंतेभक्तास्तवमहेश्वर ॥ महेश्वरउवाच ॥ आश्रित्यपरमांविद्यांत्हृद्यांपंचाक्षरींमम ॥ ॥ ४५ ॥ भक्त्याचभावितात्मानोमुच्यंतेकलिजानराः ॥ मनोवाक्कायजैर्दोषैर्वक्तुंस्मर्तुमगोचरैः ॥ ४६ ॥ दूषितानां कृतघ्नानांनिर्दयानांखलात्मनां ॥ लुब्धानांवक्रमनसामपिमत्प्रवणात्मनां ॥ ४७ ॥ ममपंचाक्षरीविद्यासंसारभय तारिणी ॥ मयैवमसकृद्देविप्रतिज्ञातंधरातले ॥ ४८ ॥ ॥ ॥ ॥

रणरूपेणयथाऽभिन्नंतद्वदित्यर्थः ॥ तदेवाह ॥ शिवेति ॥ ३६ ॥ ३७ ॥ ३८ ॥ ३९ ॥ ४० ॥ निष्ठःतत्परः ॥ ४१ ॥ ४२ ॥ ४३ ॥ विपर्ययेधर्मनाशे ॥ उपदेशेमंत्रोपदेशे ॥ गतेनष्टे ॥ ४४ ॥ ४५ ॥ ४६ ॥ ४७ ॥ ४८ ॥ ॥ ॥ ॥ ॥

अनयापंचाक्षरमंत्ररूपया ॥ ४९ ॥ ५० ॥ ५१ ॥ ५२ ॥ एतैःअब्भक्षणादिभिः ॥ ५३ ॥ ५४ ॥ ५५ ॥ ५६ ॥ अरुद्रःरुद्रभक्तिरहितः ॥ सरुद्रः रुद्रभक्तियुतः ॥ ५७ ॥ ब्रह्मांगेनब्रह्मरूपोमंत्रस्तत्साधनेन ॥ ५८ ॥ लब्धःगुरोर्लब्धमंत्रःमंत्रग्रहणविधिर्वक्ष्यते ॥ अलब्धस्तद्भिन्नः ॥ ५९ ॥ ६० ॥ ६१ ॥





पतितोपिविमुच्येतमद्भक्तोविद्ययानया ॥ देव्युवाच ॥ कर्मायोग्योभवेन्मर्त्यःपतितोयदिसर्वथा ॥ ४९ ॥ कर्मायोग्येनयत्कर्मकृतंचनरकायहि ॥ ततःकथंविमुच्येतपतितोविद्ययानया ॥ ५० ॥ ईश्वरउवाच ॥ तथ्यमेतत्त्वयाप्रोक्तं तथाहिशृणुसुंदरि ॥ रहस्यमितिमत्वैतद्गोपितंयन्मयापुरा ॥ ५१ ॥ समंत्रकंमांपतितःपूजयेद्यदिमोहितः ॥ नारकीस्यान्नसदेहोममपंचाक्षरंविना ॥ ५२ ॥ अब्भक्षावायुभक्षाश्चयेचान्येव्रतकर्शिताः ॥ तेषामेतैर्व्रतैर्नास्तिममलोकसमागमः ॥ ५३ ॥ भक्त्यापंचाक्षरेणैवयोहिमांसकृदर्चयेत् ॥ सोपिगच्छेन्ममस्थानंमंत्रस्यास्यैवगौरवात् ॥ ५४ ॥ तस्मात्तपांसियज्ञाश्चव्रतानिनियमास्तथा ॥ पंचाक्षरार्चनस्यैतेकोट्यंशेनापिनोसमाः ॥ ५५ ॥ बद्धोवाप्यथवामुक्तःपाशात्पंचाक्षरेणयः ॥ पूजयेन्मांसमुच्येतनात्रकार्याविचारणा ॥ ५६ ॥ अरुद्रोवासरुद्रोवासकृत्पंचाक्षरेणयः ॥ पूजयेत्पतितोवापिमूढोवामुच्यतेनरः ॥ ५७ ॥ षडक्षरेणवादेवितथापंचाक्षरेणवा ॥ सब्रह्मांगेनमांभक्त्यापूजयेद्यदिमुच्यते ॥ ५८ ॥ पतितोपतितोवापिमंत्रेणानेनपूजयेत् ॥ ममभक्तोजितक्रोधोह्यलब्धोलब्धएववा ॥ ५९ ॥ अलब्धाल्लब्धएवेहकोटिकोटिगुणाधिकः ॥ तस्माल्लब्ध्वैवमांदेविमंत्रेणानेनपूजयेत् ॥ ६० ॥ लब्ध्वासंपूजयेद्यस्तुमैत्र्यादिगुणसंयुतः ॥ ब्रह्मचर्यरतोभक्त्यामत्सादृश्यमवाप्नुयात् ॥ ६१ ॥ किमत्रबहुनोक्तेनभक्ताःसर्वेधिकारिणः ॥ ममपंचाक्षरेमंत्रेतस्माच्छ्रेष्ठतरोहिसः ॥ ६२ ॥ पंचाक्षरप्रभावेनलोकावेदामहर्षयः ॥ तिष्ठंतिशाश्वताधर्मादेवाःसर्वमिदंजगत् ॥ ६३ ॥ प्रलयेसमनुप्राप्तेनष्टेस्थावरजंगमे ॥ सर्वंप्रकृतिमापन्नंतत्रसंलयमेष्यति ॥ ६४ ॥ एकोहंसंस्थितोदेविनद्वितीयोस्तिकुत्रचित् ॥ तदावेदाश्चशास्त्राणिसर्वेपंचाक्षरेस्थिताः ॥ ६५ ॥ तेनाशंनैवसंप्राप्तामच्छक्त्याह्यनुपालिताः ॥ गुणमूर्त्यात्मनांचैवततोवांतरसंहृतिः ॥ ६६ ॥ ॥ ॥ ॥



॥ ६२ ॥ ६३ ॥ ६४ ॥ भूतसर्गवृत्तमाह ॥ एकइति ॥ ६५ ॥ गुणमूर्त्यात्मनांगुणकृतमूर्तिरूपाणांब्रह्मादीनां ॥ अवांतरसंहृतिःअवांतरप्रलयः ॥ ६६ ॥

Indira Gandhi National Centre for the Arts

॥ ६७ ॥ ६८ ॥ ६९ ॥ तेषांमुनीनां ॥ यत्प्रोवाचतदाह ॥ मत्पुत्राणामिति ॥ ७० ॥ तेनब्रह्मणा ॥ ७१ ॥ सःब्रह्मा ॥ ७२ ॥ ७३ ॥ ७४ ॥

ततःसृष्टिरभून्मत्तःप्रकृत्यात्मप्रभेदतः ॥ तदानारायणःशेतेदेवोमायामयींतनुम् ॥ ६७ ॥ आस्थायभोगिपर्यंकश
यनेतोयमध्यगः ॥ तन्नाभिपंकजाज्जातःपंचवक्त्रःपितामहः ॥ ६८ ॥ सिसृक्षमाणोलोकांस्त्रीनशक्तोह्यसहायवान् ॥
मुनीन्दशससर्जादौमानसानमितौजसः ॥ ६९ ॥ तेषांसिद्धिविवृद्ध्यर्थंमांप्रोवाचपितामहः ॥ मत्पुत्राणांमहादेवश
क्तिंदेहिमहेश्वर ॥ ७० ॥ इत्येवंप्रार्थितस्तेनपंचवक्त्रधरोह्यहम् ॥ पंचाक्षराणिक्रमशःप्रोक्तवान्पद्मयोनये ॥ ७१ ॥
सपंचवदनैस्तानिगृण्हन्लोकपितामहः ॥ वाच्यवाचकभावेनज्ञातवान्मांमहेश्वरं ॥ ७२ ॥ ज्ञात्वाप्रयोगंविधिवत्
सिद्धमंत्रःप्रजापतिः ॥ पुत्रेभ्यःप्रददौमंत्रंमंत्रार्थंचयथातथं ॥ ७३ ॥ तेचलब्ध्वामंत्ररत्नंसाक्षाल्लोकपितामहात् ॥
तदाज्ञप्तेनमार्गेणमदाराधनकांक्षिणः ॥ ७४ ॥ मेरोस्तुशिखरेरम्येमुंजवान्नामपर्वतः ॥ मत्प्रियःसततंश्रीमान्मद्भ
क्तैरपिरक्षितः ॥ ७५ ॥ तस्याभ्याशेतपस्तीव्रंलोकसृष्टिसमुत्सुकाः ॥ दिव्यंवर्षसहस्रंतुवायुभक्षाःसमाचरन् ॥ ७६ ॥
तेषांभक्तिमहंदृष्ट्वासद्यःप्रत्यक्षतामियां ॥ ऋषिंछंदश्चकीलंचबीजंशक्तिंचदैवतं ॥ ७७ ॥ न्यासंषडंगदिग्बंधंविनि
योगमशेषतः ॥ प्रोक्तवानहमार्याणांजगत्सृष्टिविवृद्धये ॥ ७८ ॥ ततस्तेमंत्रमाहात्म्यादृषयस्तपसैधिताः ॥ सृष्टिं
वितन्वतेसम्यक्सदेवासुरमानुषां ॥ ७९ ॥ अस्याःपरमविद्यायाःस्वरूपमधुनोच्यते ॥ आदौनमःप्रयोक्तव्यंशिवा
येतिततःपरम् ॥ ८० ॥ सैषापंचाक्षरीविद्यासर्वश्रुतिशिरोगता ॥ शब्दजातस्यसर्वस्यबीजभूतासमासतः ॥ ८१ ॥
प्रथमंमन्मुखोद्गीर्णासाममैवास्तिवाचिका ॥ तप्तचामीकरप्रख्यापीनोन्नतपयोधरा ॥ ८२ ॥ चतुर्भुजात्रिनयनाबालें
दुकृतशेखरा ॥ पद्मोत्पलकरीसौम्यावरदाभयपाणिका ॥ ८३ ॥ सर्वलक्षणसंपन्नासर्वाभरणभूषिता ॥ सितपद्मा
सनासीनानीलकुंचितमूर्धजा ॥ ८४ ॥ ॥ ॥ ॥ ॥

॥ ७५ ॥ समाचरन्निति ॥ तद्इतिसंबध्यते ॥ ७६ ॥ तेषांब्रह्मपुत्राणाम् ॥ ७७ ॥ ७८ ॥ ७९ ॥ अस्याःपंचाक्षरमंत्ररूपायाः ॥ ८० ॥ ८१ ॥
एतद्विद्यायाःकल्पितंस्वरूपमाह ॥ तप्तेति ॥ ८२ ॥ ८३ ॥ ८४ ॥ ॥ ॥ ॥ ॥

Indira Gandhi National Centre for the Arts.

एतल्लेखनप्रकारमाह ॥ अस्याइति ॥ ८५ ॥ प्रयोज्याःस्थापनीयाः ॥ तत्प्रकारमाहि ॥ अर्धेति ॥ ८६ ॥ बीजमिति ॥ एतदग्रेव्यक्तीकरिष्यते ॥ ८७ ॥ ॥ ८८ ॥ वर्णानांनकारादीनां ॥ ८९ ॥ तेषांपूर्वोक्तवर्णानां ॥ ९० ॥ पूर्वादिष्विति ॥ आदिनादक्षिणपश्चिमोत्तरादिशोग्राह्याः ॥ ९१ ॥ उदात्तइति ॥ प्रथमोनकारः ॥ चतुर्थोवावर्णः ॥ द्वितीयोमकारः ॥ पंचमोयकारः ॥ शिवर्णस्तृतीयःनिहतोऽनुदात्तः ॥ तत्रनकारवाकाराबुदात्तौमकारयकारौस्वरितौ

अस्याःपंचविधावर्णाःप्रस्फुरद्रश्मिमंडलाः ॥ पीतःकृष्णस्तथाधूम्रःस्वर्णाभोरक्तएवच ॥ ८५ ॥ पृथक्प्रयोज्याय द्येतेबिंदुनादविभूषिताः ॥ अर्धचंद्राकृतिर्बिंदुर्नादोदीपशिखाकृतिः ॥ ८६ ॥ बीजंद्वितीयंबीजेषुमंत्रस्यास्यवरान ने ॥ दीर्घपूर्वंतुरीयस्यपंचमंशक्तिमादिशेत् ॥ ८७ ॥ वामदेवोनामऋषिःपंक्तिच्छंदउदाहृतम् ॥ देवताशिवएवाहं मंत्रस्यास्यवरानने ॥ ८८ ॥ गौतमोत्रिर्वरारोहेविश्वामित्रस्तथांगिराः ॥ भरद्वाजश्चवर्णानांक्रमशोऋषयःस्मृताः ॥ ॥ ८९ ॥ गायत्र्यनुष्टुप्त्रिष्टुप्चछंदांसिबृहतीविराट् ॥ इंद्रोरुद्रोहरिर्ब्रह्मास्कंदस्तेषांचदेवताः ॥ ९० ॥ ममपंचमुखा न्याहुःस्थानंतेषांवरानने ॥ पूर्वादिषूर्ध्वपर्यंतंनकारादियथाक्रमम् ॥ ९१ ॥ उदात्तःप्रथमोवर्णश्चतुर्थश्चद्वितीयकः ॥ पंचमःस्वरितश्चैवतृतीयोनिहतःस्मृतः ॥ ९२ ॥ मूलविद्याशिवंचैवंसूत्रंपंचाक्षरस्तथा ॥ नामान्यस्यविजानीयाच्छै वंमेहृदयंमहत् ॥ ९३ ॥ नकारःशिरउच्येतमकारस्तुशिखोच्यते ॥ शिकारःकवचंतद्वद्वाकारोनेत्रमुच्यते ॥ ९४ ॥ यकारोस्त्रंनमःस्वाहावषट्हुंवौषडित्यपि ॥ फडित्यपिचवर्णानामंतेंगत्वंयदातदा ॥ ९५ ॥ तत्रापिमूलमंत्रोयंकिंचि द्भेदसमन्वयात् ॥ तत्रापिपंचमोवर्णोद्वादशस्वरभूषितः ॥ ९६ ॥ तस्मादनेनमंत्रेणमनोवाक्कायभेदतः ॥ आवयोर र्चनंकुर्याज्जपहोमादिकंतथा ॥ ९७ ॥ यथाप्रज्ञंयथाश्रद्धंयथाकालंयथामति ॥ यथाशक्तियथासंपद्यथायोगंयथार ति ॥ ९८ ॥ यदाकदापिवाभक्त्यायत्रकुत्रापिवाकृता ॥ येनकेनापिवादेविपूजामुक्तिंनयिष्यति ॥ ९९ ॥

शिकारोनुदात्तइत्यर्थः रुद्राध्यायेतथैवपाठात्व्याकरणरीत्यापितथैवसिद्धत्वाच्च ॥ ९२ ॥ शिवंकल्याणप्रदम् ॥ अस्यशिवस्य ॥ ९३ ॥ ९४ ॥ ॥९५॥ तमेवभेदमाह ॥ तत्रापीति ॥ द्वादशस्वरऐकारः ॥ ९६ ॥ ९७ ॥ यथायोगंयथासंभवं ॥ ९८ ॥ नयिष्यतिप्रापयिष्यति ॥ ९९ ॥



Gandhi National Centre for the Arts

॥ १०० ॥ १०१ ॥ १०२ ॥ आज्ञाहीनंउपदेशहीनं ॥ १०३ ॥ १०४ ॥ तत्त्ववेदिनंशिवतत्त्वज्ञं ॥ १०५ ॥ १०६ ॥ १०७ ॥ विभवेऐश्वर्ये ॥ १०८ ॥

मय्यासक्तेनमनसायत्कृतंममसुंदरि ॥ मत्प्रियंचशिवंचैवक्रमेणाप्यक्रमेणवा ॥ १०० ॥ तथापिममभक्तायेनात्यंत विवशाःपुनः ॥ तेषामर्थेतुशास्त्रेषुमयैषनियमःकृतः ॥ १०१ ॥ तत्रादौसंप्रवक्ष्यामिमंत्रसंग्रहणंशुभम् ॥ यद्विना निष्फलंजाप्यंयेनवासफलंभवेत् ॥ १०२ ॥ आज्ञाहीनंक्रियाहीनंश्रद्धाहीनंवरानने ॥ आज्ञार्थंदक्षिणाहीनंसदा जप्तंचनिष्फलम् ॥ १०३ ॥ आज्ञासिद्धंक्रियासिद्धंश्रद्धासिद्धंमदात्मकं ॥ एवंचेद्दक्षिणायुक्तंमंत्रसिद्धंमहत्फलं ॥ ॥ १०४ ॥ उपगम्यगुरुंविप्रमाचार्यंतत्त्ववेदिनं ॥ जापिनंसद्गुणोपेतंध्यानयोगपरायणम् ॥ १०५ ॥ तोषयेत्तंप्रय त्नेनभावशुद्धिसमन्वितः ॥ वाचाचमनसाचैवकायेनद्रविणेनच ॥ १०६ ॥ आचार्यंपूजयेच्छिष्यःसर्वदाहिप्रयत्न तः ॥ हस्त्यश्वरथरत्नानिक्षेत्राणिचगृहाणिच ॥ १०७ ॥ भूषणानिचवासांसिधान्यानिचधनानिच ॥ एतानिगुरवे दद्याद्भक्त्याचविभवेसति ॥ १०८ ॥ वित्तशाठ्यंनकुर्वीतयदीच्छेत्सिद्धिमात्मनः ॥ पश्चान्निवेदयेद्देविस्वात्मानंस परिच्छदं ॥ १०९ ॥ एवंसंपूज्यविधिवद्यथाशक्तित्ववंचयन् ॥ आददीतगुरोर्मंत्रंज्ञानंचैवक्रमेणतु ॥ ११० ॥ एवं तुष्टोगुरुःशिष्यंपूजकंवत्सरोषितम् ॥ शुश्रूषुमनहंकारंस्नातंशुचिमुपोषितम् ॥ १११ ॥ स्नापयित्वाविशुध्यर्थंपूर्ण कुंभघृतेनवै ॥ जलेनमंत्रशुद्धेनपुण्यद्रव्ययुतेनच ॥ ११२ ॥ अलंकृत्यसुवेषंचगंधस्त्रग्वस्त्रभूषणैः ॥ पुण्याहंवाचयि त्वाचब्राह्मणानभिपूज्यच ॥ ११३ ॥ समुद्रतीरेनद्यांचगोष्ठेदेवालयेपिवा ॥ शुचौदेशेगृहेवापिकालेसिद्धिकरेतिथौ ॥ ॥ ११४ ॥ नक्षत्रेशुभयोगेचसर्वदोषविवर्जिते ॥ अनुगृह्यततोदद्याज्ज्ञानंममयथाविधि ॥ ११५ ॥ स्वरेणोच्चारये त्सम्यगेकांतेतिप्रसन्नधीः ॥ उच्चार्योच्चारयित्वातमावयोर्मंत्रमुत्तमम् ॥ ११६ ॥ शिवंचास्तुशुभंचास्तुशोभनोस्तु प्रियोस्त्विति ॥ एवंदद्याद्गुरुर्मंत्रमाज्ञांचैवततःपरम् ॥ ११७ ॥ ॥ ॥ ॥

॥ १०९ ॥ ११० ॥ वत्सरोषितंसंवत्सरपर्यंतंस्थितं ॥ उपोषितंअभुक्तवंतं ॥ १११ ॥ ११२ ॥ ११३ ॥ ११४ ॥ ११५ ॥ ११६ ॥ मंत्रमाह ॥ शिव मिति ॥ आज्ञांजपविषयमुपदेशं ॥ ११७ ॥ ॥ ॥ ॥ ॥

Indira Gandhi National Centre for the Arts

॥ ११८ ॥ ११९ ॥ अक्षरेति ॥ यावंतिमंत्रेऽक्षराणितावल्लक्षमित्यर्थः ॥ १२० ॥ १२१ ॥ त्वयेति ॥ त्वयासहेत्यर्थः ॥ १२२ ॥ तत्वानिभूतानिदहनप्ला
वनादिभिःवक्ष्यमाणैस्तनुदाहप्लावनादिभिः ॥ १२३ ॥ मंत्रन्यासादिकंषडंगन्यासादिकं ॥ सकलीकृतेति ॥ सकलीकरणंचदेवतांगेषडंगानांन्यासःस्या



एवंलब्ध्वागुरोर्मंत्रमाज्ञांचैवसमाहितः ॥ संकल्प्यचजपेन्नित्यंपुरश्चरणपूर्वकम् ॥ ११८ ॥ यावज्जीवंजपेन्नित्यम
ष्टोत्तरसहस्रकं ॥ अनन्यस्तत्परोभूत्वासयातिपरमांगतिं ॥ ११९ ॥ जपेदक्षरलक्षंवैचतुर्गुणितमादरात् ॥ नक्ता
शीसंयमीयःसपौरश्चरणिकःस्मृतः ॥ १२० ॥ यःपुरश्चरणंकृत्वानित्यजापीभवेत्पुनः ॥ तस्यनास्तिसमोलोकेस
सिद्धःसिद्धिदोभवेत् ॥ १२१ ॥ स्नानंकृत्वाशुचौदेशेबध्वारुचिरमासनम् ॥ त्वयामांत्वदिसंचिंत्यसंचिंत्यस्वगुरुंततः ॥
॥ १२२ ॥ उदङ्मुखःप्राङ्मुखोवामौनीचैकाग्रमानसः ॥ विशोध्यपंचतत्त्वानिदहनप्लावनादिभिः ॥ १२३ ॥ मंत्र
न्यासादिकंकृत्वासकलीकृतविग्रहः ॥ आवयोर्विग्रहंध्यायन्प्राणापानौनियम्यच ॥१२४॥ विद्यास्थानंस्वकंरूपमृ
षिंछंदोधिदैवतम् ॥ बीजंशक्तिंतथावाच्यंस्मृत्वापंचाक्षरींजपेत् ॥ १२५॥ उत्तमंमानसंजाप्यमुपांशुमध्यमंविदुः॥
अधमंवाचिकंप्राहुरागमार्थविशारदाः ॥ १२६ ॥ उत्तमंरुद्रदैवत्यंमध्यमंविष्णुदैवतं ॥ अधमंब्रह्मदैवत्यमित्याहुर
नुपूर्वशः ॥ १२७ ॥ यदुच्चनीचस्वरितैःशब्दैःस्पष्टपदाक्षरैः ॥ मंत्रमुच्चारयेद्वाचावाचिकोयंजपःस्मृतः ॥ १२८ ॥
जिव्हामात्रपरिस्पंदादीषदुच्चारितोपिवा ॥ अपरैरश्रुतःकिंचिच्छ्रुतोवोपांशुरुच्यते ॥ १२९ ॥ धियायदक्षरश्रेण्या
वर्णाद्वर्णंपदात्पदम् ॥ शब्दार्थचिंतनंभूयःकथ्यतेमानसोजपः ॥ १३० ॥ वाचिकस्त्वेकएवस्यादुपांशुःशतमुच्यते ॥
साहस्रोमानसःप्रोक्तःसगर्भस्तुशताधिकः ॥ १३१ ॥ प्राणायामसमायुक्तःसगर्भोजपउच्यते ॥ आद्यंतयोरगर्भो
पिप्राणायामःप्रशस्यते ॥ १३२ ॥ चत्वारिंशत्समावृत्तिप्राणानायम्यसंस्मरेत् ॥ मंत्रमंत्रार्थविद्धीमानशक्तःशक्ति
तोजपेत् ॥ १३३ ॥ पंचकंत्रिकमेकंवाप्राणायामंसमाचरेत् ॥ अगर्भंवासगर्भंवासगर्भस्तत्रशस्यते ॥ १३४ ॥

त्सकलाकृतिरित्युक्त ॥ एतदग्रेस्फुटीकरिष्यते ॥१२४॥१२५॥१२६॥२२७॥१२८॥१२९॥१३०॥१३१ ॥ सगर्भइति ॥ आद्यंतयोःप्राणायामसमायुक्तः
सगर्भोजपइत्यन्वयः ॥ अगर्भोपीतिपक्षांतरं ॥ प्राणायामइति ॥ इतःपरंप्राणायामःप्रशस्यतइत्यर्थः ॥ १३२ ॥ १३३ ॥ शस्यतेजपइतिशेषः ॥ १३४ ॥



Indira Gandhi National Centre for the Arts

पंचविधेष्विति ॥ सगर्भश्चतुर्विधउक्तःसध्यानःपंचमएतेष्वित्यर्थः ॥ १३५ ॥ करमालादिभिर्जपेफलतारतम्यमाह ॥ जपसंख्यानमिति ॥ अंगुल्यारेखयाजपसंख्यानमित्यन्वयः ॥ पुत्रजीवैःपुत्रजीवाख्यतरुकाष्ठोद्भवैर्मणिभिः ॥ १३६ ॥ ॥ १३७ ॥ १३८ ॥ मालामणिसंख्यामाह ॥ त्रिंशदिति ॥ अक्षैःमणिभिः ॥ १३९ ॥ १४० ॥ अंगुल्यादिभेदेनजपफलान्याह ॥ अंगुष्ठमिति ॥ १४१ ॥ क्षरणीदुःखनाशिनी ॥ १४२ ॥ स्थानभेदेनजपफलतारतम्यमाह ॥

सगर्भादपिसाहस्रःसध्यानोजपउच्यते ॥ एषुपंचविधेष्वेकःकर्तव्यःशक्तितोजपः ॥ १३५ ॥ अंगुल्याजपसंख्यानमेकमेकमुदाहृतम् ॥ रेखयाष्टगुणंविद्यात्पुत्रजीवैर्दशाधिकं ॥ १३६ ॥ शतंस्याच्छंखमणिभिःप्रवालैस्तुसहस्रकम् ॥ स्फाटिकैर्दशसाहस्रंमौक्तिकैर्लक्षमुच्यते ॥ १३७ ॥ पद्माक्षैर्दशलक्षंतुसौवर्णैःकोटिरुच्यते ॥ कुशग्रंथ्याचरुद्राक्षैरनंतगुणितंभवेत् ॥ १३८ ॥ त्रिंशदक्षैःकृतामालाधनदाजपकर्मणि ॥ सप्तविंशतिसंख्यातैरक्षैःपुष्टिप्रदाभवेत् ॥ १३९ ॥ पंचविंशतिसंख्यातैःकृतामुक्तिंप्रयच्छति ॥ अक्षैस्तुपंचदशभिरभिचारफलप्रदा ॥ १४० ॥ अंगुष्ठंमोक्षदंविद्यात्तर्जनींशत्रुनाशिनी ॥ मध्यमाधनदाशांतिंकरोत्येषाअनामिका ॥ १४१ ॥ कनिष्ठाक्षरणीप्रोक्ताजपकर्मणिशोभना ॥ अंगुष्ठेनजपेज्जाप्यमन्यैरंगुलिभिःसह ॥ १४२ ॥ अंगुष्ठेनविनाजाप्यंकृतंतदफलंयतः ॥ गृहेजपंसमंविद्याद्गोष्ठेशतगुणंविदुः ॥ १४३ ॥ पुण्यारण्येतथारामेसहस्रगुणमुच्यते ॥ अयुतंपर्वतेपुण्येनद्यांलक्षमुदाहृतम् ॥ १४४ ॥ कोटिंदेवालयेप्राहुरनंतंममसन्निधौ ॥ सूर्यस्याग्नेर्गुरोरिंदोर्दीपस्यचजलस्यच ॥ १४५ ॥ विप्राणांचगवांचैवसन्निधौशस्यतेतपः ॥ तत्पूर्वाभिमुखंवश्यंदक्षिणंचाभिचारकं ॥ १४६ ॥ पश्चिमंधनदंविद्यादौत्तरंशांतिदंभवेत् ॥ सूर्याग्निविप्रदेवानांगुरूणामपिसन्निधौ ॥ १४७ ॥ अन्येषांचप्रशस्तानांमंत्रंनविमुखोजपेत् ॥ उष्णीषीकंचुकीनग्नोमुक्तकेशोगलावृतः ॥१४८॥ अपवित्रकरोऽशुद्धोविलपन्नजपेत्क्वजित् ॥ क्रोधंमदंक्षुतंत्रीणिनिष्ठीवनविजृंभणे ॥ १४९ ॥ दर्शनंचश्वनीचानांवर्जयेज्जपकर्मणि ॥ आचमेत्संभवेतेषांस्मरेद्वामांत्वयासह ॥ १५० ॥

गृहइति ॥ १४३ ॥ १४४ ॥ १४५ ॥ तपइति ॥ जपइतिपाठांतरं ॥ दक्षिणंदक्षिणाभिमुखं ॥ एवमुत्तरत्रापि ॥ १४६ ॥ १४७ ॥ गलावृतःवेष्टितकंठः ॥ १४८ ॥ क्षुतमिति ॥ क्षुतंतंद्रीमितिक्वचित्पाठः ॥ १४९ ॥ क्रोधादीनांप्राप्तौयत्कर्तव्यंतदाह ॥ आचमेदिति ॥ १५० ॥ ॥

Indira Gandhi National Centre for the Arts

ज्योतींषिसूर्यादीनि ॥ प्राणसंयमंप्राणायामं ॥ १५१ ॥ १५२ ॥ समर्थस्यैवायंनियमइत्याह ॥ शक्तइति ॥ १५३ ॥ १५४ ॥ १५५ ॥ १५६ ॥ वैदि



ज्योतींषिचप्रपश्येद्वाकुर्याद्वाप्राणसंयमं ॥ अनासनःशयानोवागच्छन्नुत्थितएववा ॥ १५१ ॥ रथ्यायामशिवेस्था
नेनजपेत्तिमिरांतरे ॥ प्रसार्यनजपेत्पादौकुक्कुटासनएववा ॥ १५२ ॥ यानशय्याधिरूढोवाचिंताव्याकुलितोथवा॥
शक्तश्चेत्सर्वमेवैतदशक्तःशक्तितोजपेत् ॥ १५३ ॥ किमत्रबहुनोक्तेनसमासेनवचःशृणु ॥ सदाचारोजपन्शुद्धंध्याय
न्भद्रंसमश्नुते ॥१५४॥ आचारःपरमोधर्मआचारःपरमंधनं ॥ आचारःपरमाविद्याआचारःपरमागतिः ॥१५६॥
आचारहीनःपुरुषोलोकेभवतिनिंदितः ॥ परत्रचसुखीनस्यात्तस्मादाचारवान्भवेत् ॥ १५६॥ यस्ययद्विहितंकर्मवे
देशास्त्रेचवैदिकैः ॥ तस्यतेनसमाचारःसदाचारोनचेतरः ॥ १५७ ॥ सद्भिराचरितत्वाच्चसदाचारःसउच्यते ॥ सदा
चारस्यतस्याहुरास्तिक्यंमूलकारणं ॥ १५८ ॥ आस्तिकश्चेत्प्रमादाद्यैःसदाचारादपिच्युतः ॥ नदुष्यतिनरोनि
त्यंतस्मादास्तिकतांव्रजेत् ॥ १५९ ॥ यथेहास्तिसुखंदुःखंसुकृतैर्दुष्कृतैरपि ॥ तथापरत्रचास्तीतिमतिरास्तिक्य
मुच्यते ॥ १६० ॥ रहस्यमन्यद्वक्ष्यामिगोपनीयमिदंप्रिये ॥ नवाच्यंयस्यकस्यापिनास्तिकस्याथवापशोः ॥१६१॥
सदाचारविहीनस्यपतितस्यांत्यजस्यच ॥ पंचाक्षरात्परंनास्तिपरित्राणंकलौयुगे ॥ १६२ ॥ गच्छतस्तिष्ठतो
वापिस्वेच्छयाकर्मकुर्वतः ॥ अशुचेर्वाशुचेर्वापिमंत्रोयंनचनिष्फलः ॥ १६३ ॥ अनाचारवतांपुंसामविशुद्धषडध्वना
म् ॥ अनादिष्टोपिगुरुणामंत्रोयंनचनिष्फलः ॥ १६४ ॥ अंत्यजस्यापिमूर्खस्यमूढस्यपतितस्यच ॥ निर्मर्यादस्यनी
चस्यमंत्रोयंनचनिष्पलः ॥ १६५ ॥ सर्वावस्थांगतस्यापिमयिभक्तिमतःपरम् ॥ सिद्ध्यत्येवनसंदेहोनापरस्यतुकस्य
चित् ॥ १६६ ॥ नलग्नतिथिनक्षत्रवारयोगादयःप्रिये ॥ अस्यात्यंतमवेक्ष्याःस्युर्नैषसुप्तःसदोदितः ॥ १६७ ॥ न
कदाचिन्नकस्यापिरिपुरेषमहामनुः ॥ सुसिद्धोवापिसिद्धोवासाध्योवापिभविष्यति ॥ १६८ ॥ ॥



कैःवेदविद्भिः ॥ तस्यपुरुषस्य ॥ तेनकर्मणा ॥ १५७ ॥ १५८ ॥ १५९ ॥ आस्तिक्यलक्षणमाह ॥ यथेति ॥ १६० ॥ १६१ ॥ १६२ ॥१६३॥१६४॥
॥ १६५ ॥ अपरस्यअभक्तस्य ॥ १६६ ॥ अस्यमद्भक्तस्य ॥ १६७ ॥ १६८ ॥ ॥ ॥ ॥

Indira Gandhi National Centre for the Arts

तेनब्रह्मणा ॥ ३५ ॥ सईश्वरः ॥ ३६ ॥ कददर्शतदाह ॥ क्षीरेति ॥ ३७ ॥ तेनविष्णुना ॥ अनंतेति ॥ अनंतःशेषः ॥ तच्छरीररूपायांशय्यायाम् ॥ ३८ ॥
॥ ३९ ॥ धरेति ॥ धरयाभुवास्त्रीरूपयापादसंवाहनेकृतेनमृदुकरांभोजस्पर्शेनरक्तंपदांबुजंयस्यतं ॥ ४० ॥ एकैकगुणयोगेनएकैकंनामभगवतःसंपन्नमित्या

तथाममापितत्सर्वंदातुमर्हसिशंकर ॥ इतिविज्ञापितस्तेनभगवान्भगनेत्रहा ॥ ३५ ॥ स्मयेनवैददौसर्वंतस्यापिस
घृणानिधिः ॥ लब्ध्वैवमीश्वरादेवब्रह्मासर्वात्मतांक्षणात् ॥ ३६ ॥ त्वरमाणोऽथसंगम्यददर्शपुरुषोत्तमम् ॥ क्षीरार्ण
वालयेशुभ्रेविमानेसूर्यसन्निभे ॥ ३७ ॥ हेमरत्नान्वितेदिव्येमनसातेननिर्मिते ॥ अनंतभोगशय्यायांशयानंपंक
जेक्षणम् ॥ ३८ ॥ चतुर्भुजमुदारांगंसर्वाभरणभूषितम् ॥ शंखचक्रधरंसौम्यंचंद्रबिंबसमाननम् ॥ ३९ ॥ श्रीवत्स
वक्षसंदेवंप्रसन्नमधुरस्मितम् ॥ धरामृदुकरांभोजस्पर्शरक्तपदांबुजम् ॥ ४० ॥ क्षीरार्णवेऽमृतमिवशयानंयोगनि
द्रया ॥ तमसाकालरुद्राख्यंरजसाकनकांडजम् ॥ ४१ ॥ सत्वेनसर्वगंविष्णुंनिर्गुणत्वमहेश्वरम् ॥ तंदृष्ट्वापुरुषंब्रह्मा
प्रगल्भमिदमब्रवीत् ॥ ४२ ॥ ग्रसामित्वामहंविष्णोत्वमात्मानंयथापुरा ॥ तस्यतद्वचनंश्रुत्वाप्रतिबुध्यपितामहम् ॥
॥ ४३ ॥ उदैक्षतमहाबाहुःस्मितमीषच्चकारच ॥ तस्मिन्नवसरेविष्णुर्ग्रस्तस्तेनमहात्मना ॥ ४४ ॥ सृष्टश्चब्रह्मणा
सद्योभ्रुवोर्मध्यादयत्नतः ॥ तस्मिन्नवसरेसाक्षाद्भगवानिंदुभूषणः ॥ ४५ ॥ शक्तिंतयोरपिद्रष्टुमरूपोरूपमास्थितः ॥
प्रसादमतुलंकर्तुंपुरादत्तवरस्तयोः ॥ ४६ ॥ आगच्छत्तत्रयत्रेमौब्रह्मनारायणौस्थितौ ॥ अथतुष्टुवतुर्देवंप्रीतौभीतौ
चकौतुकात् ॥ ४७ ॥ प्रणेमतुश्चबहुशोबहुमानेनदूरतः ॥ भवोपिभगवानेतावनुगृह्यपिनाकधृक् ॥ सादरंपश्यतोरे
वतयोरंतरधीयत ॥ ४८ ॥ इतिश्रीशिवमहापुराणेवायवीयसंहितायांपूर्वभागेशेषशायिनारायणवर्णनंनामैकादशो
ध्यायः ॥ ११ ॥ वायुरुवाच ॥ प्रतिकल्पंप्रवक्ष्यामिरुद्राविर्भावकारणम् ॥ यतोविच्छिन्नसंतानाब्रह्मसृष्टिःप्रवर्तते ॥ १ ॥

ह ॥ तमसेति ॥ ४१ ॥ ४२ ॥ ब्रह्मायदब्रवीत्तदाह ॥ ग्रसामीति ॥ पुर्वसृष्ट्यंते ॥ तस्यब्रह्मणः ॥ ४३ ॥ तेनब्रह्मणा ॥ ४४ ॥ ४५ ॥ तयोःविष्णुब्रह्मयोः ॥
॥ ४६ ॥ ४७ ॥ ४८ ॥ इतिश्रीशैवमहापुराणवायवीयसंहिताटीकायांसारबोधिन्यांपूर्वभागेशेषशायिवर्णनंनामैकादशोऽध्यायः ॥ ११ ॥ ओंनमःशिवाय
॥ रुद्रोरुद्रान्स्वसदृशान्सृष्ट्वाब्रह्माणमादिशत् ॥ स्रष्टुमन्यदिदंवृत्तंद्वादशेत्रनिरूप्यते ॥ १ ॥ १ ॥ ॥ ॥

अवृद्धिहेतोःअवृद्धिरूपाद्धेतोः ॥ २ ॥ तस्यब्रह्मणः ॥ ३ ॥ अनुजःसूनुः ॥ ४ ॥ भूतसंकोचकःजगत्संहारी ॥ ५ ॥ परमेश्वरभावितःपरमेश्वरप्रेरितः ॥ तच्छ
त्तयाशिवशक्त्या ॥ तच्छिन्हैःशिवचिन्हैः ॥ ६ ॥ उक्तमेवविवृणोति ॥ तन्नामेति ॥ ७ ॥ चंद्रावयवश्चंद्रखंडः ॥ भुजंगेति ॥ भुजंगाएवहारादयोयस्यस
इत्यर्थः ॥ मुंजमेखलःमुंजतृणमयकटिसूत्रः ॥ ८ ॥ जलंधरोदेवविशेषः॥ ९ ॥ भग्नेति ॥ भग्नदंष्ट्रांकुरैःआक्रांताःप्रांतभागायस्यअतएवतादृशःकांतःरमणी

कल्पेकल्पेप्रजांसृष्ट्वाब्रह्माब्रह्मांडसंभवः ॥ अवृद्धिहेतोर्भूतानांमुमोहभृशदुःखितः ॥ २ ॥ तस्यदुःखप्रशांत्यर्थंप्रजा
नांचविवृद्धये ॥ तत्तत्कल्पेषुकालात्मारुद्रोरुद्रगणाधिपः ॥ ३ ॥ निर्दिष्टःपरमेशेनमहेशोनीललोहितः ॥ पुत्रोभूत्वा
ऽनुगृण्हातिब्रह्माणंब्रह्मणोऽनुजः ॥ ४ ॥ सएवभगवानीशस्तेजोराशिरनामयः ॥ अनादिनिधनोधाताभूतसंकोच
कोविभुः ॥ ५ ॥ परमैश्वर्यसंयुक्तःपरमेश्वरभावितः ॥ तच्छक्त्याधिष्ठितःशश्वत्तच्चिन्हैरपिचिन्हितः ॥ ६ ॥ तन्नाम
नामातद्रूपस्तत्कार्यकारणक्षमः ॥ तत्तुल्यव्यवहारश्चतदाज्ञापरिपालकः ॥ ७ ॥ सहस्रादित्यसंकाशश्चंद्रावयवभू
षणः ॥ भुजंगहारकेयूरवलयोमुंजमेखलः ॥ ८ ॥ जलंधरविरंचींद्रकपालशकलोज्वलः ॥ गंगातुंगतरंगार्द्रपिंगला
ननमूर्धजः ॥ ९ ॥ भग्नदंष्ट्रांकुराक्रांतप्रांतकांतधराधरः ॥ सव्यश्रवणपाशांतमंडलीकृतकुंडलः ॥ १० ॥ महावृष
भनिर्याणोमहाजलदनिःस्वनः ॥ महानलसमप्रख्योमहाबलपराक्रमः ॥ ११ ॥ एवंघोरमहारूपोब्रह्मपुत्रोमहेश्व
रः ॥ विज्ञानंब्रह्मणेदत्वासर्गेसहकरोतिच ॥ १२ ॥ तस्माद्रुद्रप्रसादेनप्रतिकल्पंप्रजापतेः ॥ प्रवाहरूपतोनित्याप्र
जासृष्टिःप्रवर्तते ॥ १३ ॥ कदाचित्प्रार्थितःस्रष्टुंब्रह्मणानीललोहितः ॥ स्वात्मनासदृशान्सर्वान्ससर्जमनसाविभुः
॥ १४ ॥ कपर्दिनोनिरातंकान्नीलग्रीवांस्त्रिलोचनान् ॥ जरामरणनिर्मुक्तान्दीप्तशूलवरायुधान् ॥ १५ ॥ तैस्तुसं
छादितंसर्वंचतुर्दशविधंजगत् ॥ तान्दृष्ट्वाविविधान्रुद्रान्रुद्रमाहपितामहः ॥ १६ ॥ नमस्तेदेवदेवेशमास्राक्षीरी
दृशीःप्रजाः ॥ अन्याःसृजहभद्रंतेप्रजामृत्युसमन्विताः ॥ १७ ॥ ॥ ॥

यःधराधरःकैलासपर्वतोयस्य ॥ १० ॥ महेति॥महावृषभएवनिर्याणंगमनसाधनंयस्यसइत्यर्थः॥प्रख्याकांतिः॥ ११॥प्रवाहरूपतःधारावाहिकया ॥ १३॥ नीललो
हितःरुद्रः ॥ १४॥ तेषांस्वरूपमाह ॥ कपर्दिनइति ॥ निरातंकान्निर्भयान् ॥ १५ ॥ चतुर्दशविधंचतुर्दशभुवनात्मकम् ॥ १६ ॥ ईदृशीःमृत्युरहिताः ॥ १७ ॥



Indira Gandhi National Centre for the Arts

परमेश्वरोरुद्रः ॥१८॥ याज्ञिकाःसृष्टियज्ञेनचरंतः॥१९॥ विश्वकर्माणंब्रह्माणं ॥ निवृत्तात्मात्यक्तयत्नः ॥ व्यतिष्ठतउदासीनोबभूव॥२०॥अशुभाःजरामरणयुक्ताः ॥ देवोरुद्रः ॥ २१ ॥ इतिश्रीशिवमहापुराणवायवीयसंहिताटीकायांसारबोधिन्यांपूर्वभागेरुद्रोत्पत्तिवर्णनंनामद्वादशोऽध्यायः ॥ १२ ॥ ओनमः शिवाय ॥ ब्रह्माप्रजाविवृद्ध्यर्थमर्धनारीश्वरेश्वरम् ॥ तपसातोषयामासवर्ण्यतेतत्त्रयोदशे ॥ १ ॥ वेधसःब्रह्मणः ॥ मैथुनजांस्त्रीपुरुषसंगजाम् ॥१॥ ननुपूर्व

इत्युक्तःप्रहसन्प्राहब्रह्माणंपरमेश्वरः ॥ नास्तिमेतादृशःसर्गःसृजत्वमशुभाःप्रजाः ॥ १८ ॥ येत्विमेमनसासृष्टामहात्मानोमहाबलाः ॥ चरिष्यंतिमयासार्धंसर्वएवहियाज्ञिकाः ॥ १९ ॥ इत्युक्त्वाविश्वकर्माणंविश्वभूतेश्वरोहरः ॥ सहरुद्रैःप्रजासर्गान्निवृत्तात्माव्यतिष्ठत ॥ २० ॥ ततःप्रभृतिदेवोऽसौनप्रसूतेशुभाःप्रजाः ॥ ऊर्ध्वरेताःस्थितःस्थाणुर्यावदाभूतसंप्लवम् ॥ २१ ॥ इतिश्रीशिवमहापुराणेवायवीयसंहितायांपूर्वभागेरुद्रोत्पत्तिर्नामद्वादशोऽध्यायः॥ ॥ १२ ॥ वायुरुवाच ॥ यदापुनःप्रजाःसृष्टानव्यवर्धंतवेधसः ॥ तदामैथुनजांसृष्टिंब्रह्माकर्तुममन्यत ॥ १ ॥ ननिर्गतंपुरायस्मान्नारीणांकुलमीश्वरात् ॥ तेनमैथुनजांसृष्टिंनशशाकपितामहः ॥ २ ॥ ततःसविदधेबुद्धिमर्थनिश्चयगामिनीम् ॥ प्रजानामेववृद्ध्यर्थंप्रष्टव्यःपरमेश्वरः ॥ ३ ॥ प्रसादेनविनातस्यनवर्धेरन्निमाःप्रजाः ॥ एवंसंचिंत्यविश्वात्मातपःकर्तुंप्रचक्रमे ॥ ४ ॥ तदाद्यापरमाशक्तिरनंतालोकभाविनी ॥ आद्यासूक्ष्मतराशुद्धाभावगम्यामनोहरा ॥ ॥ ५ ॥ निर्गुणानिष्प्रपंचाचनिष्कलानिरुपप्लवा ॥ निरंतरतरानित्यानित्यमीश्वरपार्श्वगा ॥ ६ ॥ तयापरमयाशक्त्याभगवंतंत्रियंबकम् ॥ संचिंत्यहृदयेब्रह्माततापपरमंतपः ॥ ७ ॥ तीव्रेणतपसातस्ययुक्तस्यपरमेष्ठिनः ॥ अचिरेणैवकालेनपितासंप्रतुतोषह ॥ ८ ॥ ॥ ॥ ॥ ॥

मेवमैथुनजांसृष्टिंकुतोनचकारेतितत्राह ॥ ननिर्गतमिति ॥ ईश्वरात्शिवात् ॥ सृष्टिमिति ॥ कर्तुमितिशेषः ॥२॥ बुद्धिंविचारं ॥ अर्थनिश्चयगामिनीमर्थनिश्चयकारिणीम् ॥ तस्याआकारमाह ॥ प्रजानामिति ॥ ३ ॥ तस्यपरमेश्वरस्य ॥ ४ ॥ तदातपःसमयेआद्यामुख्या ॥ लोकभाविनीलोककर्त्री ॥ भावगम्याभक्त्यतिशयप्राप्या ॥ ५ ॥ निरंतरतरेति॥अंतरमीश्वराद्भेदःसर्वथातद्रहितेत्यर्थःईश्वरपार्श्वगाशिवसमीपगा ॥ ६ ॥ शक्त्येति ॥ शक्त्यासहेत्यर्थः ॥ ७ ॥ पिताशिवः ॥ ८ ॥ ॥ ॥ ॥ ॥ ॥

Indira Gandhi National Centre for the Arts

कामपीति ॥ कामंपिकल्पितांमूर्तिंआविश्यअनुप्रविश्येत्यर्थः ॥ ९ ॥ अनिर्देश्यमिति ॥ अकृतात्मभिःअकृतश्रवणादिप्रयत्नैरनिर्देश्यंनिर्देष्टुमशक्यमतएव अदृश्यमज्ञेयमित्यर्थः ॥ १० ॥ ११ ॥ अनाभासंनभवत्याभासोज्ञानंयस्यतं ॥ १२ ॥ १३ ॥ संस्कारसंयुतैःच्युतसंस्कृतित्वादिदोषरहितैरलंकारयुक्तैरित्यर्थः ॥ १४ ॥ १५ ॥ सूक्तान्याह ॥ जयेति ॥ सर्वोत्कर्षेणवर्तस्वेत्यर्थः ॥ १६ ॥ एवंशिवंस्तुत्वैकेनदेवींस्तौति ॥ जयेति ॥ एवमग्रेपि॥दूरांगिदूरंमहत्अंगंय

ततःकेनचिदंशेनमूर्तिमाविश्यकामपि ॥ अर्धनारीश्वरोभूत्वाययौदेवःस्वयंहरः ॥९॥ तंदृष्ट्वापरमंदेवंतमसःपरमव्य
यम् ॥ अद्वितीयमनिर्देश्यमदृश्यमकृतात्मभिः ॥ १० ॥ सर्वलोकविधातारंसर्वलोकेश्वरेश्वरम् ॥ सर्वलोकविधायि
न्याशक्त्यापरमयायुतम् ॥ ११ ॥ अप्रतर्क्यमनाभासममेयमजरंध्रुवम् ॥ अचलंनिर्गुणंशांतमनंतमहिमास्पद
म् ॥ १२ ॥ सर्वदंसर्वगंसर्वसदसद्व्यक्तिवर्जितम् ॥ सर्वोपमाननिर्मुक्तंशरण्यंशाश्वतंशिवम् ॥ १३ ॥ प्रणम्यदंडव
द्ब्रह्मासमुत्थायकृतांजलिः ॥ श्रद्धाविनयसंपन्नैःश्राव्यैःसंस्कारसंयुतैः ॥ १४ ॥ यथार्थयुक्तसर्वार्थैर्वेदार्थपरिबृंहितैः
॥ तुष्टावदेवंदेवींचसूक्तैःसूक्ष्मार्थगोचरैः ॥ १५ ॥ श्रीब्रह्मोवाच ॥ जयदेवमहादेवजयेश्वरमहेश्वर ॥ जयसर्वगुण
श्रेष्ठजयसर्वसुराधिप ॥ १६ ॥ जयप्रकृतिकल्याणिजयप्रकृतिनायिके ॥ जयप्रकृतिदूरांगिजयप्रकृतिसुंदरि ॥
॥ १७ ॥ जयामोघमहामायजयामोघमनोरथ ॥ जयामोघमहालीलजयामोघमहाबल ॥ १८ ॥ जयविश्वजग
न्मातर्जयविश्वजगन्मयि ॥ जयविश्वजगद्धात्रिजयविश्वजगत्सखि ॥ १९ ॥ जयशाश्वतिकैश्वर्यजयशाश्वतिकाल
य ॥ जयशाश्वतिकाकारजयशाश्वतिकानुग ॥ २० ॥ जयात्मत्रयनिर्मात्रिजयात्मत्रयपालनि ॥ जयात्मत्रयसंह
र्त्रिजयात्मत्रयनायिके ॥ २१ ॥ जयावलोकनायत्तजगत्कारणबृंहण ॥ जयोपेक्षाकटाक्षोत्थहुतभुग्भुक्तमौक्तिक ॥
॥ २२ ॥ जयदेवाद्यविज्ञेयस्वात्मसूक्ष्मदृशोज्ज्वले ॥ जयस्थूलात्मशक्त्यंशव्याप्तविश्वचराचरे ॥ २३ ॥

स्याःसातत्संबुद्धौ ॥ प्रकृतिसुंदरीस्वभावसुंदरी ॥ १७ ॥ १८ ॥ विश्वजगत्सखिसर्वजगन्मित्रभूते ॥ १९ ॥ २० ॥ आत्मत्रयंब्रह्मादित्रितयं॥२१॥अवलो कनेति ॥ अवलोकनमात्रेणआयत्तानिअधीनानियानिजगत्कारणानिअव्यक्तादीनितेषांबृंहणप्रसारक ॥ उपेक्षेति ॥ उपेक्षानिग्रहस्तद्युक्तकटाक्षोत्थ हुतभुजाभुक्तंध्वंसितंकामरूपमौक्तिकंयेनसः ॥ २२ ॥ देवादीति ॥ देवादिभिरप्यविज्ञेयोयःस्वात्मातद्गोचरसूक्ष्मदृशाउज्ज्वले ॥ २३ ॥



Indira Gandhi National Centre for the Arts

शिवसंस्कारकर्मणिशिवमंत्रदीक्षादिकर्मणि ॥ ६१ ॥ ६२ ॥ ६३ ॥ ६४ ॥ अस्त्येवेति ॥ अधिकारइतिसंबध्यते ॥ ६५ ॥ तथैवेति ॥ यथोक्तंमनुना ॥ बाल्येपितुर्वशेतिष्ठेत्पाणिग्राहस्ययौवने ॥ पुत्राणांभर्तरिप्रेतेनभजेत्स्त्रीस्वतंत्रतामिति ॥ ६६ ॥ ६७ ॥ ६८ ॥ अनुलोमजाताःविप्रान्मूर्धावसिक्त इतियाज्ञवल्क्याद्युक्तामूर्धावसिक्तादयः ॥ क्षत्रियाद्विप्रकन्यायांसूतोभवतिजातितइतिमन्वाद्युक्तानांप्रतिलोमजानांनात्राधिकारःप्रतिलोमजास्तुधर्महीनाइ

आकृष्टास्ताडितावापियेविषादंनयांत्यपि ॥ तेयोग्याःसंयताःशुद्धाःशिवसंस्कारकर्मणि ॥ ६१ ॥ अहिंसकादयावंतोनित्यमुद्युक्तचेतसः ॥ अमानिनोबुद्धिमंतस्त्यक्तस्पर्धाःप्रियंवदाः ॥ ६२ ॥ ऋजवोमृदवःस्वस्थाविनीताःस्थिरचेतसः ॥ शौचाचारसमायुक्ताःशिवभक्ताद्विजातयः ॥ ६३ ॥ एवंवृत्तसमोपेतावाङ्मनःकायकर्मभिः ॥ शोध्याबोध्यायथान्यायमितिशास्त्रेषुनिश्चयः ॥ ६४ ॥ नाधिकारःस्वतोनार्याः शिवसंस्कारकर्मणि ॥ नियोगाद्भर्तुरस्त्येवभक्तियुक्तायदीश्वरे ॥ ६५ ॥ तथैवभर्तृहीनायाः पुत्रादेरभ्यनुज्ञया ॥ अधिकारोभवत्येवकन्यायाःपितुराज्ञया॥६६॥ शूद्राणामंत्यजातीनांपतितानांविशेषतः ॥ तथासंकरजातीनांनाध्वशुद्धिर्विधीयते ॥ ६७ ॥ तेप्यकृत्रिमभावाश्चेच्छिवेपरमकारणे ॥ पादोदकप्रदानाद्यैःकुर्युःपाशविशोधनं ॥६८॥ अत्रानुलोमजातायेयुक्ताएवद्विजातिषु ॥ तेषामध्वविशुध्यादिकुर्यान्मातृकुलोचितम् ॥ ६९ ॥ यातुकन्यास्वपित्राद्यैःशिवधर्मेनियोजिता ॥ साभक्तायप्रदातव्यानापरायविरोधिने ॥ ७० ॥ दत्ताचेत्प्रतिकूलायप्रमादाद्बोधयेत्पतिम् ॥ अशक्तौतंपरित्यज्यमनसाधर्ममाचरेत् ॥ ॥ ७१ ॥ यथामुनिवरंत्यक्त्वापतिमत्रिंपतिव्रता ॥ कृतकृत्याभवत्पूर्वंतपसाराध्यशंकरम् ॥ ७२ ॥ यथानारायणंदेवंतपसाराध्यपांडवान् ॥ पतीन्लब्धवतीधर्मेगुरुभिर्विनियोजिता ॥७३॥ अस्वातंत्र्यकृतोदोषोनेहास्तिपरमार्थतः ॥ शिवधर्मेनियुक्तायाःशिवशासनगौरवात् ॥ ७४ ॥ बहुनात्रकिमुक्तेनयोपिकोपिशिवाश्रयः ॥ संस्कारोगुर्वधीनश्चेत्संस्क्रियातुप्रभिद्यते ॥ ७५ ॥ ॥ ॥ ॥ ॥

तिगौतमोक्तेः ॥ मातृकुलोचितमिति ॥ तेषांमातृसजातीयत्वादितिभावः ॥ यथोक्तंशंखेन ब्राह्मणेनक्षत्रियायामुत्पादितःक्षत्रियोभवतिक्षत्रियेणवैश्यायांवैश्यएववैश्येनशूद्रायांशूद्रएवेति ॥ ६९ ॥ अपरायाभक्ताय ॥ ७० ॥ परित्यज्येति ॥ परित्यागोत्रशैवधर्ममात्रसिद्ध्येनतुसर्वथा ॥७१ ॥ ७२ ॥ लब्धवतीति ॥ द्रौपदीतिशेषः ॥ ७३ ॥ ७४ ॥ संस्कारइति ॥ संस्कारोदीक्षाविधिगुर्वधीनश्चेदप्यधिकारिभेदाद्भिद्यतइत्यर्थः ॥ ७५ ॥ ॥

॥ ७६ ॥ ७७ ॥ ७८ ॥ इतिश्रीशैवमहापुराणेवायवीयसंहितायामुत्तरभागेशैवमंत्रदीक्षाविधिर्नामत्रयोदशोध्यायः ॥ १३ ॥ ओंनमःशिवाय ॥ यापूर्वंग
दितादीक्षावेदिकुंडमयीशुभा ॥ तद्विध्युपक्रमःसम्यक्रियतेऽत्रचतुर्दशे ॥ १ ॥ समयाव्हयंयथोक्ताचार्यसमागमसमयएवास्यग्रहणादेरुक्तत्वात्समयाव्हयंएत
दध्यायांतेस्फुटीभविष्यति ॥ १ ॥ शिल्पशास्त्रंविश्वकर्मादिप्रणीतं ॥ २ ॥ अष्टदिक्षुपूर्वाद्यष्टदिक्षु ॥ दिक्षुपूर्वादिषुचतसृषु ॥ ३ ॥ प्रधानकुंडंइदंनवमंपंचमंवा

गुरोरालोकनादेवस्पर्शात्संभाषणादपि ॥ यस्यसंजायतेह्याज्ञातस्यनास्तिपराक्रिया ॥ ७६ ॥ मनसायस्तुसंस्कारः
क्रियतेयोगवर्त्मना ॥ सनेहकथ्यतेगुह्योगुरुवक्त्रैकगोचरः ॥ ७७ ॥ क्रियावान्यस्तुसंस्कारःकुंडमंडपपूर्वकः ॥ स
वक्ष्यतेसमासेनतस्यशक्योनविस्तरः ॥ ७८ ॥ इतिश्रीशिवमहापुराणेवायवीयसंहितायामुत्तरभागेत्रयोदशोऽध्या
यः ॥ १३ ॥ उपमन्युरुवाच ॥ पुण्येहनिशुचौदेशेबहुदोषविवर्जिते ॥ दैशिकःप्रथमंकुर्यात्संस्कारंसमयाव्हयं ॥ १ ॥
परीक्ष्यभूमिंविधिवद्गंधवर्णरसादिभिः ॥ शिल्पशास्त्रोक्तमार्गेणमंडपंतत्रकल्पयेत् ॥ २ ॥ कृत्वावेदिंचतन्मध्येकुंडानि
परिकल्पयेत् ॥ अष्टदिक्ष्वथवादिक्षुतत्रेशान्यांपुनःक्रमः ॥ ३ ॥ प्रधानकुंडंकुर्वीतयद्वापश्चिमभागतः ॥ प्रधानमेकमे
वाथकृत्वाशोभांप्रकल्पयेत् ॥ ४ ॥ वितानध्वजमालाभिर्विविधाभिरनेकशः ॥ वेदिमध्येततःकुर्यान्मंडलंशुभलक्षण
म् ॥ ५ ॥ रत्नहेमादिभिश्चूर्णैरीश्वरावाहनोचितम् ॥ सिंदूरशालिनीवारचूर्णैरेवाथनिर्धनः ॥ ६ ॥ एकहस्तंद्विहस्तं
वासितंवारक्तमेववा ॥ एकहस्तस्यपद्मस्यकर्णिकाष्टांगुलामता ॥ ७ ॥ केसराणितदर्धानिशेषंचाष्टदलात्मकं ॥ द्विह
स्तस्यतुपद्मस्यद्विगुणंकर्णिकादिकम् ॥ ८ ॥ कृत्वाशोभोपशोभाढ्यमैशान्यांतस्यकल्पयेत् ॥ एकहस्तंतदर्धंवापुनर्वे
द्यांतुमंडलम् ॥ ९ ॥ व्रीहितंदुलसिद्धार्थतिलपुष्पकुशास्तृते ॥ तत्रलक्षणसंयुक्तंशिवकुंभंप्रसाधयेत् ॥ १० ॥ सौ
वर्णंराजतंवापिताम्रजंमृन्मयंतुवा ॥ गंधपुष्पाक्षताकीर्णंकुशदूर्वांकुरार्चितम् ॥ ११ ॥ सितसूत्रावृतंकंठेनववस्त्रयु
गावृतं ॥ शुद्धांबुपूर्णमुत्कूर्चंसद्रव्यंसपिधानकम् ॥ १२ ॥ भृंगारंवर्धनींचापिशंखंचक्रकमेववा ॥ विनासूत्रादिकंसं
वैपद्मपत्रमथापिवा ॥ १३ ॥ तस्यासनारविंदस्यकल्पयेदुत्तरेदले ॥ अग्रतश्चंदनांभोभिरस्त्रराजस्यवर्धनीम् ॥ १४ ॥

अनुकल्पमाह ॥ यद्वेति ॥ ४ ॥ मंडलंपद्माकारं ॥ ५ ॥ ६ ॥ वेदिगतमंडलपरिमाणमाह ॥ एकहस्तमिति ॥ कर्णिकामध्यभागः ॥ ७ ॥ तदर्धानि
चतुरंगुलानि ॥ ८ ॥ ९ ॥ सिद्धार्थाःश्वेतसर्षपाः ॥ प्रसाधयेत्स्थापयेत् ॥ १० ॥ ११ ॥ उत्कूर्चंउद्गतदर्भपिंजूलं ॥ १२ ॥ भृंगारंपानपात्रंवर्धनींशरावं ॥
सूत्रादिकंआदिनापूर्वोक्तशुद्धांबुप्रभृति ॥ १३ ॥ अस्त्रराजस्यशैवागमोक्तस्य ॥ १४ ॥ ॥ ॥ ॥



Indira Gandhi National Centre for the Arts

मंडलस्यततःप्राच्यांमंत्रकुंभंचपूर्ववत् ॥ कृत्वाविधिवदीशस्यमहापूजामथाचरेत् ॥ १५ ॥ अथार्णवस्यतीरेवानद्यां गोष्ठेपिवागिरौ ॥ देवागारेगृहेवापिदेशेन्यस्मिन्मनोहरे ॥ १६ ॥ कृत्वापूर्वोदितंसर्वंविनावामंडपादिकम् ॥ मंडलं पूर्ववत्कृत्वास्थंडिलंचविभावसोः ॥ १७ ॥ प्रविश्यपूजाभवनंप्रहृष्टवदनोगुरुः ॥ सर्वमंगलसंयुक्तःसमाचरितनैत्य कः ॥ १८ ॥ महापूजांमहेशस्यकृत्वामंडलमध्यतः ॥ शिवकुंभेतथाभूयःशिवमावाह्यपूजयेत् ॥ १९ ॥ पश्चिमाभि मुखंध्यात्वायज्ञरक्षकमीश्वरम् ॥ अर्चयेदस्त्रवर्धन्यामस्त्रमीशस्यदक्षिणे ॥ २० ॥ मंत्रकुंभेचविन्यस्यमंत्रंमंत्रविशार दः ॥ कृत्वामुद्रादिकंसर्वंमंत्रयागंसमाचरेत् ॥ २१ ॥ ततःशिवानलेहोमंकुर्याद्देशिकसत्तमः ॥ प्रधानकुंडेपरितोजुहु युश्चापरेद्विजाः ॥ २२ ॥ आचार्यात्पादमर्धंवाहोमस्तेषांविधीयते ॥ प्रधानकुंडएवाथजुहुयाद्देशिकोत्तमः ॥ २३ ॥ स्वाध्यायमपरेकुर्युःस्तोत्रमंगलवाचनम् ॥ जपंचविधिवच्चान्येशिवभक्तिपरायणाः ॥ २४ ॥ नृत्यंगीतंचवाद्यंचमंग लान्यपराणिच ॥ पूजनंचसदस्यानांकृत्वासम्यग्विधानतः ॥ २५ ॥ पुण्याहंकारयित्वाथपुनःसंपूज्यशंकरम् ॥ प्रा र्थयेद्देशिकोदेवंशिष्यानुग्रहकाम्यया ॥ २६ ॥ प्रसीददेवदेवेशदेहमाविश्यमामकम् ॥ विमोचयैनंविश्वेशघृणया चघृणानिधे ॥ २७ ॥ अथचैवंकरोमीतिलब्धानुज्ञस्तुदेशिकः ॥ आनीयोपोषितंशिष्यंहविष्याशिनमेवच ॥ ॥ २८ ॥ एकाशनंवाविरतंस्नातंप्रातःकृतक्रियम् ॥ जपंतंप्रणवंदेवंध्यायंतंकृतमंगलम् ॥ २९ ॥ द्वारस्यपश्चिमस्या ग्रेमंडलेदक्षिणस्यवा ॥दर्भासनेसमासीनंविधायोदङ्मुखंशिशुम् ॥ ३० ॥ स्वयंप्राग्वदनस्तिष्ठन्नूर्ध्वकायंकृतांजलि म् ॥ संप्रोक्ष्यप्रोक्षणीतोयैर्मूर्धन्यस्त्रेणमुद्रया ॥ ३१ ॥ पुष्पक्षेपेणसंताड्यबध्नीयाल्लोचनंगुरुः ॥ दुकूलार्धेनवस्त्रेण मंत्रितेननवेनच ॥ ३२ ॥ ॥ ॥ ॥ ॥ ॥



Indira Gandhi National Centre for the Arts

तेनगुरुणा ॥ ३३ ॥ ३४ ॥ ३५ ॥ ३६ ॥ ३७ ॥ तेनैवपाणिनैव ॥ ३८ ॥ ततइति ॥ आत्मविद्गुरुःदेवंसमभ्यर्च्यशिवानलेआहुतित्रयंहुत्वाशिष्यमुप वेश्यतंदर्भाग्रैःस्पृशंतंआत्मानंविधायेत्यन्वयः ॥ ३९ ॥ ४० ॥ ४१ ॥ ४२ ॥ संतर्पणायेति ॥ संतर्पणार्थंमूलस्यमूलमंत्रस्यविनियोगःकर्तव्यइत्यर्थः ॥ ते

ततःप्रवेशयेच्छिष्यंगुरुर्द्वारेणमंडलं ॥ सोपितेनेरितःशंभोराचरेत्त्रिःप्रदक्षिणम् ॥३३॥ ततःसुवर्णसंमिश्रंदत्त्वापुष्पांजलिंप्रभोः ॥ प्राङ्मुखोदङ्मुखोवापिप्रणमेद्दंडवत्क्षितौ ॥३४॥ ततःसंप्रोक्ष्यमूलेनशिरःशस्त्रेणपूर्ववत् ॥ संताड्यदेशिकस्तस्यमोचयेन्नेत्रबंधनम् ॥ ३५ ॥ सदृष्ट्वामंडलंभूयःप्रणमेद्दंडवच्छिवम् ॥ अथासीनंशिवाचार्योमंडलस्यतुदक्षिणे ॥ ३६ ॥ उपवेश्यात्मनःसव्येशिष्यंदर्भासनेगुरुः ॥ आराध्यचमहादेवंशिवहस्तंप्रविन्यसेत् ॥ ३७ ॥ शिवतेजोमयंपाणिंशिवमंत्रमुदीरयन् ॥ शिवाभिमानसंपन्नोन्यसेच्छिष्यस्यमस्तके ॥ ३८ ॥ सर्वांगालंबनंचैवकुर्यात्तेनैवदेशिकः ॥ शिष्योपिप्रणमेद्भूमौदेशिकाकृतिमीश्वरम् ॥ ३९ ॥ ततःशिवानलेदेवंसमभ्यर्च्ययथाविधि ॥ हुत्वाहुतित्रयंशिष्यमुपवेश्ययथापुरा ॥ ४० ॥ दर्भाग्रैःसंस्पृशंतंतंविधायात्मानमात्मवित् ॥ नमस्कृत्यमहादेवंनाडीसंधानमाचरेत् ॥ ४१ ॥ शिवशास्त्रोक्तमार्गेणकृत्वाप्राणस्यनिर्गमम् ॥ शिष्यदेहप्रवेशंचस्मृत्वामंत्रांस्तुतर्पयेत् ॥ ४२ ॥ संतर्पणायमूलस्यतेनैवाहुतयोदश ॥ देयास्तिस्रस्तथांगानामंगैरेवयथाक्रमम् ॥ ४३ ॥ ततःपूर्णाहुतिंदत्त्वाप्रायश्चित्तंचदेशिकः ॥ पुनर्दशाहुतिंकुर्यान्मूलमंत्रेणमंत्रवित् ॥ ४४ ॥ पुनःसंपूज्यदेवेशंप्रणम्याचम्यदेशिकः ॥ दत्त्वाचैवयथान्यायंस्वजात्यावैश्यमुद्धरेत् ॥ ४५ ॥ तस्यैवंजनयेत्क्षात्रमुद्धारंचततःपुनः ॥ कृत्वातथैवविप्रत्वंजनयेदस्यदेशिकः ॥ ४६ ॥ राजन्यंचैवमुद्धृत्यकृत्वाविप्रंपुनस्तयोः ॥ रुद्रत्वंजनयेद्विप्रेरुद्रनामैवसाधयेत् ॥ ॥ ४७ ॥ प्रोक्षणंताडनंकृत्वाशिशोःस्वात्मानमात्मनि ॥ शिवात्मकमनुस्मृत्यस्फुरंतंविस्फुलिंगवत् ॥ ४८ ॥ नाड्यायथोक्तयावायुंरेचयन्मंत्रतोगुरुः ॥ निर्गम्यप्रविशेन्नाड्याशिष्यस्यत्हृदयंतथा ॥ ४९ ॥ ॥

नैवमूलमंत्रेणैव ॥ अंगानामंगदेवतानां ॥ अंगैःतत्तद्देवतामंत्रैः ॥ ४३ ॥ ४४ ॥ स्वजात्याःवैश्यजातेःसकाशात् ॥ ततःक्षात्रात् ॥ ४५ ॥ ४६ ॥ तयोः राजन्यवैश्ययोः ॥ ४७ ॥ शिशोःशिष्यस्य ॥ ४८ ॥ नाड्यासुषुम्नया ॥ ४९ ॥ ॥ ॥ ॥



Indira Gandhi National Centre for the Arts

प्रविश्यतस्यचैतन्यंनीलबिंदुनिभंस्मरन् ॥ स्वतेजसापास्तमलंज्वलंतमनुचिंतयेत् ॥ ५० ॥ तमादायतयानाड्या
मंत्रीसंहारमुद्रया ॥ पूरकेणनिवेश्यैनमेकीभावार्थमात्मनि ॥ ५१ ॥ कुंभकेनतयानाड्यारेचकेनयथापुरा ॥ तस्मा
दादायशिष्यस्यत्हृदयेतंनिवेशयेत् ॥ ५२ ॥ तमालभ्यशिवाल्लब्धंतस्मैदत्वोपवीतकम् ॥ हुत्वाहुतित्रयंपश्चाद्दद्या
त्पूर्णाहुतिंततः ॥ ५३ ॥ देवस्यदक्षिणेशिष्यमुपवेश्यवरासने ॥ कुशपुष्पपरिस्तीर्णेबद्धांजलिमुदङ्मुखम् ॥ ५४ ॥
स्वस्तिकासनमारूढंविधायप्राङ्मुखःस्वयम् ॥ वरासनस्थितोमंत्रैर्महामंगलनिस्वनैः ॥ ५५ ॥ समादायघटंपूर्णंपू
र्वमेवप्रसाधितम् ॥ ध्यायमानःशिवंशिष्यमभिषिंचेतदेशिकः ॥ ५६ ॥ अथापनुद्यस्नानांबुपरिधायसितांबरम् ॥
आचांतोलंकृतःशिष्यःप्रांजलिर्मंडपंव्रजेत् ॥ ५७ ॥ उपवेश्ययथापूर्वंतंगुरुर्दर्भविष्टरे ॥ संपूज्यमंडलेदेवंकरन्यासं
समाचरेत् ॥ ५८ ॥ ततस्तुभस्मनादेवंध्यायमानःस्वदेशिकः ॥ समालभेतपाणिभ्यांशिशुंशिवमुदीरयेत् ॥ ५९ ॥
अथतस्यशिवाचार्योदहनप्लावनादिकम् ॥ सकलीकरणंकृत्वामातृकान्यासवर्त्मना ॥ ६० ॥ ततःशिवासनंध्यात्वा
शिष्यमूर्धनिदेशिकः ॥ तत्रावाह्ययथान्यायमर्चयेन्मनसाशिवम् ॥ ६१ ॥ प्रार्थयेत्प्रांजलिर्देवंनित्यमत्रस्थितोभव॥
इतिविज्ञाप्यतंशंभोस्तेजसाभासुरंस्मरेत् ॥ ६२ ॥ संपूज्याथशिवंशैवीमाज्ञांप्राप्यशिवात्मिकाम् ॥ कर्णेशिष्यस्य
शनकैःशिवमंत्रमुदीरयेत् ॥ ६३ ॥ सतुबद्धांजलिःश्रुत्वामंत्रंतद्गतमानसः ॥ शनैस्तंव्याहरेच्छिष्यःशिवाचार्यस्यशा
सनात् ॥ ६४ ॥ ततःशाक्तंचसंदिश्यमंत्रंमंत्रविचक्षणः ॥ उच्चारयित्वाचसुखंतस्मैमंगलमादिशेत् ॥ ६५ ॥ ततःस
मासान्मंत्रार्थंवाच्यवाचकयोगतः ॥ समादिश्यैश्वरंरूपंयोगमासनमादिशेत् ॥ ६६ ॥ अथगुर्वाज्ञयाशिष्यःशिवा
ग्निगुरुसन्निधौ ॥ भक्त्यैवमभिसंधायदीक्षावाक्यमुदीरयेत् ॥ ६७ ॥ ॥ ॥ ॥



Indira Gandhi National Centre for the Arts

॥ ६८ ॥ ६९ ॥ ७० ॥ दद्यात्गुरुरितिशेषः॥७१॥गूढदेहंलिंगात्मकं ॥ ७२ ॥ ७३ ॥ ७४ ॥ ७५ ॥ ७६ ॥ ७७ ॥ ७८ ॥ इतिश्रीशैवमहापुराणेवायवीयसंहि
तायांउत्तरभागेदीक्षाविधानंनामचतुर्दशोऽध्यायः ॥ १४ ॥ ॐनमःशिवाय ॥ षडध्वशुद्धिकथनंशिवपूजाविधिस्ततः ॥ दहनप्लावनाद्यंचसर्वंपंचदशोस्थित



वरंप्राणपरित्यागश्छेदनंशिरसोपिवा ॥ नत्वनभ्यर्च्यभुंजीयांभगवंतंत्रिलोचनम् ॥ ६८ ॥ सएवमुक्तानियतोयाव
न्मोहविपर्ययः ॥ तावदाराधयेद्देवंतन्निष्ठस्तत्परायणः ॥ ६९ ॥ ततःससमयोनामभविष्यतिशिवाश्रमे ॥ लब्धाधि
कारोगुर्वाज्ञापालकस्तद्वशोभवेत् ॥ ७० ॥ अतःपरंन्यस्तकरोभस्मादायस्वहस्ततः ॥ दद्याच्छिष्यायमूलेनरुद्राक्षं
चाभिमंत्रितं ॥ ७१ ॥ प्रतिमांवापिदेवस्यगूढदेहमथापिवा ॥ पूजाहोमजपध्यानसाधनानिचसंभवे ॥ ७२ ॥ सो
पिशिष्यःशिवाचार्याल्लब्धानिबहुमानतः ॥ आददीताज्ञयातस्यदेशिकस्यनचान्यथा ॥ ७३ ॥ आचार्यादाप्तमखिलं
शिरस्याधायभक्तितः ॥ रक्षयेत्पूजयेच्छंभुंमठेवागृहएववा ॥ ७४ ॥ अतःपरंशिवाचारमादिशेदस्यदेशिकः ॥ भक्ति
श्रद्धानुसारेणप्रज्ञायाश्चनुसारतः ॥ ७५ ॥ यदुक्तंयत्समाज्ञातंयच्चवान्यत्प्रकीर्तितम् ॥ शिवाचार्येणसमयेतत्सर्वंशि
रसावहेत् ॥ ७६ ॥ शिवागमस्यग्रहणंवाचनंश्रवणंतथा ॥ देशिकादेशतःकुर्यान्नस्वेच्छातोनचान्यतः ॥ ७७ ॥
इतिसंक्षेपतःप्रोक्तःसंस्कारःसमयाव्हयः ॥ साक्षाच्छिवपुरप्राप्तौनृणांपरमसाधनम् ॥ ७८॥ इतिश्रीशिवमहापु
राणेवायवीयसंहितायामुत्तरभागेचतुर्दशोऽध्यायः ॥ १४ ॥ उपमन्युरुवाच ॥ अतःपरंसमालक्ष्यगुरुःशिष्यस्ययो
ग्यताम् ॥ षडध्वशुद्धिंकुर्वीतसर्वबंधविमुक्तये ॥ १ ॥ कलातत्त्वंचभुवनंवर्णंपदमतःपरम् ॥ मंत्रश्चेतिसमासेनषड
ध्वापरिपठ्यते ॥ २ ॥ निवृत्त्याद्याःकलाःपंचकलाध्वाकथ्यतेबुधैः ॥ व्याप्ताःकलाभिरितरेत्वध्वानःपंचपंचभिः ॥
॥ ३ ॥ शिवतत्त्वादिभूम्यंतंतत्त्वाध्वासमुदाहृतः ॥ षड्विंशसंख्ययोपेतःशुद्धाशुद्धोभयात्मकः ॥ ४ ॥



म् ॥ १ ॥ १ ॥ अध्वभेदमाह ॥ कलेति ॥ २ ॥ निवृत्याद्याःनिवृत्तिप्रतिष्ठाविद्याशांतिशांत्यतीतात्मिकाःपूर्वोक्ताः ॥ व्याप्ताइति ॥ पंचभिःकलाभिरि
तरेतत्वादयःपंचाध्वानोव्याप्ताइत्यर्थः ॥ ३ ॥ ४ ॥ ॥ ॥ ॥ ॥

Indira Gandhi National Centre for the Arts

आधारादीति ॥ आधारादयउन्मनांतालोकविशेषास्तदात्मकइत्यर्थः उपभेदोऽवांतरभेदः॥५॥पंचाशदिति ॥ अकारादयःषोडशस्वराः कादयोमांताःस्पर्शाः पंचविंशतिः यादयोंऽतस्थाश्चतस्रः शादयःक्षसहिताःपंचोष्माणइत्यर्थः ॥ अनेकेति ॥ नामाख्यातोपसर्गनिपातरूपभेदसंपन्नइत्यर्थः ॥ ६ ॥ प्रधानेति ॥ प्रधानभूतायईशानादिमंत्राःपंचतदवयवत्वेत्वित्यर्थः ॥ ७ ॥ परमविद्ययापंचाक्षरमंत्ररूपया ॥ ८ ॥ ९ ॥ १० ॥ ११ ॥ १२ ॥ कलशमंडलंक

आधाराद्युन्मनांतश्चभुवनाध्वाप्रकीर्तितः ॥ विनाभेदोपभेदाभ्यांषष्टिसंख्यासमन्वितः ॥ ५ ॥ पंचाशद्रुद्ररूपास्तु वर्णावर्णाध्वसंज्ञितः ॥ अनेकभेदसंपन्नःपदाध्वासमुदाहृतः ॥ ६ ॥ महामंत्रोपमंत्राणांवर्ततेवयवात्मना ॥ प्रधानावयवत्वेतुसोध्वापंचपदात्मकः ॥ ७ ॥ सप्तकोटिमहामंत्रामंत्राध्वासमुदाहृतः ॥ सर्वोपिमंत्रैर्मंत्राध्वाव्याप्तःपरमविद्यया ॥ ॥ ८ ॥ यथाशिवोनतत्वेषुगण्यतेतत्वनायकः ॥ मंत्राध्वनिनगण्येततथासौमंत्रनायकः ॥ ९ ॥ कलाध्वनोव्यापकत्वंव्याप्यत्वंचेतराध्वनां ॥ नवेत्तितत्वतोयःसनैवार्हत्यध्वशोधनम् ॥ १० ॥ षड्विधस्याध्वनोरूपंनयेनविदितंभवेत् ॥ व्याप्यव्यापकतातेनज्ञातुमेवनशक्यते ॥ ११ ॥ तस्मादध्वस्वरूपंचव्याप्यव्यापकतांतथा ॥ यथावदवगम्यैवकुर्यादध्वविशोधनम् ॥ १२ ॥ कुंडमंडलपर्यंतंतत्रकृत्वायथापुरा ॥ द्विहस्तमानंकुर्वीतप्राच्यांकलशमंडलम् ॥ १३ ॥ ततः स्नातःशिवाचार्यःसशिष्यःकृतनैत्यकः ॥ प्रविश्यमंडलंशंभोःपूजांपूर्ववदाचरेत् ॥ १४ ॥ तत्राढकावरैःसिद्धंतंदुलैः पायसंप्रभोः ॥ अर्द्धंनिवेद्यहोमार्थंशेषंसमुपकल्पयेत् ॥ १५ ॥ पुरतःकल्पितेवाथमंडलेवर्णमंडिते ॥ स्थापयेत्पंचकलशान्दिक्षुमध्येचदेशिकः ॥ १६ ॥ तेषुब्रह्माणिमूलार्णैर्बिंदुनादसमन्वितैः ॥ नमाद्यैश्चयकारांतैःकल्पयेत्कल्पवित्तमः ॥ १७ ॥ ईशानंमध्यमेकुंभेपुरुषंपुरतःस्थिते ॥ अघोरंदक्षिणेवामेवामंसद्यंचपश्चिमे ॥ १८ ॥ रक्षांविधायमुद्रांचबध्वाकुंभाभिमंत्रणम् ॥ कृत्वाशिवानलेहोमंप्रारभेतयथापुरा ॥ १९ ॥ यदर्धंपायसंपूर्वंहोमार्थमुपकल्पितम् ॥ हुत्वाशिष्यस्यतच्छेषंभोक्तुंसमुपकल्पयेत् ॥ २० ॥ ॥ ॥ ॥ ॥

लशस्थापनार्थमंडलं ॥ १३ ॥ १४ ॥ आढकावरैःचतुःप्रस्थादधिकैः ॥ १५ ॥ दिक्षुपूर्वादिषुचतसृषु ॥ १६ ॥ मूलार्णैःमूलमंत्राक्षरैःबिंदुनादसमन्वितैः नमंशिइत्यादिरूपैः ॥ कल्पवित्तमःपूर्णविधिज्ञः ॥ १७ ॥ १८ ॥ १९ ॥ २० ॥ ॥ ॥ ॥ ॥

॥ २१ ॥ प्रदीपनप्रकारमाह ॥ ओंकारादिति ॥ ओंहुंनमःशिवायफट्स्वाहेत्येवमित्यर्थः ॥ २२ ॥ तेषामंगानां ॥ २३ ॥ त्रिगुणंसूत्रंत्रिगुणीकृत्यसंमंत्र्य सूत्रेणाशिशोःशिखाग्रेबंधयेदित्यन्वयः ॥ २४ ॥ सुषुम्नांतालुमध्यगतांनाडीं ॥ तत्रसूत्रे ॥ २५ ॥ तस्याःशांतमुद्रायाः ॥ २६ ॥ द्वादशेति ॥ द्वादशएकादश

तर्पणांतंचमंत्राणांकृत्वाकर्मयथापुरा ॥ हुत्वापूर्णाहुतिंतेषांततःकुर्यात्प्रदीपनम् ॥ २१ ॥ ओंकारादनुहुंकारंततोमूलं फडंतकम् ॥ स्वाहांतंदीपनेप्राहुरंगानिचयथाक्रमम् ॥ २२ ॥ तेषामाहुतयस्तिस्रोदेयादीपनकर्मणि ॥ मंत्रैरेकैकश स्तैस्तुविचिंत्यादीप्तमूर्तयः ॥ २३ ॥ त्रिगुणंत्रिगुणीकृत्यद्विजकन्याकृतंसितम्॥ सूत्रंसूत्रेणसंमंत्र्यशिखाग्रेबंधयेच्छि शोः ॥ २४ ॥ चरणांगुष्ठपर्यंतमूर्ध्वकायस्यतिष्ठतः ॥ लंबयित्वातुतत्सूत्रंसुषुम्नांतत्रयोजयेत् ॥ २५ ॥ शांतयामुद्रया दायमूलमंत्रेणमंत्रवित् ॥ हुत्वाहुतित्रयंतस्याःसान्निध्यमुपकल्पयेत् ॥ २६ ॥ हृदिसंताड्यशिष्यस्यपुष्पक्षेपेणपूर्वव त् ॥ चैतन्यंसमुपादायद्वादशांतेनिवेश्यच ॥ २७ ॥ सूत्रंसूत्रेणसंयोज्यसंरक्ष्यास्त्रेणवर्मणा ॥ अवगुंठ्याथतत्सूत्रंशि ष्यदेहंविचिंतयेत् ॥ २८ ॥ मलत्रयमलंभोगभोग्यभोक्तृत्वलक्षणम् ॥ विषयेंद्रियदेहादिजनकंतस्यभावयेत् ॥ ॥ २९ ॥ व्योमादिभूतरूपिण्यः शांत्यतीतादयःकलाः ॥ सूत्रेस्वनामभिर्योज्याःपूज्याश्चैवनमोयुतैः ॥ ३० ॥ अथ वाभूतबीजैस्तत्कृत्वापूर्वोदितंक्रमात् ॥ ततोमलादेस्तत्वादौव्याप्तिंसमवलोकयेत् ॥ ३१ ॥ कलाव्याप्तिंमलादौच हुत्वासंदीपयेत्कलाः ॥ शिष्यंशिरसिसंताड्यतत्रदेहेयथाक्रमम् ॥ ३२ ॥ शांत्यतीतपदेसूत्रंलांछयेन्मंत्रमुच्चरन् ॥ एवंकृत्वानिवृत्त्यंतंशांत्यतीताद्यनुक्रमात् ॥ ३३ ॥ हुत्वाहुतित्रयंपश्चान्मंडलेचाशिवंयजेत् ॥ देवस्यदक्षिणेशिष्यमुप वेश्योत्तरामुखम् ॥ ३४ ॥ सदर्भेमंडलेदद्याद्धोमशिष्टंचरुंगुरुः ॥ शिष्यस्तद्गुरुणादत्तंसत्कृत्यशिवपूर्वकम् ॥ ३५ ॥ भुक्त्वापश्चाद्द्विराचम्यशिवमंत्रमुदीरयेत् ॥ अपरेमंडलेदद्यात्पंचगव्यंतथागुरुः ॥ ३६ ॥ सोपितच्छक्तितःपीत्वाद्विरा चम्यशिवंस्मरेत् ॥ तृतीयेमंडलेशिष्यमुपवेश्ययथापुरा ॥ ३७ ॥ ॥ ॥ ॥

तत्वानामाधारईश्वरःसएवांतोलयावधिस्तत्रेत्यर्थः ॥ एकादशतत्वानिनवैकादशपंचत्रीणीत्यादिनाश्रीमद्भागवतेप्रोक्तानि ॥ एकमात्रममात्रंहिद्वादशांतंव्य वस्थितमितिशिवगीतायामुक्तं॥निवेश्यनिवेद्येतिपाठांतरं ॥ २७ ॥ अवगुंठ्यवेष्टयित्वा ॥ २८ ॥ मलत्रयंजात्यायुर्भोगरूपं ॥ तस्यशिष्यस्य ॥ २९ ॥ स्वनामभिःशांत्यतीतादिनामभिः ॥ ३० ॥ भूतबीजैःव्योमादिबीजैः ॥ ३१ ॥ संदीपयेत्प्रकाशयेत् ॥ ३२ ॥ ३३ ॥ ३४ ॥ ३५ ॥ ३६ ॥ ३७ ॥



Indira Gandhi National Centre for the Arts

दंतपवनं दंतशोधनकाष्ठं ॥ तस्यकाष्ठस्य ॥ ३८ ॥ ३९ ॥ ४० ॥ अशस्ताशामुखेअप्रशस्तदक्षिणादिदिङ्मुखे ॥ ४१॥४२ ॥ अधिवासयेत्शाययेत् ॥

प्रदद्याद्दंतपवनंयथाशास्त्रोक्तलक्षणम् ॥ अग्रेणतस्यमृदुनाप्राङ्मुखोवाप्युदङ्मुखः ॥ ३८ ॥ वाचंनियम्यचासीनः
शिष्योदंतान्विशोधयेत् ॥ प्रक्षाल्यदंतपवनंत्यक्त्वाचम्यशिवंस्मरेत् ॥ ३९ ॥ प्रविशेद्देशिकादिष्टःप्रांजलिःशिवमं
डलम् ॥ त्यक्तंतद्दंतपवनंदृश्यतेगुरुणायदि ॥ ४० ॥ प्रागुदक्पश्चिमेचाग्रंशिवमन्यच्छिवेतरत् ॥ अशस्ताशामुखे
तस्मिन्गुरुस्तद्दोषशांतये ॥ ४१ ॥ शतमर्द्धंतदर्द्धंवाजुहुयान्मूलमंत्रतः ॥ ततःशिष्यंसमालभ्यजपित्वाकर्णयोःशि
वम् ॥ ४२ ॥ देवस्यदक्षिणेभागेतंशिष्यमधिवासयेत् ॥ अहतास्तरणास्तीर्णेसदर्भशयनेशुचिः ॥ ४३ ॥ मंत्रितेंतः
शिवंध्यायन्प्राक्शिरस्कोनिशिस्वपेत् ॥ शिखायांबद्धसूत्रस्यशिखयाताच्छिखांगुरुः ॥४४॥ आवेष्ट्याहतवस्त्रेणतमा
च्छाद्यचवर्मणा ॥ रेखात्रयंचपरितोभस्मनातिलसर्षपैः ॥ ४५ ॥ कृत्वास्त्रजप्तैस्तद्बाह्येदिगीशानांबलिंहरेत् ॥ शि
ष्योपिपरतोनश्नन्कृत्वैवमधिवासनम् ॥ ४६ ॥ प्रबुध्योत्थायगुरवेस्वप्नंदृष्टंनिवेदयेत् ॥ ततःस्नानादिकंसर्वंसमाप्या
चार्यचोदितः ॥ ४७ ॥ गच्छेद्बद्धांजलिर्ध्यायन्शिवमंडलपार्श्वतः ॥ अथपूजांविनासर्वंकृत्वापूर्वदिनेयथा ॥ ४८ ॥
नेत्रबंधनपर्यंतंदर्शयेन्मंडलंगुरुः ॥ बद्धनेत्रेणशिष्येणपुष्पावकिरणेकृते ॥ ४९ ॥ यत्रापतंतिपुष्पाणितस्यनामास्य
संदिशेत् ॥ ततोपनीयनिर्माल्यंमंडलेस्मिन्यथापुरा ॥ ५० ॥ पूजयेद्देवमीशानंजुहुयाच्चशिवानले ॥ शिष्येणयदि
दुःस्वप्नोदृष्टस्तद्दोषशांतये ॥ ५१ ॥ शतमर्धंतदर्धंवाजुहुयान्मूलविद्यया ॥ ततःसूत्रंशिखाबद्धंलंबयित्वायथापुरा ॥
॥ ५२ ॥ आधारपूजाप्रभृतियन्निवृत्तिकलाश्रयं ॥ वागीश्वरीपूजनांतंकुर्याद्धोमपुरःसरम् ॥ ५३ ॥ अथप्रणम्यवा
गीशांनिवृत्तेर्व्यापिकांसतीं ॥ मंडलेदेवमभ्यर्च्यहुत्वाचैवाहुतित्रयम् ॥ ५४ ॥ प्रार्थयेच्चशिशोःप्राप्तिंयुगपत्सर्वयोनि
षु ॥ सूत्रदेहेथशिष्यस्यताडनप्रोक्षणादिकं ॥ ५५ ॥ ॥ ॥

॥ ४३ ॥ शिखयाअग्रेण ॥ तच्छिखांशिष्यशिखां ॥ ४४ ॥ तंशिष्यं ॥ ४५ ॥ अस्त्रजप्तैरस्त्रमंत्राभिमंत्रितैःतिलसर्षपैः ॥ ४६ ॥ ४७ ॥ ४८ ॥ ४९ ॥
॥ ५० ॥ ५१ ॥ ५२ ॥ कुर्यादिति ॥ उक्तप्रकारेणेतिभावः ॥ ५३ ॥ ५४ ॥ सर्वयोनिषुवक्ष्यमाणासुचतुर्दशसुयोनिषु ॥ ५५ ॥

Indira Gandhi National Centre for the Arts

॥ ५६ ॥ ५७ ॥ तासुयोनिषु ॥ ५८ ॥ ५९ ॥ निष्पंनंगर्भमितिशेषः ॥ ६० ॥ ६१ ॥ ६२ ॥ पाशत्रयंजात्यायुर्भोगरूपं ॥ अत्यंतभेदतः



कृत्वात्मानंसमादायद्वादशांतेनिवेद्यच ॥ ततोप्यादायमूलेनमुद्रयाशास्त्रदृष्टया ॥ ५६ ॥ योजयेन्मनसाचार्योयुग
पत्सर्वयोनिषु ॥ देवानांजातयश्चाष्टौतिरश्चांपंचजातयः ॥५७॥ जात्यैकयामानुषयायोनयश्चचतुर्दश ॥ तासुसर्वा
सुयुगपत्प्रवेशायशिशोर्द्धिया ॥ ५८ ॥ वागीशान्यांयथान्यायंशिष्यात्मानंनिवेशयेत् ॥ गर्भनिष्पत्तयेदेवंसंपूज्य
प्रणिपत्यच ॥ ५९ ॥ हुत्वाचैवयथान्यायंनिष्पन्नंतदनुस्मरेत् ॥ निष्पन्नस्यैवमुत्पत्तिमनुवृत्तिंचकर्मणः ॥ ६० ॥ आ
र्जवंभोगनिष्पतिंकुर्यात्प्रीतिंपरांतथा ॥ निष्कृत्यर्थंचजात्यायुर्भोगसंस्कारसिद्धये ॥ ६१ ॥ हुत्वाहुतित्रयंदेवंप्रार्थये
द्देशिकोत्तमः ॥ भोक्तृत्वविषयासंगमलंतत्कार्यशोधनम् ॥ ६२ ॥ कृत्वैवमेवशिष्यस्यछिंद्यात्पाशत्रयंततः ॥ निवृत्त्या
परिबद्धस्यपाशस्यात्यंतभेदनं ॥ ६३ ॥ कृत्वाशिष्यस्यचैतन्यंस्वच्छंमन्येतकेवलम् ॥ हुत्वापूर्णाहुतिंवन्हौब्रह्माणंपूज
येत्ततः ॥ ६४ ॥ हुत्वाहुतित्रयंतस्मैशिवाज्ञामनुसंदिशेत् ॥ पितामहत्वयानास्ययातुःशैवंपरंपदम् ॥ ६५ ॥ प्रतिबं
धोविधातव्यःशैवाज्ञैषागरीयसी ॥ इत्यादिश्यतमभ्यर्च्यविसृज्यचविधानतः ॥ ६६ ॥ समभ्यर्च्यमहादेवंजुहुया
दाहुतित्रयम् ॥ निवृत्त्याशुद्धमुद्धृत्यशिष्यात्मानंयथापुरा ॥ ६७ ॥ निवेश्यात्मनिसूत्रेचवागीशांपूजयेत्ततः ॥ हुत्वा
हुतित्रयंतस्मैप्रणम्यचविसृज्यतां ॥ ६८ ॥ कुर्यान्निवृत्तेःसंधानंप्रतिष्ठाकलयासह ॥ संधानेयुगपत्पूजांकृत्वाहुत्वा
हुतित्रयं ॥ ६९ ॥ शिष्यात्मनःप्रतिष्ठायांप्रवेशंत्वथभावयेत् ॥ ततःप्रतिष्ठामावाह्यकृत्वाशेषंपुरोदितं ॥७०॥ तद्व्या
प्तिंव्यापिकांतस्यवागीशानींचभावयेत् ॥ पूर्णेंदुमंडलप्रख्यांकृत्वाशेषंचपूर्ववत् ॥ ७१ ॥ विष्णवेसंदिशेदाज्ञांशिव
स्यपरमात्मनः ॥ विष्णोर्विसर्जनाद्यंचकृत्वाशेषंचविद्यया ॥ ७२ ॥ प्रतिष्ठामनुसंधायतस्यांचापियथापुरा ॥ कृत्वा
नुचिंत्यतद्व्याप्तिंवागीशांचयथाक्रमम् ॥ ७३ ॥ ॥ ॥ ॥ ॥



अत्यंतविच्छेदात् ॥ ६३ ॥ ६४ ॥ तस्मैब्रह्मणे ॥ ६५ ॥ ६६ ॥ ६७ ॥ तांवागीशां ॥ ६८ ॥ प्रतिष्ठाकलयाप्रतिष्ठारूपायाकलातयासह ॥ ६९ ॥
॥ ७० ॥ तस्यस्वात्मनः ॥ ७१ ॥ विद्ययामहामंत्रेण ॥ ७२ ॥ अस्यविष्णोः ॥ ७३ ॥ ॥ ॥

Indira Gandhi National Centre for the Arts

दीप्ताग्नौपूर्णहोमांतंकृत्वाशेषंचपूर्ववत् ॥ नीलरुद्रमुपस्थायतस्मैपूजादिकंतथा ॥ ७४ ॥ कृत्वाकर्मशिवाज्ञांचदद्या
त्पूर्वोक्तवर्त्मना ॥ ततस्तमपिचोद्वास्यकृत्वातस्याथशांतये ॥ ७५ ॥ विद्याकलांसमाधायतद्व्याप्तिंचावलोकयेत् ॥
स्वात्मनोऽव्यापिकांतद्वद्वागीशींचयथापुरा ॥ ७६ ॥ बालार्कसदृशाकारांभासयंतींदिशोदश ॥ ततःशेषंयथापूर्वंकृत्वा
देवंमहेश्वरम् ॥ ७७ ॥ आवाह्याराध्यहुत्वास्मैशिवाज्ञांमनसादिशेत् ॥ महेश्वरंततोत्सृज्यकृत्वापंचकलामिमां ॥
॥ ७८ ॥ शांत्यतीतांकलांनीत्वातद्व्याप्तिमवलोकयेत् ॥ स्वात्मनोऽव्यापिकांतद्वद्वागीशांचविचिंतयेत् ॥ ७९ ॥ नभो
मंडलसंकाशांपूर्णांतंचापिपूर्ववत् ॥ कृत्वाशेषंविधानेनसमभ्यर्च्यसदाशिवम् ॥ ८० ॥ तस्मैसमादिशेदाज्ञांशंभोर
मितकर्मणः ॥ तत्रापिचयथापूर्वंशिवंशिरसिपूर्ववत् ॥ ८१ ॥ समभ्यर्च्यचवागीशंप्रणम्यचविसर्जयेत् ॥ ततःशिवे
नसंप्रोक्ष्यशिष्यंशिरसिपूर्ववत् ॥ ८२ ॥ विलयंशांत्यतीतायाःशक्तितत्वेथचिंतयेत् ॥ षडध्वनःपरेपारेसर्वाध्वव्यापि
नींपराम् ॥ ८३ ॥ कोटिसूर्यप्रतीकाशांशैवींशक्तिंचचिंतयेत् ॥ तदग्रेशिष्यमानीयशुद्धस्फटिकनिर्मलम् ॥ ८४ ॥ प्र
क्षाल्यकर्तरींपश्चाच्छिवशास्त्रोक्तमार्गतः ॥ कुर्यात्तस्यशिखाछेदंसहसूत्रेणदेशिकः ॥ ८५ ॥ ततस्तांगोमयेन्यस्याशि
वाग्नौजुहुयाच्छिखाम् ॥ वौषडंतेनमूलेनपुनःप्रक्षाल्यकर्तरीं ॥ ८६ ॥ हस्तौचशिष्यचैतन्यंतद्देहेविनिवेशयेत् ॥ ततः
स्नातंसमाचांतंकृतस्वस्त्ययनंशिशुम् ॥ ८७ ॥ प्रवेश्यमंडलाभ्याशंप्रणिपत्यचदंडवत् ॥ पूजांकृत्वायथान्यायंक्रि
यावैकल्यशुद्धये ॥ ८८ ॥ उपांशूच्चारयोगेनजुहुयादाहुतित्रयम् ॥ पुनःसंपूज्यदेवेशंमंत्रवैकल्यशुद्धये ॥ ८९ ॥ मान
सोच्चारयोगेनजुहुयादाहुतित्रयम् ॥ ततःशिवंसमाराध्यमंडलस्थंसहांबया ॥ ९० ॥ हुत्वाहुतित्रयंपश्चात्प्रार्थयेत्प्रां
जलिर्गुरुः ॥ भगवंस्त्वत्प्रसादेनशुद्धिरस्यषडध्वनः ॥ ९१ ॥ ॥ ॥



Indira Gandhi National Centre for the Arts

॥ ९२ ॥ भूतानिआकाशादीनि ॥ ९३ ॥ ९४ ॥ अस्यशिष्यस्य ॥ ९५ ॥ ९६ ॥ ९७ ॥ ९८ ॥ ९९ ॥ १०० ॥ १०१ ॥ १०२ ॥ १०३ ॥ १०४ ॥



कृतातस्मात्परंधामगमयैनंतवाव्ययम् ॥ इतिविज्ञाप्यदेवायनाडीसंधानपूर्वकम् ॥ ९२ ॥ पूर्णांतंपूर्ववत्कृत्वाततो
भूतानिशोधयेत् ॥ स्थिरास्थिरेततःशुध्यैशीतोष्णेचततःपरं ॥ ९३ ॥ ध्यायेद्व्याप्त्यैकताकारेभूतशोधनकर्मणि ॥
भूतानांग्रंथिविच्छेदंकृत्वात्यक्त्वासहाधिपैः ॥ ९४ ॥ भूतानिस्थितियोगेनयोजयेत्परमेशिवे ॥ विशोध्यास्यतनुंदग्ध्वा
प्लावयित्वासुधाकणैः ॥ ९५ ॥ स्नाप्यात्मानंततःकुर्याद्विशुद्धाध्वमयंवपुः ॥ तत्रादौशांत्यतीतांतुव्यापिकांस्वाध्वनः
कलां ॥ ९६ ॥ शुद्धामेवशिशोर्मूर्ध्निन्यसेच्छांतिमुखेतथा ॥ विद्यांगलादिनाभ्यंतंप्रतिष्ठांतदधःक्रमात् ॥ ९७ ॥ जा
न्वंतंतदधोन्यस्येन्निवृत्तिंचानुचिंतयेत् ॥ स्वबीजैःसूत्रमंत्रंचन्यस्यांगैस्तंशिवात्मकम् ॥ ९८ ॥ बुद्ध्वातंत्दृदयांभोजे
देवमावाह्यपूजयेत् ॥ आशास्यनित्यसान्निध्यंशिवस्वात्म्यंशिशौगुरुः ॥ ९९ ॥ शिवतेजोमयस्यास्यशिशोरापादये
द्गुणान् ॥ अणिमादीन्प्रसीदेतिप्रदद्यादाहुतित्रयम् ॥ १०० ॥ तथैवतुगुणानेवपुनरस्योपपादयेत् ॥ सर्वज्ञतांतथा
तृप्तिंबोधंचाद्यंतवर्जितं ॥ १०१ ॥ अलुप्तशक्तिंस्वातंत्र्यमनंतांशक्तिमेवच ॥ ततोदेवमनुज्ञाप्यसद्यादिकलशैस्तुतम् ॥
॥ १०२ ॥ अभिषिंचेतदेवेशंध्यायमानोयथाक्रमम् ॥ अथोपवेश्यतंशिष्यंशिवमभ्यर्च्यपूर्ववत् ॥ १०३ ॥ लब्धा
नुज्ञःशिवाच्छैवींविद्यामस्मैसमादिशेत् ॥ ओंकारपूर्विकांतेनसंपुटांतुनमोंतगाम् ॥ १०४ ॥ शिवशक्तियुतांचैवशक्ति
विद्यांचताद्दशीम् ॥ ऋषिंछंदश्चदैवंचशिवतांशिवयोस्तथा ॥ १०५ ॥ पूजांसावरणांशंभोरासनानिचसंदिशेत् ॥ पु
नःसंपूज्यदेवेशंयन्मयासमनुष्ठितम् ॥ १०६ ॥ सुकृतंकुरुतत्सर्वमितिविज्ञापयेच्छिवम् ॥ सहशिष्योगुरुर्देवंदंडवत्
क्षितिमंडले ॥ १०७ ॥ प्रणम्योद्वासयेत्तस्मान्मंडलात्पावकादपि ॥ ततःसदसिकाःसर्वेपूज्याःपूजार्हकाःक्रमात् ॥
॥ १०८ ॥ सेव्यावित्तानुसारेणसदस्याश्चसहार्त्विजः ॥ वित्तसाठ्यंनकुर्वीतयदीच्छेच्छिवमात्मनः ॥ १०९ ॥ इतिश्री
शिवमहापुराणेवायवीयसंहितायामुत्तरभागेपंचदशोऽध्यायः ॥ १५ ॥ ॥ ॥



॥ १०५ ॥ १०६ ॥ १०७ ॥ १०८ ॥ इतिश्रीशैवमहापुराणेवायवीसंहितायामुत्तरभागेपंचदशोऽध्यायः ॥ १५ ॥ ॥

Indira Gandhi National Centre for the Arts

ओंनमःशिवाय ॥ नाममंत्रस्यशैवस्यसाधनंचसविस्तरं ॥ यदुक्तंमुनिनातच्चषोडशेत्रनिरूप्यते ॥ १ ॥ साधकमिति ॥ नामतःनाम्नासाधकमितिप्रसिद्धंसं
स्कारमित्यर्थः ॥ १ ॥ २ ॥ ३ ॥ ४ ॥ पुष्पांबुनापुष्पयुक्तोदकेन ॥ ५ ॥ ६ ॥ गुरुःआचार्यः ॥ साधनमिति ॥ विनियोगंतत्तत्कर्मसूपयोगंसाधका

उपमन्युरुवाच ॥ अतःपरंप्रवक्ष्यामिसाधकंनामनामतः ॥ संस्कारंमंत्रमाहात्म्यकथनेसूचितंमया ॥ १ ॥ संपूज्य
मंडलेदेवंस्थाप्यकुंभंचपूर्ववत् ॥ हुत्वाशिष्यमनुष्णीषंप्रापयेद्भूमिमंडलं ॥ २ ॥ पूर्णांतंपूर्ववत्कृत्वाहुत्वाहुतिशतंतथा ॥
संतर्प्यमूलमंगानिदशांशैर्देशिकोत्तमः ॥ ३ ॥ संदीप्यचयथापूर्वंकृत्वापूर्णांदितंक्रमात् ॥ अभिषिच्ययथापूर्वंप्रद
द्यान्मंत्रमुत्तमम् ॥ ४ ॥ तत्रविद्योपदेशांतंकृत्वाविस्तरशःक्रमात् ॥ पुष्पांबुनाशिशोःपाणौविद्यांशैवींसमर्पयेत् ॥
॥ ५ ॥ तवैहिकामुष्मिकयोःसर्वसिद्धिफलप्रदः ॥ भवत्वेषमहामंत्रःप्रसादात्परमेष्ठिनः ॥ ६ ॥ इत्युक्त्वादेवमभ्यर्च्य
लब्धानुज्ञःशिवाद्गुरुः ॥ साधनंविनियोगंचसाधकायसमादिशेत् ॥ ७ ॥ तच्छ्रुत्वागुरुसंदेशंक्रमशोमंत्रसाधकः ॥
पुरतोविनियोगस्यमंत्रसाधनमाचरेत् ॥ ८ ॥ साधनंमूलमंत्रस्यपुरश्चरणमुच्यते ॥ पुरतश्चरणीयत्वाद्विनियोगाख्य
कर्मणः ॥ ९ ॥ नात्यंतकरणीयंतुमुमुक्षोर्मंत्रसाधनम् ॥ कृतंतुतदिहान्यत्रतस्यापिशुभदंभवेत् ॥ १० ॥ शुभेहनिशु
भेदेशेकालेवादोषवर्जिते ॥ शुक्लदंतनखःस्नातःकृतपूर्वाण्हिकक्रियः ॥ ११ ॥ अलंकृत्ययथालब्धैर्गंधमाल्यविभूष
णैः ॥ सोष्णीषःसोत्तरासंगःसर्वशुक्लःसमाहितः ॥ १२ ॥ देवालयेगृहेन्यस्मिन्देशेवासुमनोहरे ॥ सुखेनाभ्यस्तपूर्वे
णत्वासनेनकृतासनः ॥ १३ ॥ तनुंकृत्वात्मनःशैवींशिवशास्त्रोक्तवर्त्मना ॥ संपूज्यदेवदेवेशंनकुलीश्वरमीश्वरम् ॥
॥ १४ ॥ निवेद्यपायसंतस्मैसमाप्याराधनक्रमम् ॥ प्रणिपत्यचतंदेवंप्राप्तानुज्ञश्चतन्मुखात् ॥ १५ ॥ कोटिवारंतद
र्धंवातदर्धंवाजपेच्छिवम् ॥ लक्षविंशतिकंवापिदशलक्षमथापिवा ॥ १६ ॥ अहिंसकःक्षमीशांतोदांतश्चैवसदाभवेत् ॥
ततश्चपायसाक्षारालवणैकमिताशनः ॥ १७ ॥ ॥ ॥ ॥

यशिष्याय ॥ ७ ॥ पुरतःप्रथमतः ॥ ८ मूलमंत्रस्येति ॥ पुरश्चरणमिति ॥ ९ ॥ तस्यापिमुमुक्षोरपि ॥ १० ॥ ११ ॥ सोत्तरासंगःसप्रावरणः ॥ १२ ॥
॥ १३ ॥ १४ ॥ तन्मुखात् ईश्वरमुखात् ॥ १५ ॥ १६ ॥ १७ ॥ ॥ ॥ ॥

॥ १८ ॥ १९ ॥ मंत्रेणपंचाक्षरेण ॥ २० ॥ २१ ॥ द्रव्यैश्चरुबिल्वतिलादिभिः ॥ २२ ॥ २३ ॥ मंत्रसाधनंविनापिजपप्रकारमाह ॥ अथवेति ॥ ॥ २४ ॥ एतन्मंत्रजपस्यफलमाह ॥ नतस्येति ॥ २५ ॥ जपेदिति ॥ जलादिनास्नात्वासाधनेविनियोगेनित्येनैमित्तिकेचकर्मणिजपेदितिसंबंधः॥२६॥ सूत्रीयज्ञोपवीती ॥ २७ ॥ इतिश्रीशैवमहापुराणेवायवीसंहितायामुत्तरभागेमंत्रसाधनप्रकारोनामषोडशोऽध्यायः ॥ १६ ॥ ओंनमःशिवाय ॥ आचार्य

अलाभेपायसस्याश्नन्फलमूलादिकानिवा ॥ विहितानिशिवेनैवविशिष्टान्युत्तरोत्तरम् ॥ १८ ॥ चरुंभक्ष्यमथोसक्तुकणान्यावकमेवच ॥ शाकंपयोदधिघृतंमूलंफलमथोदकम् ॥ १९ ॥ अभिमंत्र्यचमंत्रेणभक्ष्यभोज्यादिकानिच॥ साधनेस्मिन्विशेषेणनित्यंभुंजीतवाग्यतः ॥ २० ॥ मंत्राष्टशतपूतेनजलेनशुचिनाव्रती ॥ स्नायान्नदीनदोत्थेनप्रोक्षयेद्वाथशक्तितः ॥ २१ ॥ तर्पयेच्चतथानित्यंजुहुयाच्चशिवानले ॥ सप्तभिःपंचभिर्द्रव्यैस्त्रिभिर्वाथघृतेनवा ॥ २२ ॥ इत्थंभक्त्याशिवंशैवोयःसाधयतिसाधकः ॥ तस्येहामुत्रदुष्प्रापंनकिंचिदिहविद्यते ॥ २३ ॥ अथवाहरहर्मंत्रंजपेदेकाग्रमानसः ॥ अनश्नन्नेवसाहस्रंविनामंत्रस्यसाधनम् ॥ २४ ॥ नतस्यदुर्लभंकिंचिन्नतस्यास्त्यशुभंक्वचित् ॥ इह विद्यांश्रियंसौख्यंलब्ध्वामुक्तिंचविंदति ॥ २५ ॥ साधनेविनियोगेचनित्येनैमित्तिकेतथा ॥ जपेज्जलैर्भस्मनाचस्नात्वामंत्रेणचक्रमात् ॥ २६ ॥ शुचिर्बद्धशिखःसूत्रीसपवित्रकरस्तथा ॥ धृतत्रिपुंड्रुरुद्राक्षोविद्यांपंचाक्षरींजपेत् ॥२७॥ इतिश्रीशिवमहापुराणेवायवीयसंहितायामुत्तरभागेषोडशोऽध्यायः ॥ १६ ॥ ॥ छ ॥ उपमन्युरुवाच ॥ अथैवंसंस्कृतंशिष्यंकृतपाशुपतव्रतम् ॥ आचार्यत्वेभिषिंचेततद्योग्यत्वेनचान्यथा ॥ १ ॥ मंडलंपूर्ववत्कृत्वासंपूज्यपरमेश्वरम् ॥ स्थापयेत्पंचकलशान्दिक्षुमध्येचपूर्ववत् ॥ २ ॥ निवृत्तिंपुरतोन्यस्यप्रतिष्ठांपश्चिमेघटे॥ विद्यांदक्षिणतःशांतिमुत्तरेमध्यतःपराम् ॥ ३ ॥ कृत्वादीक्षादिकंतत्रबध्वामुद्रांचधेनवीं ॥ अभिमंत्र्यघटान्हुत्वापूर्णांतंचयथापुरा ॥ ४ ॥

त्वस्यसित्यर्थमभिषेकादिसंस्कृतिः ॥ शिष्येदेशिककार्यंतत्सर्वंसप्तदशेस्थितम् ॥ १ ॥ तद्योग्यत्वेआचार्यकर्मकरणयोग्यत्वेसति ॥ १ ॥ २ ॥ निवृत्तिं पूर्वोक्तांकलां ॥ एवमुत्तरत्रापि॥परांशांत्यतीताख्यां ॥३॥ दीक्षादिकंरक्षादिकमितिपाठांतरं ॥ धेनवींधेनुस्तनाकारांधेनुमुद्रामित्यर्थः॥पूर्णांतंपूर्णाहुत्यंतं॥४॥



Indira Gandhi National Centre for the Arts

॥ ५ ॥ ६ ॥ ७ ॥ शिवेनाशिवमंत्रेण ॥ ८ ॥ तंशिशुं ॥ ९ ॥ १० ॥ ११ ॥ अयंशिष्यः ॥ १२ ॥ शिवागमंशिवतत्वस्यप्रतिपादकंवेदं ॥ १३ ॥

प्रवेश्यमंडलंशिष्यमनुष्णांपंचदेशिकः ॥ तर्पणाद्यंतुमंत्राणांकुर्यात्पूर्णावसानकम् ॥ ५ ॥ ततःसंपूज्यदेवेशमनुज्ञा प्यचपूर्ववत् ॥ अभिषेकायतंशिष्यमासनंत्वधिरोहयेत् ॥ ६ ॥ सकलीकृत्यतंपश्चात्कलापंचकरूपिणं ॥ न्यस्तमंत्र तनुंबुध्वाशिवंशिष्यंसमर्पयेत् ॥ ७ ॥ ततोनिवृत्तिकुंभादिसमुद्धृत्यघटान्क्रमात् ॥ मध्यमांतंशिवेनैवशिष्यंतमभि षेचयेत् ॥ ८ ॥ शिवहस्तंसमर्प्याथशिशोःशिरसिदेशिकः ॥ शिवभावंसमापन्नःशिवाचार्यंतमादिशेत् ॥ ९ ॥ अथालंकृत्यतंदेवमाराध्यशिवमंडले ॥ शतमष्टोत्तरंहुत्वादद्यात्पूर्णाहुतिंततः ॥ १० ॥ पुनःसंपूज्यदेवेशंप्रणम्यभुवि दंडवत् ॥ शिरस्यंजलिमाधायशिवंविज्ञापयेद्गुरुः ॥ ११ ॥ भगवंस्त्वत्प्रसादेनदेशिकोयंमयाकृतः ॥ अनुगृह्यत्वया देवदिव्याज्ञास्मैप्रदीयताम् ॥ १२ ॥ एवंविज्ञाप्यशिष्येणसहभूयःप्रणम्यच ॥ शिवंशिवागमंदिव्यंपूजयेच्छिववद् द्गुरुः ॥ १३ ॥ पुनःशिवमनुज्ञाप्यशिवज्ञानस्यपुस्तकं ॥ उभाभ्यामथपाणिभ्यांदद्याच्छिष्यायदेशिकः ॥ १४ ॥ स तांमूर्ध्निसमाधायविद्यांविद्यासनोपरि ॥ अधिरोप्ययथान्यायमभिवंद्यसमर्चयेत् ॥ १५ ॥ अथतस्मैगुरुर्दद्याद्राजो पकरणान्यपि ॥ आचार्यपदवींप्राप्तोराज्यंचापियतोर्हति ॥ १६ ॥ अथानुशासनंकुर्यात्पूर्वैराचरितंयथा ॥ यथाच शिवशास्त्रोक्तंयथालोकेपुपूज्यते ॥ १७ ॥ शिष्यान्परीक्ष्ययत्नेनशिवशास्त्रोक्तलक्षणैः ॥ संस्कृत्यचशिवज्ञानंदातु मर्हसिनान्यथा ॥ १८ ॥ प्रतिष्ठांचापिदेवस्यविधिवत्कर्तुमर्हसि ॥ परार्थमपिदेवस्यपूजाहोमादिकंकुरु ॥ १९ ॥ अ कार्पण्यमनायासंशौचंक्षांतिंदयांतथा ॥ अस्पृहामप्यसूयांचयत्नेनचविभावयेत् ॥ २० ॥ इत्थमादिश्यतंशिष्यंशि वमुद्वास्यमंडलात् ॥ शिवकुंभानलादींश्चसदस्यानपिपूजयेत् ॥ २१ ॥ युगपद्वाथसंस्कारान्कुर्वीतगुणिनोगुरुः ॥ तत्रत्रयंद्वयंवापिप्रयोगस्योपदिश्यते ॥ २२ ॥ ॥ ॥

॥ १४ ॥ १५ ॥ राजोपकरणानिआसनच्छत्रादीनि ॥ तत्रहेतुमाह ॥ आचार्येति ॥ १६ ॥ कथंकुर्यात्तदाह ॥ पूर्वैरिति ॥ १७ ॥ १८ ॥ १९ ॥
॥ २० ॥ २१ ॥ गुणिनःउक्तकार्पण्यादिगुणयुतस्यशिष्यस्य ॥ २२ ॥

तदादांतत्प्रयोगादौ ॥२३॥ तस्मिन्अध्वविशोधने ॥ २४ ॥ २५ ॥ अथवेति ॥ प्रयोगत्रयपक्षेसमयसंस्कारादिमंत्रसमर्पणांतंकुर्यात्द्वयपक्षेतुमंत्रसंस्कारम
नुचिंत्याध्वशुत्ध्यादिसर्वंकुर्यादितिविवेकः ॥२६॥२७॥ समुद्भवौप्रादुर्बभूव ॥२८॥२९॥ शांभवंमंत्रमूलमितिसंबंधः॥३०॥३१॥इतिश्रीशैवमहापुराणेवा



तदादावेवकलशान्कल्पयेदध्वशुद्धिवत् ॥ कृत्वासमयसंस्कारमभिषेकंविनाऽखिलम् ॥२३॥ समभ्यर्च्यशिवंभूयः
कृत्वाचाध्वविशोधनं ॥ तस्मिन्पारसमाप्तेषुपुनर्देवंप्रपूजयेत् ॥ २४ ॥ हुत्वामंत्रंतुसंतर्प्यसंदीप्याशास्यचेश्वरम् ॥ स
मर्प्यमंत्रंशिष्यस्यपाणौशेषंसमापयेत् ॥ २५ ॥ अथवामंत्रसंस्कारमनुचिंत्याखिलंक्रमात् ॥ अध्वशुद्धिंगुरुःकुर्याद
भिषेकावसानकां ॥ २६ ॥ तत्रयःशांत्यतीतादिकलासुविहितोविधिः ॥ ससर्वोपिविधातव्यस्तत्त्वत्रयविशोधने॥
॥ २७ ॥ शिवविद्यात्मतत्त्वाख्यंतत्त्वत्रयमुदाहृतम् ॥ शक्तौशिवस्ततोविद्यातस्यास्त्वात्मासमुद्भवौ ॥ २८ ॥ शिवेन
शांत्यतीताध्वाव्याप्तस्तदपरःपरः ॥ विद्ययापारिशिष्टोध्वाह्यात्मनानिखिलःक्रमात् ॥ २९ ॥ दुर्लभंशांभवंमत्वामं
त्रमूलंमनीषिणः ॥ शाक्तंशंसंतिसंस्कारंशिवशास्त्रार्थपारगाः ॥ ३० ॥ इतितेसर्वमाख्यातंसंस्काराख्यस्यकर्मणः॥
चातुर्विध्यमिदंकृष्णकिंभूयःश्रोतुमिच्छसि ॥ ३१ ॥ इतिश्रीशिवमहापुराणेवायवीयसंहितायामुत्तरभागेसप्तदशो
ऽध्यायः ॥ १७ ॥ छ ॥ श्रीकृष्णउवाच ॥ भगवन्श्रोतुमिच्छामिशिवाश्रमनिषेवणं ॥ शिवशास्त्रोदितंकर्मनित्यंनै
मित्तिकंतथा ॥ १ ॥ उपमन्युरुवाच ॥ प्रातरुत्थायशयनात्ध्यात्वादेवंसहांबया ॥ विचार्यकार्यंनिर्गच्छेद्गृहादभ्यु
दितेरुणे ॥ २ ॥ अबाधेविजनेदेशेकुर्यादावश्यकंततः ॥ कृत्वाशौचंविधानेनदंतधावनमाचरेत् ॥ ३ ॥ अलाभेदंत
काष्ठानामष्टम्यादिदिनेषुच ॥ अपांद्वादशगंडूषैःकुर्यादास्यविशोधनम् ॥ ४ ॥ आचम्यविधिवत्पश्चाद्वारुणंस्नानमा
चरेत् ॥ नद्यांवादेवखातेवाह्रदेवाथगृहेपिवा ॥ ५ ॥ ॥ ॥ ॥

यवीयसंहितायामुत्तरभागेसप्तदशोऽध्यायः ॥ १७ ॥ ओंनमःशिवाय ॥ शिवदीक्षाविधानांगमाह्निकंपूजनादिकं ॥ सर्वमष्टादशेध्यायेमुनिनाकथितंशुभ
म् ॥ १ ॥ १ ॥ २ ॥ अबाधेनिरुपद्रवेदेशे ॥ ३ ॥ अष्टम्यादीति ॥ तदुक्तंनारदेन ॥ चतुर्दश्यष्टमीपौर्णमासीसंक्रमणेषुच॥ नंदासुचनवम्यांचदंतकाष्ठंविव
र्जयेत ॥ श्राद्धेयज्ञेचनियमेतथाप्रोषितभर्तृका ॥ व्यतीपातेचसंक्रांत्यांनंदाभूताष्टपर्वसु ॥ तैलंक्षौरंरतिंमांसंदंतकाष्ठंचवर्जयेदिति ॥ ४ ॥ वारुणमिति ॥
तत्स्वरूपमाहयोगयाज्ञवल्क्यः ॥ अवगाहोवारुणंस्यान्मानसंविष्णुचिंतनमिति ॥ ५ ॥ ॥ ॥



...ra Gandhi National
...entre for the Arts

स्नानद्रव्याणिगोशृंगादीनि ॥ ६ ॥ ७ ॥ ८ ॥ जलइति ॥ सौम्येजलेत्रिमंडलसदृशमाकारंन्यस्येदित्यर्थः ॥ ९ ॥ तेनैवमंत्रेण ॥ १० ॥ ११ ॥ १२ ॥

स्नानद्रव्याणितत्तीरेस्थापयित्वाबहिर्मलं ॥ व्यपोह्यमृदमालिप्यस्नात्वागोमयमालिपेत् ॥ ६ ॥ स्नात्वापुनःपुनर्वे स्त्रंत्यक्त्वावाथविशोध्यवा ॥ सुस्नातोनृपवद्भूयःशुद्धंवासोवसेत्ततः ॥ ७ ॥ मलस्नानंसुगंधाद्यैःस्नानंदंतविशोधनं ॥ न कुर्याद्ब्रह्मचारीचतपस्वीविधवातथा ॥ ८ ॥ सोपवीतःशिखांबध्वाप्रविश्यचजलांतरम् ॥ अवगाह्यसमाचांतोजलेन्य स्येत्त्रिमंडलं ॥ ९ ॥ सौम्येमग्नःपुनर्मंत्रंजपेच्छक्त्याशिवंस्मरन् ॥ उत्थायाचम्यतेनैवस्वात्मानमभिषेचयेत् ॥ १० ॥ गोशृंगेणसदर्भेणपालाशेनदलेनवा ॥ पाद्मेनवाथपाणिभ्यांपंचकृत्वस्त्रिरेववा ॥ ११ ॥ उद्यानादौगृहेचैववर्धन्या कलशेनवा ॥ अवगाहनकालेद्भिर्मंत्रितैरभिषेचयेत् ॥ १२ ॥ अथचेद्वारुणंकर्तुमशक्तःशुद्धवाससा ॥ आर्द्रेणशोध येद्देहमापादतलमस्तकं ॥ १३ ॥ आग्नेयंवाथवामांत्रंकुर्यात्स्नानंशिवेनवै ॥ शिवचिंतापरंस्नानंयुक्तस्यात्मीयमुच्य ते ॥ १४ ॥ स्वसूत्रोक्तविधानेनमंत्राचमनपूर्वकम् ॥ आचरेद्ब्रह्मयज्ञांतंकृत्वादेवादितर्पणं ॥ १५ ॥ मंडलस्थंमहादे वंध्यात्वाभ्यर्च्ययथाविधि ॥ दद्यादर्घ्यंततस्तस्मैशिवायादित्यरूपिणे ॥१६॥ अथवैतत्स्वसूत्रोक्तंकृत्वाहस्तौविशो धयेत् ॥ करन्यासंततःकुर्यात्सकलीकृतविग्रहः ॥ १७ ॥ वामहस्तगतांभोभिर्गंधसिद्धार्थकान्वितैः ॥ कुशपुंजेनवा भ्युक्ष्यमूलमंत्रसमन्वितैः ॥ १८ ॥ आपोहिष्ठादिभिर्मंत्रैःशेषमाघ्रायवैजलम् ॥ वामनासापुटेनैवदेहंसंभावयेत्सि तं ॥ १९ ॥ अघमादायदेहस्थंसव्यनासापुटेनच ॥ कृष्णवर्णंनबाह्यस्थंभावयेच्चशिलागतं ॥ २० ॥ तर्पयेदथदेवे भ्यऋषिभ्यश्चविशेषतः ॥ भूतेभ्यश्चपितृभ्यश्चदद्यादर्घ्यंयथाविधि ॥ २१ ॥ रक्तचंदनतोयेनहस्तमात्रेणमंडलं ॥ सुवृत्तंकल्पयेद्भूमौरत्नचूर्णाद्यलंकृतं ॥ २२ ॥ तत्रसंपूजयेद्भानुंस्वकीयावरणैःसह ॥ खखोल्कायेतिमंत्रेणसांगतःसु खसिद्धये ॥ २३ ॥ ॥ ॥ ॥ ॥

शोधयेदिति ॥ इदंकापिलस्नानमुच्यते ॥ १३ ॥ आग्नेयंभस्मनास्नानंमांत्रमापोहिष्ठादिमंत्रैःप्रोक्षणमितिधर्माब्धिसारे शिवेनशिवमंत्रेण ॥ १४ ॥ १५ ॥ ॥ १६ ॥ १७ ॥ १८ ॥ सितंशुद्धं ॥ १९ ॥ २० ॥ २१ ॥ २२ ॥ खखोल्कायेति ॥ अयंमंत्रःशैवागमादौप्रसिद्धः ॥ २३ ॥ ॥

Indira Gandhi National Centre for the Arts

मागधेति ॥ मगधदेशप्रसिद्धप्रस्थसंमितमित्यर्थः ॥ २४ ॥ २५ ॥ गव्यैःगोदुग्धादिभिः ॥ २६ ॥ २७ ॥ २८ ॥ २९ ॥ यादीति ॥ विपरीतक्रमेणेति
भावः ॥ ३० ॥ एकादशेति ॥ एकादशवारमभिमंत्रितैरित्यर्थः ॥ ३१ ॥ त्रिपुंड्रस्वरूपमाह ॥ अवक्रमिति ॥ आयतंदीर्घं ॥ ३२ ॥ ३३ ॥ ३४ ॥

पुनश्चमंडलंकृत्वातदंगैःपरिपूज्यच ॥ तत्रस्थंहेमपात्राद्यंमागधप्रस्थसंमितम् ॥ २४ ॥ पूरयेद्गंधतोयेनरक्तचंदनयो
गिना ॥ रक्तपुष्पैस्तिलैश्चैवकुशाक्षतसमन्वितैः ॥ २५ ॥ दूर्वापामार्गगव्यैश्चकेवलेनजलेनवा ॥ जानुभ्यांधरणींग
त्वानत्वादेवंचमंडले ॥ २६ ॥ कृत्वाशिरसितत्पात्रंदद्यादर्घ्यंशिवायतत् ॥ अथवांजलिनातोयंसदर्भंमूलविद्यया ॥
॥ २७ ॥ उत्क्षिपेदंबरस्थायशिवायादित्यमूर्तये ॥ कृत्वापुनःकरन्यासंकरशोधनपूर्वकम् ॥ २८ ॥ बुध्येशानादिस
द्यांतंपंचब्रह्ममयंशिवम् ॥ गृहीत्वाभसितंमंत्रैर्विमृज्यांगानिसंस्पृशेत् ॥ २९ ॥ यादिनांतैःशिरोवक्त्रहृद्गुह्यचरणक्र
मात् ॥ ततोमूलेनसर्वांगमालभ्यवसनांतरम् ॥ ३० ॥ परिधायद्विराचम्यप्रोक्ष्यैकादशमंत्रितैः ॥ जलैराच्छाद्यवा
सोन्यद्विराचम्यशिवंस्मरेत् ॥ ३१ ॥ पुनर्न्यस्तकरोमंत्रीत्रिपुंड्रंभस्मनालिखेत् ॥ अवक्रमायतंव्यक्तंललाटेगंधवारि
णा ॥ ३२ ॥ वृत्तंवाचतुरस्रंवाबिंदुमर्द्धेंदुमेववा ॥ ललाटेयादृशंपुंड्रंलिखितंभस्मनापुनः ॥ ३३ ॥ तादृशंभुजयोर्मू
र्ध्निस्तनयोरंतरेलिखेत् ॥ सर्वांगोद्धूलनंचैवनसमानंत्रिपुंड्रकैः ॥ ३४ ॥ तस्मात्त्रिपुंड्रमेवैकंलिखेदुद्धूलनंविना ॥ रु
द्राक्षान्धारयेन्मूर्ध्निकंठेश्रोत्रेकरेतथा ॥ ३५ ॥ सुवर्णवर्णमच्छिन्नंशुभंनान्यधृतंशुभं ॥ विप्रादीनांक्रमाच्छ्वेतंपीतंरक्तम
थासितं ॥ ३६ ॥ तदलाभेयथालाभंधारणीयमदूषितम् ॥ तत्रापिनोत्तरंनीचैर्धार्यंनीचमथोत्तरैः ॥ ३७ ॥ नाशुचि
र्धारयेदक्षंसदाकालेषुधारयेत् ॥ इत्थंत्रिसंध्यमथवाद्विसंध्यंसकृदेववा ॥ ३८ ॥ कृत्वास्नानादिकंशक्त्यापूजयेत्परमे
श्वरम् ॥ पूजास्थानंसमासाद्यबद्ध्वारुचिरमासनम् ॥ ३९ ॥ ध्यायेद्देवंचदेवींचप्राङ्मुखोवाप्युदङ्मुखः ॥ श्वेतादी
न्नकुलीशांतान्सशिष्यान्प्रणमेद्गुरून् ॥ ४० ॥ स्वगुरुंचपुनर्देवंततोनामाष्टकंजपेत् ॥ शिवोमहेश्वरश्चैवरुद्रोविष्णुः
पितामहः ॥ ४१ ॥ ॥ ॥ ॥ ॥ ॥

॥ ३५ ॥ वस्त्रधारणप्रकारमाह ॥ सुवर्णवर्णमिति ॥ ३६ ॥ ३७ ॥ अक्षंरुद्राक्षंकालेषुपूजादिसमयेषु ३८ ॥ ३९ ॥ श्वेतादीन्पूर्वोक्तान् ॥ ४० ॥ ४१ ॥



Indira Gandhi National Centre for the Arts

एकादशाधिकमेकादशभ्योऽधिकवारं ॥ ४२ ॥ ४३ ॥ ४४ ॥ उत्पत्तिःउत्पत्तिन्यासः ॥ ४५ ॥ सएवसंहृतिन्यासएव ॥ ४६ ॥ विपरीतइति ॥ वामां

संसारवैद्यःसर्वज्ञःपरमात्मेतिचाष्टकम् ॥ अथवाशिवमेवैकंजपित्वैकादशाधिकम् ॥ ४२ ॥ जिव्हाग्रेतेजसोराशिं ध्यात्वाव्याध्यादिशांतये ॥ प्रक्षाल्यचकरौपश्चात्कृत्वाचंदनचर्चितौ ॥ ४३ ॥ प्रकुर्वीतकरन्यासंकरशोधनपूर्वकम् ॥ न्यासस्तुत्रिविधःप्रोक्तःस्थित्युत्पत्तिलयक्रमात् ॥ ४४ ॥ स्थितिन्यासोगृहस्थानामुत्पत्तिर्ब्रह्मचारिणां ॥ यतीनांसंहृतिन्यासोवनस्थानांतथैवच ॥ ४५ ॥ सएवभर्तृहीनायाःकुटुंबिन्याःस्थितिर्भवेत् ॥ कन्यायाःपुनरुत्पत्तिर्वक्ष्येन्यासस्यलक्षणं ॥ ४६ ॥ अंगुष्ठादिकनिष्ठांतंस्थितिन्यासउदाहृतः ॥ दक्षिणांगुष्ठमारभ्यवामांगुष्ठांतमेवच ॥ ४७ ॥ उत्पत्तिन्यासआख्यातोविपरीतस्तुसंहृतिः ॥ सबिंदुकान्नकारादीन्वर्णान्न्यस्येदनुक्रमात् ॥ ४८ ॥ अंगुलीषुशिवंन्यस्यतलयोरप्यनामयोः ॥ अस्त्रन्यासंततःकृत्वादशदिक्ष्वस्त्रमंत्रतः ॥ ४९ ॥ निवृत्त्यादिकलाःपंचपंचभूतस्वरूपिणीः ॥ पंचभूताधिपैःसार्धंतत्तच्चिन्हसमन्विताः ॥ ५० ॥ हृत्कंठतालुभ्रूमध्यब्रह्मरंध्रसमाश्रयाः ॥ तत्तद्बीजेनसंग्रंथीस्तत्तद्बीजेषुभावयेत् ॥ ५१ ॥ तासांविशोधनार्थायविद्यांपंचाक्षरींजपेत् ॥ निरुद्धवाग्प्राणवायुर्गुणसंख्यानुसारतः ॥ ५२ ॥ भूतग्रंथिंततश्छिद्यादस्त्रेणैवास्त्रमुद्रया ॥ नाड्यासुषुम्नयात्मानंप्रेरितंप्राणवायुना ॥ ५३ ॥ निर्गतंब्रह्मरंध्रेणयोजयेच्छिवतेजसा ॥ विशोष्यवायुनापश्चाद्देहंकालाग्निनादहेत् ॥ ५४ ॥ ततश्चोपरिभावेनकलाःसंहृत्यवानवा ॥ देहंसंहृत्यवैदग्धंकलाःस्पृष्ट्वासहाधिपम् ॥ ५५ ॥ प्लावयित्वामृतैर्देहंयथास्थानंनिवेशयेत् ॥ ५६ ॥ अथासंहृत्यवैदग्धःकलासर्गेविनैवतु ॥ अमृतप्लावनंकुर्याद्भस्मीभूतस्यतस्यवै ॥ ५७ ॥ ततोविद्यामयेतस्मिन्देहेदीपशिखाकृतिम् ॥ शिवान्निर्गतमात्मानंब्रह्मरंध्रेणयोजयेत् ॥ ५८ ॥ देहस्यांतःप्रविष्टंतंध्यात्वाहृदयपंकजे ॥ पुनश्चामृतवर्षेणसिंचेद्विद्यामयंवपुः ॥ ५९ ॥ ॥ ॥ ॥

गुष्ठमारभ्यदक्षिणांगुष्ठपर्यंतमित्यर्थः ॥ ४७ ॥ ४८ ॥ ४९ ॥ ५० ॥ तत्तद्बीजेनतत्तद्भूतबीजेन ॥ तत्तद्बीजेषुतत्तत्कलाबीजेषु ॥ ५१ ॥ तासांनिवृत्त्यादिकलानां ॥ ५२ ॥ ५३ ॥ ५४ ॥ ५५ ॥ प्लावयित्वासंस्नाप्य ॥ ५६ ॥ तस्यदेहस्य ॥ ५७ ॥ ५८ ॥ तंशिवं ॥ ५९ ॥ ॥

न्यासक्रममाह ॥ पुनरिति ॥६०॥६१॥ जातिषट्कंवक्ष्यते ॥ ६२ ॥ ६३ ॥ ६४ ॥ ६५ ॥ ६६ ॥ ६७ ॥ वर्णन्यासमाह ॥ अकारइति ॥६८॥ क्रमात्दक्षिणादि



पुनःकुर्यात्करन्यासंकरशोधनपूर्वकम् ॥ देहन्यासंततःपश्चान्महत्यामुद्रयाचरेत् ॥ ६० ॥ अंगन्यासंततःकृत्वाशिवोक्तेनतुवर्त्मना ॥ वर्णन्यासंततःकुर्याद्धस्तपादादिसंधिषु ॥ ६१ ॥ षडंगानिततोन्यस्यजातिषट्कयुतानिच ॥ दिग्बंधमाचरेत्पश्चादाग्नेयादियथाक्रमं ॥ ६२ ॥ यद्वामूर्धादिपंचांगंन्यासमेवसमाचरेत् ॥ तथाषडंगन्यासंवाभूतशुद्ध्यादिकंविना ॥ ६३ ॥ एवंसमासरूपेणकृत्वादेहात्मशोधनम्॥शिवभावमुपागम्यपूजयेत्परमेश्वरम्॥६४॥अथयस्यास्त्यवसरोनास्तिवामतिविभ्रमः ॥ सविस्तीर्णेनकल्पेनन्यासकर्मसमाचरेत् ॥ ६५ ॥ तत्राद्योमातृकान्यासोब्रह्मन्यासस्ततःपरः ॥ तृतीयःप्रणवन्यासोहंसन्यासस्तदुत्तरः ॥ ६६ ॥ पंचमःकथ्यतेसद्भिर्न्यासःपंचाक्षरात्मकः ॥ एतेष्वेकमनेकंवाकुर्यात्पूजादिकर्मसु ॥ ६७ ॥ अकारोमूर्ध्निविन्यस्यआकारोथललाटके॥ इईचनेत्रयोस्तद्वदुऊश्रवणयोस्तथा ॥ ६८ ॥ ऋॠकपोलयोश्चैवलृॡनासापुटद्वये ॥ एऐओष्ठद्वयेओऔदंतपंक्तिद्वयेक्रमात् ॥ ६९ ॥ अंजिव्हायामथोतालुन्यःप्रयोज्योयथाक्रमम् ॥ कवर्गंदक्षिणेहस्तेन्यसेत्पंचसुसंधिषु ॥७०॥ चवर्गंचतथावामहस्तसंधिषुविन्यसेत् ॥ टवर्गंचतवर्गंचपादयोरुभयोरपि ॥ ७१ ॥ पफौतुपार्श्वयोःपृष्ठेनाभौचापिबभौततः ॥ न्यसेन्मकारंहृदयेत्वगादिषुयथाक्रमम् ॥ ७२ ॥ यकारादिसकारांतान्सप्तसप्तसुधातुषु ॥ हकारंहृदयस्यांतःक्षकारंभ्रूयुगांतरे ॥७३॥ एवंवर्णान्प्रविन्यस्यपंचाशद्रुद्रवर्त्मना ॥ अंगवक्त्रकलाभेदात्पंचब्रह्माणिविन्यसेत् ॥ ७४ ॥ करन्यासाद्यमपितैःकृत्वावाथनवाक्रमात् ॥ शिरोर्वदनहृद्गुह्यपादेष्वेतानिकल्पयेत् ॥ ७५ ॥ ततश्चोर्ध्वादिवक्त्राणिपश्चिमांतानिकल्पयेत् ईशानस्यकलाःपंचपंचस्वेतेषुचक्रमात् ॥ ७६ ॥ ततश्चतुर्षुवक्त्रेषुपुरुषस्यकलाअपि ॥ चतस्रःप्रणिधातव्याःपूर्वादिक्रमयोगतः ॥ ७७ ॥ हृत्कंठांशेपुनाभौचकुक्षौपृष्ठेचवक्षसि ॥ अघोरस्यकलाश्चाष्टौयोजनीयायथाक्रमम् ॥ ७८ ॥

क्रमादित्यर्थः ॥ ६९ ॥ ७० ॥ ७१ ॥ ७२ ॥ ७३ ॥ ७४ ॥ ७५ ॥ ७६ ॥ ७७ ॥ ७८ ॥ ॥ ॥



Indira Gandhi National Centre for the Arts

॥७९॥८०॥८१॥८२॥८३॥८४॥८५॥८६॥ अशिवइति ॥ वक्ष्यमाणप्रकारेणशिवरूपएवभूत्वाशिवंशैवमंत्रमभ्यस्येदित्यर्थः ॥ ८७ ॥ पशुभा

पश्चात्त्रयोदशकलाःपायुमेढ्रोरुजानुषु ॥ जंघास्फिक्कटिपार्श्वेषुवामदेवस्यभावयेत् ॥ ७९ ॥ सद्यस्यापिकलाश्चाष्टौ
पादयोरपिहस्तयोः ॥ घ्राणेशिरसिबाह्वोश्चकल्पयेत्कल्पवित्तमः ॥ ८० ॥ अष्टत्रिंशत्कलान्यासमेवंकृत्वानुपूर्वशः
॥ पश्चात्प्रणवविद्धीमान्प्रणवन्यासमाचरेत् ॥ ८१ ॥ बाहुद्वयेकूर्परयोस्तथाचमणिबंधयोः ॥ पार्श्वोदरोरुजंघेषुपा
दयोःपृष्ठतस्तथा ॥ ८२ ॥ इत्थंप्रणवविन्यासंकृत्वान्यासविचक्षणः ॥ हंसन्यासंप्रकुर्वीतशिवशास्त्रेयथोदितं॥८३॥
बीजंविभज्यहंसस्यनेत्रयोर्घ्राणयोरपि ॥ विभज्यबाहुनेत्रास्यललाटेघ्राणयोरपि ॥ ८४ ॥ कक्षयोस्कंधयोश्चैवपा
र्श्वयोस्तनयोस्तथा ॥ कट्योःपाण्योर्गुल्फयोश्चयद्वापंचांगवर्त्मना ॥८५॥ हंसन्यासमिमंकृत्वान्यसेत्पंचाक्षरींततः ॥
यथापूर्वोक्तमार्गेणशिवत्वंयेनजायते ॥ ८६ ॥ नाशिवःशिवमभ्यस्येन्नाशिवःशिवमर्चयेत् ॥ नाशिवस्तुशिवंध्याये
न्नाशिवःशिवमाप्नुयात् ॥ ८७ ॥ तस्माच्छैवींतनुंकृत्वात्यक्त्वाचपशुभावनाम् ॥ शिवोहमितिसंचिंत्यशैवंकर्मसमा
चरेत् ॥ ८८ ॥ कर्मयज्ञस्तपोयज्ञोजपयज्ञस्तदुत्तरः ॥ ध्यानयज्ञोज्ञानयज्ञःपंचयज्ञाःप्रकीर्तिताः ॥ ८९ ॥ कर्मय
ज्ञरताःकेचित्तपोयज्ञरताःपरे ॥ जपयज्ञरताश्चान्येध्यानयज्ञरतास्तथा ॥ ९० ॥ ज्ञानयज्ञरताश्चान्येविशिष्टाश्चो
त्तरोत्तरम् ॥ कर्मयज्ञोद्विधाप्रोक्तःकामाकामविभेदतः ॥ ९१ ॥ कामान्कामीततोभुक्त्वाकामासक्तःपुनर्भवेत् ॥ अ
कामोरुद्रभवनेभोगान्भुक्त्वाततश्च्युतः ॥ ९२ ॥ तपोयज्ञरतोभूत्वाजायतेनात्रसंशयः ॥ तपस्वीचपुनस्तस्मिन्भो
गान्भुक्त्वाततश्च्युतः ॥ ९३ ॥ जपध्यानरतोभूत्वाजायतेभुविमानवः ॥ जपध्यानरतोमर्त्यस्तद्वैशिष्ट्यवशादिह ॥
॥ ९४ ॥ ज्ञानंलब्ध्वाचिराद्देवाशिवसायुज्यमाप्नुयात् ॥ तस्मान्मुक्तौशिवाज्ञप्तःकर्मयज्ञोपिदेहिनाम् ॥ ९५ ॥
अकामःकामसंयुक्तोबंधायैवभविष्यति ॥ तस्मात्पंचसुयज्ञेषुध्यानज्ञानपरोभवेत् ॥ ९६ ॥ ॥

वनांजीवभावनां ॥ संचिंत्येति ॥ शिवोभूत्वाशिवंयजेदित्युक्तेरितिभावः ॥ ८८ ॥ ८९ ॥ ९० ॥ ९१ ॥ ततःरुद्रभवनात्॥ ९२ ॥ ९३ ॥ ९४ ॥
तस्मात्ज्ञानयज्ञादपि ॥ ९५ ॥ ९६ ॥ ॥ ॥ ॥ ॥ ॥ ॥

॥ ९७ ॥ ९८ ॥ ९९ ॥ १०० ॥ आत्मस्थंह्रदयस्थं ॥ १०१ ॥ लिहेत्आस्वादयेत् ॥ १०२॥ उभाभ्यांध्यानज्ञानाभ्यां ॥ द्वादशांतेब्रह्मरंध्रस्थाने॥ १०३॥
॥१०४॥१०५॥१०६॥ इतिश्रीशैवमहापुराणेवायवीयसंहितायामुत्तरभागेऽष्टादशोऽध्यायः ॥ १८ ॥ ओंनमःशिवाय ॥ अंतर्यागबहिर्यागविधानकथन



ध्यानंज्ञानंचयस्यास्तितीर्णस्तेनभवार्णवः ॥ हिंसादिदोषनिर्मुक्तोविशुद्धश्चित्तसाधनः ॥ ९७ ॥ ध्यानयज्ञःपरस्त
स्मादपवर्गफलप्रदः ॥ बहिःकर्मकरायद्वन्नातीवफलभागिनः ॥ ९८ ॥ दृष्टानरेंद्रभवनेतद्वदत्रापिकर्मिणः ॥ ध्या
निनांहिवपुःसूक्ष्मंभवेत्प्रत्यक्षमैश्वरम् ॥ ९९ ॥ तथेहकर्मिणांस्थूलंमृत्काष्ठाद्यैःप्रकल्पितम् ॥ ध्यानयज्ञरतास्तस्मा
द्देवान्पाषाणमृन्मयान् ॥ १०० ॥ नात्यंतंप्रतिपद्यंतेशिवयाथात्म्यवेदनात् ॥ आत्मस्थंयःशिवंत्यक्त्वाबहिरभ्यर्चये
न्नरः ॥ १०१ ॥ हस्तस्थंफलमुत्सृज्यलिहेत्कूर्परमात्मनः ॥ ज्ञानात्ध्यानंभवेत्ध्यानाज्ज्ञानंभूयःप्रवर्तते ॥ १०२ ॥
तदुभाभ्यांभवेन्मुक्तिस्तस्मात्ध्यानरतोभवेत् ॥ द्वादशांतेतथामूर्ध्निललाटेभ्रूयुगांतरे ॥ १०३ ॥ नासाग्रेवातथास्ये
वाकंधरेत्त्हृदयेतथा ॥ नाभौवाशाश्वतस्थानेश्रद्धाविद्धेनचेतसा ॥ १०४ ॥ बहिर्यागोपचारेणदेवंदेवींचपूजयेत् ॥ अ
थवापूजयेन्नित्यंलिंगेवाकृतकेपिवा ॥ १०५ ॥ वन्हौवास्थंडिलेवाथभक्त्यावित्तानुसारतः ॥ अथवांतर्बहिश्चैवपूज
येत्परमेश्वरम् ॥ अंतर्यागरतःपूजांबहिःकुर्वीतवानवा ॥ १०६ ॥ इतिश्रीशिवमहापुराणेवायवीयसंहितायामुत्तर
भागेऽष्टादशोध्यायः ॥ १८॥ ॥ छ ॥ उपमन्युरुवाच ॥ व्याख्यांपूजाविधानस्यप्रवदामिसमासतः ॥ शिवशास्त्रे
शिवेनैवशिवायैकथितस्यतु ॥ १ ॥ अंगमभ्यंतरंयागमग्निकार्यावसानकम् ॥ विधायवानवापश्चाद्बहिर्यागंसमाचरे
त् ॥ २ ॥ तत्रद्रव्याणिमनसाकल्पयित्वाविशोध्यच ॥ ध्यात्वाविनायकंदेवंपूजयित्वाविधानतः ॥ ३॥ दक्षिणेचोत्त
रेचैवनंदीशंसुयशंतथा ॥ आराध्यमनसासम्यगासनंकल्पयेद्बुधः ॥ ४ ॥ आराधनादिकैर्युक्तःसिंहयोगासनादिक
म् ॥ पद्मासनंवाविमलतत्वत्रयसमन्वितम् ॥५॥ तस्योपरिशिवंध्यायेत्सांबंसर्वमनोहरम् ॥ सर्वलक्षणसंपन्नंसर्वा
वयवशोभनम् ॥ ६ ॥ सर्वातिशयसंयुक्तंसर्वाभरणभूषितम् ॥ रक्तास्यपाणिचरणंकुंदमंदस्मिताननम् ॥७॥



क्रमः॥मुनिनाकथितोऽत्रैवसांगएकोनविंशके ॥ १ ॥ १ ॥ नवेति ॥ अनेनअंतर्यागस्यबहिर्यागात्पूर्वकृताकृतस्वंसूचितं ॥ २ ॥ ३ ॥ दक्षिणइति ॥ दक्षि
णेनंदीशमुत्तरेसुयशमित्यर्थः ॥ ४ ॥ कृतकेमूर्तौ ॥ ५ ॥ ६ ॥ ७ ॥ ॥ ॥ ॥

Indira Gandhi National Centre for the Arts

॥ ८ ॥ ९ ॥ १० ॥ ११ ॥ १२ ॥ १३ ॥ सर्वतोनुगुणाकारां सर्वप्रकारेणानुकूलाकारांसुंदराकृतिमित्यर्थः ॥ १४ ॥ १५ ॥ १६ ॥ प्रकारांत

शुद्धस्फटिकसंकाशंफुल्लपद्मविलोचनम् ॥ चतुर्भुजमुदारांगंचारुचंद्रकलाधरम् ॥ ८ ॥ वरदाभयहस्तंचमृगटंकधरं
हरं ॥ भुजंगहारवलयंचारुनीलगलांतरम् ॥ सर्वोपमानरहितंसानुगंसपरिच्छदम् ॥ ९ ॥ ततःसंचिंतयेत्तस्यवाम
भागेमहेश्वरीं ॥ प्रफुल्लोत्पलपत्राभांविस्तीर्णायतलोचनाम् ॥ १० ॥ पूर्णचंद्राभवदनांनीलकुंचितमूर्धजां ॥ नीलो
त्पलदलप्रख्यांचंद्रार्धकृतशेखराम् ॥ ११ ॥ अतिवृत्तघनोत्तुंगस्निग्धपीनपयोधरां ॥ तनुमध्यांपृथुश्रोणींपीतसू
क्ष्मवरांबरां ॥ १२ ॥ सर्वाभरणसंपन्नांललाटतिलकोज्वलां ॥ विचित्रपुष्पसंकीर्णकेशपाशोपशोभितां ॥ १३ ॥
सर्वतोनुगुणाकारांकिंचिल्लज्जायिताननां ॥ हेमारविंदंविकसद्दधानांदक्षिणेकरे ॥ १४ ॥ दंडवच्चापरंहस्तंन्यस्यासी
नांमहासने ॥ पाशविच्छेदिकांसाक्षात्सच्चिदानंदरूपिणीं ॥ १५ ॥ एवंदेवंचदेवींचध्यात्वासनवरेशुभे ॥ सर्वोपचार
वद्भक्त्याभावपुष्पैःसमर्चयेत् ॥ १६ ॥ अथवापरिकल्प्यैवंमूर्तिमन्यत्तमांविभोः ॥ शैवींसदाशिवाख्यांवातथामाहे
श्वरींपराम् ॥१७॥ षड्विंशकाभिधानांवाश्रीकंठाख्यामथापिवा ॥ मंत्रन्यासादिकंचापिकृत्वास्वस्यांतनौयथा ॥१८॥
अस्यांमूर्तौमूर्तिमंतंशिवंसदसतःपरं ॥ ध्यात्वाबाह्यक्रमेणैवपूजांनिर्वर्तयेद्धिया ॥ १९ ॥ समिदाज्यादिभिःपश्चान्ना
भौहोमंचभावयेत् ॥ भ्रूमध्येचशिवंध्यायेच्छुद्धदीपशिखाकृतिं ॥ २० ॥ इत्थमंगेस्वतंत्रेवायोगेध्यानमयेशुभे ॥ अ
ग्निकार्यावसानंचसर्वश्चैषसमोविधिः ॥ २१ ॥ अथचिंतामयंसर्वंसमाप्याराधनक्रमं ॥ लिंगेचपूजयेद्देवंस्थंडिलेवा
नलेपिवा ॥ २२ ॥ इतिश्रीशिवमहापुराणेवायवीयसंहितायामुत्तरभागेएकोनविंशोऽध्यायः ॥ १९ ॥ ॥ छ ॥
उपमन्युरुवाच ॥ प्रोक्षयेन्मूलमंत्रेणपूजास्थानंविशुद्धये ॥ गंधचंदनतोयेनपुष्पंतत्रविनिक्षिपेत् ॥ १ ॥

रमाह ॥ अथवेति ॥ १७ ॥ १८ ॥ १९ ॥ २० ॥ २१ ॥ २२ ॥ इतिश्रीशिवमहापुराणेवायवीयसंहितायामुत्तरभागेएकोनविंशोऽध्यायः ॥ १९ ॥
ओंनमःशिवाय ॥ नानाविधविधानेनपूजनंशंकरस्ययत् ॥ पार्वत्याश्वसमग्रंतद्विंशेध्यायेत्रकथ्यते ॥ १ ॥ १ ॥ ॥ ॥

Indira Gandhi National Centre for the Arts

अर्चनाभुवंपूजास्थानं ॥ २ ॥ ३ ॥ ४ ॥ तेषुप्रोक्षण्यादिपात्रेषु ॥ ५ ॥ ६ ॥ पानीयेनैवेद्यादिष्वर्पणीयेजले ॥ ७ ॥ ८ ॥ ९ ॥ भसितंभस्म ॥ १० ॥

अस्त्रेणोत्सार्यवैविघ्नानवगुंठ्यचवर्मणा ॥ अस्त्रंदिक्षुप्रविन्यस्यकल्पयेदर्चनाभुवं ॥ २ ॥ तत्रदर्भान्परिस्तीर्यक्षालये
त्प्रोक्षणादिभिः ॥ संशोध्यसर्वपात्राणिद्रव्यशुद्धिंसमाचरेत् ॥ ३ ॥ प्रोक्षणीमर्घ्यपात्रंचपाद्यपात्रमतःपरं ॥ तथै
वाचमनीयस्यपात्रंचेतिचतुष्टयम् ॥ ४ ॥ प्रक्षाल्यप्रोक्ष्यवीक्ष्याथक्षिपेत्तेषुजलंशिवम् ॥ पुण्यद्रव्याणिसर्वाणियथा
लाभंविनिक्षिपेत् ॥ ५ ॥ रत्नानिरजतंहेमगंधपुष्पाक्षतादयः ॥ फलपल्लवदर्भाश्चपुण्यद्रव्याण्यनेकधा ॥ ६ ॥ स्ना
नोदकेसुगंधादिपानीयेचविशेषतः ॥ शीतलानिमनोज्ञानिकुसुमादीनिनिक्षिपेत् ॥ ७ ॥ उशीरंचंदनंचैवपाद्येतुपरि
कल्पयेत् ॥ जातिकंकोलकर्पूरबहुमूलतमालकान् ॥ ८ ॥ क्षिपेदाचमनीयेचचूर्णयित्वाविशेषतः ॥ एलांसर्वेषुपात्रेषु
कर्पूरंचंदनंतथा ॥ ९ ॥ कुशाग्राण्यक्षतांश्चैवयवव्रीहितिलानपि ॥ आज्यसिद्धार्थपुष्पाणिभसितंचार्घ्यपात्रके ॥
॥ १० ॥ कुशपुष्पयवव्रीहिबहुमूलतमालकान् ॥ प्रक्षिपेत्प्रोक्षणीपात्रेभसितंचयथाक्रमं ॥ ११ ॥ सर्वत्रमंत्रंविन्य
स्यवर्मणावेष्ट्यबाह्यतः॥पश्चादस्त्रेणसंरक्ष्यधेनुमुद्रांप्रदर्शयेत्॥१२॥पूजाद्रव्याणिसर्वाणिप्रोक्षणीपात्रवारिणा॥संप्रो
क्ष्यमूलमंत्रेणशोधयेद्विधिवत्ततः ॥ १३ ॥ पात्राणांप्रोक्षणीमेकामलाभेसर्वकर्मसु ॥ साधयेदर्घ्यमद्भिस्तत्सामान्यं
साधकोत्तमः ॥ १४ ॥ ततोविनायकंदेवंभक्ष्यभोज्यादिभिःक्रमात् ॥ पूजयित्वाविधानेनद्वारपार्श्वेथदक्षिणे ॥ १५ ॥
अंतःपुराधिपंसाक्षान्नंदिनंसम्यगर्चयेत् ॥ चामीकराचलप्रख्यंसर्वाभरणभूषितम् ॥ १६ ॥ बालेंदुमुकुटंसौम्यंत्रिने
त्रंचचतुर्भुजम् ॥ दीप्तशूलमृगीटंकतिग्मवेत्रधरंप्रभुं ॥ १७ ॥ चंद्रबिंबाभवदनंहरिवक्त्रमथापिवा ॥ उत्तरेद्वारपार्श्वे
स्यभार्यांचमरुतांसुतां ॥ १८ ॥ सुयशांसुव्रतामंबापादमंडनतत्परां ॥ पूजयित्वाप्रविश्यांतर्भवनंपरमेष्ठिनः ॥ १९ ॥

॥ ११ ॥ १२ ॥ १३ ॥ १४ ॥ १५ ॥ १६ ॥ १७ ॥ हरिवक्त्रंसिंहवक्त्रं ॥ १८ ॥ १९ ॥ ॥ ॥



Indira Gandhi National Centre for the Arts

अपनोदयेत् निष्कासयेत् ॥ २० ॥ तस्यचंडस्य ॥ २१ ॥ २२ ॥ २३ ॥ कंठीरवचतुष्पदंसिंहाकारपादचतुष्टययुक्तं ॥ २४ ॥ २५ ॥ राजावर्तःश्रे

संपूज्यलिंगंतैर्द्रव्यैर्निर्माल्यमपनोदयेत् ॥ प्रक्षाल्यपुष्पंशिरसिन्यसेत्तस्यविशुद्धये ॥ २० ॥ पुष्पहस्तोजपेच्छक्त्या मंत्रंमंत्रविशुद्धये ॥ ऐशान्यांचंडमाराध्यनिर्माल्यंतस्यदापयेत् ॥ २१ ॥ कल्पयेदासनंपश्चादाधारादियथाक्रमं ॥ आधारशक्तिंकल्याणींश्यामांध्यायेदधोभुवि ॥ २२ ॥ तस्याःपुरस्तादुल्कंठमनंतंकुंडलाकृतिं ॥ धवलंपंचफणिनंलेलिहानमिवांबरं ॥ २३ ॥ तस्योपर्यासनंभद्रंकंठीरवचतुष्पदं ॥ धर्मोज्ञानंचवैराग्यमैश्वर्यंचपदानिवै ॥ २४ ॥ आग्नेयादिश्वेतरक्तपीतश्यामानिवर्णतः ॥ अधर्मादीनिपूर्वादीन्युत्तरांतान्यनुक्रमात् ॥ २५ ॥ राजावर्तमणिप्रख्यान्यस्य गात्राणिभावयेत् ॥ अस्योर्ध्वच्छादनंपद्ममासनंविमलंसितं ॥ २६ ॥ अष्टपत्राणितस्याहुरणिमादिगुणाष्टकं ॥ केसराणिचवामाद्यारुद्रावामादिशक्तिभिः ॥ २७ ॥ बीजान्यपिचताएवशक्त्यंतर्मनोन्मनी ॥ कर्णिकापरवैराग्यं नालंज्ञानंशिवात्मकं ॥ २८ ॥ कंदश्चशिवधर्मात्माकर्णिकांतेत्रिमंडले ॥ त्रिमंडलोपर्यात्मादितत्त्वत्रितयमासनं ॥ ॥ २९ ॥ सर्वासनोपरिसुखंविचित्रास्तरणास्तृतं ॥ आसनंकल्पयेद्दिव्यंशुद्धविद्यासमुज्वलं ॥ ३० ॥ आवाहनंस्थापनंचसंनिरोधंनिरीक्षणं ॥ नमस्कारंचकुर्वीतबध्वामुद्रांपृथक्पृथक् ॥ ३१ ॥ पाद्यमाचमनंचार्घ्यंगंधंपुष्पंततःपरं ॥ धूपंदीपंचतांबूलंदत्वाथस्नापयेच्छिवं ॥ ३२ ॥ अथवापरिकल्प्यैवमासनंमूर्तिमेवच ॥ सकलीकृत्यमूलेनब्रह्मभिश्चापरैस्तथा ॥ ३३ ॥ आवाहयेत्ततोदेव्याशिवंपरमकारणं ॥ शुद्धस्फटिकसंकाशंदेवंनिश्चलमक्षरं ॥ ३४ ॥ कारणं सर्वलोकानांसर्वलोकमयंपरं ॥ अंतर्बहिस्थितंव्याप्यअणोरणुमहत्तरं ॥ ३५ ॥ भक्तानामप्रयत्नेनदृश्यमीश्वरमव्ययम् ॥ ब्रह्मेंद्रविष्णुरुद्राद्यैरपिदेवैरगोचरम् ॥ ३६ ॥ वेदसारंचविद्वद्भिरगोचरमितिश्रुतम् ॥ आदिमध्यांतरहितंभेषजंभवरोगिणाम् ॥ ३७ ॥ ॥ ॥ ॥ ॥ ॥

ष्ठजातिविशेषयुक्तः ॥ २६ ॥ २७ ॥ २८ ॥ २९ ॥ ३० ॥ संनिरोधंचित्तवृत्तिनिरोधं ॥ ३१ ॥ ३२ ॥ ब्रह्मभिःवेदमंत्रैः ॥ ३३ ॥ ३४ ॥ ॥ ३५ ॥ ३६ ॥ ३७ ॥ ॥ ॥ ॥ ॥ ॥

Indira Gandhi National Centre for the Arts

शिवार्थकल्याणार्थं ॥ ३८ ॥ ३९ ॥ ४० ॥ ४१ ॥ चक्रवर्तीति ॥ राजवदुपचारैरित्यर्थः ॥ ४२ ॥ बेरंमूर्तिम् ॥ ४३ ॥ ४४ ॥ ४५ ॥ ४६ ॥ नीले



शिवतत्त्वमितिख्यातंशिवार्थंजगतिस्थितम् ॥ पंचोपचारवद्भक्त्यापूजयेल्लिंगमूर्धनि ॥ ३८ ॥ लिंगमूर्तिर्महेशस्यशि
वस्यपरमात्मनः ॥ स्नानकालेप्रकुर्वीतजयशब्दादिमंगलम् ॥ ३९ ॥ पंचगव्यघृतक्षीरदधिमध्वादिपूर्वकैः ॥ फलैः
फलानांसारैश्चतिलसर्षपसक्तुभिः ॥ ४० ॥ बीजैर्यवादिभिःशस्तैश्चूर्णैर्माषादिसंभवैः ॥ संस्नाप्यालिप्यपिष्टाद्यैः
स्नापयेदुष्णवारिभिः ॥ ४१ ॥ घर्षयेद्बिल्वपत्राद्यैर्लेपगंधापनुत्तये ॥ पुनःसंस्नाप्यसलिलैश्चक्रवर्त्युपचारतः ॥ ४२ ॥
सुगंध्यामलकंदद्याद्धरिद्रांचयथाक्रमम् ॥ ततःसंशोध्यसलिलैर्लिंगंबेरमथापिवा ॥ ४३ ॥ स्नापयेद्गंधतोयेनकुशपु
ष्पोदकेनच ॥ हिरण्यरत्नतोयैश्चमंत्रसिद्धैर्यथाक्रमं ॥ ४४ ॥ असंभवेतुद्रव्याणांयथासंभवसंभृतैः ॥ केवलैर्मंत्रतो
यैर्वास्नापयेच्छ्रद्धयाशिवम् ॥ ४५ ॥ कलशेनाथशंखेनवर्धन्यापाणिनातथा ॥ सकुशेनसपुष्पेणस्नापयेन्मंत्रपूर्वकम्
॥ ४६ ॥ पवमानेनरुद्रेणनीलेनत्वरितेनच ॥ लिंगसूक्तादिसूक्तैश्चशिरसाथर्वणेनच ॥ ४७ ॥ ऋग्भिश्चसामभिःशै
वैर्ब्रह्मभिश्चापिपंचभिः ॥ स्नापयेद्देवदेवेशंशिवेनप्रणवेनच ॥ ४८ ॥ यथादेवस्यदेव्याश्चकुर्यात्स्नानादिकंतथा ॥
नतुकश्चिद्विशेषोस्तितत्रतौसदृशौयतः ॥ ४९ ॥ प्रथमंदेवमुद्दिश्यकृत्वास्नानादिकाःक्रियाः ॥ देव्यैपश्चात्प्रकुर्वीतदे
वदेवस्यशासनात् ॥ ५० ॥ अर्धनारीश्वरेपूज्येपौर्वापर्यंचविद्यते ॥ तत्रतत्रोपचाराणांलिंगेवान्यत्रवाक्वचित् ॥ ५१ ॥
कृताभिषेकंलिंगाद्यंशुचिनाचसुगंधिना ॥ संमृज्यवाससादद्यादंबरंचोपवीतकं ॥ ५२ ॥ पाद्यमाचमनंचार्घ्यंगंधपु
ष्पंचभूषणम् ॥ धूपंदीपंचनैवेद्यंपानीयंमुखशोधनम् ॥ ५३ ॥ पुनश्चाचमनीयंचमुखवासंततःपरं ॥ मुकुटंचशुभंभ
द्रंसर्वरत्नैरलंकृतं ॥ ५४ ॥ भूषणानिविचित्राणिमाल्यानिविविधानिच ॥ अंजनंचामरंछत्रंतालवृंतंचदर्पणं ॥ ५५ ॥



नएतदाख्यरुद्रमंत्रेण ॥ त्वरितेनएतदाख्येन ॥ ४७ ॥ ब्रह्मभिःसद्योजातमित्यादिभिर्मंत्रैः ॥ ४८ ॥ ४९ ॥ ५० ॥ अन्यत्रमूर्त्यादौ ॥ ५१ ॥ शुचिना
शुद्धोदकेन ॥ ५२ ॥ ५३ ॥ ५४ ॥ ५५ ॥ ॥ ॥ ॥

Indira Gandhi National Centre for the Arts

॥ ५६ ॥ ५७ ॥ ५८ ॥ तेषुप्रदीपेषु ॥ ५९ ॥ ६० ॥ ६१ ॥ ६२ ॥ ६३ ॥ ६४ ॥ ६५ ॥ ६६ ॥ ६७ ॥ ६८ ॥ ६९ ॥ ७० ॥ शिवस्येति ॥

दत्वानीराजनंकुर्यात्सर्वमंगलनिस्वनैः ॥ गीतनृत्यादिभिश्चैवजयशब्दसमन्वितैः ॥ ५६ ॥ हैमेचराजतेताम्रेपात्रेवा
मृन्मयेशुभे ॥ पद्मकैःशोभितैःपुष्पैर्बीजैर्दध्यक्षतादिभिः ॥ ५७ ॥ त्रिशूलशंखयुग्माब्जनंद्यावर्तैःकरीषजैः ॥ श्रीव
त्सस्वस्तिकादर्शवज्रैर्वन्ह्यादिचिन्हितैः ॥ ५८ ॥ अष्टौप्रदीपान्परितोविधायैकंतुमध्यतः ॥ तेषुवामादिकाश्चिंत्याः
पूज्याश्चनवशक्तयः ॥५९॥ कवचेनसमाच्छाद्यसंरक्ष्यास्त्रेणसर्वतः ॥ धेनुमुद्रांचसंदर्श्यपाणिभ्यांपात्रमुद्धरेत् ॥६०॥
अथवारोपयेत्पात्रेपंचदीपान्यथाक्रमं ॥ विदिक्ष्वपिचमध्येचदीपमेकमथापिवा ॥ ६१ ॥ ततस्तत्पात्रमुद्धृत्यलिंगा
देरुपरिक्रमात् ॥ त्रिःप्रदक्षिणयोगेनभ्रामयेन्मूलविद्यया ॥ ६२ ॥ दद्यादर्घ्यंततोमूर्ध्निभसितंचसुगंधितं ॥ कृत्वापु
ष्पांजलिंपश्चादुपहारान्निवेदयेत् ॥ ६३ ॥ पानीयंचततोदद्याद्दत्वाचाचमनंपुनः ॥ पंचसौगंधिकोपेतंतांबुलंचनिवेद
येत् ॥ ६४ ॥ प्रोक्षयेत्प्रोक्षणीयानिगाननाट्यादिकारयेत् ॥ लिंगादौशिवयोश्चिंतांकृत्वाशक्त्याजपेच्छिवं ॥ ६५ ॥
प्रदक्षिणंप्रणामंचस्तवंचात्मसमर्पणम ॥ विज्ञापनंचकार्याणांकुर्याद्विनयपूर्वकम् ॥ ६६ ॥ अर्घ्यंपुष्पांजलिंदत्वाब
ध्वामुद्रांयथाविधि ॥ पश्चात्क्षमापयेद्देवमुद्वास्यात्मनिचिंतयेत् ॥ ६७ ॥ पाद्यादिमुखवासांतमर्घ्याद्यंचातिसंकटे ॥
पुष्पनिक्षेपमात्रंवाकुर्याद्भावपुरःसरम् ॥ ६८ ॥ तावतैवपरोधर्मोभावेनसुकृतोभवेत् ॥ असंपूज्यनभुंजीतशिवमा
प्राणसंचरात् ॥ ६९ ॥ यदिपापस्तुभुंजीतस्वैरंतस्यननिष्कृतिः ॥ प्रमादेनतुभुक्तंचेत्तदुद्गीर्यप्रयत्नतः ॥ ७० ॥ स्ना
त्वाद्विगुणमभ्यर्च्यदेवंदेवीमुपोष्यच ॥ शिवस्यायुतमभ्यस्येद्ब्रह्मचर्यपुरःसरम् ॥ ७१ ॥ परेद्युःशक्तितोदत्वासुवर्णा
द्यंशिवायच ॥ शिवभक्तायवाकृत्वामहापूजांशुचिर्भवेत् ॥ ७२ ॥ अनुक्तंचात्रपूजायाःक्रमलोपभयादिना ॥ यत्तदन्य
त्रवक्ष्यामिसमासान्नतुविस्तरात् ॥ ७३ ॥ हविर्निवेदनात्पूर्वंदीपदानादनंतरम् ॥ कुर्यादावरणाभ्यर्चांप्राप्तेनीरा
जनेथवा ॥ ७४ ॥ ॥ ॥ ॥ ॥

मंत्रमितिशेषः ॥ ७१ ॥ ७२ ॥ ७३ ॥ ७४ ॥ ॥ ॥ ॥ ॥

Indira Gandhi National Centre for the Arts

तत्रेशानादिसद्यांतंत्हृदाद्यस्त्रांतमेवच ॥ शिवस्यचशिवायाश्चप्रथमावरणेयजेत् ॥ ७५ ॥ ईशान्यांपूर्वभागेचदक्षिणे चोत्तरेतथा ॥ पश्चिमेचतथाग्नेय्यामैशान्यांनैर्ऋतौततः ॥ ७६ ॥ वायव्यांपुनरीशान्यांचतुर्दिक्षुततःपरं ॥ गर्भावर णमाख्यातंमंत्रसंघातमेववा ॥ ७७ ॥ हृदयाद्यस्त्रपर्यंतमथवापिसमर्चयेत् ॥ तद्बहिःपूर्वतःशक्रंयमंदक्षिणतोयजेत् ॥ ७८ ॥ वरुणंवारुणेभागेधनदंचोत्तरेबुधः ॥ ईशमैशेऽनलंस्वीयेनैर्ऋतेनिर्ऋतिंयजेत् ॥ ७९ ॥ मारुतेमारुतंविष्णुंनै र्ऋतेविधिमैश्वरे ॥ बहिःपद्मस्यवज्रादीन्यब्जांतान्यायुधान्यपि ॥८०॥ प्रसिद्धरूपाण्याशासुलोकेशानांक्रमाद्यजेत्॥ देवंदेवींचसंप्रेक्ष्यसर्वावरणदेवताः ॥ ८१ ॥ बद्धांजलिपुटाध्येयाःसमासीनायथासुखं ॥ सर्वावरणदेवानांस्वाभिधा नैर्नमोयुतैः ॥ ८२ ॥ पुष्पैःसंपूजनंकुर्यान्नत्वास्मृत्वायथाक्रमं ॥ गर्भावरणमेवापियजेत्स्वावरणेनवा ॥ ८३ ॥ योगे ध्यानेजपेहोमेबाह्येवाभ्यंतरेपिवा ॥ हविश्चषड्विधंदेयंशुद्धंमुद्गान्नमेवच ॥ ८४ ॥ पायसंदधिसंमिश्रंगौडंचमधुनाप्लु तं ॥ एतेष्वेकमनेकंवानानाव्यंजनसंयुतं ॥ ८५ ॥ गुडखंडान्वितंदद्यान्मथितंदधिचोत्तमं ॥ भक्ष्याण्यपूपमुख्यानि स्वादुमंतिफलानिच ॥ ८६ ॥ एलाचंदनपुष्पाढ्यंपानीयंचातिशीतलं ॥ मृदुतैलरसाक्तंचखंडंपूगफलस्यच ॥ ८७॥ दलानिनागवल्याश्चगौराणिचशिवानिच ॥ शैलमेवसितंचूर्णंनातिरुक्षंनदूषितं ॥ ८८ ॥ कर्पूरंचाथकंकोलंजात्या दिचनवंशुभं ॥ आलेपनंचंदनंस्यान्मूलकाष्ठरजोमयं ॥ ८९ ॥ कस्तूरिकाकुंकुमंचरसोमृगमदात्मकः ॥ पुष्पाणिसु रभीण्येवपवित्राणिशुभानिच ॥९०॥ निर्गंधान्युग्रगंधानिदूषितान्युषितानिच ॥ स्वयमेवविशीर्णानिनाऽऽदेयानिशि वार्चने ॥ ९१ ॥ वासांसिचमृदून्येवनवानिचशुभानिच ॥ दुकूलपट्टदेवांगमयानिचसितानिच ॥ ९२ ॥



Indira Gandhi National Centre for the Arts

नवरत्नचितान्येवतपनीयमयानिच ॥ विद्युद्वलयकल्पानिभूषणानिविशेषतः ॥ ९३ ॥ सर्वाण्येतानिकर्पूरनिर्यासा
गुरुचंदनैः ॥ प्रधूपितानिपुष्पौघैर्वासितानिसमंततः ॥ ९४ ॥ चंदनागुरुकर्पूरकुष्ठगुग्गुलचूर्णकैः ॥ घृतेनमधुनाचै
वसिद्धोधूपःप्रशस्यते ॥ ९५ ॥ कपिलासंभवेनैवघृतेनापिसुगंधिना ॥ नित्यंप्रदीपितादीपाःशस्ताःकर्पूरसंयुताः ॥
॥ ९६ ॥ पंचगव्यंचमधुरंपयोदधिघृतंतथा ॥ कपिलासंभवंशंभोरिष्टंस्नानेचपानके ॥ ९७ ॥ आसनानिचभद्राणि
गजदंतमयानिच ॥ सुवर्णरत्नचित्राणिचित्राण्यास्तरणानिच ॥ ९८ ॥ मृदूपधानयुक्तानिसूक्ष्मतूलमयानिच ॥ उ
च्चावचानिरम्याणिशयनानिसुखानिच ॥ ९९ ॥ नद्याःसमुद्रगामिन्यानदाद्वांभःसमाह्रतं ॥ वस्त्रपूतंचशीतंचविशि
ष्टंस्नानपानयोः ॥ १०० ॥ छत्रंशशिनिभंचारुमुक्तादामविराजितं ॥ नवरत्नचितंदिव्यंहेमदंडमनोहरम् ॥ १०१ ॥
चामरेचसितेसूक्ष्मेचामीकरपरिष्कृते ॥ राजहंसद्वयाकारेरत्नदंडोपशोभिते ॥ १०२ ॥ दर्पणंचापिसुस्निग्धंदिव्यगं
धानुलेपनम् ॥ समंताद्रत्नसंछन्नंस्त्रग्वरैश्चापिभूषितम् ॥ १०३ ॥ गंभीरनिनदःशंखोहंसकुंदेंदुसन्निभः ॥ आस्यपृ
ष्ठादिदेशेषुरत्नचामीकरांचितः ॥ १०४ ॥ काहलानिचरम्याणिनानानादकराणिच ॥ सुवर्णनिर्मितान्येवमौक्तिका
लंकृतानिच ॥ १०५ ॥ भेरीमृदंगमुरजतिमिच्छापटहादयः ॥ समुद्रकल्पसन्नादाःकल्पनीयाःप्रयत्नतः ॥ १०६ ॥
भांडान्यपिचरम्याणिपात्राण्यपिचकृत्स्नशः ॥ तदाधाराणिसर्वाणिसौवर्णान्येवधारयेत् ॥ १०७ ॥ आलयंचमहे
शस्यशिवस्यपरमात्मनः ॥ राजावसथवत्कल्प्यंशिल्पशास्त्रोक्तलक्षणम् ॥ १०८ ॥ उच्चप्राकारसंभिन्नंभूधराकारगो
पुरम् ॥ अनेकरत्नसंछन्नंहेमद्वारकपाटकं ॥ १०९ ॥ तप्तजांबूनदमयंरत्नस्तंभशताव्रतं ॥ मुक्तादामवितानाढ्यंवि
द्रुमद्वारतोरणं ॥ ११० ॥ चामीकरमयैर्दिव्यैर्मुकुटैःकुंभलक्षणैः ॥ अलंकृतशिरोभागमस्त्रराजेनचिन्हितैः ॥ १११ ॥



Indira Gandhi National Centre for the Arts

राजन्यार्हनिवासैश्चराजवीथ्यादिशोभितैः ॥ प्रक्षिप्तप्रांशुशिखरैःप्रासादैश्चसमंततः ॥ ११२ ॥ आस्थानस्थानव
यैश्चस्थितैर्दिक्षुविदिक्षुच ॥ अत्यंतालंकृतप्रांतमंतरावरणैरिव ॥ ११३ ॥ उत्तमस्त्रीसहस्रैश्चनृत्यगेयविशारदैः ॥
वेणुवीणाविदग्धैश्चपुरुषैर्बहुभिर्युतम् ॥ ११४ ॥ रक्षितंरक्षिभिर्वीरैर्गजवाजिरथान्वितैः ॥ अनेकपुष्पवाटीभिरने
कैश्चसरोवरैः ॥ ११५ ॥ दीर्घिकाभिरनेकाभिर्दिग्विदिक्षुविराजितम् ॥ वेदवेदांगतत्वज्ञैःशिवशास्त्रपरायणैः ॥ ११६ ॥
शिवाश्रमरतैर्भक्तैःशिवशास्त्रोक्तलक्षणैः ॥ शांतैःस्मितमुखैःस्फीतैःसदाचारपरायणैः ॥ ११७ ॥ शैवैर्माहेश्वरैश्चैव
श्रीमद्भिःसेवितंद्विजैः ॥ एवमंतर्बहिर्वाथयथाशक्तिविनिर्मिते ॥ ११८ ॥ स्थानेशिलामयेदांतेदारवेचेष्टकामये ॥ के
वलंमृन्मयेवापिपुण्यारण्येपिवागिरौ ॥ ११९ ॥ नद्यांदेवालयेन्यत्रदेशेवाथगृहेशुभे ॥ आढ्योवाथदरिद्रोवास्व
कांशक्तिमवंचयन् ॥ १२० ॥ द्रव्यैर्न्यायार्जितैरेवभक्त्यादेवंसमर्चयेत् ॥ अथान्यायार्जितैश्चापिभक्त्याचेच्छिवमर्च
येत् ॥ १२१ ॥ नतस्यप्रत्यवायोस्तिभाववश्योयतःप्रभुः ॥ न्यायार्जितैरपिद्रव्यैरभक्त्यापूजयेद्यदि ॥ १२२ ॥ न
तत्फलमवाप्नोतिभक्तिरेवात्रकारणं ॥ भक्त्यावित्तानुसारेणशिवमुद्दिश्ययत्कृतं ॥ १२३ ॥ अल्पेमहतिवातुल्यंफल
माढ्यदरिद्रयोः ॥ भक्त्याप्रचोदितःकुर्यादल्पवित्तोपिमानवः ॥ १२४ ॥ महाविभवसारोपिनकुर्याद्भक्तिवर्जितः ॥
सर्वस्वमपियोदद्याच्छिवेभक्तिविवर्जितः ॥ १२५ ॥ नतेनफलभाक्सस्याद्भक्तिरेवात्रकारणं ॥ नतत्तपोभिरत्युग्रैर्न
चसर्वैर्महामखैः ॥ १२६ ॥ गच्छेच्छिवपुरंदिव्यंमुक्त्वाभक्तिंशिवात्मिकाम् ॥ गुह्याद्गुह्यतरंकृष्णसर्वत्रपरमेश्वरे ॥ १२७ ॥
शिवेभक्तिर्नसंदेहस्तयायुक्तोविमुच्यते ॥ शिवमंत्रजपोध्यानंहोमोयज्ञस्तपःश्रुतं ॥ १२८ ॥ दानमध्ययनंसर्वंभावा
र्थंनात्रसंशयः ॥ भावहीनोनरःसर्वंकृत्वापिनविमुच्यते ॥ १२९ ॥ भावयुक्तःपुनःसर्वमकृत्वापिविमुच्यते ॥ चांद्राय
णसहस्रैश्चप्राजापत्यशतैस्तथा ॥ १३० ॥ ॥ ॥ ॥ ॥



Indira Gandhi National Centre for the Arts

॥ १३१ ॥ १३२ ॥ १३३ ॥ १३४ ॥ १३५ ॥ १३६ ॥ १३७ ॥ १३८ ॥ १३९ ॥ १४० ॥ १४१ ॥ अपरःअभक्तःनविमुच्येतेतिसंबंधः ॥

मासोपवासैश्चान्यैश्चशिवभक्तस्याकिंफलं ॥ अभक्तामानवाश्चास्मिन्लोकेगिरिगुहासुच ॥ १३१ ॥ तपंतिचाल्पभो
गार्थभक्तोभावेनमुच्यते ॥ सात्विकंमुक्तिदंकर्मसत्वेवैयोगिनःस्थिताः ॥ १३२ ॥ राजसंसिद्धिदंकुर्युःकर्मिणोरजसा
वृताः ॥ असुराराक्षसाश्चैवतमोगुणसमन्विताः ॥ १३३ ॥ ॥ ऐहिकार्थयजंतीशंनराश्चान्येपितादृशाः ॥ तामसंरा
जसंवापिसात्विकंभावमेववा ॥ १३४ ॥ आश्रित्यभक्त्यापूजाद्यंकुर्वन्भद्रंसमश्नुते ॥ यतःपापार्णवात्रातुंभक्तिर्नौरिव
निर्मिता ॥ १३५ ॥ तस्माद्भक्त्युपपन्नस्यरजसातमसाचकिं ॥ अंत्यजोवाधमोवापिमूर्खोवापतितोपिवा ॥ १३६ ॥
शिवंप्रपन्नश्चेत्कृष्णपूज्यःसर्वसुरासुरैः ॥ तस्मात्सर्वप्रयत्नेनभक्त्यैवशिवमर्चयेत् ॥ १३७ ॥ अभक्तानांक्वचिदपिफ
लंनास्तियतस्ततः ॥ वक्ष्याम्यतिरहस्यंतेशृणुकृष्णवचोमम ॥ १३८ ॥ वेदैःशास्त्रैर्वेदविद्भिर्विचार्यसुविनिश्चितं ॥ ब्र
ह्मघ्नोवासुरापोवास्तेयीवागुरुतल्पगः ॥ १३९ ॥ मातृहापितृहावापिवीरहाभ्रूणहापिवा ॥ संपूज्यामंत्रकंभक्त्या
शिवंपरमकारणं ॥ १४० ॥ तैस्तैःपापैर्विमुच्येतवर्षैर्द्वादशभिःक्रमात् ॥ तस्मात्सर्वप्रयत्नेनपतितोपियजेच्छिवं ॥
॥१४१॥ भक्तश्चेन्नापरःकश्चिद्भिक्षाहारोजितेंद्रियः ॥ कृत्वापिसुमहत्पापंभक्त्यापंचाक्षरेणतु ॥१४२॥ पूजयेद्यदिदेवे
शंतस्मात्पापात्प्रमुच्यते ॥ अब्भक्षावायुभक्षाश्चयेचान्येव्रतकर्शिताः ॥ १४३ ॥ तेषामेतैर्व्रतैर्नास्तिशिवलोकसमा
गमः ॥ भक्त्यापंचाक्षरेणैवयःशिवंसकृदर्चयेत् ॥ १४४ ॥ सोपिगच्छेच्छिवस्थानंशिवमंत्रस्यगौरवात् ॥ तस्मात्तपां
सियज्ञाश्चसर्वेसर्वस्वदक्षिणाः ॥१४५॥ शिवमूर्त्यर्चनस्यैतेकोट्यंशेनापिनोसमाः ॥ बद्धोवाप्यथमुक्तोवापाशात्पंचा
क्षरेणचेत् ॥ १४६ ॥ पूजयेन्मुच्यतेभक्तोनात्रकार्याविचारणा ॥ अरुद्रोवासरुद्रोवासूक्तेनशिवमर्चयेत् ॥ १४७ ॥
यःसकृत्पतितोवापिमूढोवामुच्यतेनरः ॥ षडक्षरेणवानित्यंतथापंचाक्षरेणवा॥१४८॥ सब्रह्मांगेनवातेनसहंसेनविमु
च्यते ॥ तस्मान्नित्यंशिवंभक्त्यासूक्तमंत्रेणपूजयेत् ॥ १४९ ॥ ॥ ॥

॥ १४२ ॥ १४३ ॥ एतैरब्भक्षणादिभिः ॥ १४४ ॥ १४५ ॥ १४६ ॥ १४७ ॥ १४८ ॥ सब्रह्मांगेनब्रह्मांगानिसद्योजातादिमंत्रास्तत्सहितेनसहंसेन
पूर्वोक्तहंसमंत्रसहितेन ॥ १४९ ॥ ॥ ॥ ॥ ॥

Indira Gandhi National Centre for the Arts

॥१५०॥ लब्धेति ॥ गुरोरितिशेषः ॥ १५१ ॥ १५२ ॥ १५३ ॥ १५४ ॥ १५५ ॥ १५६ ॥ १५७ ॥ त्यागार्द्रभावतात्यागेदानेआर्द्रभावतादयालुता



शिवभक्तोजितक्रोधोह्यलब्धोलब्धएवच॥अलब्धाल्लब्धएवात्रविशिष्टोनात्रसंशयः॥१५० तस्माल्लब्ध्वैवदेवेशंसूक्तमं
त्रेणपूजयेत्॥एककालंद्विकालंवात्रिकालंनित्यमेववा॥ १५१॥ येर्चयंतिमहादेवंविज्ञेयास्तेगणेश्वराः॥ज्ञानेनात्मसहा
येननार्चितोभगवान्शिवः ॥१५२॥ सचिरंसंसरत्यस्मिन्संसारेदुःखसागरे॥दुर्लभंप्राप्यमानुष्यंमूढोनार्चयतेशिवं॥
॥१५३॥ निष्फलंतस्यतज्जन्ममोक्षायनभवेद्यतः॥दुर्लभंप्राप्यमानुष्यंयेर्चयंतिपिनाकिनं॥१५४॥तेषांहिसफलंजन्म
कृतार्थास्तेनरोत्तमाः॥भवभक्तिपरायेचभवप्रणतचेतसः॥१५५॥भवसंस्मरणोद्युक्तानतेदुःखस्यभागिनः॥भवनानिम
नोज्ञानिविभ्रमाभरणाःस्त्रियः ॥१५६॥ धनंचातृप्तिपर्यंतंशिवपूजाविधेःफलम् ॥ येवांछंतिमहाभोगान्राज्यंचत्रिद
शालये ॥१५७॥ तेवांछंतिसदाकालंहरस्यचरणांबुजं॥सौभाग्यंकांतिमद्रूपंसत्वंत्यागार्द्रभावता ॥१५८॥शौर्यंचजग
तिख्यातिःशिवमर्चयतोभवेत् ॥ तस्मात्सर्वंपरित्यज्यशिवैकाहितमानसः ॥ १५९ ॥ शिवपूजाविधिंकुर्याद्यदिच्छे
च्छिवमात्मनः ॥ त्वरितंजीवितंयातित्वरितंयातियौवनम् ॥ १६० ॥ त्वरितंव्याधिरप्येतितस्मात्पूज्यःपिनाकधृक् ॥
यावन्नायातिमरणंयावन्नाक्रमतेजरा ॥ १६१ ॥ यावन्नेंद्रियवैकल्यंतावत्पूजयशंकरं ॥ नशिवार्चनतुल्योस्तिधर्मो
न्योभुवनत्रये ॥ १६२ ॥ इतिविज्ञाययत्नेनपूजनीयःसदाशिवः॥द्वारयागंचवनिकांपरिवारबलिक्रियां ॥१६३॥ नि
त्योत्सवंचकुर्वीतप्रासादेयदिपूजयेत् ॥हविर्निवेदनादूर्ध्वंस्वयंचानुचरोपिवा ॥१६४॥ प्रासादपरिवारेभ्योबलिंदद्या
द्यथाक्रमं ॥ निर्गम्यसहवादित्रैस्तदाशाभिमुखःस्थितः ॥ १६५ ॥ पुष्पंधूपंचदीपंचदद्यादन्नंजलैःसह॥ततोदद्यान्म
हापीठेतिष्ठन्बलिमुदङ्मुखः ॥ १६६ ॥ ततोनिवेदितंदेवेयत्तदन्नादिकंपुरा॥ तत्सर्वंसावशेषंवाचंडायविनिवेदयेत्॥
॥ १६७ ॥ हुत्वाचविधिवत्पश्चात्पूजाशेषंसमापयेत्॥कृत्वाप्रयोगंविधिवद्यावन्मंत्रंजपंततः॥१६८॥नित्योत्सवंप्रकुर्वी
तयथोक्तंशिवशासने ॥ विपुलेतैजसेपात्रेरत्नपद्मोपशोभिते ॥ १६९ ॥ ॥ ॥

॥ १५८ ॥ १५९ ॥ १६० ॥ १६१ ॥ १६२ ॥ वनिकारम्यकोमलतरुसमूहः ॥ १६३ ॥ १६४ ॥ १६५ ॥ १६६ ॥ १६७ ॥१६८॥ शिवशासनेशि
वशास्त्रे ॥ १६९ ॥ ॥ ॥ ॥ ॥ ॥



Indira Gandhi National Centre for the Arts

॥ १७० ॥ १७१ ॥ १७२ ॥ १७३ ॥ अष्टपुष्पाणिपूर्वोक्तानि॥ १७४॥इतिश्रीशैवमहापुराणेवायवीयसंहितायाटी ० सा ० बो ० मुत्तरभागेशिवपूजाविधिर्नाम विंशतितमोऽध्यायः ॥२०॥ ओंनमःशिवाय ॥ पूजाव्रतांगहोमादिकुंडमानादिकंचयत्॥शांकरंयजनंसर्वमेकविंशेनिरूप्यते ॥ १ ॥ १ ॥ आधायप्रतिष्ठाप्य

अस्त्रंपाशुपतंदिव्यंतत्रावाह्यसमर्चयेत्॥शिरस्यारोप्यतत्पात्रंद्विजस्यालंकृतस्यच॥१७०॥न्यस्तास्त्रवपुषातेनदीप्तयष्टिधरस्यच॥प्रासादपरिवारेभ्योबहिर्मंगलनिस्वनैः॥१७१॥नृत्यगेयादिभिश्चैवसहदीपध्वजादिभिः॥प्रदक्षिणत्रयंकृत्वानद्रुतंनविलंबितं ॥ १७२ ॥ महापीठंसमावृत्यत्रिःप्रदक्षिणयोगतः॥पुनःप्रविष्टोद्वारस्थोयजमानःकृतांजलिः ॥ १७३॥आदायाभ्यंतरंनीत्वाह्यस्त्रमुद्वासयेत्ततः॥ प्रदक्षिणादिकंकृत्वायथापूर्वोदितंक्रमात्॥प्रदायचाष्टपुष्पाणिपूजामथसमापयेत्॥१७४॥इतिश्रीशिवमहापुराणेवायवीयसंहितायामुत्तरभागेविंशोऽध्यायः॥२०॥उपमन्युरुवाच॥अथाग्निकार्यंवक्ष्यामिकुंडेवास्थंडिलेपिवा॥वेद्यांवाह्यायसेपात्रेमृन्मयेवानवेशुभे॥१॥आधायाग्निंविधानेनसंस्कृत्यचततःपरं ॥ तत्राराध्यमहादेवंहोमकर्मसमाचरेत् ॥ २ ॥ कुंडंद्विहस्तमानंवाहस्तमात्रमथापिवा ॥ वृत्तंवाचतुरस्त्रंवाकुर्याद्वेदींचमंडलं ॥ ३ ॥ कुंडंविस्तारवन्निम्नंतन्मध्येष्टदलांबुजं ॥ चतुरंगुलमुत्सेधंतस्यद्व्यंगुलमेववा ॥ ४ ॥ वितस्तिर्द्विगुणोन्नत्यानाभिमंतःप्रचक्षते ॥ मध्यंचमध्यमांगुल्यामध्यमोत्तमपर्वणोः ॥ ५ ॥ अंगुलिःकथ्यतेसद्भिस्तच्चतुर्विंशतिःकरः ॥ मेखलानांत्रयंवापिद्वयमेकमथापिवा ॥ ६ ॥ यथाशोभंप्रकुर्वीतश्लक्ष्णमिष्टंमृदास्थिरं ॥ अश्वत्थपत्रवद्योनिंगजाधरवदेववा ॥ ७ ॥ मेखलामध्यतःकुर्यात्पश्चिमेदक्षिणेपिवा ॥ शोभनामग्रतःकिंचिन्निम्नामुन्मीलिकांशनैः ॥ ॥ ८ ॥ अग्रेणकुंडाभिमुखींकिंचिदुत्सृज्यमेखलाम् ॥ नोत्सेधनियमोवेद्याःसामार्दीवाथसैकती ॥ ९ ॥ मंडलंगोशकृत्तोयैर्मानंपात्रस्यनोदितं ॥ कुंडंचमृन्मयींवेदीमालिपेद्गोमयांबुना ॥ १० ॥ ॥ ॥ ॥

॥ २ ॥ ३ ॥ तन्मध्येकुंडमध्ये ॥ तस्यांबुजस्य ॥ उत्सेधमुच्चतां ॥ ४ ॥ अंगुल्यादिप्रमाणमाह ॥ मध्यमिति ॥ ५ ॥ ६ ॥ गजाधरवत्गजोष्ठवत् ॥ अन्यदपियोनिलक्षणमुक्तंशांतिसारे॥कूर्मपृष्ठोन्नतामध्येपार्श्वयोश्चांगुलोच्छ्रिता॥गजोष्ठसदृशीतद्वदायताछिद्रसंयुता॥ एतत्सर्वेषुकुंडेषुयोनिलक्षणमिष्यतइति ॥ ७ ॥ उन्मीलिकांसंयुक्तप्रांतद्वयां ॥ ८ ॥ मार्दीमृन्मयी ॥ ९ ॥ गोशकृत्तोयैर्मंडलंकुर्यादितिसंबंधः ॥ १० ॥ ॥ ॥

॥ ११॥वन्हिविष्टरमाग्निस्थापनार्थमासनं ॥ १२॥ साधयेत्संपादयेत्॥ १३॥साधारंपात्रेस्थितं॥ १४॥वन्हिबीजंरुमितिवक्ष्यमाणं॥ १५॥योनिप्रदेशगःयोनिसमी
पस्थः॥तद्रंध्रात्नाभिरंध्रात् ॥ १६॥ १७॥ १८॥ तैजसौकांस्यादिव्यतिरिक्तधातुमयौ ॥ १९॥ स्मार्तौस्मृतिसूत्रप्रोक्तौ॥ब्रह्मवृक्षःपलाशवृक्षःमध्येपर्णद्वयमध्येउ

प्रक्षाल्यतापयेत्पात्रंप्रोक्षयेदन्यदंभसा ॥ स्वसूत्रोक्तप्रकारेणकुंडादौविलिखेत्ततः ॥ ११ ॥ संप्रोक्ष्यकल्पयेद्दर्भैःपुष्पै
र्वावन्हिविष्टरं ॥ अर्चनार्थंचहोमार्थंसर्वद्रव्याणिसाधयेत् ॥१२॥ प्रक्षाल्यक्षालनीयानिप्रोक्षण्याप्रोक्ष्यशोधयेत् ॥ म
णिजंकाष्ठजंवाथश्रोत्रियागारसंभवं ॥ १३ ॥ अन्यंवाऽगर्हितंवन्हिंततःसाधारमानयेत् ॥ त्रिःप्रदक्षिणमावृत्यकुंडा
देरुपरिक्रमात् ॥ १४ ॥ वन्हिबीजंसमुच्चार्यत्वादधीताग्निमासने ॥ योनिमार्गेणवातद्वदात्मनःसंमुखेनवा ॥ १५ ॥
योनिप्रदेशगःसर्वकुंडेकुर्याद्विचक्षणः ॥ स्वनाभ्यंतस्थितंवन्हिंतद्रंध्राद्विस्फुलिंगवत् ॥ १६ ॥ निर्गम्यपावकेबाह्येली
नंबिंबाकृतिंस्मरेत् ॥ आज्यसंस्कारपर्यंतमन्वाधानपुरःसरं ॥ १७॥ स्वसूत्रोक्तक्रमात्कुर्यान्मूलमंत्रेणमंत्रवित् ॥
शिवमूर्तिसमभ्यर्च्यततोदक्षिणपार्श्वतः ॥ १८ ॥ न्यस्यमंत्रंघृतेमुद्रांदर्शयेद्धेनुसंज्ञितां ॥ स्रुक्स्रुवौतैजसौग्राह्यौन
कांस्यायससैसकौ ॥ १९ ॥ यज्ञदारुमयौवापिस्मार्तौवाशिल्पसंमतौ ॥ पर्णेवाब्रह्मवृक्षादेरच्छिद्रेमध्यउत्थिते ॥२०॥
संमृज्यदर्भैस्तौवन्हौसंताप्यप्रोक्षयेत्पुनः ॥ परिषिच्यस्वसूत्रोक्तक्रमेणशिवपूर्वकैः ॥ २१ ॥ जुहुयादष्टभिर्बीजैरग्नि
संस्कारसिद्धये ॥ भ्रुंस्तुंब्रुंश्रुंक्रमेणैवपुंड्रुंद्रुमित्यतःपरम् ॥ २२ ॥ बीजानिसप्तसप्तानांजिव्हानामनुपूर्वशः ॥ त्रिशि
खामध्यमाजिव्हाबहुरूपसमाव्हया ॥ २३ ॥ तस्याःशिखैकादक्षिणतोज्वलंतीवामतःपरा ॥ हिरण्याप्रागुदग्जि
व्हाकनकापूर्वतःस्थिता ॥ २४ ॥ रक्ताग्नेयीनैर्ऋतीचकृष्णान्यासुप्रभामता ॥ अतिरक्तामरुज्जिव्हास्वनामानुगुणप्र
भा ॥ २५ ॥ स्वबीजानंतरंवाच्याःस्वाहांताश्चयथाक्रमम् ॥ जिव्हामंत्रैस्तुतैर्हुत्वाजिव्हास्वेकैकशःक्रमात् ॥ २६ ॥
रुंवन्हयेचस्वाहेतिमध्येहुत्वाहुतित्रयं ॥ सर्पिषावासमिद्भिर्वापरिषेचनमाचरेत् ॥ २७॥ एवंकृतेशिवाग्निःस्यात्स्मरे
त्तत्रशिवासनं ॥ तत्रावाह्ययजेद्देवमर्धनारीश्वरंशिवम् ॥ २८ ॥ ॥ ॥ ॥

त्थितेउत्पन्ने ॥२०॥ शिवपूर्वकैःशिवमंत्रपूर्वकैः ॥२१॥ तानिबीजान्याह ॥ भ्रुमिति ॥२२॥२३॥ तस्याःमध्यमजिव्हायाः॥शिखाज्वाला॥प्रागुदक्ऐशानी
॥ २४ ॥ स्वनामेति॥वायुवच्चंचलेत्यर्थः ॥२५॥ स्वबीजानंतरंउक्तभ्रुंइत्यादिस्वस्वबीजानंतरमित्यर्थःतैःओंभ्रुंत्रिशिखायैस्वाहेत्येवंरूपैः ॥ २६ ॥ २७ ॥२८॥



Indira Gandhi National Centre for the Arts

दीपांतमिति ॥ अस्ययजेदितिपूर्वेणसंबंधः ॥ ताःसमिधः ॥ यज्ञियाःयज्ञियवृक्षोद्भवाः ॥ २९ ॥ नस्त्वयमिति ॥ आर्द्राएवच्छिन्नाइत्यर्थः ॥ ३० ॥ ३१ ॥
अक्षप्रमाणतःषोडशमाषाअक्षस्तत्प्रमाणतःग्रासप्रमाणतइतियावत् ॥ ३२ ॥ ३३ ॥ पाण्यापाणिना ॥ ३४ ॥ दिव्येनदैवतीर्थेन ॥ ३५ ॥ ३६ ॥ ३७ ॥

दीपांतंपरिषिच्याथसमिद्धोमंसमाचरेत् ॥ ताःपालाश्यःपरावापियज्ञियाद्वादशांगुलाः ॥ २९ ॥ अवक्रानस्वयंशुष्काःसत्वचोनिर्व्रणाःसमाः ॥ दशांगुलावाविहिताःकनिष्ठांगुलिसंमिताः ॥ ३० ॥ प्रादेशमात्रावाऽलाभेहोतव्याःसकलाअपि ॥ दूर्वापत्रसमाकारांचतुरंगुलमायतां ॥ ३१ ॥ दद्यादाज्याहुतिंपश्चादन्नमक्षप्रमाणतः ॥ लाजांस्तथासर्षपांश्चयवांश्चैवतिलांस्तथा ॥ ३२ ॥ सर्पिषाक्तानिभक्ष्याणिलेह्यचोष्याणिसंभवे ॥ दशैवाहुतयस्तत्रपंचवातिस्रएववा ॥ ३३ ॥ होतव्याःशक्तितोदद्यादेकामेवाथवाहुतिं ॥ स्रुवेणाज्यंसमित्पाण्यास्रुचाशेषान्करेणवा ॥ ३४ ॥ तत्रदिव्येनहोतव्यंतीर्थेनार्षेणवापिच॥द्रव्येणैकेनवाऽलाभेजुहुयाच्छ्रद्धयापुनः ॥३५॥ प्रायश्चित्तायजुहुयान्मंत्रयित्वाहुतित्रयं॥ततोहोमावशिष्टेनघृतेनापूर्यवैस्रुचं ॥ ३६ ॥ निधायपुष्पंतस्याग्रेस्रुवेणाधोमुखेनतां ॥ सदर्भेणसमाच्छाद्यमूलेनांजलिनोत्थितः ॥ ३७ ॥ वौषडंतेनजुहुयाद्धारांतुयवसंमितां ॥ इत्थंपूर्णाहुतिंकृत्वापरिषिंचेच्चपूर्ववत् ॥ ३८ ॥ ततउद्वास्यदेवेशंगोपयेत्तुहुताशनं ॥ तमप्युद्वास्यवानाभौयजेत्संधायनित्यशः ॥ ३९ ॥ अथवावन्हिमानीयशिवशास्त्रोक्तवर्त्मना ॥ वागीशीगर्भसंभूतंसंस्कृत्यविधिवद्यजेत् ॥ ४० ॥ अन्वाधानंपुरःकृत्वापरिधीन्परिधायच ॥ पात्राणिद्वंद्वरूपेणनिक्षिप्येष्ट्वाशिवंतथा ॥ ४१ ॥ संशोध्यप्रोक्षणीपात्रंप्रोक्ष्यान्यानितदंभसा ॥ प्रणीतापात्रमैशान्यांविन्यस्याऽऽपूरितंजलैः ॥ ४२ ॥ आज्यसंस्कारपर्यंतंकृत्वासंशोध्यस्रुक्स्रुवौ ॥ गर्भाधानंपुंसवनंसीमंतोन्नयनंततः ॥४३॥ कृत्वापृथक्पृथग्धुत्वाजातमग्निंविचिंतयेत् ॥ त्रिपादंसप्तहस्तंचचतुःशृंगंद्विशीर्षकं ॥ ४४ ॥ मधुपिंगंत्रिनयनंसकपर्देंदुशेखरं ॥ रक्तंरक्तांबरालेपमाल्यभूषणभूषितं ॥ ४५ ॥ ॥ ॥ ॥

॥ ३८ ॥ ३९ ॥ ४० ॥ ४१ ॥ ४२ ॥ गर्भाधानमिति ॥ अग्नेरितिशेषः ॥ एवमग्रेपि ॥ ४३ ॥ अग्निध्यानमाह ॥ त्रिपादमिति ॥ मधुपिंगंमधुवत्पिंगलं त्रिनयनंत्र्यस्यतं ॥ ४४ ॥ ४५ ॥ ॥ ॥ ॥ ॥

Indira Gandhi National Centre for the Arts

॥ ४६ ॥ जातमिति ॥ अग्निमितिशेषः ॥ ४७ ॥ ४८ ॥ पित्रोर्वागीशीशंकरयोः ॥ ४९ ॥ ५० ॥ तदस्त्राणांब्रह्माद्यस्त्राणां ॥ ५१ ॥ ५२ ॥ पूर्णांतंपूर्णाहु



सर्वलक्षणसंपन्नंसोपवीतंत्रिमेखलं ॥ शक्तिमन्नंस्रुक्स्रुवौचदधानंदक्षिणैःकरैः ॥ ४६ ॥ तोमरंतालवृंतंचघृतपात्रंतथे
तरैः ॥ जातंध्यात्वैवमाकारंजातकर्मसमाचरेत् ॥ ४७ ॥ नालापनयनंकृत्वाततःसंशोध्यसूतकं ॥ शिवाग्नेरुचिना
मास्यकृत्वाहुतिपुरःसरं ॥ ४८ ॥ पित्रोर्विसर्जनंकृत्वाचौलोपनयनादिकं ॥ आप्तोर्यामावसानांतंकृत्वासंस्कारमस्यतु॥
॥ ४९ ॥ इध्माघारादिहोमंचकृत्वास्विष्टकृतंततः ॥ रुमित्यनेनबीजेनपरिषिंचेत्ततःपरं ॥ ५० ॥ ब्रह्मविष्णुशिवे
शानांलोकेशानांतथैवच ॥ तदस्त्राणांचपरितःकृत्वापूजांयथाक्रमम् ॥ ५१ ॥ धूपदीपादिसिध्यर्थंवन्हिमुत्धृत्यकृत्य
वित् ॥ साधयित्वाज्यपूर्वाणिद्रव्याणिपुनरेवच ॥ ५२ ॥ कल्पयित्वासनंवन्हौतत्रावाह्ययथापुरा ॥ संपूज्यदेवंदेवीं
चततःपूर्णांतमाचरेत् ॥ ५३ ॥ अथवास्वाश्रमोक्तंतुवन्हिकर्मशिवार्पणं ॥ बुत्ध्वाशिवाश्रमीकुर्यान्नचतत्रापरोविधिः॥
॥ ५४ ॥ शिवाग्नेर्भस्मसंग्राह्यमग्निहोत्रोद्भवंतुवा ॥ वैवाहाग्निभवंचापिपक्कंशुचिसुगंधिच ॥ ५५ ॥ कपिलायाःश
कृच्छस्तंगृहीतंगगनेपतत् ॥ नक्लिन्नंनातिकठिनंनदुर्गंधंनशोषितं ॥ ५६ ॥ उपर्यधःपरित्यज्यगृण्हीयात्पतितंय
दि ॥ पिंडीकृत्यशिवाग्न्यादौतत्क्षिपेन्मूलमंत्रतः ॥ ५७॥ अपक्कमतिपक्कंचसंत्यज्यभासितंसितं ॥ आदायवाससा
लोड्यभस्माधारेविनिक्षिपेत् ॥ ५८ ॥ सुकृतेसुदृढेशुद्धेक्षालितेप्रोक्षितेशुभे ॥ विन्यस्तमंत्रेमंत्रेणपात्रेभस्मविनिक्षि
पेत् ॥ ५९ ॥ तैजसंदारवंवापिमृन्मयंशैलमेवच ॥ अन्यद्वाशोभनंशुद्धंभस्माधारंप्रकल्पयेत् ॥ ६० ॥ समेदेशेशु
भेशुद्धेधनवद्भस्मनिक्षिपेत् ॥ प्रस्थितोभस्मगृण्हीयात्स्वयंचानुचरोपिवा ॥ ६१ ॥ नचायुक्तकरेदद्यान्नैवाशुचितले
क्षिपेत् ॥ नसंस्पृशेच्चनीचांगैर्नोपेक्षेतनलंघयेत् ॥ ६२ ॥ तस्माद्भसितमादायविनियुंजीतमंत्रतः ॥ कालेषूक्तेषुना
न्यत्रनायोग्येभ्यःप्रदापयेत् ॥ ६३ ॥ ॥ ॥ ॥ ॥

त्यंतमित्यर्थः ॥ ५३ ॥ ५४ ॥ ५५ ॥ ५६ ॥ ५७ ॥ ५८ ॥ विन्यस्तमंत्रेविन्यस्तःमंत्रोयस्मिन्मंत्रेणाभिमंत्रितइत्यर्थः ॥ ५९ ॥ ६० ॥ अयुक्तकरेअयु
क्तस्यअयोग्यस्यकरे ॥ ६१ ॥ ६२ ॥ कालेष्विति ॥ अस्यपूर्वेणसंबंधः ॥ ६३ ॥ ॥ ॥

॥ ६४ ॥ ६५ ॥ ६६ ॥ ६७ ॥ ६८ ॥ ६९ ॥ ७० ॥ ७१ ॥ पूर्वांशेरात्रिप्रथमयामे ॥ ७२ ॥ ७३ ॥ ७४ ॥ ७५ ॥ ७६ ॥ ७७ ॥ इतिश्रीशिवमहापुरा

भस्मसंग्रहणंकुर्याद्देवेनुद्वासितेसति ॥ उद्वासनेकृतेयस्माच्चंडभस्मप्रजायते ॥ ६४ ॥ अग्निकार्येकृतेपश्चाच्छिवशास्त्रोक्तमार्गतः ॥ स्वसूत्रोक्तप्रकाराद्वाबलिकर्मसमाचरेत् ॥ ६५ ॥ अथविद्यासनंन्यस्यसुप्रलिप्तेतुमंडले ॥ विद्याकोशंप्रतिष्ठाप्ययजेत्पुष्पादिभिःक्रमात् ॥ ६६ ॥ विद्यायाःपुरतःकृत्वागुरोरपिचमंडलं ॥ तत्रासनवरंकृत्वापुष्पाद्यैर्गुरुमर्चयेत् ॥ ६७ ॥ ततोनुपूजयेत्पूज्यान्भोजयेच्चबुभुक्षितान् ॥ ततःस्वयंचभुंजीतशुद्धमन्नंयथासुखं ॥ ६८ ॥ निवेदितंचवादेवेतच्छेषंचात्मशुद्धये ॥ श्रद्दधानोनलोभेननचंडायसमर्पितम् ॥ ६९ ॥ गंधमाल्यादियच्चान्यत्तत्राप्येषसमोविधिः ॥ तत्रतत्रशिवोस्मीतिबुद्धिंकुर्याद्विचक्षणः ॥ ७० ॥ भुक्त्वाचम्यशिवंध्यात्वाहृदयेमूलमुच्चरेत् ॥ कालशेषंनयेद्योग्यैःशिवशास्त्रकथादिभिः ॥ ७१ ॥ रात्रौव्यतीतेपूर्वांशेकृत्वापूजांमनोहराम् ॥ शिवयोःशयनंत्वेकंकल्पयेदतिशोभनं ॥ ७२ ॥ भक्ष्यभोज्यांबरालेपपुष्पमालादिकंतथा ॥ मनसाकर्मणावापिकृत्वासर्वमनोहरं ॥ ७३ ॥ ततोदेवस्यदेव्याश्चपादमूलेशुचिःस्वपेत् ॥ गृहस्थोभार्ययासार्द्धंतदन्योपितुकेवलः ॥ ७४ ॥ प्रत्यूषसमयेबुध्वामंत्रमाद्यमुदीरयेत् ॥ प्रणम्यमनसादेवंसांबंसगणमव्ययं ॥ ७५ ॥ देशकालोचितंकृत्वाशौचाद्यमपिशक्तितः ॥ शंखादिनिनदैर्दिव्यैर्देवंदेवींचबोधयेत् ॥ ७६ ॥ ततस्तत्समयोन्निद्रैःपुष्पैरतिसुगंधिभिः ॥ निर्वर्त्यशिवयोःपूजांप्रारभेतपुरोदितं ॥ ७७ ॥ इतिश्रीशिवमहापुराणेवायवीयसंहितायामुत्तरभागेएकविंशोऽध्यायः ॥ २१ ॥ ॥ छ ॥ उपमन्युरुवाच ॥ अतःपरंप्रवक्ष्यामिशिवाश्रमनिषेविणां ॥ शिवशास्त्रोक्तमार्गेणनैमित्तिकविधिक्रमं ॥ १ ॥ सर्वेष्वपिचमासेषुपक्षयोरुभयोरपि ॥ अष्टम्यांचचतुर्दश्यांतथापर्वणिचक्रमात् ॥ २ ॥ अयनेविषुवेचैवग्रहणेषुविशेषतः ॥ कर्तव्यामहतीपूजाह्यधिकावापिशक्तितः ॥ ३ ॥ ॥ ॥ ॥ ॥

णेवायवीयसंहिताटीकायांसारबोधिन्यामुत्तरभागेहोमादिविधिकथनंनामैकविंशोऽध्यायः ॥ २१ ॥ ओंनमःशिवाय ॥ शिवपूजाव्रतस्यास्यनैमित्तिकविधिक्रमः ॥ कार्योमासविशेषादौद्वाविंशेत्रनिरूप्यते ॥ १ ॥ १ ॥ २ ॥ विषुवेतुलामेषयोः ॥ ३ ॥ ॥ ॥

Indira Gandhi National Centre for the Arts

ब्रह्मकूर्चमिति ॥ बौधायनाद्युक्तविधिनासंस्कृतंपंचगव्यंब्रह्मकूर्चस्तंप्रसाध्येत्यर्थः ॥ ४ ॥ ५ ॥ घृतकंबलविधिःशैवशास्त्रेप्रसिद्धः ॥६॥ उत्तरांतेउत्तराफाल्गु
न्यंते ॥ ७ ॥ पुष्पमहालयंपुष्पमयमंदिरं ॥ ८ ॥ पवित्रारोपणविधिर्निर्णयसिंधावुक्तः॥प्राकृतान्यानिप्राकृतानितत्प्रकरणपठितानिअन्यानिचेत्यर्थः ॥ ९ ॥

मासिमासियथान्यायंब्रह्मकूर्चंप्रसाध्यतु ॥ स्नापयित्वाशिवंतेनपिबेच्छेषमुपोषितः ॥ ४ ॥ ब्रह्महत्यादिदोषाणामती
वमहतामपि ॥ निष्कृतिर्ब्रह्मकूर्चस्यपानान्नान्याविशिष्यते ॥ ५ ॥ पौषेतुपुष्यनक्षत्रेकुर्यान्नीराजनंविभोः ॥ माघेम
घाख्येनक्षत्रेप्रदद्याद्घृतकंबलं ॥ ६ ॥ फाल्गुनेचोत्तरांतेवैप्रारभेतमहोत्सवं ॥चैत्रेचित्रापौर्णमास्यांदोलांकुर्याद्यथा
विधि ॥ ७ ॥ वैशाखेपिचवैशाख्यांकुर्यात्पुष्पमहालयं ॥ ज्येष्ठेमूलाख्यनक्षत्रेशीतकुंभंप्रदापयेत् ॥ ८ ॥ आषाढे
चोत्तराषाढेपवित्रारोपणंतथा ॥ श्रावणेप्राकृतान्यानिमंडलानिप्रकल्पयेत् ॥ ९ ॥ श्रविष्ठाख्येतुनक्षत्रेप्रोष्ठपद्यांत
तःपरम् ॥ प्रोक्षयेच्चजलक्रीडांपूर्वाषाढाश्रयेदिने ॥ १० ॥ आश्वयुज्यांततोदद्यात्पायसंचनवौदनम् ॥ अग्निकार्यं
चतेनैवकुर्याच्छतभिषग्दिने ॥११॥ कार्तिक्यांकृत्तिकायोगेदद्याद्दीपसहस्रकम् ॥ मार्गशीर्षेतथार्द्रायांघृतेनस्नापये
च्छिवम् ॥ १२ ॥ अशक्तस्तेषुकालेषुकुर्यादुत्सवमेववा ॥ आस्थानंवामहापूजामधिकंवासमर्चनं ॥ १३ ॥ प्रवृत्तेपि
चकल्याणेप्रशस्तेष्वपिकर्मसु ॥ दौर्मनस्येदुराचारेदुःस्वप्नेदुष्टदर्शने ॥ १४ ॥ उत्पातेवाऽशुभेन्यस्मिन्रोगेवाप्रबले
थवा ॥ स्नानपूजाजपध्यानहोमदानादिकाःक्रियाः ॥ १५ ॥ निमित्तानुगुणाःकार्याःपुरश्चरणपूर्विकाः ॥ शिवानले
चविहृतेपुनःसंधानमाचरेत् ॥ १६ ॥ यएवंशिवधर्मिष्ठोवर्ततेनित्यमुद्यतः ॥ तस्यैकजन्मनामुक्तिंप्रयच्छतिमहेश्वरः ॥
॥ १७ ॥ एतद्यथोत्तरंकुर्यान्नित्यनैमित्तिकेषुयः ॥ दिव्यंश्रीकंठनाथस्यस्थानमाद्यंसगच्छति ॥ १८ ॥ तत्रभुक्त्वाम
हाभोगान्कल्पकोटिशतंनरः॥कालांतरेच्युतस्तस्मादौमंकौमारमेवच॥१९॥संप्राप्यवैष्णवंब्राह्मंरुद्रलोकंविशेषतः
॥ तत्रोषित्वाचिरंकालंभुक्त्वाभोगान्यथेप्सितान् ॥२०॥ पुनश्चोर्ध्वंगतस्तस्मादतीत्यस्थानपंचकम्॥श्रीकंठाज्ज्ञानमा
साद्यपरंशिवपुरंव्रजेत् ॥ २१ ॥ ॥ ॥ ॥ ॥

॥ १० ॥ तेनैवपायसेनैव ॥ ११ ॥ १२ ॥ १३ ॥ १४ ॥ १५ ॥ १६ ॥ १७ ॥ १८ ॥ तस्मात्श्रीकंठमाथस्थानात ॥ १९ ॥ तत्ररुद्रलोके ॥ २० ॥
स्थानपंचकंऔमादिपूर्वोक्तस्थानपंचकं ॥ २१ ॥ ॥ ॥ ॥ ॥

अर्धचर्यारतःयथोक्तादर्धानुष्ठानयुक्तः ॥ २२ ॥ बौद्धंबुद्धिकृतं ॥ २३ ॥ २४ ॥ २५ ॥ २६ ॥ २७ ॥ अंडस्यब्रह्मांडस्य ॥ २८ ॥ नभूयइति ॥ नसपुन
रावर्ततइतिश्रुतेः ॥ २९ ॥ निवर्तकोमुमुक्षुः ॥ ३० ॥ चक्रवृत्तःसंसारचक्रेपतितः ॥ ३१ ॥ ३२ ॥ ३३ ॥ संसारकारणमविद्या ॥ ॥ ३४ ॥ ३५ ॥

अर्धचर्यारतश्चापिद्विरावृत्त्यैवमेवतु ॥ पश्चाज्ज्ञानंसमासाद्यशिवसायुज्यमाप्नुयात् ॥ २२ ॥ अर्धार्धचरितोयस्तुदे
हीदेहक्षयात्परम् ॥ अंडांतंबौद्धमव्यक्तमतीत्यभुवनद्वयम् ॥ २३ ॥ संप्राप्यपौरुषंरौद्रंस्थानमद्रींद्रजापतेः ॥ अने
कयुगसाहस्रंभुक्त्वाभोगाननेकधा ॥ २४ ॥ पुण्यक्षयेक्षितिंप्राप्यकुलेमहतिजायते ॥ तत्रापिपूर्वसंस्कारवशेनसम
हाद्युतिः ॥ २६ ॥ पशुधर्मान्परित्यज्यशिवधर्मरतोभवेत् ॥ तद्धर्मगौरवादेवध्यात्वाशिवपुरंव्रजेत् ॥ २६ ॥ भोगांश्च
विविधान्भुक्त्वाविद्येश्वरपदंव्रजेत् ॥ तत्रविद्येश्वरैःसार्धंभुक्त्वाभोगान्बहून्क्रमात् ॥ २७ ॥ अंडस्यांतर्बहिर्वाथसकृ
दावर्ततेपुनः ॥ ततोलब्ध्वाशिवज्ञानंपरांभक्तिमवाप्यच ॥ २८ ॥ शिवसाधर्म्यमासाद्यनभूयोविनिवर्तते ॥ यश्चा
तीवशिवासक्तोविषयासक्तचित्तवत् ॥ २९ ॥ शिवधर्मानसौकुर्वन्नकुर्वन्वापिमुच्यते ॥ एकावृत्तोद्विरावृत्तस्त्रिरावृत्तो
निवर्तकः ॥ ३० ॥ नपुनश्चक्रवृत्तःस्याच्छिवधर्माधिकारवान् ॥ तस्माच्छिवाश्रितोभूत्वायेनकेनापिहेतुना ॥ ३१ ॥
शिवधर्मेमतिंकुर्याच्छ्रेयसेचेत्कृतोद्यमः ॥ नात्रनिर्बंधयिष्यामोवयंकंचनकेनचित् ॥ ३२ ॥ निर्बंधोप्यत्रपापेभ्यःप्रकृ
त्यैवनरोचते ॥ रोचतेवापरेभ्यस्तुपुण्यसंस्कारगौरवात् ॥ ३३ ॥ संसारकारणंह्येषांनप्ररोढुमलंभवेत् ॥ प्रकृत्यनुगु
णंतस्माद्विमृश्यैतदशेषतः ॥ ३४ ॥ शिवधर्मेधिकुर्वीतयदीच्छेच्छिवमात्मनः ॥ ३५ ॥ इतिश्रीशिवमहापुराणेवाय
वीयसंहितायामुत्तरभागेद्वाविंशोऽध्यायः ॥ २२ ॥ छ ॥ श्रीकृष्णउवाच ॥ भगवंस्त्वन्मुखादेवश्रुतंश्रुतिसमंमया ॥
स्वाश्रितानांशिवप्रोक्तंनित्यंनैमित्तिकंतथा ॥ १ ॥ इदानींश्रोतुमिच्छामिशिवधर्माधिकारिणाम् ॥ काम्यमप्यस्तिचे
त्कर्मवक्तुमर्हसिसांप्रतं ॥ २ ॥ उपमन्युरुवाच ॥ अस्त्यैहिकफलंकिंचिदामुष्मिकफलंतथा ॥ ऐहिकामुष्मिकंचापि
तच्चपंचविधंपुनः ॥ ३ ॥ किंचित्क्रियामयंकर्मकिंचित्कर्मतपोमयम् ॥ जपध्यानमयंकिंचित्किंचित्सर्वमयंतथा ॥ ४ ॥

इतिश्रीशैवमहापुराणेवायवीयसंहिताटीकायांसारबोधिन्यामुत्तरभागेद्वाविंशोऽध्यायः ॥ २२ ॥ ओंनमःशिवाय ॥ शिवपूजाव्रतस्यास्यप्रोक्तःकाम्यविधि
क्रमः ॥ यादृशोमुनिनासोत्रत्रयोविंशेनिरूप्यते ॥ १ ॥ १ ॥ २ ॥ ३ ॥ ४ ॥ ॥ ॥ ॥

Indira Gandhi National Centre for the Arts

॥ ५ ॥ नात्रशक्तिःशारीरबलरूपाऽपितुशिवशासनरूपैवेत्याह ॥ शक्तिरिति ॥ ६ ॥ ७ ॥ नात्यंतमिति ॥ सगुणनिर्गुणरूपाभ्यांभेदेपिस्वरूपचैतन्ये

क्रियामयंतथाभिन्नंहोमदानार्चनक्रमात् ॥ सर्वंशक्तिमतामेवनान्येषांसफलंभवेत् ॥ ५ ॥ शक्तिश्चाज्ञामहेशस्यशिव
स्यपरमात्मनः ॥ तस्मात्काम्यानिकर्माणिकुर्यादाज्ञाधरोद्विजः ॥ ६ ॥ अथवक्ष्यामिकाम्यानामिहामुत्रफलप्रदं ॥ शै
वैर्माहेश्वरैश्चैवकार्यमंतर्बहिःक्रमात् ॥ ७ ॥ शिवोमहेश्वरश्चेतिनात्यंतमिहभिद्यते ॥ यथातथानभिद्यंतेशैवामाहेश्व
राअपि ॥ ८ ॥ शिवाश्रितेषुतेशैवाज्ञानयज्ञरतानराः ॥ माहेश्वराःसमाख्याताःकर्मयज्ञरताभुवि ॥ ९ ॥ तस्मादभ्यं
तरेकुर्युःशैवामाहेश्वराबहिः ॥ नातिप्रयोगोभिद्येतवक्ष्यमाणस्यकर्मणः ॥ १० ॥ परीक्ष्यभूमिंविधिवद्गंधवर्णरसादि
भिः ॥ मनोभिलषितेतत्रवितानविततांबरे ॥ ११ ॥ सुप्रलिप्तेमहीपृष्ठेदर्पणोदरसन्निभे ॥ प्राचीमुत्पादयेत्पूर्वंशा
स्त्रदृष्टेनवर्त्मना ॥ १२ ॥ एकहस्तंद्विहस्तंवामंडलंपरिकल्पयेत् ॥ आलिखेद्विमलंपद्ममष्टपत्रंसकर्णिकं ॥ १३ ॥
रत्नहेमादिभिश्चूर्णैर्यथासंभवसंभृतैः ॥ पंचावरणसंयुक्तंबहुशोभासमन्वितं ॥ १४ ॥ दलेषुसिद्धयःकल्प्याःकेसरेषु
सशक्तिकाः ॥ रुद्रावामादयस्त्वष्टौपूर्वादिदलतःक्रमात् ॥ १५ ॥ कर्णिकायांचवैराग्यंबीजेषुनवशक्तयः ॥ कंदेशिवा
त्मकोधर्मोनालेज्ञानंशिवात्मकं ॥ १६ ॥ कर्णिकोपरिवान्हेयंमंडलंसौरमैंदवं ॥ शिवविद्यात्मतत्त्वाख्यंतत्त्वत्रयमतः
परं ॥ १७ ॥ सर्वासनोपरिसुखंविचित्रकुसुमान्वितं ॥ पंचावरणसंयुक्तंपूजयेदंबयासह ॥ १८ ॥ शुद्धस्फटिकसं
काशंजटामुकुटभूषितं ॥ शार्दूलचर्मवसनंकिंचित्स्मितमुखांबुजम् ॥ १९ ॥ रक्तपद्मदलप्रख्यपादपाणितलाधरं ॥
सर्वलक्षणसंपन्नंसर्वाभरणभूषितं ॥ २० ॥ दिव्यायुधवरैर्युक्तंदिव्यगंधानुलेपनं ॥ पंचवक्त्रंदशभुजंचंद्रखंडशिखाम
णिं ॥ २१ ॥ अस्यपूर्वमुखंसौम्यंबालार्कसदृशप्रभं ॥ त्रिलोचनारविंदाढ्यंकृतबालेंदुशेखरं ॥ २२ ॥ दक्षिणंनीलजी
मूतसमानरुचिरप्रभं ॥ भृकुटीकुटिलंघोरंरक्तवृत्तेक्षणत्रयं ॥ २३ ॥ ॥ ॥ ॥

भेदाभावादितिभावः ॥ ८ ॥ ९ ॥ १० ॥ ११ ॥ १२ ॥ १३ ॥ १४ ॥ वामादयोष्टौवक्ष्यंते ॥ १५ ॥ १६ ॥ १७ ॥ १८ ॥ १९ ॥ २० ॥
॥ २१ ॥ २२ ॥ २३ ॥ ॥ ॥ ॥ ॥ ॥



Indira Gandhi National Centre for the Arts

दंष्ट्राकरालंदुर्धर्षस्फुरिताधरपल्लवं ॥ उत्तरंविद्रुमप्रख्यंनीलालकविभूषितं ॥ २४ ॥ सविलासंत्रिनयनंचंद्राभरणशेखरं ॥ पश्चिमंपूर्णचंद्राभंलोचनत्रितयोज्वलं ॥ २५ ॥ चंद्ररेखाधरंसौम्यंमंदस्मितमनोहरं ॥ पंचमंस्फटिकप्रख्यमिंदुरेखासमुज्वलं ॥ २६ ॥ अतीवसौम्यमुत्फुल्ललोचनत्रितयोज्वलं ॥ दक्षिणेशूलपरशुवज्रखड्गानलोज्वलं॥२७॥ सव्येचनागनाराचघंटापाशांकुशोज्वलं ॥ निवृत्त्याजानुसंबद्धमानाभेश्चप्रतिष्ठया ॥ २८ ॥ आकंठंविद्ययातद्वदाललाटंतुशांतया ॥ तदूर्ध्वंशांत्यतीताख्यकलयापरयातथा ॥ २९ ॥ पंचाध्वव्यापिनंतस्मात्कलापंचकविग्रहं ॥ ईशानमुकुटंदेवंपुरुषास्यंपुरातनं ॥ ३० ॥ अघोरहृदयंतद्वद्वामगुह्यंमहेश्वरं ॥ सद्यपादंचतन्मूर्तिमष्टत्रिंशत्कलामयं ॥ ॥ ३१ ॥ मातृकामयमीशानंपंचब्रह्ममयंतथा ॥ ओंकाराख्यमयंचैवहंसशक्त्यासमन्वितं ॥ ३२ ॥ पंचाक्षरमयंदेवंषडक्षरमयंतुवा ॥ अंगषट्कमयंचैवजातिषट्कसमन्वितम् ॥ ३३ ॥ तथेच्छात्मिकयाशक्त्यासमारूढांकमंडलं ॥ ज्ञानाख्ययादक्षिणतोवामतश्चक्रियाख्यया ॥ ३४ ॥ तत्त्वत्रयमयंसाक्षाद्विद्यामूर्तिंसदाशिवं ॥ मूर्तिंमूलेनसंकल्प्यसकलीकृत्यचक्रमात् ॥ ३५ ॥ संपूज्यचयथान्यायमर्घ्यांतंमूलविद्यया ॥ मूर्तिमंतंशिवंसाक्षाच्छक्त्यापरमयासह ॥ ३६ ॥ तत्रावाह्यमहादेवंसदसद्व्यक्तिवर्जितं ॥ पंचोपकरणंकृत्वापूजयेत्परमेश्वरं ॥ ३७ ॥ ब्रह्मभिश्चषडंगैश्चततोमातृकयासह ॥ प्रणवेनशिवेनैवशक्तियुक्तेनचक्रमात् ॥ ३८ ॥ शांतेनचतथान्यैश्चवेदमंत्रैश्चकृत्स्नशः ॥ पूजयेत्परमंदेवंकेवलेनशिवेनवा ॥ ३९ ॥ पाद्यादिमुखवासांतंकृत्वाथस्नपनंविना ॥ पंचावरणपूजांतुआरभेतयथाक्रमं ॥ ४० ॥ तत्रादौशिवयोःपार्श्वेदक्षिणेवामतःक्रमात् ॥ गंधाद्यैरर्चयेत्पूर्वंदेवौहेरंबषण्मुखौ ॥ ४१ ॥ ततोब्रह्माणिपरितईशानादियथाक्रमं ॥ सशक्तिकानिसद्यांतंप्रथमावरणंयजेत् ॥ ४२ ॥ ॥ ॥ ॥



Indira Gandhi National Centre for the Arts

षडंगान्यपितत्रैवत्हृदयादीन्यनुक्रमात् ॥ शिवस्यचशिवायाश्ववान्हेयादिसमर्चयेत् ॥ ४३ ॥ तत्रवामादिकान्रुद्रा
नष्टौवामादिशक्तिभिः ॥ अर्चयेद्वानवापश्चात्पूर्वादिपरितःक्रमात् ॥ ४४ ॥ प्रथमावरणंप्रोक्तंद्वितीयावरणंशृणु ॥
अनंतंपूर्वदिक्पत्रेतच्छक्तिंतस्यवामतः ॥ ४५ ॥ सूक्ष्मंदक्षिणदिक्पत्रेशक्त्यासहसमर्चयेत् ॥ ततःपश्चिमदिक्पत्रेस
हशक्त्याशिवोत्तमम् ॥ ४६ ॥ तथैवोत्तरदिक्पत्रेएकनेत्रंसमर्चयेत् ॥ एकरुद्रंचतच्छक्तिंपश्चादीशानदिग्दले ॥४७॥
त्रिमूर्तितस्यशक्तिंचपूजयेदग्निदिग्दले ॥ श्रीकंठंनैर्ऋतेपत्रेतच्छक्तिंतस्यवामतः ॥ ४८ ॥ तथैवमारुतेपत्रेशिखंडीशं
समर्चयेत् ॥ द्वितीयावरणेचेज्याःसर्वतश्चक्रवर्तिनः ॥४९॥ तृतीयावरणेपूज्याःशक्तिभिश्चाष्टमूर्तयः ॥ अष्टासुक्रम
शोदिक्षुपूर्वादिपरितःक्रमात् ॥ ५० ॥ भवःशर्वःस्तथेशानोरुद्रःपशुपतिस्ततः ॥ उग्रोभीमोमहादेवइत्यष्टौमूर्तयःक्र
मात् ॥ ५१ ॥ अनंतरंततश्चैषांमहादेवादयःक्रमात् ॥ शक्तिभिःसहसंपूज्यास्तत्रैकादशमूर्तयः॥५२॥महादेवःशिवो
रुद्रःशंकरोनीललोहितः ॥ईशानोविजयोभीमोदेवदेवोभवोद्भवः॥५३॥कपालीशश्चकथ्यंतेतथैकादशशक्तयः ॥ तत्रा
ष्टौप्रथमंपूज्यावान्हेयादियथाक्रमं ॥ ५४ ॥ देवदेवःपूर्वपत्रेईशान्यामग्निगोचरे ॥ भवोद्भवस्तयोर्मध्येकपालीशस्त
तःपरः ॥ ५५ ॥ तस्मिन्नावरणेभूयोवृषेंद्रंपुरतोयजेत् ॥ नंदिनंदक्षिणेतस्यमहाकालंतथोत्तरे ॥ ५६ ॥ शास्तारंव
न्हिदिक्पत्रेमातृर्दक्षिणदिग्दले ॥ गजास्यंनैर्ऋतेपत्रेषण्मुखंवारुणेपुनः ॥ ५७ ॥ ज्येष्ठांवायुदलेगौरीमुत्तरेचंडमै
श्वरे ॥ शास्तृनंदीशयोर्मध्येमुनींद्रंवृषभंयजेत् ॥ ५८ ॥ महाकालस्योत्तरतःपिंगलंतुसमर्चयेत् ॥ शास्तृमातृसमूह
स्यमध्येभृंगीश्वरंततः ॥ ५९ ॥ मातृविघ्नेशमध्येतुवीरभद्रंसमर्चयेत् ॥ स्कंदविघ्नेशयोर्मध्येयजेद्देवींसरस्वतीं ॥६०॥
ज्येष्ठाकुमारयोर्मध्येश्रियंशिवपदार्चिकां ॥ ज्येष्ठागणांबयोर्मध्येमहामोटींसमर्चयेत् ॥ ६१ ॥ गणांबाचंडयोर्मध्येदे ॥४५॥
वींदुर्गांप्रपूजयेत् ॥ अत्रैवावरणेभूयःशिवानुचरसंहतिं ॥ ६२ ॥ ॥ ॥



Indira Gandhi National Centre for the Arts

॥ ६३ ॥ ६४ ॥ ६५ ॥ ६६ ॥ ६७ ॥ चतस्रःपूर्वोक्ताः ॥ ६८ ॥ विवस्वतःसूर्यस्यशक्तिरूपाइत्यर्थः ॥ ६९ ॥ ७० ॥ ७१ ॥ ७२ ॥ ७३ ॥ रा

रुद्रप्रमथभूताख्यांविविधांचसशक्तिकां ॥ शिवायाश्चसखीवर्गंयजेत्ध्यात्वासमाहितः ॥ ६३ ॥ एवंतृतीयावरणेवि
ततेपूजितेसति ॥ चतुर्थावरणंध्यात्वाबहिस्तस्यसमर्चयेत् ॥ ६४ ॥ भानुःपूर्वदलेपूज्योदक्षिणेचतुराननः ॥ रुद्रोवरु
णदिक्पत्रेविष्णुरुत्तरदिग्दले ॥ ६५ ॥ चतुर्णामपिदेवानांपृथगावरणान्यथ ॥ तस्यांगानिषडेवादौदीप्ताद्याभिश्चश
क्तिभिः ॥ ६६ ॥ दीप्तासूक्ष्माजयाभद्राविभूतिर्विमलाक्रमात् ॥ अमोघाविद्युताचैवपूर्वादिपरितःस्थिताः ॥ ६७ ॥
द्वितीयावरणेपूज्याश्चतस्रोमूर्तयःक्रमात् ॥ पूर्वाद्युत्तरपर्यंताःशक्तयश्चततःपरं ॥ ६८ ॥ आदित्योभास्करोभानूरवि
श्चेत्यनुपूर्वशः ॥ अर्कोब्रह्मातथारुद्रोविष्णुश्चेतिविवस्वतः ॥ ६९ ॥ विस्तारापूर्वदिग्भागेसुतरादक्षिणेस्थिता ॥
बोधनीपश्चिमेभागेआप्यायिन्युत्तरेपुनः ॥ ७० ॥ उषांप्रभांतथाप्रज्ञांसंध्यामपिततःपरं ॥ ऐशानादिषुकोणेषुद्विती
यावरणेयजेत् ॥ ७१ ॥ सोममंगारकंचैवबुधंबुद्धिमतांवरं ॥ बृहस्पतिंबृहद्बुद्धिंभार्गवंतेजसांनिधिं ॥ ७२ ॥ शनैश्चरंत
थाराहुंकेतुंधूम्रंभयंकरं ॥ समंततोयजेदेतांस्तृतीयावरणेक्रमात् ॥ ७३ ॥ अथवाद्वादशादित्यान्द्वितीयावरणेयजे
त् ॥ तृतीयावरणेचैवराशीन्द्वादशपूजयेत् ॥ ७४ ॥ सप्तसप्तगणांश्चैवबहिस्तस्यसमंततः ॥ ऋषीन्देवांश्चगंधर्वान्
पन्नगानप्सरोगणान् ॥ ७५ ॥ ग्रामण्यश्चतथायक्षान्यातुधानांस्तथाहयान् ॥ सप्तच्छंदोमयांश्चैववालखिल्यांश्चपू
जयेत् ॥ ७६ ॥ एवंतृतीयावरणेसमभ्यर्च्यदिवाकरं ॥ ब्रह्माणमर्चयेत्पश्चात्त्रिभिरावरणैःसह ॥ ७७ ॥ हिरण्यगर्भं
पूर्वस्यांविराजंदक्षिणेततः ॥ कालंपश्चिमदिग्भागेपुरुषंचोत्तरेयजेत् ॥ ७८ ॥ हिरण्यगर्भःप्रथमोब्रह्माकमलसन्निभः ॥
कालोजात्यंजनप्रख्यःपुरुषःस्फटिकोपमः ॥ ७९ ॥ त्रिगुणोराजसश्चैवतामसःसात्विकस्तथा ॥ चत्वारएतेक्रमशः
प्रथमावरणेस्थिताः ॥ ८० ॥ द्वितीयावरणेपूज्याःपूर्वादिपरितःक्रमात् ॥ सनत्कुमारःसनकःसनंदश्चसनातनः ॥ ८१ ॥

शीन्मेषवृषभादीन् ॥ ७४ ॥ ७५ ॥ ग्रामण्योदेवयोनिविशेषाः ॥ ७६ ॥ ७७ ॥ ७८ ॥ ब्रह्माविराट् ॥ जात्यंजनप्रख्यःजात्यास्वभावेनांजनतुल्यकां
तिः ॥ ७९ ॥ ८० ॥ ८१ ॥ ॥ ॥ ॥ ॥ ॥

Indira Gandhi National Centre for the Arts

॥ ४६ ॥ तृतीयावरणेपश्चादर्चयेच्चप्रजापतीन् ॥ अष्टौपूर्वाश्चपूर्वादौत्रीन्प्राक्पश्चादनुक्रमात् ॥ ८२ ॥ दक्षोरुचिर्भृगुश्चैवम
रीचिश्चतथांगिराः ॥ पुलस्त्यःपुलहश्चैवक्रतुरत्रिश्चकश्यपः ॥ ८३ ॥ वसिष्ठश्चेतिविख्याताःप्रजानांपतयस्त्विमे ॥
तेषांभार्याश्चतैःसार्धंपूजनीयायथाक्रमं ॥ ८४ ॥ प्रसूतिश्चतथाकूतिःख्यातिःसंभूतिरेवच ॥ स्मृतिःप्रीतिःक्षमाचैव
सन्नतिश्चानसूयका ॥ ८५ ॥ देवमातारुंधतीचसर्वाःखलुपतिव्रताः ॥ शिवार्चनरतानित्यंश्रीमत्यःप्रियदर्शनाः ॥
॥ ८६ ॥ प्रथमावरणेवेदांश्चतुरोवाप्रपूजयेत् ॥ इतिहासपुराणानिद्वितीयावरणेपुनः ॥ ८७ ॥ तृतीयावरणेपश्चा
द्धर्मशास्त्रपुरःसराः ॥ वैदिक्योनिखिलाविद्याःपूज्याएवसमंततः ॥ ८८ ॥ पूर्वादिपुरतोवेदास्तदन्येतुयथारुचि ॥ अ
ष्टधावाचतुर्धावाकृत्वापूजांसमंततः ॥ ८९ ॥ एवंब्रह्माणमभ्यर्च्यत्रिभिरावरणैर्युतं ॥ दक्षिणेपश्चिमेपश्चाद्रुद्रंसावर
णंयजेत् ॥ ९० ॥ तस्यब्रह्मषडंगानिप्रथमावरणंस्मृतं ॥ द्वितीयावरणंचैवविद्येश्वरमयंतथा ॥ ९१ ॥ तृतीयावरणे
भेदोविद्यतेसतुकथ्यते ॥ चतस्रोमूर्तयस्तस्यपूज्याःपूर्वादितःक्रमात् ॥ ९२ ॥ त्रिगुणःसकलोदेवःपुरस्ताच्छिवसंज्ञ
कः ॥ राजसोदक्षिणेब्रह्मासृष्टिकृत्पूज्यतेभवः ॥ ९३ ॥ तामसःपश्चिमेचाग्निःपूज्यःसंहारकोहरः ॥ सात्विकःसुखकृ
त्सौम्येविष्णुर्विश्वपतिर्मृडः ॥ ९४ ॥ एवंपश्चिमदिग्भागेशंभोःषड्विंशकंशिवं ॥ समभ्यर्च्योत्तरेपार्श्वेततोवैकुंठमर्च
येत् ॥ ९५ ॥ वासुदेवंपुरस्तस्यप्रथमावरणेयजेत् ॥ अनिरुद्धंदक्षिणतःप्रद्युम्नंपश्चिमेततः ॥ ९६ ॥ सौम्येसंकर्ष
णंपश्चाद्व्यत्यस्तौवायजेदिमौ ॥ प्रथमावरणंप्रोक्तंद्वितीयावरणंशृणु ॥ ९७ ॥ मत्स्यःकूर्मोवराहश्चनारसिंहोथवाम
नः ॥ रामश्चान्यतमःकृष्णोभवानश्वमुखोपिच ॥ ९८ ॥ तृतीयावरणेचक्रंपूर्वभागेसमर्चयेत् ॥ नारायणाख्यंया
म्येस्त्रंक्कचिदव्याहतंयजेत्॥९९॥पश्चिमेपांचजन्यंचशार्ङ्गधनुरथोत्तरे॥एवंत्र्यावरणंसाक्षाद्विष्ण्वाख्यंपरमंहरिं॥१०० ॥ ४६ ॥



Indira Gandhi National Centre for the Arts

इत्थमिति ॥ इत्थंचतुश्चतुर्व्यूहमितिक्वचित्पाठः ॥ १०१ ॥ १०२ ॥ १०३ ॥ १०४ ॥ १०५ ॥ १०६ ॥ १०७ ॥ १०८ ॥ १०९ ॥ ११० ॥

महाविष्णुंसदाविष्णुंमूतीकृत्यसमर्चयेत् ॥ इत्थंविष्णोश्चतुर्व्यूहंक्रमान्मूर्तिचतुष्टयं ॥ १०१ ॥ पूजयित्वाथतच्छक्ती श्चतस्रःपूजयेत्क्रमात् ॥ प्रभामाग्नेयदिग्भागेनैर्ऋतेतुसरस्वतीं ॥१०२॥ गणांबिकांचवायव्येलक्ष्मींरौद्रेसमर्चयेत्॥ एवंभान्वादिमूर्तीनांतच्छक्तीनामनंतरं ॥ १०३॥ पूजांविधायलोकेशांस्तत्रैवावरणेयजेत् ॥ इंद्रमाग्नियमंचैवनिर्ऋतिं वरुणंतथा ॥ १०४ ॥ वायुंसोमंकुबेरंचपश्चादीशानमर्चयेत् ॥ एवंचतुर्थावरणंपूजयित्वाविधानतः ॥ १०५ ॥ आयु धानिमहेशस्यपश्चाद्बाह्येसमर्चयेत् ॥ श्रीमत्रिशूलमैशानेवज्रंमाहेंद्रदिङ्मुखे ॥ १०६ ॥ परशुंवन्हिदिग्भागेयाम्ये सायकमर्चयेत् ॥ नैर्ऋतेतुयजेत्खड्गंपाशंवारुणगोचरे ॥ १०७॥ अंकुशंमारुतेभागेपिनाकंचोत्तरेयजेत् ॥ पश्चि माभिमुखंरौद्रंक्षेत्रपालंसमर्चयेत् ॥ १०८ ॥ पंचमावरणंचैवसंपूज्यानंतरंबहिः ॥ सर्वावरणदेवानांबहिर्वापंचमेथ वा ॥ १०९ ॥ पंचमेमातृभिःसार्धमहोक्षंपुरतोयजेत् ॥ ततःसमंततःपूज्याःसर्वादेवयोनयः ॥ ११० ॥ खेचराऋ षयःसिद्धादैत्यायक्षाश्चराक्षसाः ॥ अनंताद्याश्चनागेंद्रानागैस्तत्तत्कुलोद्भवैः ॥ १११ ॥ डाकिनीभूतवेतालप्रेतभैरव नायकाः ॥ पातालवासिनश्चान्येनानायोनिषुसंभवाः ॥ ११२ ॥ नद्यःसमुद्रागिरयःकाननानिसरांसिच ॥ पशवः पक्षिणोवृक्षाःकीटाद्याःक्षुद्रयोनयः ॥ ११३ ॥ नराश्चविविधाकारामृगाश्चक्षुद्रयोनयः ॥ भुवनान्यंतरंडस्यततोब्र ह्मांडकोटयः ॥ ११४ ॥ बहिरंडादसंख्यानिभुवनानिसहाधिपैः ॥ ब्रह्मांडाधारकारुद्रादशदिक्षुव्यवस्थिताः ॥ ११५ ॥ यद्गौणंयच्चमायेयंयद्वाशाक्तंततःपरं ॥ यत्किंचिदस्तिशब्दस्यवाच्यंचिदचिदात्मकं ॥ ११६ ॥ तत्सर्वंशि वयोःपार्श्वेबुध्वासामान्यतोयजेत् ॥ कृतांजलिपुटाःसर्वेचिंत्याःस्मितमुखास्तथा ॥११७॥ प्रीत्यासंप्रेक्षमाणाश्चदेवं देवींचसर्वदा ॥ इत्थमावरणाभ्यर्चांकृत्वाव्याक्षेपशांतये ॥ ११८ ॥ पुनरभ्यर्च्यदेवेशंपंचाक्षरमुदीरयेत् ॥ निवेदये ततःपश्चाच्छिवयोरमृतोपमं ॥ ११९ ॥ ॥ ॥ ॥ ॥ ॥

॥ १११ ॥ ११२ ॥ ११३ ॥ ११४ ॥ ११५ ॥ ११६ ॥ ११७ ॥ व्याक्षेपशांतयेविघ्नशांतये ॥ ११८ ॥ ११९ ॥ ॥

Indira Gandhi National Centre for the Arts

चतुःप्रस्थःआटकः ॥ १२० ॥ १२१ ॥ १२२ ॥ उपेक्षकस्यभक्तिश्रद्धादिकमनपेक्षमाणस्य ॥ १२३ ॥ १२४ ॥ १२५ ॥ अष्टोत्तरशतमवरंन्यूनंयस्या
स्तां ॥ १२६ ॥ सहस्रमुत्तरमधिकंयस्मिन्कर्मणितत्तथा ॥ १२७ ॥ १२८ ॥ १२९ ॥ १३० ॥ एषःउक्तयागस्तोत्रात्मकः ॥ १३१ ॥ १३२ ॥१३३॥



सुव्यंजनसमायुक्तंशुद्धंचारुमहाचरुं ॥ द्वात्रिंशदाढकैर्मुख्यमधमंत्वाढकावरं ॥ १२० ॥ साधयित्वायथासंपच्छ्रद्धया विनिवेदयेत् ॥ ततोनिवेद्यपानीयंतांबूलंचोपदंशकैः ॥ १२१ ॥ नीराजनादिकंकृत्वापूजाशेषंसमापयेत् ॥ यागोप योगद्रव्याणिविशिष्टान्येवसाधयेत् ॥ १२२ ॥ वित्तशाठ्यंनकुर्वीतभक्तिमान्विभवेसति ॥ शठस्योपेक्षकस्यापिव्यं गंचैवानुतिष्ठतः ॥ १२३ ॥ नफलंत्येवकर्माणिकाम्यानीतिसतांकथा ॥ तस्माच्छाठ्यमुपेक्षांचत्यक्त्वासर्वांगियोगतः ॥ १२४ ॥ कुर्यात्काम्यानिकर्माणिफलसिद्धिंयदीच्छति ॥ इत्थंपूजांसमाप्याथदेवंदेवींप्रणम्यच ॥ १२५ ॥ भक्त्या मनःसमाधायपश्चात्स्तोत्रमुदीरयेत् ॥ ततःस्तोत्रजपस्यांतेत्वष्टोत्तरशतावराम् ॥१२६॥ जपेत्पंचाक्षरींविद्यांसहस्रो त्तरमुत्सुकः ॥ विद्यापूजांगुरोःपूजांकृत्वापश्चाद्यथाक्रमं ॥ १२७॥ यथोदयंयथाश्रद्धंसदस्यानपिपूजयेत् ॥ ततउद्वा स्यदेवेशंसर्वैरावरणैःसह ॥ १२८ ॥ मंडलंगुरवेदद्याद्यागोपकरणैःसह ॥ शिवाश्रितेभ्योवादद्यात्सर्वमेवानुपूर्वशः ॥ १२९ ॥ अथवातच्छिवायैवशिवक्षेत्रेसमर्पयेत् ॥ शिवाग्नौवायजेद्देवंहोमद्रव्यैश्चसक्तुभिः ॥ १३० ॥ समभ्यर्च्य यथान्यायंसर्वावरणदेवताः ॥ एषयोगेश्वरोनामत्रिषुलोकेषुविश्रुतः ॥ १३१ ॥ नतस्मादधिकःकश्चिद्योगोस्तिभुव नेक्वचित् ॥ नतदस्तिजगत्यस्मिन्नसाध्यंयदनेनतु ॥ १३२ ॥ ऐहिकंवाफलंकिंचिदामुष्मिकफलंतुवा ॥ इदमस्यफ लंनेदमितिनैवनियम्यते ॥ १३३ ॥ श्रेयोरूपस्यकृत्स्नस्यतदिदंश्रेष्ठसाधनम् ॥ इदंतुशक्यतेवक्तुंपुरुषेणयदर्थ्यते ॥ १३४ ॥ चिंतामणेरिवैतस्मात्तत्तेनप्राप्यतेफलम् ॥ तथापिक्षुद्रमुद्दिश्यफलंनैतत्प्रयोजयेत् ॥ १३५॥ लघ्वर्थीमह तोयस्मात्स्वयंलघुतरोभवेत् ॥ महद्वाफलमल्पंवाकृतंचेत्कर्मसिध्यति ॥ १३६ ॥ महादेवंसमुद्दिश्यकृतंकर्मप्रयुज्य ताम् ॥ तस्मादनन्यलभ्येषुशत्रुमृत्युजयादिषु ॥ १३७॥ फलेषुदृष्टादृष्टेषुकुर्यादेतद्विचक्षणः ॥ महत्स्वपिचपापेषु महारोगभयादिषु ॥१३८॥ दुर्भिक्षादिषुचात्यर्थंशांतिंकुर्यादनेनतु ॥ बहुनाकिंप्रलापेनमहाव्यापन्निवारकम् ॥१३९॥

॥ १३४ ॥ १३५ ॥ महतःकर्मणःलघ्वर्थीअल्पफलार्थी ॥ कर्मेति ॥ कर्मकृतंचेन्महद्वाल्पंवाफलंसिध्यतीत्यन्वयः ॥ १३६ ॥ १३७ ॥ १३८ ॥१३९॥

॥ १४० ॥ १४१ ॥ तस्यस्तोत्रस्य ॥ १४२ ॥ अर्धार्धंचतुर्थांशम् ॥ १४३ ॥ पर्वादिषुपौर्णिमादिषु ॥ १४४ ॥ १४५ ॥ इतिश्रीशैवमहापुराणेवायवीय
संहिताटीकायांसारबोधिन्यामुत्तरभागेत्रयोविंशोऽध्यायः ॥ २३ ॥ ओंनमःशिवाय ॥ पूर्वोक्तपूजनस्यांतेकर्तव्यंस्तोत्रमुत्तमं ॥ शंकरस्यतदत्रैवचतुर्विंशेप्रपठ्य

आत्मीयमस्त्रंशैवानामिदमाहमहेश्वरः ॥ तस्मादितःपरंनास्तिपरित्राणमिहात्मनः ॥ १४० ॥ इतिमत्वाप्रयुंजानः
कर्मेदंशुभमश्नुते ॥ स्तोत्रमात्रंशुचिर्भूत्वायःपठेत्सुसमाहितः ॥ १४१ ॥ सोप्यभीष्टतमादर्थादष्टांशफलमाप्नुयात् ॥
अर्थंतस्यानुसंधायजपेद्यदिसमाहितः ॥ १४२ ॥ अर्धार्धफलमाप्नोतिनात्रकार्याविचारणा ॥ अथार्थमनुसंधायपर्व
ण्यनशनःपठेत् ॥ १४३ ॥ अष्टम्यांवाचतुर्दश्यांफलमर्धंसमाप्नुयात् ॥ यस्त्वर्थमनुसंधायपर्वादिषुतथाव्रती ॥ १४४ ॥
मासमेकंजपेत्स्तोत्रंसकृत्स्नंफलमाप्नुयात् ॥ १४५ ॥ इतिश्रीशिवमहापुराणेवायवीयसंहितायामुत्तरभागेत्रयोविं
शोऽध्यायः ॥ २३ ॥ ॥ छ ॥ उपमन्युरुवाच ॥ स्तोत्रंवक्ष्यामितेकृष्णपंचावरणमार्गतः ॥ योगेश्वरमिदंपुण्यंकर्मयेन
समाप्यते ॥ १ ॥ जयजयजगदेकनाथशंभोप्रकृतिमनोहरनित्यचित्स्वभाव ॥ अतिगतकलुषप्रपंचवाचामपिमन
सांपदवीमतीततत्व ॥ २ ॥ स्वभावनिर्मलाभोगजयसुंदरचेष्टित ॥ स्वात्मतुल्यमहाशक्तेजयशुद्धगुणार्णव ॥ ३ ॥
अनंतकांतिसंपन्नजयाऽसदृशविग्रह ॥ अतर्क्यमहिमाधारजयाऽनाकुलमंगल ॥ ४ ॥ निरंजननिराधारजयनिष्का
रणोदय ॥ निरंतरपरानंदजयनिर्वृतिकारण ॥ ५ ॥ जयाऽतिपरमैश्वर्यजयाऽतिकरुणास्पद ॥ जयस्वतंत्रसर्वस्व
जयाऽसदृशवैभव ॥ ६ ॥ जयावृतमहाविश्वजयाऽनावृतकेनचित् ॥ जयोत्तरसमस्तस्यजयात्यंतनिरुत्तर ॥ ७ ॥
जयाऽद्भुतजयाऽक्षुद्रजयाऽक्षतजयाऽव्यय ॥ जयाऽमेयजयाऽमायजयाऽभयजयाऽमल ॥ ८ ॥ महाभुजमहासारम
हागुणमहाकथ ॥ महाबलमहामायमहारसमहारथ ॥ ९ ॥ नमःपरमदेवायनमःपरमहेतवे ॥ नमःशिवायशांता
यनमःशिवतरायते ॥ १० ॥ त्वदधीनमिदंकृत्स्नंजगद्धिससुरासुरम् ॥ अतस्त्वद्विहितामाज्ञांक्षमतेकोऽतिवर्तितुम् ॥ ११ ॥

ते ॥ १ ॥ योगेश्वरंसर्वयोगेषुश्रेष्ठं ॥ येनस्तोत्रेण ॥ समाप्यतेपूर्णंक्रियते ॥ १ ॥ वाचामिति ॥ यतोवाचोनिवर्तंतइतिश्रुतेः ॥ २ ॥ ३ ॥ असदृशविग्रहअ
न्यासाधारणविग्रह ॥ अनाकुलमंगलस्थिरकल्याण ॥ ४ ॥ ५ ॥ ६ ॥ अत्यंतनिरुत्तरअतिश्रेष्ठ ॥ ७ ॥ ८ ॥ ९ ॥ १० ॥ ११ ॥ ॥

Indira Gandhi National Centre for the Arts

॥ १२ ॥ १३ ॥ अचिद्ध्वांतमविद्या ॥ कालोत्तरोत्तरेकालादप्यत्यधिके ॥ १४ ॥ १५ ॥ १६ ॥ १७ ॥ १८ ॥ विश्वस्मात्परायैइतिक्वचित्पाठः ॥
॥१९॥२०॥निर्वर्तयपूरय॥२१॥ वर्णेति॥वर्णाः प्रणवाद्यंतर्गताअकारादयःब्रह्माणिईशानादीनिकलानिवृत्त्यादयस्तदात्मकोदेहोयस्यसःअतएवसकलोपिवस्तु



अयंपुनर्जनोनित्यंभवदेकसमाश्रयः ॥ भवानतोनुगृह्यास्मैप्रार्थितंसंप्रयच्छतु ॥ १२ ॥ जयांबिकेजगन्मातर्जयसर्व
जगन्मयि ॥ जयाऽनवधिकैश्वर्येजयाऽनुपमविग्रहे ॥ १३ ॥ जयवाङ्मनसातीतेजयाऽचिद्ध्वांतभंजिके ॥ जयजन्म
जराहीनेजयकालोत्तरोत्तरे ॥ १४ ॥ जयानेकविधावस्थेजयानेकसुखात्मके ॥ जयानेकमहासत्वेजयानेकगुणो
र्जिते ॥ १५ ॥ जयानेकगुणात्मस्थेजयलोकमहेश्वरि ॥ जयविश्वाधिकात्मस्थेजयविश्वेश्वरप्रिये ॥ १६ ॥ जयवि
श्वसुराराध्येजयविश्वविजृंभिणि ॥ जयमंगलदिव्यांगिजयमंगलदीपिके ॥१७॥ जयमंगलचारित्रेजयमंगलदायि
नि ॥ नमःपरमकल्याणिगुणसंचयमूर्तये ॥ १८ ॥ नमःशिवायैविश्वस्मात्परस्यैशिवशक्तये ॥ त्वत्तःखलुसमुत्पन्नंज
गत्त्वय्येवलीयते ॥१९॥ त्वद्विनाऽतःफलंदातुमीश्वरोपिनशक्नुयात् ॥ जन्मप्रभृतिदेवेशिजनोयंत्वदुपाश्रितः ॥ २० ॥
अतोस्यतवभक्तस्यनिर्वर्तयमनोरथम् ॥ पंचवक्त्रोदशभुजःशुद्धस्फटिकसन्निभः ॥ २१॥ वर्णब्रह्मकलादेहोदेवःसकल
निष्कलः ॥ शिवमूर्तिसमारूढःशांत्यतीतःसदाशिवः ॥ २२ ॥ भक्त्यामयार्चितोमह्यंप्रार्थितंसंप्रयच्छतु ॥ सदाशि
वांकमारूढाशक्तिरिच्छाशिवाह्वया ॥ २३ ॥ जननीसर्वलोकानांप्रयच्छतुमनोरथम् ॥ शिवयोर्दयितौपुत्रौदेवौहेरंब
षण्मुखौ ॥ २४ ॥ शिवानुभावौचशिवौशिवज्ञानामृताशिनौ ॥ तृप्तौपरस्परंस्निग्धौशिवाभ्यांनित्यसत्कृतौ ॥ २५ ॥
आराधितौसदादेवौब्रह्माद्यैस्त्रिदशैरपि ॥ सर्वलोकपरित्राणंकर्तुमभ्युदितौसदा ॥ २६ ॥ स्वेच्छावतारंकुर्वंतौस्वांश
भेदैरनेकशः ॥ ताविमौशिवयोःपार्श्वेनित्यमित्थंमयार्चितौ ॥ २७ ॥ तयोराज्ञांपुरस्कृत्यप्रार्थितंमेप्रयच्छताम् ॥ शु
द्धस्फटिकसंकाशमीशानाख्यंसदाशिवम् ॥२८॥ मूर्धाभिमानिनीमूर्तिःशिवस्यपरमात्मनः ॥ शिवार्चनरतंशांतंशां
त्यतीतंखमास्थितं ॥ २९ ॥ पंचाक्षरांतिमंबीजंकलाभिःपंचभिर्युतम् ॥ प्रथमावरणेपूर्वंशक्त्यासहसमर्चितम् ॥३०॥

तोनिष्कलः॥२२॥२३॥२४॥२५॥२६॥२७॥तयोःशिवयोःपंचवक्त्राभिमानीशानादिब्रह्माणिप्रार्थयते॥शुद्धेत्यादिभिः॥२८॥२९॥अंतिमंयमिति ॥ ३० ॥

॥३१॥३२॥ तुरीयंवामिति ॥ ततःप्रभृतिप्रथमंद्वितीयंतुरीयंतृतीयमितिबीजानांपाठक्रमःक्वचित्पुस्तकेदृश्यते ॥ सद्यादिमंत्रपाठक्रमानुसारेणतुप्रदर्शितक्रमोबहुपुस्तकेषुस्थितोयुक्तोदृश्यते ॥ कलासुअंशभूतविभूतिषु ॥ ३३ ॥ ३४ ॥ ३५ ॥ तृतीयंशिमिति॥३६॥३७॥३८॥द्वितीयंममिति॥३९॥४०॥४१॥

पवित्रंपरमंब्रह्मप्रार्थितंमेप्रयच्छतु ॥ बालसूर्यप्रतीकाशंपुरुषाख्यंपुरातनम् ॥ ३१ ॥ पूर्ववक्राभिमानंचशिवस्यपरमेष्ठिनः ॥ शांत्यात्मकंमरुत्संस्थंशंभोःपादार्चनेरतं ॥ ३२ ॥ तुरीयंशिवबीजेषुकलासुचचतुष्कलम् ॥ पूर्वभागेमयाभक्त्याशक्त्यासहसमर्चितम् ॥ ३३ ॥पवित्रंपरमंब्रह्मप्रार्थितंमेप्रयच्छतु॥ अंजनाद्रिप्रतीकाशमघोरंघोरविग्रहम्॥ ॥ ३४ ॥ देवस्यदक्षिणंवक्रंदेवदेवपदार्चकम् ॥ विद्यापदंसमारूढंवन्हिमंडलमध्यगम् ॥ ३५ ॥ तृतीयंशिवबीजेषुकलास्वष्टकलान्वितम् ॥ शंभोर्दक्षिणदिग्भागेशक्त्यासहसमर्चितम् ॥ ३६ ॥ पवित्रंपरमंब्रह्मप्रार्थितंमेप्रयच्छतु ॥ कुंकुमक्षोदसंकाशंवामाख्यंवरवेषधृक् ॥ ३७ ॥ वक्रमुत्तरमीशस्यप्रतिष्ठायांप्रतिष्ठितम् ॥ वारिमंडलमध्यस्थंमहादेवार्चनेरतम् ॥ ३८ ॥ द्वितीयंशिवबीजेषुत्रयोदशकलान्वितम् ॥ देवेशोत्तरदिग्भागेशक्त्यासहसमर्चितं ॥ ३९ ॥ पवित्रंपरमंब्रह्मप्रार्थितंमेप्रयच्छतु ॥ शंखकुंदेंदुधवलंसद्याख्यंसौम्यलक्षणम् ॥ ४० ॥ शिवस्यपश्चिमंवक्रंशिवपादार्चनेरतम् ॥ निवृत्तिपदनिष्ठंचपृथिव्यांसमवस्थितम् ॥ ४१ ॥ प्रथमंशिवबीजेषुकलाभिश्चाष्टभिर्युतम् ॥ देवस्यपश्चिमेभागेशक्त्यासहसमर्चितम् ॥ ४२ ॥ पवित्रंपरमंब्रह्मप्रार्थितंमेप्रयच्छतु ॥ शिवस्यचशिवायाश्चहृन्मूर्तीशिवभाविते ॥ ४३ ॥ तयोराज्ञांपुरस्कृत्यतेमेकामंप्रयच्छताम् ॥ शिवस्यचशिवायाश्चशिरोमूर्तीशिवाश्रिते ॥ ४४ ॥ तयोराज्ञांपुरस्कृत्यतेमेकामंप्रयच्छताम् ॥ शिवस्यचशिवायाश्चशिखामूर्तीशिवाश्रिते ॥ ४५ ॥ सत्कृत्यशिवयोराज्ञांतेमेकामंप्रयच्छताम् ॥ शिवस्यचशिवायाश्चनेत्रमूर्तीशिवाश्रिते ॥ ४६ ॥ सत्कृत्याशिवयोराज्ञांतेमेकामंप्रयच्छताम॥ शिवस्यचशिवायाश्चवर्मणीशिवभाविते ॥ ४७ ॥ सत्कृत्यशिवयोराज्ञांतेमेकामंप्रयच्छताम् ॥ अस्त्रमुर्तीचशिवयोर्नित्यमर्चनतत्परे ॥ ४८ ॥ सत्कृत्यशिवयोराज्ञांतेमेकामंप्रयच्छताम् ॥ वामोज्येष्ठस्तथारुद्रःकालोविकरणस्तथा ॥ ॥ ४९ ॥ बलोविकरणश्चैवबलप्रमथनःपरः ॥ सर्वभूतस्यदमनस्तादृशश्चाष्टशक्तयः ॥ ५० ॥ ॥

प्रथमंनमिति ॥ कलाभिरिति ॥ एवंसर्वाःसंकलिताअष्टत्रिंशत्कलाःसंपन्नाः ॥ ४२ ॥ ४३ ॥ ४४॥४५॥सत्कृत्यआदरेणपरिगृह्य॥४६॥४७॥४८॥४९॥५०॥

Indira Gandhi National Centre for the Arts

॥ ५१ ॥ ५२ ॥ ५३ ॥ ५४ ॥ ५५ ककुदास्वांगविशेषेण ॥ ५६ ॥ वालेनपुच्छेन ॥ ५७ ॥ ५८ ॥ ५९ ॥ ६० ॥ ६१ ॥ ६२ ॥ ६३ ॥



प्रार्थितंमेप्रयच्छंतुपरमेशस्यशासनात् ॥ अथानंतश्चसूक्ष्मश्चशिवश्चाप्येकनेत्रकः ॥ ५१ ॥ एकरुद्रस्त्रिमूर्तिश्च
श्रीकंठश्चशिखंडकः ॥ तथाष्टौशक्तयस्तेषांद्वितीयावरणेर्चिताः ॥ ५२ ॥ तेमेकामंप्रयच्छंतुशिवयोरेवशासनात् ॥
भवाद्यामूर्तयश्चाष्टौतेषामपिचशक्तयः ॥ ५३ ॥ महादेवादयश्चान्येतथैकादशमूर्तयः ॥ शक्तिभिःसहिताःसर्वे
तृतीयावरणेस्थिताः ॥ ५४ ॥ सत्कृत्यशिवयोराज्ञांदिशंतुफलमीप्सितम् ॥ वृषराजोमहातेजामहामेघसमस्व
नः ॥ ५५ ॥ मेरुमंदरकैलासहिमाद्रिशिखरोपमः ॥ सिताभ्रशिखराकारःककुदापरिशोभितः ॥ ५६ ॥ महा
भोगींद्रकल्पेनवालेनचविराजितः ॥ रक्तास्यशृंगचरणोरक्तप्रायविलोचनः ॥ ५७ ॥ पीवरोन्नतसर्वांगःसुचारुग
मनोज्वलः ॥ प्रशस्तलक्षणःश्रीमान्प्रज्वलन्मणिभूषणः ॥ ५८ ॥ शिवप्रियःशिवासक्तःशिवयोर्ध्वजवाहनः ॥ तथा
तच्चरणन्यासभावितापरविग्रहः ॥ ५९ ॥ गोराजपुरुषःश्रीमान्श्रीमच्छूलवरायुधः ॥ तयोराज्ञांपुरस्कृत्यसमेकामं
प्रयच्छतु ॥ ६० ॥ नंदीश्वरोमहातेजानगेंद्रतनयात्मजः ॥ सनारायणकैर्देवैर्नित्यमभ्यर्च्यवंदितः ॥ ६१ ॥ शर्व
स्यांतःपुरद्वारिसार्द्धंपरिजनैःस्थितः ॥ सर्वेश्वरसमप्रख्यःसर्वासुरविमर्दनः ॥ ६२ ॥ सर्वेषांशिवधर्माणामध्यक्षत्वेऽ
भिषेचितः ॥ शिवप्रियःशिवासक्तःश्रीमच्छूलवरायुधः ॥ ६३ ॥ शिवाश्रितेषुसंसक्तस्त्वनुरक्तश्चतैरपि ॥ सत्कृत्यशि
वयोराज्ञांसमेकामंप्रयच्छतु ॥ ६४ ॥ महाकालोमहाबाहुर्महादेवइवापरः ॥ महादेवाश्रितानांतुनित्यमेवाभिरक्षि
ता ॥ ६५ ॥ शिवप्रियःशिवासक्तःशिवयोरर्चकःसदा ॥ सत्कृत्यशिवयोराज्ञांसमेदिशतुकांक्षितम् ॥ ६६ ॥ सर्वशा
स्त्रार्थतत्वज्ञःशास्ताविष्णोःपरातनुः ॥ महामोहात्मतनयोमधुमांसासवप्रियः ॥ ६७ ॥ तयोराज्ञांपुरस्कृत्यसमेकामं
प्रयच्छतु ॥ ब्रह्माणीचैवमाहेशीकौमारीवैष्णवीपरा ॥ ६८ ॥ वाराहीचैवमाहेंद्रीचामुंडाचंडविक्रमा ॥ एतावैमातरः
सप्तसर्वलोकस्यमातरः ॥ ६९ ॥ प्रार्थितंमेप्रयच्छंतुपरमेश्वरशासनात् ॥ मत्तमातंगवदनोगंगोमाशंकरात्मजः ॥
॥ ७० ॥ आकाशदेहोदिग्बाहुःसोमसूर्याग्निलोचनः ॥ ऐरावतादिभिर्दिव्यैर्दिग्गजैर्नित्यमर्चितः ॥ ७१ ॥

॥ ६४ ॥ ६५ ॥ ६६ ॥ परातनुःपराअतिमहतीआसमंतात्तनुर्यस्यसः ॥ अथवाशास्तालोकानांविष्णोःकेवलमूर्तिरूपः ॥ ६७ ६८ ॥ ६९ ॥ ७० ॥ ७१ ॥



Indira Gandhi National Centre for the Arts

शिवज्ञानमदोद्भिन्नस्त्रिदशानामविघ्नकृत् ॥ विघ्नकृच्चासुरादीनांविघ्नेशःशिवभावितः ॥ ७२ ॥ सत्कृत्यशिवयोराज्ञां समेदिशतुकांक्षितम् ॥ षण्मुखःशिवसंभूतःशक्तिवज्रधरःप्रभुः ॥७३ ॥ अग्नेश्चतनयोदेवोह्यपर्णातनयःप्रभुः ॥गंगा याश्चगणांऽबायाःकृत्तिकायास्तथैवच ॥ ७४ ॥ विशाखेनचशाखेननैगमेयेनचावृतः ॥ इंद्रजिच्चेंद्रसेनानीस्तारका सुरजित्तथा ॥ ७५ ॥ शैलानांमेरुमुख्यानांवेधकश्चस्वतेजसा ॥ तप्तचामीकरप्रख्यःशतपत्रदलेक्षणः ॥ ७६ ॥ कु मारःसुकुमाराणांरूपोदाहरणंमहत् ॥ शिवप्रियःशिवासक्तःशिवपादार्चकःसदा ॥ ७७ ॥ सत्कृत्यशिवयोराज्ञांसमे दिशतुकांक्षितम् ॥ ज्येष्ठावरिष्ठावरदाशिवयोःपूजनेरता ॥ ७८ ॥ तयोराज्ञांपुरस्कृत्यसामेदिशतुकांक्षितम् ॥ त्रै लोक्यवंदितासाक्षादुल्काकारागणांबिका ॥ ७९ ॥ जगत्सृष्टिविवृध्यर्थंब्रह्मणाभ्यर्थिताशिवात् ॥ शिवायाःप्रवि भक्तायाभ्रुवोरंतरनिःसृता ॥ ८० ॥ दाक्षायणीसतीमेनातथाहैमवतीह्युमा ॥ कौशिकायाश्चजननीभद्रकाल्यास्त थैवच ॥ ८१ ॥ अपर्णायाश्चजननीपाटलायास्तथैवच ॥ शिवार्चनरतानित्यंरुद्राणीरुद्रवल्लभा ॥ ८२॥ सत्कृत्यशि वयोराज्ञांसामेदिशतुकांक्षितम् ॥ चंडःसर्वगणेशानःशंभोर्वदनसंभवः ॥ ८३ ॥ सत्कृत्यशिवयोराज्ञांसमेदिशतु कांक्षितम् ॥ वृषभोनामगणपोवृषवाहपदार्चकः ॥ ८४ ॥ सत्कृत्यशिवयोराज्ञांसमेदिशतुकांक्षितम् ॥ पिंगलोगण पःश्रीमान्शिवासक्तःशिवप्रियः ॥ ८५ ॥ आज्ञयाशिवयोरेवसमेकामंप्रयच्छतु ॥ भृंगीशोनामगणपःशिवाराधन तत्परः ॥ ८६ ॥ प्रयच्छतुसमेकामंपत्युराज्ञापुरःसरम् ॥ वीरभद्रोमहातेजाहिमकुंदेंदुसंनिभः ॥८७॥ भद्रकालीप्रि योनित्यंमातृणांचाभिरक्षिता ॥ यज्ञस्यचशिरोहर्तादक्षस्यचदुरात्मनः ॥ ८८ ॥ उपेंद्रेंद्रयमादीनांदेवानामंगतक्षकः शिवस्यानुचरःश्रीमान्शिवशासनपालकः ॥ ८९ ॥ शिवयोःशासनादेवसमेदिशतुकांक्षितम् ॥सरस्वतीमहेशस्यवा क्सरोजसमुद्भवा॥९०॥शिवयोःपूजनेनित्यंसामेदिशतुकांक्षितम्॥विष्णोर्वक्षःस्थितालक्ष्मीःशिवयोःपूजनेरता॥९१॥

॥ ९२ ॥ ९३ ॥ ९४ ॥ ९५ ॥ ९६ ॥ ९७ ॥ ९८ ॥ अंतरालद्वयात्मकाः सौम्यंघोरंचेतिद्विविधमभ्यंतरमंतरालद्वयंतदात्मकाअतएवमिश्राः ॥ ९९ ॥
॥ १०० ॥ १०१ ॥ १०२ ॥ गुणसंकीर्णःगुणोपहितःगुणकेवलःगुणमात्रस्वरूपः ॥ १०३ ॥ सामान्यविक्रियःसामान्यासाधारणीजगत्प्रकाशनरूपावि



शिवयोःशासनादेवसामेदिशतुकांक्षितम् ॥ महामोटीमहादेव्याःपादपूजापरायणा ॥ ९२ ॥ तस्याएवनियोगेनसा
मेदिशतुकांक्षितं ॥ कौशिकीसिंहमारूढापार्वत्याःपरमासुता ॥ ९३ ॥ विष्णोर्निद्रामहामायामहामहिषमर्दिनी ॥
निशुंभशुंभसंहर्त्रीमधुमांसासवप्रिया ॥ ९४ ॥ सत्कृत्यशासनंमातुःसामेकामंप्रयच्छतु ॥ रुद्रारुद्रसमप्रख्याःप्रम
थाःप्रथितौजसः ॥ ९५ ॥ भूताख्याश्चमहावीर्यामहादेवसमप्रभाः ॥ नित्यमुक्तानिरुपमानिर्द्वंद्वानिरुपप्लवाः ॥ ९६ ॥
सशक्तयःसानुचराःसर्वलोकनमस्कृताः ॥ सर्वेषामेवलोकानांसृष्टिसंहरणक्षमाः ॥ ९७ ॥ परस्परानुरक्ताश्चपरस्पर
मनुव्रताः ॥ परस्परमतिस्निग्धाःपरस्परनमस्कृताः ॥ ९८ ॥ शिवप्रियतमानित्यंशिवलक्षणलक्षिताः ॥ सौम्या
घोरास्तथामिश्राश्चांतरालद्वयात्मकाः ॥ ९९ ॥ विरूपाश्चसुरूपाश्चनानारूपधरास्तथा ॥ सत्कृत्यशिवयोराज्ञांतेमे
कामंदिशंतुवै ॥ १०० ॥ देव्याःप्रियसखीवर्गोदेवीलक्षणलक्षितः ॥ सहितोरुद्रकन्याभिःशक्तिभिश्चाप्यनेकशः ॥
॥ १०१ ॥ तृतीयावरणेशंभोर्भक्त्यानित्यंसमर्चितः ॥ सत्कृत्यशिवयोराज्ञांसमेदिशतुमंगलम् ॥ १०२ ॥ दिवाकरो
महेशस्यमूर्तिर्दीप्तसुमंडलः ॥ निर्गुणोगुणसंकीर्णस्तथैवगुणकेवलः ॥ १०३ ॥ अविकारात्मकश्चाद्यस्ततःसामा
न्यविक्रियः ॥ असाधारणकर्माचसृष्टिस्थितिलयक्रमात् १०४ ॥ एवंत्रिधाचतुर्धाचविभक्तःपंचधापुनः ॥ चतुर्थावर
णेशंभोःपूजितश्चानुगैःसह ॥ १०५ ॥ शिवप्रियःशिवासक्तःशिवपादार्चनेरतः ॥ सत्कृत्यशिवयोराज्ञांसमेदिशतुमं
गलम् ॥ १०६ ॥ दिवाकरषडंगानिआदित्याद्याश्चमूर्तयः ॥ आदित्योभास्करोभानूरविश्चेत्यनुपूर्वशः ॥ १०७ ॥ अ
र्कोब्रह्मातथारुद्रोविष्णुश्चादित्यमूर्तयः ॥ विस्तारासुताराबोधिन्याप्यायिन्यपरापुनः ॥ १०८ ॥ ऊषाप्रभातथाप्रा
ज्ञासंध्याचेत्यपिशक्तयः ॥ सोमादिकेतुपर्यंताग्रहाश्चाशिवभाविताः ॥ १०९ ॥

क्रियायस्यसः ॥ १०४ ॥ त्रिधेति ॥ आवरणभेदेनमूर्तिभेदादितिभावः ॥ चतुर्थेति ॥ एवंत्र्यावरणंदेवंसमभ्यर्च्यदिवाकरं ॥ ब्रह्माणमर्चयेत्पश्चात्रिभिरावर
णैःसहेतिपूर्वमुक्तत्वादितिभावः ॥ १०५ ॥ १०६ ॥ दिवाकरषडंगानिदिवाकरस्यहृदयादीनि ॥ १०७ ॥ १०८ ॥ १०९ ॥ ॥



Indira Gandhi National Centre for the Arts

नुन्नाःप्रेरिताः ॥ ११० ॥ १११ ॥ हयाःसूर्यस्य ॥ ११२ ॥ ११३ ॥ ११४ ॥ ११५ ॥ ११६ ॥ ११७ ॥ ११८ ॥ ११९ ॥ १२० ॥१२१॥

शिवयोराज्ञयानुन्नामंगलंप्रदिशंतुमे ॥ अथवाद्वादशादित्यास्तथाद्वादशराशयः ॥ ११० ॥ ऋषयोदेवगंधर्वाःपन्न
गाप्सरसांगणाः ॥ ग्रामण्यश्चतथायक्षाराक्षसाश्चासुरास्तथा ॥ १११ ॥ सप्तसप्तगणाश्चैतेसप्तच्छंदोमयाहयाः ॥
वालखिल्यगणाश्चैवसर्वेशिवपदार्चकाः ॥ ११२ ॥ सत्कृत्यशिवयोराज्ञांमंगलंप्रदिशंतुमे ॥ ब्रह्माथदेवदेवस्यमूर्ति
र्भूमंडलाधिपः ॥ ११३ ॥ चतुःषष्टिगुणैश्वर्योबुद्धितत्वेप्रतिष्ठितः ॥ निर्गुणोगुणसंकीर्णस्तथैवगुणकेवलः ॥ ११४ ॥
अविकारात्मकोदेवस्ततःसाधारणःपरः ॥ असाधारणकर्माचसृष्टिस्थितिलयक्रमात् ॥ ११५ ॥ एवंत्रिधाचतुर्धा
चविभक्तःपंचधापुनः ॥ चतुर्थावरणेशंभोःपूजितश्चसहानुगैः ॥ ११६ ॥ शिवप्रियःशिवासक्तःशिवपादार्चनेरतः ॥
सत्कृत्यशिवयोराज्ञांसमेदिशतुमंगलम् ॥ ११७ ॥ हिरण्यगर्भोलोकेशोविराट्कालश्चपूरुषः ॥ सनत्कुमारःसनकः
सनंदश्चसनातनः ॥ ११८ ॥ प्रजानांपतयश्चैवदक्षाद्याब्रह्मसूनवः ॥ एकादशसपत्नीकाधर्मःसंकल्पएवच॥११९॥
शिवार्चनरताश्चैतेशिवभक्तिपरायणाः ॥ शिवाज्ञावशगाःसर्वेदिशंतुममंगलं ॥ १२० ॥ चत्वारश्चतथावेदाःसेति
हासपुराणकाः ॥ धर्मशास्त्रादिविद्याभिर्वैदिकीभिःसमन्विताः ॥ १२१ ॥ परस्पराविरुद्धार्थाःशिवैकप्रतिपादकाः
सत्कृत्यशिवयोराज्ञांमंगलंप्रदिशंत्विमे ॥ १२२ ॥ अथरुद्रोमहादेवःशंभोर्मूर्तिर्गरीयसी ॥ वान्हेयमंडलाधीशःपौ
रुषैश्वर्यवान्प्रभुः ॥ १२३ ॥ शिवाभिमानसंपन्नोनिर्गुणस्त्रिगुणात्मकः ॥ केवलंसात्विकश्चापिराजसश्चैवतामसः ॥
॥ १२४ ॥ अविकाररतःशर्वेततस्तुसमविक्रियः ॥ असाधारणकर्माचसृष्ट्यादिकरणात्पृथक् ॥ १२५ ॥ ब्रह्मणोपि
शिरश्छेत्ताजनकस्तस्यतत्सुतः ॥ जनकस्तनयश्चापिविष्णोरपिनियामकः ॥ १२६ ॥ बोधकश्चतयोर्नित्यमनुग्रहकरः
प्रभुः ॥ अंडस्यांतर्बहिर्वर्तीरुद्रोलोकद्वयाधिपः ॥ १२७ ॥ शिवप्रियःशिवासक्तःशिवपादार्चनेरतः ॥ शिवस्याज्ञां
पुरस्कृत्यसमेदिशतुमंगलम् ॥ १२८ ॥ तस्यब्रह्मषडंगानिविद्येशानांतथाष्टकम् ॥ चत्वारोमूर्तिभेदाश्चशिवपूर्वाःशि
वार्चकाः ॥ १२९ ॥ ॥ ॥ ॥ ॥ ॥

॥ १२२ ॥ १२३ ॥ १२४ ॥ १२५ ॥ १२६ ॥ तयोर्विष्णुब्रह्मणोः ॥ १२७ ॥ १२८ ॥ १२९ ॥ ॥ ॥

Indira Gandhi National Centre for the Arts

॥ १३० ॥ अव्यक्तंजगत्कारणंतत्रस्थितः ॥ १३१ ॥ त्रिसाधारणविक्रियःत्रिषुब्रह्मविष्णुरुद्रेषुसाधारणीसमानाविक्रियाविकारोयस्यसः ॥ १३२ ॥





शिवोभवोहरश्चैवमृडश्चैवतथापरः ॥ शिवस्याज्ञांपुरस्कृत्यमंगलंप्रदिशंतुमे ॥ १३० ॥ अथविष्णुर्महेशस्यशिवस्यै
वापरातनुः ॥ वारितत्वाधिपःसाक्षादव्यक्तपदसंस्थितः ॥ १३१ ॥ निर्गुणःसत्वबहुलस्तथैवगुणकेवलः ॥ अविका
राभिमानीचत्रिसाधारणविक्रियः ॥ १३२ ॥ असाधारणकर्माचसृष्ट्यादिकरणात्पृथक् ॥ दक्षिणांगभवेनापिस्प
र्धमानःस्वयंभुवा ॥ १३३ ॥ आद्येनब्रह्मणासाक्षात्सृष्टःस्रष्टाचतस्यतु ॥ अंडस्यांतर्बहिर्वर्तीविष्णुर्लोकद्वयाधिपः ॥
॥ १३४ ॥ असुरांतकरश्चक्रीशक्रस्यापितथानुजः ॥ प्रादुर्भूतश्चदशधाभृगुशापच्छलादिह ॥ १३५ ॥ भूभारनि
ग्रहार्थायस्वेच्छयावतरत्क्षितौ ॥ अप्रमेयबलोमायीमाययामोहयन्जगत् ॥ १३६ ॥ मूर्तीकृत्यमहाविष्णुंसदावि
ष्णुमथापिवा ॥ वैष्णवैःपूजितोनित्यंमूर्तित्रयमयासने ॥ १३७ ॥ शिवप्रियःशिवासक्तःशिवपादार्चनेरतः ॥ शिव
स्याज्ञांपुरस्कृत्यसमेदिशतुमंगलम् ॥ १३८ ॥ वासुदेवोऽनिरुद्धश्चप्रद्युम्नश्चततःपरः ॥ संकर्षणःसमाख्यातश्च
तस्रोमूर्तयोहरेः ॥ १३९ ॥ मत्स्यःकूर्मोवराहश्चनारसिंहश्चवामनः ॥ रामत्रयंतथाकृष्णोविष्णुस्तुरगवक्रकः ॥
॥ १४० ॥ चक्रंनारायणस्यास्त्रंपांचजन्यंचशार्ङ्गकम् ॥ सत्कृत्यशिवयोराज्ञांमंगलंप्रदिशंतुमे ॥ १४१ ॥ प्रभासरस्व
तीगौरीलक्ष्मीश्चशिवभाविता ॥ शिवयोःशासनादेतामंगलंप्रदिशंतुमे ॥ १४२ ॥ इंद्रोग्निश्चयमश्चैवनिर्ऋतिर्वरुण
स्तथा ॥ वायुःसोमःकुबेरश्चतथेशानस्त्रिशूलधृक् ॥ १४३ ॥ सर्वेशिवार्चनरताःशिवसद्भावभाविताः ॥ सत्कृत्यशि
वयोराज्ञांमंगलंप्रदिशंतुमे ॥ १४४ ॥ त्रिशूलमथवज्रंचतथापरशुसायकौ ॥ खड्गपाशांकुशाश्चैवपिनाकश्चायुधोत्तमः ॥
॥ १४५ ॥ दिव्यायुधानिदेवस्यदेव्याश्चैतानिनित्यशः ॥ सत्कृत्यशिवयोराज्ञांरक्षांकुर्वंतुमेसदा ॥ १४६ ॥



॥ १३३ ॥ १३४ ॥ चक्रीसुदर्शनचक्रयुक्तः ॥ १३५ ॥ १३६ ॥ १३७ ॥ १३८ ॥ १३९ ॥ रामत्रयंपर्शुरामदाशरथिबलरामात्मकं ॥ तुरगवक्रकः
तुरगवर्धनइतिपाठांतरं ॥ १४० ॥ १४१ ॥ १४२ ॥ १४३ ॥ १४४ ॥ १४५ ॥ १४६ ॥ ॥ ॥

Indira Gandhi National Centre for the Arts

सौरभेयः कामधेनुपुत्रः ॥ १४७ ॥ १४८ ॥ १४९ ॥ १५० ॥ १५१ ॥ १५२ ॥ १५३ ॥ १५४ ॥ १५५ ॥ १५६ ॥ १५७॥ १५८ ॥

वृषरूपधरोधर्मःसौरभेयोमहाबलः ॥ वाडवाख्यानलस्पर्धीपंचगोमातृभिर्वृतः ॥ १४७ ॥ वाहनत्वमनुप्राप्तस्तप
सापरमेशयोः ॥ तयोराज्ञांपुरस्कृत्यसमेकामंप्रयच्छतु ॥ १४८ ॥ नंदासुभद्रासुरभिःसुशीलासुमनास्तथा ॥ पंच
गोमातरस्त्वेताःशिवलोकेव्यवस्थिताः ॥ १४९ ॥ शिवभक्तिपरानित्यंशिवार्चनपरायणाः ॥ शिवयोःशासनादेवदि
शंतुममवांछितम् ॥ १५० ॥ क्षेत्रपालोमहातेजानीलजीमूतसंनिभः ॥ दंष्ट्राकरालवदनःस्फुरद्रक्ताधरोज्वलः ॥
॥ १५१ ॥ रक्तोर्ध्वमूर्ध्वजःश्रीमान्भ्रूकुटीकुटिलेक्षणः ॥ रक्तवृत्तत्रिनयनःशशिपन्नगभूषणः ॥ १५२ ॥ नग्नस्त्रिशू
लपाशासिकपालोद्यतपाणिकः ॥ भैरवोभैरवैःसिद्धैर्योगिनीभिश्चसंवृतः ॥ १५३ ॥ क्षेत्रेक्षेत्रेसमासीनःस्थितोयोर
क्षकःसताम् ॥ शिवप्रणामपरमःशिवसद्भावभावितः ॥ १५४ ॥ शिवाश्रितान्विशेषेणरक्षन्पुत्रानिवौरसान् ॥
सत्कृत्यशिवयोरज्ञांसमेदिशतुमंगलम् ॥ १५५ ॥ तालजंघादयस्तस्यप्रथमावरणेर्चिताः ॥ सत्कृत्यशिवयोराज्ञांच
त्वारःसमवंतुमाम् ॥ १५६ ॥ भैरवाद्याश्चयेचान्येसमंतात्तस्यवेष्टिताः ॥ तेपिमामनुगृण्हंतुशिवशासनगौरवात् ॥
॥ १५७ ॥ नारदाद्याश्चमुनयोदिव्यादेवैश्चपूजिताः ॥ साध्याश्चैवतुयेदेवाजनलोकनिवासिनः ॥ १५८ ॥ विनिवृ
त्ताधिकाराश्चमहर्लोकनिवासिनः ॥ महर्षयस्तथान्येचवैमानिकगणैःसह ॥ १५९ ॥ सर्वेशिवार्चनरताःशिवाज्ञा
वशवर्तिनः ॥ शिवयोराज्ञयामह्यंदिशंतुममकांक्षितम् ॥ १६० ॥ गंधर्वाद्याःपिशाचांताश्चतस्रोदेवयोनयः ॥ सिद्धा
विद्याधराद्याश्चयेपिचान्येनभश्चराः ॥ १६१ ॥ असुराराक्षसाश्चैवपातालतलवासिनः ॥ अनंताद्याश्चनागेंद्रावैन
तेयादयोद्विजाः ॥ १६२ ॥ कूष्मांडाःप्रेतवेतालाग्रहाभूतगणाःपरे ॥ डाकिन्यश्चापियोगिन्यःशाकिन्यश्चापितादृ
शः ॥ १६३ ॥ क्षेत्रारामगृहादीनितीर्थान्यायतनानिच ॥ द्वीपाःसमुद्रानद्यश्चनदाश्चान्येसरांसिच ॥ १६४ ॥ गिर
यश्चसुमेर्वाद्याःकाननानिसमंततः ॥ पशवःपक्षिणोवृक्षाःकृमिकीटादयोमृगाः ॥ १६५ ॥ ॥

विनिवृत्ताधिकाराः परित्यक्तसर्वकर्माधिकाराः ॥ १५९ ॥ १६० ॥ १६१ ॥ वैनतेयादयःगरुडादयः ॥ १६२ ॥ १६३ ॥ १६४ ॥ १६५ ॥

Indira Gandhi National Centre for the Arts

॥ १६६ ॥ तत्वानिमहदादीनि ॥ १६७ ॥ १६८ ॥ पंचब्रह्मरूपत्वात्पंचार्थसंज्ञिता ॥ १६९ ॥ १७० ॥ कामिकाद्याआगमविशेषाः ॥ १७१ ॥
॥ १७२ ॥ १७३ ॥ १७४ ॥ सांख्याःकापिलाःवैशेषिकाःकाणादाःयोगाःपातंजलाःनैयायिकागौतमीयाः ॥ १७५ ॥ १७६ ॥ १७७ ॥ १७८ ॥



भुवनान्यपिसर्वाणिभुवनानामधीश्वराः ॥ अंडाद्यावरणैःसार्धमाशाश्चदशदिग्गजाः ॥ १६६ ॥ वर्णाःपदानिमंत्रा
श्चतत्वान्यपिसहाधिपैः ॥ ब्रह्मांडधारकारुद्रारुद्राश्चान्येसशक्तिकाः ॥ १६७ ॥ यच्चकिंचिज्जगत्यस्मिन्दृष्टंचानुमितं
श्रुतम् ॥ सर्वेकामंप्रयच्छंतुशिवयोरेवशासनात् ॥ १६८ ॥ अथविद्यापराशैवीपशुपाशविमोचनी ॥ पंचार्थसंज्ञिता
दिव्यापशुविद्याबहिष्कृता ॥ १६९ ॥ शास्त्रंचशिवधर्माख्यंधर्माख्यंचतदुत्तरम् ॥ शैवाख्यंशिवधर्माख्यंपुराणंश्रुति
संमितम् ॥ १७० ॥ शैवागमाश्चयेचान्येकामिकाद्याश्चतुर्विधाः ॥ शिवाभ्यामविशेषेणसत्कृत्येहसमर्चिताः॥ १७१ ॥
ताभ्यामेवसमाज्ञातामभिप्रेतसिद्धये ॥ कर्मेदमनुमन्यंतांसफलंसाध्वनुष्ठितम् ॥ १७२ ॥ शैवामाहेश्वराश्चैवज्ञा
नकर्मपरायणाः ॥ कर्मेदमनुमन्यंतांसफलंसाध्वनुष्ठितम् ॥ १७३ ॥ लौकिकाब्राह्मणाःसर्वेक्षत्रियाश्चविशःक्रमात्॥
वेदवेदांगतत्वज्ञाःसर्वशास्त्रविशारदाः ॥ १७४ ॥ सांख्यावैशेषिकाश्चैवयोगानैयायिकानराः ॥ सौराब्राह्मास्तथा
रौद्रावैष्णवाश्चापरेनराः ॥ १७५ ॥ शिष्टाःसर्वेविशिष्टाश्चशिवशासनयंत्रिताः ॥ कर्मेदमनुनन्यंतांममाभिप्रेतसाध
कम् ॥ १७६ ॥ शैवाःसिद्धांतमार्गस्थाःशैवाःपाशुपतास्तथा ॥ शैवामहाव्रतधराःशैवाःकापालिकाःपरे ॥ १७७ ॥
शिवाज्ञापालकाःपूज्याममापिशिवशासनात् ॥ सर्वेमामनुगृण्हंतुशंसंतुसफलक्रियाम् ॥ १७८ ॥ दक्षिणज्ञाननिष्ठा
श्चदक्षिणोत्तरमार्गगाः ॥ अविरोधेनवर्ततांमंत्रश्रेयोर्थिनोमम ॥ १७९ ॥ नास्तिकाश्चशठाश्चैवकृतघ्नाश्चैवतामसाः॥
पाषंडाश्चातिपापाश्चवर्ततांदूरतोमम ॥ १८० ॥ बहुभिःकिंस्तुतैरत्रयेपिकेपिचिदास्तिकाः ॥ सर्वेमामनुगृण्हंतुसंतः
शंसंतुमंगलम् ॥ १८१ ॥ नमःशिवायसांबायससुतायादिहेतवे ॥ पंचावरणरूपेणप्रपंचेनावृतायते ॥ १८२ ॥ इ
त्युक्त्वादंडवद्भूमौप्रणिपत्यशिवंशिवाम् ॥ जपेत्पंचाक्षरींविद्यामष्टोत्तरशतावरां ॥ १८३ ॥ ॥

दक्षिणज्ञाननिष्ठाःउदारज्ञानयुक्ताः दक्षिणोत्तरमार्गगाःतेचोक्तायाज्ञवल्क्यस्मृतौ ॥ पितृयाणोजवीथ्याश्चयदगस्त्यस्यचांतरं ॥ तत्राष्टाशीतिसाहस्रामुन
योगृहमेधिनः ॥पुनरावर्तिनोबीजभूताधर्मप्रवर्तकाइति ॥ १७९ ॥ १८० ॥ १८१ ॥ १८२ ॥ १८३ ॥ ॥ ॥



Indira Gandhi National Centre for the Arts

॥ १८४ ॥ १८५ ॥ १८६ ॥ १८७ ॥ १८८ ॥ १८९ ॥ निष्ठस्तत्परः ॥ १९० ॥ १९१ ॥ १९२ ॥ १९३ ॥ इतिश्रीशैवमहापुराणेवायवीय

तथैवशक्तिविद्यांचजपित्वातत्समर्पणम् ॥ कृत्वाक्षमापयित्वेशंपूजाशेषंसमापयेत् ॥ १८४ ॥ एतत्पुण्यतमंस्तोत्रंशिव
योर्हृदयंगमम् ॥ सर्वाभीष्टप्रदंसाक्षाद्भुक्तिमुक्त्येकसाधनं ॥ १८५ ॥ यइदंकीर्तयेन्नित्यंशृणुयाद्वासमाहितः ॥ सवि
धूयाशुपापानिशिवसायुज्यमाप्नुयात् ॥ १८६ ॥ गोघ्नश्चैवकृतघ्नश्चवीरहाभ्रूणहापिवा ॥ शरणागतघातीचमित्र
विश्रंभघातकः ॥ १८७ ॥ दुष्टःपापसमाचारोमातृहापितृहापिवा ॥ स्तवेनायुतजप्तेनतत्तत्पापात्प्रमुच्यते॥१८८॥
दुःस्वप्नादिमहानर्थसूचकेषुभयेषुच ॥ यदिसंकीर्तयेदेतन्नततोऽनर्थभाग्भवेत् ॥ १८९ ॥ आयुरारोग्यमैश्वर्यंयच्चा
न्यदपिवांछितम् ॥ स्तोत्रस्याऽस्यजपेनिष्ठस्तत्सर्वंलभतेनरः ॥ १९० ॥ असंपूज्यशिवंस्तोत्रजपात्फलमुदाहृतम्
संपूज्यचजपेतस्यफलंवक्तुंनशक्यते ॥ १९१ ॥ आस्तामियंफलावाप्तिरेतस्मिन्कीर्तितेसति ॥ सार्धमंबिकयादेवः
श्रुत्वेदंदिवितिष्ठति ॥ १९२ ॥ तस्मान्नभसिसंपूज्यदेवदेवंसहोमया ॥ कृतांजलिपुटस्तिष्ठन्स्तोत्रमेतदुदीरयेत् ॥
॥ १९३ ॥ इतिश्रीशिवमहापुराणेवायवीयसंहितायामुत्तरभागेचतुर्विंशोऽध्यायः ॥ २४ ॥ ॥ छ ॥
॥ उपमन्युरुवाच ॥ एतत्तेकथितंकृष्णकर्मेहामुत्रसिद्धिदम् ॥ क्रियातपोजपध्यानसमुच्चयमयंपरम् ॥ १ ॥ अथव
क्ष्यामिशैवानामिहैवफलदंनृणाम् ॥ पूजाहोमजपध्यानतपोदानमयंमहत् ॥ २ ॥ तत्रसंसाधयेत्पूर्वंमंत्रंमंत्रार्थवि
त्तमः ॥ दृष्टसिद्धिकरंकर्मनान्यथाफलदंयतः ॥ ३ ॥ सिद्धमंत्रोप्यदृष्टेनप्रबलेनतुकेनचित् ॥ प्रतिबद्धफलंकर्मनकु
र्यात्सहसाबुधः ॥ ४ ॥ तस्यतुप्रतिबंधस्यकर्तुंशक्येहनिष्कृतिः ॥ परीक्ष्यशकुनाद्यैस्तुतदानिष्कृतिमाचरेत् ॥ ५ ॥
योऽन्यथाकुरुतेमोहात्कर्मैहिकफलंनरः ॥ नतेनफलभाक्सस्यात्प्राप्नुयाच्चोपहास्यताम् ॥ ६ ॥ ॥

संहिताटीकायांसारबोधिन्यामुत्तरभागेचतुर्विंशोध्यायः ॥ २४ ॥ ॐनमःशिवाय ॥ लिंगपूजाविधानंचप्रकारांतरतोयथा ॥ कर्तव्यंपंचविंशेतदध्यायेत्र
निरूप्यते ॥ १ ॥ १ ॥ २ ॥ अन्यथामंत्रसित्ध्यभावेदृष्टसिद्धिकरंदृष्टफलस्यसाधकंनेत्यर्थः ॥ ३ ॥ ४ ॥ निष्कृतिःपरिहारः ॥ ५ ॥ ६ ॥

अविस्त्रब्धःफलांशेविश्वासरहितः ॥ ७ ॥ ८ ॥ ९ ॥ १० ॥ ११ ॥ १२ ॥ शकृतागोमयेन ॥ १३ ॥ १४ ॥ १५ ॥ १६ ॥ तत्रलिंगे ॥ १७ ॥ १८ ॥



अविस्त्रब्धोनकुर्वीतकर्मदृष्टफलंक्कचित् ॥ सखल्वश्रद्दधानःस्यान्नाऽश्रद्धःफलमृच्छति ॥ ७ ॥ नाऽपराधोऽस्तिदेवस्य
कर्मण्यपितुनिष्फले ॥ यथोक्तकारिणांपुंसामिहैवफलदर्शनात् ॥ ८ ॥ साधकःसिद्धमंत्रश्चनिरस्तप्रतिबंधकः ॥ वि
श्वस्तःश्रद्दधानश्चकुर्वन्नाप्नोतितत्फलम् ॥ ९ ॥ अथवातत्फलावाप्त्यैब्रह्मचर्यरतोभवेत् ॥ रात्रौहविष्यमश्नीयात्पा
यसंवाफलानिवा ॥ १० ॥ हिंसादियन्निषिद्धंस्यान्नकुर्यान्मनसापितत् ॥ सदाभस्मानुलिप्तांगःसुवेषश्चशुचिर्भवेत् ॥
॥ ११ ॥ इत्थमाचारवान्भूत्वास्वानुकूलेशुभेऽहनि ॥ पूर्वोक्तलक्षणेदेशेपुष्पदामाद्यलंकृते ॥ १२ ॥ आलिप्यशकृता
भूमिंहस्तमानावरांतथा ॥ विलिखेत्कमलंभद्रंदीप्यमानंस्वतेजसा ॥ १३ ॥ तप्तजांबूनदमयमष्टपत्रंसकेसरम् ॥
मध्येकर्णिकयायुक्तंसर्वरत्नैरलंकृतम् ॥ १४ ॥ स्वाकारसदृशेनैवनालेनचसमन्वितम् ॥ तादृशेस्वर्णनिर्माणेकंदेस
म्यक्प्रतिष्ठितम् ॥ १५ ॥ तत्राणिमादिकंसर्वंसंकल्प्यमनसापुनः ॥ रत्नजंवाथसौवर्णंस्फाटिकंवासलक्षणम् ॥ १६ ॥
लिंगंसवेदिकंतत्रस्थापयित्वाविधानतः ॥ तत्रावाह्ययजेद्देवंसांबंसगणमव्ययम् ॥ १७ ॥ तत्रमाहेश्वरीकल्प्यामूर्ति
र्मूर्तिमतःप्रभोः ॥ चतुर्भुजाचतुर्वक्त्रासर्वाभरणभूषिता ॥ १८ ॥ शार्दूलचर्मवसनाकिंचिद्विहसितानना ॥ वरदाभय
हस्ताचमृगटंकधरातथा ॥ १९ ॥ अथवाष्टभुजाचिंत्याचिंतकस्ययथारुचि ॥ तदात्रिशूलपरशुखड्गवज्राणिदक्षिणे ॥
॥ २० ॥ वामेपाशांकुशेतद्वत्खेटंनागंचबिभ्रती ॥ बालार्कसदृशप्रख्याप्रतिवक्त्रंत्रिलोचना ॥ २१ ॥ तस्याःपूर्वमुखं
सौम्यंस्वाकारसदृशप्रभम् ॥ दक्षिणंनीलजीमूतसदृशंघोरदर्शनम् ॥ २२ ॥ उत्तरंविद्रुमप्रख्यंनीलालकविभूषित
म् ॥ पश्चिमंपूर्णचंद्राभंसौम्यमिंदुकलाधरम् ॥ २३ ॥ तस्यांकमंडलारूढाशक्तिर्माहेश्वरीपरा ॥ महालक्ष्मीरिति
ख्याताश्यामासर्वमनोहरा ॥ २४ ॥ ॥ ॥ ॥ ॥



॥ १९ ॥ २० ॥ २१ ॥ २२ ॥ २३ ॥ २४ ॥ ॥ ॥ ॥ ॥

Indira Gandhi National Centre for the Arts

॥ २ ५॥कापिलंकपिलागोर्निष्पन्नं॥बीजानिधान्यानि॥ २ ६॥ २ ७॥ २ ८॥समंत्रमिति ॥ सकूर्चसपिधानकमितिपाठांतरं ॥ २ ९ ॥ ३ ० ॥ ३ १ ॥ ३ २ ॥ ३ ३॥

मूर्तिंकृत्वैवमाकारांसकलीकृत्यचक्रमात् ॥ मूर्तिमंतमथावाह्ययजेत्परमकारणम् ॥ २५ ॥ स्नानार्थंकल्पयेत्तत्रपंच
गव्यंतुकापिलं ॥ पंचामृतंचपूर्णानिबीजानिचविशेषतः ॥ २६ ॥ पुरस्तान्मंडलंकृत्वारत्नचूर्णाद्यलंकृतम् ॥ कर्णिका
यांप्रविन्यस्यईशानकलशंपुनः ॥ २७ ॥ सद्यादिकलशान्पश्चात्परितस्तस्यकल्पयेत् ॥ ततोविद्येशकलशानष्टौपू
र्वादिदिक्क्रमात् ॥ २८ ॥ तीर्थांबुपूरितान्कृत्वासूत्रेणावेष्ट्यपूर्ववत् ॥ पुण्यद्रव्याणिनिक्षिप्यसमंत्रंसविधानकम् ॥
॥ २९ ॥ दुकूलाद्येनवस्त्रेणसमाच्छाद्यसमंततः ॥ सर्वत्रमंत्रंविन्यस्यतत्तन्मंत्रपुरःसरम् ॥ ३० ॥ स्नानकालेतुसंप्रा
प्तेसर्वमंगलनिस्वनैः ॥ पंचगव्यादिभिश्चैवस्नापयेत्परमेश्वरं ॥ ३१ ॥ ततःकुशोदकाद्यानिस्वर्णरत्नोदकान्यपि ॥
गंधपुष्पादिसिद्धानिमंत्रसिद्धानिचक्रमात् ॥ ३२ ॥ उत्धृत्योत्धृत्यमंत्रेणतैस्तैःस्नाप्यमहेश्वरम् ॥ गंधपुष्पादिदीपां
श्चपूजाकर्मसमाचरेत् ॥ ३३ ॥ पलावरःस्यादालेपएकादशपलोत्तरः ॥ सुवर्णरत्नपुष्पाणिशुभ्राणिसुरभीणिच ॥
॥ ३४ ॥ नीलोत्पलाद्युत्पलानिबिल्वपत्राण्यनेकशः ॥ कमलानिचरक्तानिश्वेतान्यपिचसंभवे ॥३५॥ कृष्णागुरूद्भ
वोधूपःसकर्पूराज्यगुग्गुलः ॥ कपिलाघृतसंसिद्धादीपाःकर्पूरवर्तिजाः ॥ ३६ ॥ पंचब्रह्मषडंगानिपूज्यान्यावरणा
निच ॥ निवेद्यःपयसासिद्धःसगुडाज्योमहाचरुः ॥३७॥ पाटलोत्पलपत्राद्यैःपानीयंचसुगंधितम् ॥ पंचसौगंधिको
पेतंतांबूलंचसुसंस्कृतम् ॥ ३८ ॥ सुवर्णरत्नसिद्धानिभूषणानिविशेषतः ॥ वासांसिचविचित्राणिसूक्ष्माणिचनवानि
च ॥ ३९ ॥ दर्शनीयानिदेयानिगानवाद्यादिभिःसह ॥ जपश्चमूलमंत्रस्यलक्षःपरमसंख्यया ॥ ४० ॥ एकावरात्र्यु
त्तराचपूजाफलवशादिह ॥ दशसंख्यावरोहोमःप्रतिद्रव्यंशतोत्तरः ॥ ४१ ॥ घोररूपःशिवश्चित्योमारणोच्चाटना
दिषु ॥ शिवलिंगेशिवाग्नौचशांतःशांतिकपौष्टिके ॥ ४२ ॥ ॥ ॥ ॥

पलावरःपलंकर्षचतुष्टयंततोधिकः ॥ आलेपउद्वर्त्तनद्रव्यं॥एकादशेति ॥ एकादशपलान्न्यूनइत्यर्थः ॥ ३ ४ ॥ ३ ५ ॥ ३ ६ ॥ ३ ७ ॥ ३ ८ ॥ ३ ९ ॥ देयानि
दिव्यानीतिपाठांतरं ॥ ४ ० ॥ एकावरेति ॥ एकवारादधिकात्रिवारान्न्यूनापूजाकार्येत्यर्थः ॥ ४ १ ॥ ४ २ ॥ ॥ ॥

Indira Gandhi National Centre for the Arts

आयसौलोहमयौ ॥ ४३ ॥ ४४ ॥ ४५ ॥ जातिपुष्पेणमालतीपुष्पेण ॥ ४६ ॥ ४७ ॥ ४८ ॥ रोहीरोहितकवृक्षः ॥ लांगलकोनालिकेरस्तस्यतैलेनेत्यर्थः ॥ ४९ ॥ ५० ॥ कद्रूषोधान्यविशेषः ॥ कंगूजतुषेतिपाठांतरं ॥ ५१ ॥ ५२ ॥ क्षौद्रंमधु ॥ ५३ ॥ समिदादिभिःआदिशब्देनचर्वाज्यतिलादयोग्राह्याः॥ ॥ ५४ ॥ ५५ ॥ ५६ ॥ ५७ ॥ आततायिनमिति ॥ आततायिनमायांतमपिवेदांतगंरणे ॥ जिघांसंतंजिघांसीयान्नतेनब्रह्महाभवेदितिस्मृतेरितिभावः ॥



आयसौस्रुक्स्रुवौकार्यौमारणादिषुकर्मसु ॥ तदन्यत्रतुसौवर्णौशांतिकाद्येषुकृत्स्नशः ॥ ४३ ॥ दूर्वयाघृतगोक्षीरमिश्रयामधुनातथा ॥ चरुणासघृतेनैवकेवलंपयसापिवा ॥४४॥ जुहुयान्मृत्युविजयेतिलैरोगोपशांतये ॥ घृतेनपयसाचैवकमलैर्वाथकेवलैः ॥ ४५ ॥ समृद्धिकामोजुहुयान्महादारिद्र्यशांतये ॥ जातिपुष्पेणवश्यार्थीजुहुयात्सघृतेनतु ॥ ४६ ॥ घृतेनकरवीरैश्चकुर्यादाकर्षणंद्विजः ॥ तैलेनोच्चाटनंकुर्यात्स्तंभनंमधुनापुनः ॥ ४७ ॥ स्तंभनंसर्षपेणापिलशुनेनतुपातनम् ॥ताडनंरुधिरेणस्यात्खरस्योष्ट्रस्यचोभयोः ॥ ४८ ॥ मारणोच्चाटनेकुर्याद्रोहिबीजैस्तिलान्वितैः॥ विद्वेषणंचतैलेनकुर्याल्लांगलकस्यतु ॥ ४९ ॥ बंधनंरोहिबीजेनसेनास्तंभनमेवच ॥ रक्तसर्षपसंमिश्रैर्होमद्रव्यैरशेषतः ॥ ५० ॥ हस्तयंत्रोद्भवैस्तैलैर्जुहुयादाभिचारके ॥ कद्रूषतुषसंयुक्तैःकार्पासास्थिभिरेवच ॥५१॥ सर्षपैस्तैलसंमिश्रैर्जुहुयादाभिचारिके ॥ ज्वरोपशांतिदंक्षीरंसौभाग्यफलदंतथा ॥ ५२ ॥ सर्वसिद्धिकरोहोमःक्षौद्राज्यदधिभिर्युतैः ॥ क्षीरेणतंडुलैश्चैवचरुणाकेवलेनवा ॥ ५३ ॥ शांतिकंपौष्टिकंवापिसप्तभिःसमिदादिभिः ॥ द्रव्यैर्विशेषतोहोमेवश्यमाकर्षणंतथा ॥ ५४ ॥ वश्यमाकर्षणंचैवश्रीपदंचविशेषतः ॥ बिल्वपत्रैस्तुहवनंशत्रोर्विजयदंतथा ॥ ५५ ॥ समिधःशांतिकार्येषुपालाशखदिरादिकाः ॥ करवीरार्कजाःक्रूराःकंटकिन्यस्तुनिग्रहे ॥ ५६ ॥ प्रशांतःशांतिकंकुर्यात्पौष्टिकंचविशेषतः ॥निर्घृणःक्रुद्धचित्तस्तुप्रकुर्यादाभिचारिकं ॥५७॥ अतीवदुरवस्थायांप्रतीकारांतरंनचेत्॥आततायिनमुद्दिश्यप्रकुर्यादाभिचारिकम् ॥५८॥ स्वराष्ट्रपतिमुद्दिश्यनकुर्यादाभिचारिकम् ॥ यद्यास्तिकःसुधर्मिष्ठोमान्योवायोपिकोपिवा ॥५९॥ तमुद्दिश्यापिनोकुर्यादाततायिनमप्युत॥मनसाकर्मणावाचायोपिकोपिशिवाश्रितः ॥ ६० ॥

आततायिनःस्मृतिषूक्ताः ॥ अग्निदोगरदश्चैवशस्त्रपाणिर्धनापहः॥क्षेत्रदारहरश्चैवषडेतेआततायिनइति ॥५८॥५९॥ आततायिनमपीति ॥ तथाचकात्यायनः ॥आततायिनिचोत्कृष्टेतपःस्वाध्यायजन्मतः ॥ वधस्तत्रतुनैवस्यात्पापंहिनवधेतुनेति ॥ अतएवपापमेवाश्रयेदस्मान्हत्वैतानाततायिनइतिगीतायामुक्तं॥६०॥



Indira Gandhi National Centre for the Arts

॥ ६१ ॥ ६२ ॥ ६३ ॥ आर्षके ऋषिभिःस्थापिते ॥ वैदिके श्रुतिप्रसिद्धे ॥ ६४ ॥ प्रतिरूपकैःप्रतिनिधिभूतैः ॥ ६५ ॥ ६६ ॥ ६७ ॥ ६८ ॥ ६९ ॥
एवमाचरेदिति ॥ शिवभक्तेभ्यएवदद्यादित्यर्थः नगृण्हीयादिति ॥ तद्द्रव्यस्यचंडायसमर्पणीयत्वादितिभावः॥तदुक्तंसिद्धांतशेखरे ॥ अन्यदन्नादिपानीयंतांबू
लंगंधपुष्पकं ॥ दद्याच्चंडायनिर्माल्यंशिवभक्तस्तुसर्वशइति ॥ ७० ॥ ७१ ॥ अर्चितमिति ॥ देवादिभिरर्चितंज्योतिर्लिंगादितत्रत्यद्रव्यग्रहणेकामचारइत्य

स्वराष्ट्रपतिमुद्दिश्यशिवाश्रितमथापिवा ॥ कृत्वाभिचारिकंकर्मसद्योविनिपतेन्नरः ॥ ६१ ॥ स्वराष्ट्रपालकंतस्माच्छि
वभक्तंचकंचन ॥ नहिंस्यादभिचाराद्यैर्यदीच्छेत्सुखमात्मनः ॥ ६२ ॥ अन्यंकमपिचोद्दिश्यकृत्वावैमारणादिकम् ॥
पश्चात्तापेनसंयुक्तःप्रायश्चित्तंसमाचरेत् ॥ ६३ ॥ बाणलिंगेपिवाकुर्यान्निर्धनोधनवानपि ॥ स्वयंभूतेऽथवालिंगेआ
र्षकेवैदिकेपिवा ॥ ६४ ॥ अभावेहेमरत्नानामशक्तौचतदर्जने ॥ मनसैवाचरेदेतद्द्रव्यैर्वाप्रतिरूपकैः ॥ ६५ ॥ क्वचि
दंशेतुयःशक्तस्त्वशक्तःक्वचिदंशके ॥ सोपिशक्त्यनुसारेणकुर्वंश्चेत्फलमृच्छति ॥ ६६ ॥ कर्मण्यनुष्ठितेप्यस्मिन्फलंय
त्रनदृश्यते ॥ द्विस्त्रिर्वावर्तयेत्तत्रसर्वथादृश्यतेफलम् ॥ ६७ ॥ पूजोपयुक्तंयद्द्रव्यंहेमरत्नाद्यनुत्तमम् ॥ तत्सर्वंगुरवेद
द्याद्दक्षिणांचततःपृथक् ॥ ६८ ॥ सचेन्नेच्छतितत्सर्वंशिवायविनिवेदयेत् ॥ अथवाशिवभक्तेभ्योनान्येभ्यस्तुप्रदीयते
॥ ६९ ॥ यःस्वयंसाधयेच्छक्त्यागुर्वादिनिरपेक्षया ॥ सोप्येवमाचरेदत्रनगृण्हीयात्स्वयंपुनः ॥ ७० ॥ स्वयंगृण्हा
तियोलोभात्पूजांगंद्रव्यमुत्तमं ॥ कांक्षितंनलभेन्मूढोनात्रकार्याविचारणा ॥ ७१ ॥ अर्चितंयत्तुतल्लिंगंगृण्हीयाद्दान
वास्वयम् ॥ गृण्हीयाद्यदितन्नित्यंस्वयंवान्योपिवार्चयेत् ॥ ७२ ॥ यथोक्तमेवकर्मैतदाचरेद्योऽनपायतः ॥ फलंव्यभि
चरेन्नैवमित्यतःकिंप्ररोचकम् ॥ ७३ ॥ तथाप्युद्देशतोवक्ष्येकर्मणःसिद्धिमुत्तमाम् ॥ अपिशत्रुभिराक्रांतोव्याधिभिर्वा
प्यनेकशः ॥ ७४ ॥ मृत्योरास्यगतश्चापिमुच्यतेनिरपायतः ॥ राजायतेतिकृपणोरिक्तोवैश्रवणायते ॥ ७५ ॥ का
मायतेविरूपोपिवृद्धोपितरुणायते ॥ शत्रुर्मित्रायतेसद्योविरोधीकिंकरायते ॥ ७६ ॥ ॥

र्थः ॥ तदुक्तंपुरुषार्थप्रबोधेभविष्ये ॥ ज्योतिर्लिंगंविनालिंगंयःपूजयतिसत्तमः ॥ तस्यनैवेद्यनिर्माल्यभक्षणात्तप्तकृच्छ्रकं ॥ बाणलिंगेस्वयंभूतेचंद्रकांतेहृदि
स्थिते ॥ चांद्रायणसमंज्ञेयंशंभोर्नैवेद्यभक्षणं ॥ लिंगेस्वयंभवेबाणेरत्नजेरसनिर्मिते ॥ सिद्धप्रतिष्ठितेचैवनचंडाधिकृतिर्भवेत् ॥ यत्रचंडाधिकारोस्तितद्भोक्त
व्यंनमानवैरिति॥गृण्हीयादितियदिस्वयमन्योवानित्यमर्चयेत्तदागृण्हीयादेवेत्यर्थः ॥ ७२ ॥ अनपायतःअप्रमादेन ॥ आचरेद्योनवायतइतिक्वचित्पाठः ॥ ७३ ॥
उद्देशतःसंक्षेपेण ॥ ७४ ॥ निरपायतःअक्लेशेन ॥ रिक्तोदरिद्रः ॥ ७५ ॥ ७६ ॥ ॥ ॥ ॥

Indira Gandhi National Centre for the Arts

॥७७॥श्वभ्रंगर्तः॥७८॥वनंवृक्षयुक्तप्रदेशमात्रंउद्यानंराजक्रीडोचितआरामः॥७९॥ अभिसारिकायंतेस्वयंवश्याभवंति ॥८०॥ वज्रसूचीयतेवज्रसदृशसूचिव
दाचरति॥यद्वावज्रस्यापिवेधिकायासूचिस्तद्वदाचरति॥८१॥८२॥कुणपायंतेशववदाचरंते॥८३॥८४॥अनागतेति॥आदिनाअतीतादिकं॥८५॥८६॥इतिश्री



विषायतेयदमृतंविषमप्यमृतायते ॥ स्थलायतेसमुद्रोपिस्थलमप्यर्णवायते ॥ ७७ ॥ महीधरायतेश्वभ्रंसचश्वभ्रा
यतेगिरिः ॥ पद्माकरायतेवन्हिःसरोवैश्वानरायते ॥ ७८ ॥ वनायतेयदुद्यानंतदुद्यानायतेवनम् ॥ सिंहायतेमृगः
क्षुद्रःसिंहःक्रीडामृगायते ॥ ७९ ॥ स्त्रियोभिसारिकायंतेलक्ष्मीःसुचरितायते ॥ स्वैरप्रेष्यायतेवाणीकीर्तिस्तुगणि
कायते ॥ ८० ॥ स्वैराचारायतेमेधावज्रसूचीयतेमनः ॥ महावातायतेशक्तिर्बलंमत्तगजायते ॥ ८१ ॥ स्तंभायतेस
होद्योगःशत्रुपक्षेस्थिताक्रिया ॥ शत्रुपक्षायतेऽरीणांसर्वएवसुहृज्जनः ॥ ८२ ॥ शत्रवःकुणपायंतेजीवंतोपिसबांध
वाः ॥ आपन्नोपिगतारिष्टःस्वयंखल्वमृतायते ॥ ८३ ॥ रसायनायतेनित्यमपथ्यमपिसेवितम् ॥ अनिशंक्रियमा
णापिरतिस्त्वभिनवायते ॥ ८४ ॥ अनागतादिकंसर्वंकरस्थामलकायते ॥ यादृच्छिकफलायंतेसिद्धयोप्यणिमादयः
॥ ८५ ॥ बहुनात्रकिमुक्तेनसर्वकामार्थसिद्धिषु ॥ अस्मिन्कर्मणिनिर्वृत्तेत्वनवाप्यंनविद्यते ॥ ८६ ॥ इतिश्रीशिवम
हापुराणेवायवीयसंहितायामुत्तरभागेपंचविंशोऽध्यायः ॥ २५ ॥ छ ॥ उपमन्युरुवाच ॥ अतःपरंप्रवक्ष्यामिकेव
लामुष्मिकंविधिम् ॥ नैतेनसदृशंकिंचित्कर्मास्तिभुवनत्रये ॥ १ ॥ पुण्यातिशयसंयुक्तःसर्वदेवैरनुष्ठितः ॥ ब्रह्मणा
विष्णुनाचैवरुद्रेणचविशेषतः ॥ २ ॥ इंद्रादिलोकपालैश्चसूर्याद्यैर्नवभिर्ग्रहैः ॥ विश्वामित्रवसिष्ठाद्यैर्ब्रह्मविद्भिर्महर्षि
भिः ॥ ३ ॥ श्वेतागस्त्यदधीचाद्यैरस्माभिश्चशिवाश्रितैः ॥ नंदीश्वरमहाकालचंडीशाद्यैर्गणेश्वरैः ॥ ४ ॥ पातालवा
सिभिर्दैत्यैःशेषाद्यैश्चमहोरगैः ॥ सिद्धैर्यक्षैश्चगंधर्वैरक्षोभूतपिशाचकैः ॥ ५ ॥ स्वंस्वंपदमनुप्राप्तुंसर्वैरयमनुष्ठितः ॥
अनेनविधिनासर्वेदेवादेवत्वमागताः ॥ ६ ॥ ब्रह्माब्रह्मत्वमापन्नोविष्णुर्विष्णुत्वमागतः ॥ रुद्रोरुद्रत्वमापन्नइंद्रश्चेंद्र
त्वमागतः ॥ ७ ॥ गणेशश्चगणेशत्वमनेनविधिनागतः ॥ सितचंदनतोयेनलिंगंस्नाप्यशिवंशिवाम् ॥ ८ ॥ श्वेतैर्वि
कसितैःपद्मैःसंपूज्यप्रणिपत्यच ॥ तत्रपद्मासनंरम्यंकृत्वालक्षणसंयुतं ॥ ९ ॥ ॥ ॥

शैवमहापुराणेवायवीयसंहिताटीकायांसारबोधिन्यामुत्तरभागेकाम्यपूजादिकथनंनामपंचविंशोध्यायः॥२५॥ ॐनमःशिवाय ॥ शिवपूजाविधानेनयेनब्रह्माद
यःसुराः॥प्राप्ताःस्वस्वपदंह्येतत्षड्विंशेत्रनिरूप्यते १ केवलामुष्मिकंपारलौकिकफलस्यैवजनकं॥१॥२॥३॥४॥५॥अयंविधिः॥६॥७॥विधिमाह॥सितेति॥८॥९

कनीयसंपुंस्त्वमार्षं ॥ १० ॥ ११ ॥ १२ ॥ १३ ॥ विकाशानिविस्तृतानि ॥ १४ ॥ १५ ॥ १६ ॥ १७ ॥ १८ ॥ इतिश्रीशैवमहापुराणेवायवीयसंहिताटीकायांसारबोधिन्यामुत्तरभागेपूजादिकथनंनामषाड्विंशोध्यायः ॥ २६ ॥ ओंनमःशिवाय ॥ लिंगसाक्षात्कृतिर्विष्णोर्ब्रह्मणश्चाभवच्चया ॥ तथा

विभवेसतिहेमाद्यैरत्नाद्यैर्वास्वशक्तितः ॥ मध्येकेसरजालस्यस्थाप्यलिंगंकनीयसम् ॥ १० ॥ अंगुष्ठप्रतिमंरम्यंसर्वगंधमयंशुभम् ॥ दक्षिणेस्थापयित्वातुबिल्वपत्रैःसमर्चयेत् ॥ ११ ॥ अगुरुंदक्षिणेपार्श्वेपश्चिमेतुमनःशिलाम् ॥ उत्तरेचंदनंदद्याद्धरितालंतुपूर्वतः ॥ १२ ॥ सुगंधैःकुसुमैरम्यैर्विचित्रैश्चापिपूजयेत् ॥ धूपंकृष्णागुरुंदद्यात्सघृतंचसगुग्गुलुं ॥ १३ ॥ वासांसियानिसूक्ष्माणिविकाशानिनिवेदयेत् ॥ पायसंघृतसंमिश्रंघृतदीपांश्चदापयेत् ॥ १४ ॥ सर्वंनिवेद्यमंत्रेणततोगच्छेत्प्रदक्षिणम् ॥ प्रणम्यभक्त्यादेवेशंस्तुत्वाचांतेक्षमापयेत् ॥ १५ ॥ सर्वोपहारसंमिश्रंतल्लिंगंचनिवेदयेत् ॥ शिवायशिवमंत्रेणदक्षिणांमूर्तिमाश्रितः ॥ १६ ॥ एवंयोर्चयतेनित्यंपंचगंधमयंशुभम् ॥ सर्वपापविनिर्मुक्तःशिवलोकेमहीयते ॥ १७ ॥ एतद्व्रतोत्तमंगुह्यंशिवलिंगमहाव्रतम् ॥ भक्तस्यतेसमाख्यातंनदेयंयस्यकस्यचित् ॥ देयंचशिवभक्तेभ्यःशिवेनकथितंपुरा ॥ १८ ॥ इतिश्रीशिवमहापुराणेवायवीयसंहितायामुत्तरभागेषड्विंशोऽध्यायः ॥ २६ ॥ ॥ छ ॥ उपमन्युरुवाच ॥ नित्यान्नैमित्तिकात्काम्याद्यासिद्धिरिहकीर्तिता ॥ सासर्वालभ्यतेसद्योलिंगबेरप्रतिष्ठया ॥ १ ॥ सर्वोलिंगमयोलोकःसर्वंलिंगेप्रतिष्ठितम् ॥ तस्मात्प्रतिष्ठितेलिंगेभवेत्सर्वंप्रतिष्ठितम् ॥ २ ॥ ब्रह्मणाविष्णुनावापिरुद्रेणान्येनकेनवा ॥ लिंगप्रतिष्ठामुत्सृज्यक्रियतेस्वपदस्थितिः ॥ ३ ॥ किमन्यदिहवक्तव्यंप्रतिष्ठांप्रतिकारणम् ॥ प्रतिष्ठितंशिवेनापिलिंगंवैश्वेश्वरंयतः ॥ ४ ॥ तस्मात्सर्वप्रयत्नेनपरत्रेहचशर्मणे ॥ स्थापयेत्परमेशस्यलिंगंबेरमथापिवा ॥ ५ ॥ श्रीकृष्णउवाच ॥ किमिदंलिंगमाख्यातंकथंलिंगीमहेश्वरः ॥ कथंचलिंगभावोस्यकस्मादस्मिन्शिवोर्च्यते ॥ ६ ॥ उपमन्युरुवाच ॥ अव्यक्तंलिंगमाख्यातंत्रिगुणप्रभवाप्ययं ॥ अनाद्यंतंचविश्वस्ययदुपादानकारणम् ॥ ७ ॥ ॥ ॥ ॥ ॥ ॥

प्रतिष्ठालिंगादेर्वर्ण्यतेसप्तविंशके ॥ १ ॥ बेरंमूर्तिः ॥ १ ॥ २ ॥ केनेति ॥ नकेनापीत्यर्थः ॥ ३ ॥ ४ शर्मणेसुखाय ॥ ५ ॥ अस्यमहेश्वरस्य ॥ अस्मिन्लिंगे ॥ ६ ॥ अव्यक्तंकारणस्वरूपं ॥ तदेवाह ॥ त्रिगुणेति ॥ त्रयाणांगुणानांसत्वादीनामुत्पत्तिलयस्थानमित्यर्थः ॥ ७ ॥ ॥

Indira Gandhi National Centre for the Arts

गगनेति ॥ गगनस्यप्रथममुत्पन्नत्वात्कार्यकारणयोरभेदाच्चगगनात्मिकेत्युक्तं ॥ ८ ॥ अशुद्धंतामसंतिर्यक्पशुपक्ष्यादि ॥ शुद्धंसात्विकंदेवादिशुद्धाशुद्धंमिश्रमनुष्यरूपं ॥ ९ ॥ इंद्रियैःसहभूतानिचजातानीत्यर्थः ॥ १० ॥ तल्लिंगं ॥ अनाज्ञातमविज्ञातं ॥ ११ ॥ १२ ॥ १३ ॥ १४ ॥ तदेवलिंगमेव ॥ १५ ॥



तदेवमूलप्रकृतिर्मायाचगगनात्मिका ॥ ततएवसमुत्पन्नंजगदेतच्चराचरम् ॥ ८ ॥ अशुद्धंचैवशुद्धंयच्छुद्धाशुद्धंचतत्त्रिधा ॥ ततःशिवोमहेशश्चरुद्रोविष्णुःपितामहः ॥ ९ ॥ भूतानिचेंद्रियैर्जातालीयंतेत्रशिवाज्ञया ॥ अतएवशिवोलिंगीलिंगमाज्ञापयेद्यतः ॥१०॥ यतोनतदनाज्ञातंकार्यायप्रभवेत्स्वतः ॥ ततोजातस्यविश्वस्यतत्रैवविलयोयतः ॥११॥ अनेनलिंगतातस्यभवेन्नान्येनकेनचित् ॥ लिंगंचशिवयोर्देहस्ताभ्यांयस्मादधिष्ठितम् ॥ १२ ॥ अतस्तत्रशिवःसांबोनित्यमेवसमर्च्यते ॥ लिंगंदेवीमहादेवीलिंगंसाक्षान्महेश्वरः ॥ १३ ॥ तयोःसंपूजनादेवसचसाचसमर्चितौ ॥ नतयोर्लिंगदेहत्वंविद्यतेपरमार्थतः ॥ १४ ॥ यतःस्वतोविशुद्धौतौदेहस्तदुपचारतः ॥ तदेवपरमाशक्तिःशिवस्यपरमात्मनः ॥ १५ ॥ शक्तिराज्ञायदाज्ञातंप्रसूतेतच्चराचरम् ॥ नतस्यमहिमाशक्योवक्तुंवर्षशतैरपि ॥ १६ ॥ येनादौमोहितौस्यातांब्रह्मनारायणावपि ॥ पुरात्रिभुवनस्यास्यप्रलयेसमुपस्थिते ॥ १७ ॥ वारिशय्यागतोविष्णुःसुष्वापानाकुलःसुखं ॥ यदृच्छयागतस्तत्रब्रह्मालोकपितामहः ॥ १८ ॥ ददर्शपुंडरीकाक्षंस्वपंतंतमनाकुलम् ॥ माययामोहितःशंभोर्विष्णुमाहपितामहः ॥ १९ ॥ कस्त्वंवदेत्यमर्षेणप्रहत्योत्थाप्यमाधवम् ॥ सतुहस्तप्रहारेणतीव्रेणाभिहतःक्षणात् ॥ २० ॥ प्रबुध्योत्थायशयनाद्ददर्शपरमेष्ठिनम् ॥ तमाहचांतःसंक्रुद्धःस्वयंनक्रुद्धवद्धरिः ॥ २१ ॥ कुतस्त्वमागतोवत्सकस्मात्त्वंव्याकुलोवद ॥ इतिविष्णुवचःश्रुत्वाप्रभुत्वगुणसूचकम् ॥२२॥ रजसाबद्धवैरस्तंब्रह्मापुनरभाषत ॥ वत्सेतिमांकुतोब्रूषेगुरुःशिष्यमिवात्मनः ॥ २३ ॥ मांनजानासिकिंनाथंप्रपंचोयस्यमेकृतिः ॥ त्रिधात्मानंविभज्येदंसृष्ट्वाथपरिपाल्यते ॥२४॥ संहरामिनमेकश्चित्स्त्रष्टाजगतिविद्यते ॥ इत्युक्तेसतिसोप्याहब्रह्माणंविष्णुरव्ययः २५॥ ॥५६॥

आज्ञातंशिवेनबोधितं ॥ १६ ॥ १७ ॥ १८ ॥ १९ ॥ २० ॥ २१ ॥ २२ ॥ २३ ॥ प्रपंचोजगत् ॥ त्रिधात्मानंब्रह्मविष्णुरुद्ररूपेणेत्यर्थः ॥ २४ ॥ २५ ॥

Indira Gandhi National Centre for the Arts

॥ २६ ॥ २७ ॥ मामिति ॥ मामनाथमनन्यजमितिपाठांतरं ॥ २८ ॥ एष्यतिगमिष्यति ॥ २९ ॥ ३० ॥ ३१ ॥ ३२ ॥ ३३ ॥ ३४ ॥ ३५ ॥

अहमेवादिकर्तास्यहर्ताचपरिपालकः ॥ भवानपिममैवांगादवतीर्णःपराव्ययात् ॥ २६ ॥ मन्नियोगात्त्वमात्मानंत्रि
धाकृत्वाजगत्त्रयम् ॥ सृजस्यवसिचांतेतत्पुनःप्रतिसृजस्यपि ॥ २७ ॥ विस्मृतोसिजगन्नाथंनारायणमनामयम् ॥ तवा
पिजनकंसाक्षान्मामेवमवमन्यसे ॥ २८ ॥ तवापराधोनास्त्यत्रभ्रांतोसिमममायया ॥ मत्प्रसादादियंभ्रांतिरप्येष्य
तितवाचिरात् ॥ २९ ॥ शृणुसत्यंचतुर्वक्त्रसर्वदेवेश्वरोह्यहम् ॥ कर्ताभर्ताचहर्ताचनमयास्तिसमोविभुः ॥ ३० ॥ एव
मेवविवादोऽभद्ब्रह्मविष्ण्वोःपरस्परम् ॥ अभवच्चमहायुद्धंभैरवंरोमहर्षणम् ॥ ३१ ॥ मुष्टिभिर्निघ्नतोस्तीव्रंरजसाब
द्धवैरयोः ॥ तयोर्दर्पापहारायप्रबोधायचदेवयोः ॥ ३२ ॥ मध्येसमाविरभवल्लिंगमैश्वरमद्भुतम् ॥ ज्वालामालासह
स्राढ्यमप्रमेयमनौपमम् ॥ ३३ ॥ क्षयवृद्धिविनिर्मुक्तमादिमध्यांतवर्जितम् ॥ तस्यज्वालासहस्रेणब्रह्मविष्णूविमो
हितौ ॥ ३४ ॥ विसृज्ययुद्धंकिंत्वेतदित्यचिंतयतांतदा ॥ नतयोस्तस्ययाथात्म्यंप्रबुद्धमभवद्यदा ॥ ३५ ॥ तदासमुद्य
तौस्यातांतस्याद्यंतंपरीक्षितुं ॥ तत्रहंसाकृतिर्ब्रह्माविश्वतःपक्षसंयुतः ॥ ३६ ॥ मनोनिलजवोभूत्वागतस्तूर्ध्वंप्रयत्न
तः ॥ नारायणोपिविश्वात्मानीलांजनचयोपमं ॥ ३७ ॥ वाराहममितंरूपमास्थायगतवानधः ॥ एवंवर्षसहस्रंतुत्व
रन्विष्णुरधोगतः ॥ ३८ ॥ नापश्यदल्पमप्यस्यमूलंलिंगस्यशूकरः ॥ तावत्कालंगतश्चोर्ध्वंतस्यांतंज्ञातुमिच्छया ॥
॥ ३९ ॥ श्रांतोऽत्यंतमदृष्ट्वांतंपपाताऽधःपितामहः ॥ तथैवभगवान्विष्णुःश्रांतःसंविग्नलोचनः ॥ ४० ॥ क्लेशेनमह
तातूर्णमधस्तादुत्थितोभवत् ॥ समागतावथाऽन्योन्यंविस्मयस्मेरवीक्षणौ ॥ ४१ ॥ माययामोहितौशंभोःकृत्याकृत्यंनज
ग्मतुः ॥ पृष्ठतःपार्श्वतस्तस्यचाग्रतश्चास्थितावुभौ ॥ ४२ ॥ प्रणिपत्यकिमात्मेदमित्यचिंतयतांतदा ॥ अथाविरभवत्तत्र
सनादंशब्दलक्षणम् ॥ ४३ ॥ ओमित्येकाक्षरंब्रह्मब्रह्मणःप्रतिपादकम् ॥ तदप्यविदितंतावद्ब्रह्मणाविष्णुनातथा ॥
॥ ४४ ॥ रजसातमसाचित्तंतयोर्यस्मात्तिरस्कृतम् ॥ तदाविभक्तमभवच्चतुर्धैकंतदक्षरम् ॥ ४५ ॥ ॥

॥ ३६ ॥ ३७ ॥ ३८ ॥ ३९ ॥ ४० ॥ अधस्तात्अधःप्रदेशात् ॥ ४१ ॥ नजग्मतुःनज्ञातवंतौ ॥ तस्यलिंगस्यअनेनसर्वव्यापित्वंलिंगस्यदर्शितं ॥
॥ ४२ ॥ ४३ ॥ ४४ ॥ ४५ ॥ ॥ ॥ ॥ ॥ ॥

Indira Gandhi National Centre for the Arts

॥ ४६ ॥ ४७ ॥ विभागार्थंविभज्यमानावयवार्थ ॥ ४८ ॥ ४९ ॥ ५० ॥ तमेवार्थमाह ॥ रजइति ॥ तत्वेषुआत्मविद्याशिवाख्येषु ॥ ५१ ॥ कारणत्रये

अउमेतित्रिमात्राभिःपरस्ताच्चार्द्धमात्रया ॥ तत्राऽकारःश्रितोभागेतदालिंगस्यदक्षिणे ॥ ४६ ॥ उकारश्चोत्तरेतद्व न्मकारस्तस्यमध्यतः ॥ अर्धमात्रात्मकोनादःश्रूयतेलिंगमूर्धनि ॥ ४७ ॥ विभक्तेपितथातस्मिन्प्रणवेपरमाक्षरे ॥ विभागार्थंचतौदेवौनकिंचिदवजग्मतुः ॥ ४८ ॥ वेदात्मनातदाव्यक्तःप्रणवोविकृतिंगतः ॥ तत्राऽकारोऋगभवदुका रोयजुरव्ययः ॥ ४९ ॥ मकारःसामसंजातोनादस्त्वाथर्वणीश्रुतिः ॥ ऋगुपस्थापयामाससमासात्स्वर्थमात्मनः ॥५०॥ रजोगुणेषुब्रह्माणंमूर्तिष्वाद्यंक्रियास्वपि ॥ सृष्टिंलोकेषुपृथिवींतत्वेष्वात्मानमव्ययम् ॥ ५१ ॥ कलाध्वनिनिवृत्तिंच सद्यंब्रह्मसुपंचसु ॥ लिंगभागेष्वधोभागंबीजाख्यंकारणत्रये ॥ ५२ ॥ चतुःषष्टिगुणैश्वर्यंबौद्धंयदणिमादिषु ॥ तदि त्थमर्थैर्दशभिर्व्याप्तंविश्वमृचाजगत् ॥ ५३ ॥ अथोपस्थापयामासस्वार्थंदशविधंयजुः ॥ सत्वंगुणेषुविष्णुंचमूर्तिष्वा द्यंक्रियास्वपि ॥ ५४ ॥ स्थितिंलोकेष्वंतरिक्षंविद्यांतत्वेषुचत्रिषु ॥ कलाध्वसुप्रतिष्ठांचवामंब्रह्मसुपंचसु ॥ ५५ ॥ म ध्यंतुलिंगभागेषुयोनिंचत्रिषुहेतुषु ॥ प्राकृतंचतथैश्वर्यंतस्माद्विश्वंयजुर्मयं ॥ ५६ ॥ ततोपस्थापयामाससामार्थंदशधा त्मनः ॥ तमोगुणेष्वथोरुद्रंमूर्तिमाद्यंक्रियासुच ॥ ५७ ॥ संहृतिंत्रिषुलोकेषुतत्वेषुशिवमुत्तमम् ॥ विद्याकलास्वघोरं चब्रह्मब्रह्मसुपंचसु ॥ ५८ ॥ लिंगभागेषुपीठोर्ध्वंबीजिनंकारणत्रये ॥ पौरुषंचतथैश्वर्यमित्थंसाम्नाततंजगत् ॥ ५९ ॥ अथाथर्वाहनैर्गुण्यमर्थंप्रथममात्मनः ॥ ततोमहेश्वरंसाक्षान्मूर्तिष्वपिसदाशिवम् ॥ ६० ॥ क्रियासुनिष्क्रियस्यापि शिवस्यपरमात्मनः ॥ भूतानुग्रहणंचैवमुच्यंतेयेनजंतवः ॥ ६१ ॥ लोकेष्वपियतोवाचोनिवृत्तामनसासह ॥ तदूर्ध्वं मुन्मनालोकात्सोमलोकमलौकिकं ॥ ६२ ॥ सोमःसहोमयायत्रनित्यंनिवसतीश्वरः ॥ तदूर्ध्वमुन्मनालोकाद्यंप्राप्तो ननिवर्तते ॥ ६३ ॥ शांतिंचशांत्यतीतांचव्यापिकांवैकलास्वपि ॥ तत्पुरुषंतथेशानंब्रह्मब्रह्मसुपंचसु ॥ ६४ ॥

बीजयोनिबीजिस्वरूपे ॥ ५२ ॥ दशभिःगुणेषुरजइत्यादिभिःएवमग्रेप्यूहनीयं ॥ ५३ ॥ ५४ ॥ ५५ ॥ ५६ ॥ ततइत्यत्रसंधिरार्षः ॥ ५७ ॥ ५८ ॥ ॥ ५९ ॥ ६० ॥ ६१ ॥ ६२ ॥ ६३ ॥ ६४ ॥ ॥ ॥ ॥ ॥

॥ ६५ ॥ ६६ ॥ ६७ ॥ ६८ ॥ ६९ ॥ ७० ॥ ७१ ॥ ७२ ॥ अनीश्वरंनेश्वरोयस्यतं ॥ ७३ ॥ ७४ ॥ निःसाम्येति ॥ निरस्तातिशयमितिपाठांतरं ॥

मूर्धानमपिलिंगस्यनादभागेष्वनुत्तमम् ॥ यत्रावाह्यसमाराध्यःकेवलोनिष्कलःशिवः ॥ ६५ ॥ तत्वेष्वपितदाबिंदो
र्नादाच्छक्तेस्ततःपरात् ॥ तत्वादपिपरंतत्वमतत्वंपरमार्थतः ॥६६॥ कारणेषुत्रयातीतान्मायाविक्षोभकारणात् ॥ अ
नंताच्छुद्धविद्यायाःपरस्ताच्चमहेश्वरात् ॥ ६७ ॥ सर्वविद्येश्वराधीशान्नपराच्चसदाशिवात् ॥ सर्वमंत्रतनोर्देवाच्छ
क्तित्रयसमन्वितात् ॥ ६८ ॥ पंचवक्त्राद्दशभुजात्साक्षात्सकलनिष्कलात् ॥ तस्माद्पिपराद्बिंदोरर्धेंदोश्चततःपरात्
॥ ६९ ॥ ततःपरान्निशाधीशान्नादाख्याच्चततःपरात् ॥ ततःपरात्सुषुम्नेशाद्ब्रह्मरंध्रेश्वरादपि ॥ ७० ॥ ततःपरस्याः
शक्तेश्चपरस्ताच्छिवतत्वतः ॥ परमंकारणंसाक्षात्स्वयंनिष्कारणंशिवम् ॥ ७१ ॥ कारणानांचधातारंध्यातारंध्येयम
व्ययम् ॥ परमाकाशमध्यस्थंपरमात्मोपरिस्थितम् ॥ ७२ ॥ सर्वैश्वर्येणसंपन्नंसर्वेश्वरमनीश्वरं ॥ ऐश्वर्याच्चापिमायेया
दशुद्धान्मानुषादिकात् ॥ ७३ ॥ अपराच्चपरात्त्याज्यादविशुद्धाध्वगोचरात् ॥ तत्पराच्छुद्धविद्याद्यादुन्मनांतात्प
रात्परात्॥७४॥परमंपरमैश्वर्यमुन्मनाद्यमनादिच॥अपारमपराधीनंनिःसाम्यातिशयंस्थिरम्॥७५॥इत्थमर्थैर्दशवि
धैरियमाथर्वणीश्रुतिः॥यस्माद्वरीयसीतस्माद्विश्वंव्याप्तमथर्वणा॥७६॥ऋग्वेदःपुनराहेदंजाग्रद्रूपंमयोच्यते॥ येनाह
मात्मतत्वस्यानित्यमस्म्यभिधायकः ॥ ७७ ॥ यजुर्वेदोवदत्तद्वत्स्वप्नावस्थामयोच्यते ॥ भोग्यात्मनापरिणताविद्या
वेद्यायतोमयि ॥ ७८ ॥ सामचाहसुषुप्त्याख्यमेवंसर्वंमयोच्यते ॥ ममार्थेनशिवेनेदंतामसेनाभिधीयते ॥ ७९ ॥
अथर्वाहतुरीयाख्यंतुरीयातीतमेवच ॥ मयाभिधीयतेतस्माद्ध्वातीतपदोस्म्यहम् ॥ ८० ॥ अध्वात्मकंतुत्रिमलं
शिवविद्यात्मसंज्ञितं ॥ त्रैगुण्यंत्रयीसाध्यंसंशोध्यंचपदैषिणाम् ॥ ८१ ॥ अध्वातीतंतुरीयाख्यंनिर्वाणंपरमंपदम्॥
तदतीतंचनैर्गुण्याद्ध्वनोऽस्यविशोधकम् ॥ ८२ ॥ द्वयोःप्रमापकोनादोनादांतश्चमदात्मकः ॥ तस्मान्ममार्थःस्वातं
त्र्यात्प्रधानःपरमेश्वरः॥८३॥यदस्तिवस्तुतत्सर्वंगुणप्राधान्ययोगतः ॥ समस्तंव्यस्तमपिचप्रणवार्थंप्रचक्षते॥८४॥

॥ ७५ ॥ ७६ ॥ ७७ ॥ ७८ ॥ ७९ ॥ ८० ॥ अध्वात्मकंतत्तृतीयमितिक्वचित्पाठः ॥ ८१ ॥ ८२ ॥ ८३ ॥ ८४ ॥ ॥

Indira Gandhi National Centre for the Arts

॥ ८५ ॥ ८६ ॥ चिंतयारहितःअभक्तैर्ध्यातुमप्यशक्यः ॥ ८७ ॥ ८८ ॥ ८९ ॥ ९० ॥ ९१ ॥ ९२ ॥ ९३ ॥ ९४ ॥ ९५ ॥ ९६ ॥ ९७ ॥ ९८ ॥

सर्वार्थवाचकंतस्मादेकंब्रह्मैतदक्षरम् ॥ तेनोमितिजगत्कृत्स्नंकुरुतेप्रथमंशिवः ॥ ८५ ॥ शिवोवाप्रणवोह्येपप्रण
वोवाशिवःस्मृतः ॥ वाच्यवाचकयोर्भेदोनात्यंतंविद्यतेयतः॥८६॥ चिंतयारहितोरुद्रोवाचोयंमनसासह ॥ अप्राप्य
यनिवर्त्ततेवाच्यस्त्वेकाक्षरेणसः ॥ ८७ ॥ एकाक्षरादकाराख्यादात्माब्रह्माभिधीयते ॥ एकाक्षरादुकाराख्याद्विद्या
विष्णुरुदीर्यते ॥ ८८ ॥ एकाक्षरान्मकाराख्याच्छिवोरुद्रउदाहृतः ॥ दक्षिणांगान्महेशस्यजातोब्रह्मात्मसंज्ञकः ॥
॥ ८९ ॥ वामांगादभवद्विष्णुस्ततोविद्येतिसंज्ञितः ॥ हृदयान्नीलरुद्रोभूच्छिवस्यशिवसंज्ञितः ॥ ९० ॥ सृष्टेःप्रवर्त
कोब्रह्मास्थितेर्विष्णुर्विमोहकः ॥ संहारस्यतथारुद्रस्तयोर्नित्यंनियामकः ॥ ९१ ॥ तस्मात्रयस्तेकथ्यंतेजगतःकार
णत्रयम् ॥ कारणत्रयहेतुश्चशिवःपरमकारणं ॥ ९२ ॥ अर्थमेतमविज्ञायरजसाबद्धवैरयोः ॥ युवयोःप्रतिबोधायम
ध्येलिंगमुपस्थितम् ॥ ९३ ॥ एवमोमितिमांप्राहुर्यदिहोक्तमथर्वणा ॥ ऋचोयजूंषिसामानिशाखाश्चान्याःसहस्रशः
॥ ९४ ॥ वेदेष्वेवंस्वयंवक्तैर्व्यक्तमित्यवदत्स्वपि ॥ स्वप्नानुभूतमिवतत्ताभ्यांनाध्यवसीयते ॥ ९५ ॥ तयोस्तत्रप्रबो
धायतमोपनयनायच ॥ लिंगेपिमुद्रितंसर्वंयथावेदैरुदाहृतम् ॥ ९६ ॥ तद्दृष्ट्वामुद्रितंलिंगेप्रसादाल्लिंगिनस्तदा ॥
प्रशांततमसौदेवौप्रबुद्धौसंबभूवतुः ॥९७॥ ततोलिंगस्यलिंगत्वंलिंगिनोपिचलिंगितां ॥ लिंगेविश्वस्यजगतोविशेषा
त्स्वात्मनोरपि ॥ ९८ ॥ उत्पत्तिंविलयंचैवयाथात्म्यंचषडध्वनाम् ॥ ततःपरतरंधामधामवंतंचपूरुषम् ॥ ९९ ॥ निरु
त्तरतरंब्रह्मनिष्कलंशिवमीश्वरम् ॥ पशुपाशमयस्यास्यप्रपंचस्यसदापतिम् ॥ १०० ॥ अकुतोभयमत्यंतमवृद्धिक्षय
मव्ययम् ॥ बाह्यमाभ्यंतरंव्याप्तंबाह्याभ्यंतरवर्जितम् ॥ १०१ ॥ निरस्तातिशयंशश्वद्विश्वलोकविलक्षणम् ॥ अल
क्षणमनिर्देश्यमवाङ्मनसगोचरम् ॥ १०२ ॥ प्रकाशैकरसंशांतंप्रसन्नंसततोदितम् ॥ सर्वकल्याणनिलयंशक्त्या
तादृशयान्वितम् ॥१०३॥ ज्ञात्वादेवंविरूपाक्षंब्रह्मनारायणौतदा ॥ रचयित्वांजलिंमूर्ध्निभीतौतौवाचमूचतुः॥१०४॥

॥९९॥ निरुत्तरतरंसर्वोत्कृष्टं ॥ १०० ॥ १०१ ॥ १०२ ॥ १०३ ॥ १०४ ॥ ॥ ॥ ॥



Indira Gandhi National Centre for the Arts

ब्रह्मोवाच ॥ अज्ञोवाहमभिज्ञोवात्वयादेवविनिर्मितः ॥ ईदृशींभ्रांतिमापन्नइतिकोत्रापराध्यति ॥ १०५ ॥ आस्तां
ममेदमज्ञानंत्वयिसान्निहितेप्रभो ॥ निर्भयःकोभिभाषेतकृत्यंस्वस्यपरस्यवा ॥ १०६ ॥ आवयोर्देवदेवेशविवादोपि
हिशोभनः ॥ पादप्रणामफलदोनाथस्यभवतोयतः ॥ १०७ ॥ विष्णुरुवाच ॥ स्तोतुंदेवनवागस्तिमहिम्नःसदृशी
तव ॥ प्रभोरग्रेविधेयानांतूष्णींभावोव्यतिक्रमः ॥ १०८ ॥ किमत्रसंकटेकृत्यमित्येवावसरोचितम् ॥ अजानन्नपिय
त्किंचित्प्रलप्यत्वांनतोऽस्म्यहम् ॥ १०९ ॥ कारणत्वंत्वयादत्तंविस्मृतंतवमायया ॥ मोहितोहंकृतश्चाहंपुनरेवास्मि
शासितः ॥ ११० ॥ विज्ञापितैःकिंबहुभिर्भीतोऽस्मिभृशमीश्वर ॥ यतोहमपरिच्छेद्यंत्वांपरिछेत्तुमुद्यतः ॥ १११ ॥ त्वा
मुशंतिमहादेवंभीतानामार्तिनाशनं ॥ अतोव्यतिक्रमंमेद्यक्षंतुमर्हसिशंकर ॥ ११२ ॥ इतिविज्ञापितस्ताभ्यामीश्व
राभ्यांमहेश्वरः ॥ प्रीतोनुगृह्यतौदेवोस्मितपूर्वमभाषत ॥ ११३ ॥ ईश्वरउवाच ॥ वत्सवत्सविधेविष्णोमाययामम
मोहितौ ॥ युवांप्रभुत्वेहंकृत्यबद्धवैरौपरस्परं ॥ ११४ ॥ विवादंयुद्धपर्यंतंकृत्वानोपरतौकिल ॥ तेनोच्छिन्नाप्रजासृ
ष्टिर्जगत्कारणभूतयोः ॥ ११५ ॥ अज्ञानमानप्रभवाद्वैमत्याद्युवयोरपि ॥ तन्निवर्तयितुंयुष्मद्दर्पमोहौमयैवतु ॥ ११६ ॥
एवंनिवारितावद्यलिंगाविर्भावलीलया ॥ तस्माद्व्यंविषादंचव्रीडांचोत्सृज्यकृत्स्नशः ॥ ११७ ॥ यथास्वंकर्मकुर्या
तांभवंतौवीतमत्सरौ ॥ पुराममाज्ञयासार्धंसमस्ताज्ञानसंहिताः ॥ ११८ ॥ युवाभ्यांहिमयादत्ताकारणत्वप्रसिद्धये ॥
मंत्ररत्नंचसूत्राख्यंपंचाक्षरमयंपरम् ॥ ११९ ॥ मयोपदिष्टंसर्वंतद्युवयोरद्यविस्मृतम् ॥ ददामिचपुनःसर्वंयथापूर्वं
ममाज्ञया ॥ १२० ॥ यतोयुवांविनातेननक्षमौसृष्टिरक्षणे ॥ एवमुक्त्वामहादेवोनारायणपितामहौ ॥ १२१ ॥ मंत्रे
णाज्ञांददौताभ्यांज्ञानसंहितयासह ॥ तौलब्ध्वामहतींदिव्यामाज्ञांमाहेश्वरींपराम् ॥ १२२ ॥ महार्थंमंत्ररत्नंचत
थैवसकलाःकलाः ॥ दंडवत्प्रणतिंकृत्वादेवदेवस्यपादयोः ॥ १२३ ॥ ॥ ॥



Indira Gandhi National Centre for the Arts

॥ १२४ ॥ १२५ ॥ १२६ ॥ १२७ ॥ १२८ ॥ इतिश्रीशैवमहापुराणेवायवीयसंहिताटीकायांसारबोधिन्यामुत्तरभागेलिंगाविर्भावकथनंनामसप्त
विंशोध्यायः ॥ २७ ॥ ओंनमःशिवाय ॥ प्रतिष्ठादेवदेवस्यसंप्रोक्षणविधिस्तथा ॥ विस्तरेणैवतरसर्वमष्टाविंशेनिरूप्यते ॥ १ ॥ १ ॥ अनात्मेति॥शुभ

अतिष्ठतांवीतभयावानंदस्तिमितौतदा ॥ एतस्मिन्नंतरेचित्रमिंद्रजालवदैश्वरम् ॥ १२४ ॥ लिंगंक्वापितिरोभूतंनता
भ्यामुपलभ्यते ॥ ततोविलप्यहाहेतिसद्यःप्रणयभंगतः ॥ १२५ ॥ किमद्भुतमिदंवृत्तमितिचोक्त्वापरस्परम् ॥
अचिंत्यवैभवंशंभोर्विचिंत्यचगतव्यथौ ॥ १२६ ॥ अभ्युपेत्यपरांमैत्रीमालिंग्यचपरस्परम् ॥ जगद्व्यापारमुद्दिश्य
जग्मतुर्देवपुंगवौ ॥ १२७ ॥ ततःप्रभृतिशक्राद्याःसर्वएवसुरासुराः ॥ ऋषयश्चनरानागानार्यश्चापिविधानतः ॥
॥ लिंगप्रतिष्ठांकुर्वंतिलिंगंतत्पूजयंतिच ॥ १२८ ॥ इतिश्रीशिवमहापुराणेवायवीयसंहितायामुत्तरभागेलिंगावि
र्भावकथनंनामसप्तविंशोऽध्यायः ॥ २७ ॥ छ ॥ श्रीकृष्णउवाच ॥ भगवन्श्रोतुमिच्छामिप्रतिष्ठाविधिमुत्तमम्
॥ लिंगस्यापिचबेरस्यशिवेनविहितंतथा ॥ १ ॥ उपमन्युरुवाच ॥ अनात्मप्रतिकूलेतुदिवसेशुक्लपक्षके ॥ शिव
शास्त्रोक्तमार्गेणकुर्याल्लिंगंप्रमाणवत् ॥ २ ॥ स्वीकृत्याथशुभंस्थानंभूपरीक्षांविधायच ॥ दशोपचारान्कुर्वीतलक्ष
णोद्धारपूर्वकान् ॥ ३ ॥ तेषांदशोपचाराणांपूर्वंपूज्यविनायकम् ॥ स्थानशुद्ध्यादिकंकृत्वालिंगंस्नानालयंनयेत् ॥
॥ ४ ॥ शलाकयाकांचनयाकुंकुमादिरसाक्तया ॥ लांछितंलक्षणंशिल्पशास्त्रेणविलिखेत्ततः ॥ ५ ॥ अष्टमृत्सलिलै
र्वाथपंचामृतजलैस्तथा ॥ लिंगंपिंडिकयासार्धंपंचगव्यैश्चशोधयेत् ॥ ६ ॥ सवेदिकंसमभ्यर्च्यदिव्याद्यंतुजलाश
यम् ॥ नीत्वाधिवासयेत्तत्रलिंगंपिंडिकयासह ॥ ७ ॥ अधिवासालयेशुद्धेसर्वशोभासमन्विते ॥ सतोरणेसावरणे
दर्भमालासमावृते ॥८॥ दिग्गजाष्टकसंपन्नेदिक्पालाष्टघटान्विते ॥ अष्टमंगलकैर्युक्तेकृतदिक्पालकार्चिते ॥ ९ ॥

स्थानेषुस्थितैर्ग्रहैःस्वानुकूलइत्यर्थः ॥ प्रमाणवत्यथोक्तपरिमाणयुक्तं ॥ २ ॥ दशोपचारात्गंधादिपुष्पांजलिपर्यंतान् ॥ ३ ॥ तेषामिति ॥ तृतीयार्थेषष्ठी ॥
॥ ४ ॥ लक्षणोद्धारप्रकारमाह ॥ शलाकयेति ॥ ५ ॥ ६ ॥ दिव्याद्यंदिव्यंगंगादिकमाद्यंयस्यतं ॥ ७ ॥ ८ ॥ घटाःकलशाःमंगलकानिमंगलद्रव्याणि
कृतदिक्पालकार्चितेकृतंदिक्पालकैरर्चितमर्चनंयस्मिन् ॥ ९ ॥ ॥ ॥ ॥ ॥



Indira Gandhi National Centre for the Arts

॥१०॥११॥१२॥शाययेदिति॥लिंगमितिसंबध्यते॥ १३ ॥ १४ ॥ १५ ॥१६॥१७॥ चंडिकापद्मंचंडिकास्थापनार्थपद्मं॥ पिंडिकापद्ममितिक्कचित्पाठः

तैजसंदारवंवापिकृत्वापद्मासनांकितम् ॥ विन्यसेन्मध्यतस्तत्रविपुलंपीठिकालयं ॥ १० ॥ द्वारपालान्समभ्यर्च्य भद्रादींश्चतुरःक्रमात् ॥ सुभद्रश्चविभद्रश्चसुनंदश्चविनंदकः ॥ ११ ॥ स्नापयित्वासमभ्यर्च्यलिंगंवेदिकयासह ॥ सकूर्चाभ्यांतुवस्त्राभ्यांसमावेष्ट्यसमंततः ॥ १२ ॥ प्रापय्यशनकैस्तोयंपीठिकोपरिशाययेत् ॥ प्राक्शिरस्कमधः सूत्रंपिंडिकांचास्यपश्चिमे ॥ १३ ॥ सर्वमंगलसंयुक्तंलिंगंतत्राधिवासयेत् ॥ पंचरात्रंत्रिरात्रंवाप्येकरात्रमथापिवा ॥ १४ ॥ विसृज्यपूजितांस्तत्रलिंगंचोद्धृत्यपूर्ववत् ॥ संपूज्योत्सवमार्गेणशयनालयमानयेत् ॥ १५ ॥ तत्रापिशयन स्थानंकुर्यान्मंडलमध्यतः ॥ शुद्धैर्जलैःस्नापयित्वालिंगमभ्यर्चयेत्क्रमात् ॥ १६ ॥ ऐशान्यांपद्ममालिख्यशुद्धलिप्तेम हीतले ॥ शिवकुंभंसाधयित्वातत्रावाह्यशिवंयजेत् ॥ १७ ॥ वेदिमध्येसितंपद्मंपरिकल्प्यविधानतः ॥ तस्यपश्चि मतश्चापिचंडिकापद्ममालिखेत् ॥ १८ ॥ क्षौमाद्यैर्वाहतैर्वस्त्रैःपुष्पैर्दर्भैरथापिवा ॥ प्रकल्प्यशयनंतस्मिन्हेमपुष्पंवि निक्षिपेत् ॥ १९ ॥ तत्रलिंगंसमानीयसर्वमंगलनिस्वनैः ॥ रक्तेनवस्त्रयुग्मेनसकूर्चेनसमंततः ॥ २० ॥ सहपिंडिक यावेष्ट्यशाययेच्चयथापुरा ॥ पुरस्तात्पद्ममालिख्यतद्दलेषुयथाक्रमम् ॥ २१ ॥ विद्येशकलशान्न्यस्येन्मध्येशैवींचवर्द्ध नीम् ॥ परीत्यपद्मत्रितयंजुहुयुर्द्विजसत्तमाः ॥ २२ ॥ तेचाष्टमूर्तयःकल्प्याःपूर्वादिपरितःस्थिताः ॥ चत्वारश्चाथवा दिक्षुस्वध्येतारःसजापकाः ॥ २३ ॥ जुहुयुस्तेविरंच्याद्याश्चतस्रोमूर्तयःस्मृताः॥ देशिकःप्रथमंतेषामैशान्यांपश्चिमे थवा ॥ २४ ॥ प्रधानहोमंकुर्वीतसप्तद्रव्यैर्यथाक्रमम् ॥ आचार्यात्पादमर्धंवाजुहुयुश्चापरेद्विजाः ॥ २५ ॥ प्रधान मेकमेवात्रजुहुयादथवागुरुः ॥ पूर्वंपूर्णाहुतेर्हुत्वाघृतेनाष्टोत्तरंशतम् ॥ २६ ॥ मूर्ध्निमूलेनलिंगस्यशिवहस्तंप्रविन्यसे त् ॥ शतमर्धंतदर्धंवाक्रमाद्द्रव्यैश्चसप्तभिः ॥ २७ ॥ हुत्वाहुत्वास्पृशेल्लिंगंवेदिकांचपुनःपुनः ॥ पूर्णाहुतिंततोहुत्वा क्रमाद्दद्याच्चदक्षिणाम् ॥ २८ ॥ ॥ ॥ ॥ ॥

॥ १८ ॥ १९ ॥ २० ॥ २१ ॥ परीत्यप्रदक्षिणीकृत्य ॥ २२ ॥ २३ ॥ २४ ॥ अपरइति ॥ आचार्यादन्यइत्यर्थः ॥ २५ ॥ २६ ॥ २७ ॥ २८ ॥

Indira Gandhi National Centre for the Arts

स्थपतेः आलयादेर्निर्मातुः शिल्पिनः ॥ २९ ॥ ३० ॥ ३१ ॥ ३२ ॥ ३३ ॥ ३४ ॥ बंधकद्रव्यैः सुधादिलेपद्रव्यैः ॥ यवनिकां तिरस्करिणीं ॥ आच्छनपटमित्यर्थः



आचार्यात्पादमर्धंवाहोत्तृणांस्थपतेरपि ॥ तदर्धंदेयमन्येभ्यःसदस्येभ्यश्चशक्तितः ॥ २९ ॥ ततःश्वभ्रेवृषंहेमंकूर्चं वाविनिवेश्यच ॥ मृदंभसापंचगव्यैःपुनःशुद्धजलेनच ॥ ३० ॥ शोधितांचंदनालिप्तांश्वभ्रेब्रह्मशिलांक्षिपेत् ॥ करन्यासंततःकृत्वानवभिःशक्तिनामभिः ॥ ३१ ॥ हरितालादिधातूंश्चबीजगंधौषधैरपि ॥ शिवशास्त्रोक्तविधिनाक्षिपेद्ब्रह्मशिलोपरि ॥ ३२ ॥ प्रतिलिंगंतुसंस्थाप्यक्षीरवृक्षसमुद्भवम् ॥ स्थितंबुध्वातमुत्सृज्यलिंगंब्रह्मशिलामपि ॥ ३३ ॥ प्रागुदक्प्रवणंकिंचित्स्थापयेन्मूलविद्यया ॥ पिंडिकांचाथसंयोज्यशाक्तंमूलमनुस्मरन् ॥ ३४ ॥ बंधनंबंधकद्रव्यैः कृत्वास्थानंविशोध्यच ॥ दत्वाचार्घ्यंचपुष्पाणिकुर्युर्यवनिकांपुनः ॥ ३५ ॥ यथायोग्यंनिषेकादिलिंगस्यपुरतस्तदा ॥ आनीयशयनस्थानात्कलशान्विन्यसेत्क्रमात् ॥ ३६ ॥ महापूजामथारभ्यसंपूज्यकलशान्दश ॥ शिवमंत्रमनुस्मृत्यशिवकुंभजलांतरे ॥ ३७ ॥ अंगुष्ठानामिकायोगादादायतमुदीरयेत् ॥ न्यसेदीशानभागस्यमध्येलिंगस्यमंत्रवित् ॥ ३८ ॥ शक्तिंन्यसेत्तथावेद्यांविद्येशांश्चयथाक्रमम् ॥ लिंगमूलेशिवजलैस्तथालिंगंनिषेचयेत् ॥ ३९ ॥ वर्धन्यापिंडिकालिंगंविद्येशकलशैःपुनः ॥ अभिषिच्यासनंपश्चादाधाराद्यंप्रकल्पयेत् ॥ ४० ॥ कृत्वापंचकलान्यासंदीप्तंलिंगमनुस्मरन् ॥ आवाहयेच्छिवंसाक्षात्प्रांजलिःप्रागुदङ्मुखः ॥ ४१ ॥ वृषाधिराजमारुह्यविमानंवानभस्थलात् ॥ अलंकृतंसमायांतंदेव्यादेवमनुस्मरन् ॥ ४२ ॥ सर्वाभरणशोभाढ्यंसर्वमंगलनिःस्वनैः ॥ ब्रह्मविष्णुमहेशार्केशक्राद्यैर्देवदानवैः ॥ ४३ ॥ आनंदक्लिन्नसर्वांगैर्विन्यस्तांजलिमस्तकैः ॥ स्तुवद्भिरेवनृत्यद्भिर्नमद्भिरभितोवृतम् ॥ ॥ ४४ ॥ ततःपंचोपचाराणांकृत्वापूजांसमापयेत् ॥ नातःपरतरःकश्चिद्विधिःपंचोपचारकात् ॥ ४५ ॥ प्रतिष्ठांलिंगवत्कुर्यात्प्रतिमास्वपिसर्वतः ॥ लक्षणोद्धारसमयेकार्यंनयनमोचनम् ॥ ४६ ॥ जलाधिवासेशयनेशाययेत्तांवधोमुखीम् ॥ कुंभोदरगतंमंत्रंत्वद्दितासांनियोजयेत् ॥ ४७ ॥ कृतालयांपरामाहुःप्रतिष्ठामकृतालयात् ॥ शक्तःकृतालयंपश्चात्प्रतिष्ठाविधिमाचरेत् ॥ ४८ ॥

॥ ३५ ॥ ३६ ॥ ३७ ॥ तंमंत्रं ॥ ३८ ॥ ३९ ॥ ४० ॥ ४१ ॥ देव्यापार्वत्यासहेत्यर्थः ॥ ४२ ॥ ४३ ॥ ४४ ॥ ४५ ॥ नयनमोचनंनेत्रोन्मीलनं ॥ ४६ ॥ तासांप्रतिमानां ॥ ४७ ॥ अकृतालयात्प्रतिष्ठाविधेः ॥ ४८ ॥



Indira Gandhi National Centre for the Arts

॥ ४९ ॥ ५० ॥ ५१ ॥ ५२ ॥ तद्बीजैःपूर्वोक्तैः ॥ ५३ ॥ ५४ ॥ ५५ ॥ ५६ ॥ ५७ ॥ अत्यंतोपहतंअत्यंतदोषयुक्तं ॥ ५८ ॥ ५९ ॥ ६० ॥ ६१ ॥

अशक्तश्चेत्प्रतिष्ठाप्यलिंगंबेरमथापिवा ॥ शक्तेरनुगुणंपश्चात्प्रकुर्वीतशिवालयम् ॥ ४९ ॥ गृहार्चायांपुनर्वक्ष्येप्रतिष्ठाविधिमुत्तमम् ॥ कृत्वाकनीयसंबेरंलिंगंवालक्षणान्वितम् ॥ ५० ॥ अयनेचोत्तरेप्राप्तेशुक्लपक्षेशुभेदिने ॥ वेदिंकृत्वाशुभेदेशेतत्राब्जंपूर्ववल्लिखेत् ॥ ५१ ॥ विकीर्यपत्रपुष्पादिमध्येकुंभंनिधायच ॥ परितस्तस्यचतुरःकलशान्दिक्षुविन्यसेत् ॥ ५२ ॥ पंचब्रह्माणितद्बीजैस्तेषुपंचसुपंचभिः ॥ न्यस्यसंपूज्यमुद्रादिदर्शयित्वाभिरक्ष्यच ॥ ५३ ॥ विशोध्यलिंगंबेरंवामृत्तोयाद्यैर्यथापुरा ॥ स्थापयेत्पुष्पसंछन्नमुत्तरस्थेवरासने ॥ ५४ ॥ निधायपुष्पंशिरसिप्रोक्षयेत्प्रोक्षणीजलैः ॥ समभ्यर्च्यपुनःपुष्पैर्जयशब्दादिपूर्वकम् ॥ ५५ ॥ कुंभैरीशानविद्यांतैःस्नापयेन्मूलविद्यया ॥ ततःपंचकलान्यासंकृत्वापूजांचपूर्ववत् ॥ ५६ ॥ नित्यमाराधयेत्तत्रदेव्यादेवंत्रिलोचनम् ॥ एकमेवाथवाकुंभंमूर्तिमंत्रसमन्वितम् ॥ ५७ ॥ न्यस्यपद्मांतरेसर्वशेषंपूर्ववदाचरेत् ॥ अत्यंतोपहतंलिंगंविशोध्यस्थापयेत्पुनः ॥ ५८ ॥ संप्रोक्षयेदुपहतंमनागुपहतंयजेत् ॥ लिंगानिबाणसंज्ञानिस्थापनीयानिवानवा ॥ ५९ ॥ तानिपूर्वंशिवेनैवसंस्कृतानियतस्ततः ॥ लोहानिस्थापनीयानियानिदृष्टानिबाणवत् ॥ ६० ॥ स्वयमुद्भूतलिंगेचदिव्येचार्षेतथैवच ॥ अर्पाठेपीठमावेश्यकृत्वासंप्रोक्षणंविधिम् ॥ ६१ ॥ यजेत्तत्रशिवंतेषांप्रतिष्ठानविधीयते ॥ दग्धंश्लथंक्षतांगंचक्षिपेल्लिंगंजलाशये ॥ ॥ ६२ ॥ संधानयोग्यंसंधायप्रतिष्ठाविधिमाचरेत् ॥ बेराद्वाविकलाल्लिंगाद्देवपूजापुरःसरं ॥ ६३ ॥ उद्वास्यत्द्वादिसंधानंत्यागंवायुक्तमाचरेत् ॥ एकाहपूजाविहतौकुर्याद्द्विगुणमर्चनम् ॥ ६४ ॥ द्विरात्रेचमहापूजांसंप्रोक्षणमतःपरम् ॥ मासादूर्ध्वमनेकाहंपूजायदिविहन्यते ॥ ६५ ॥ प्रतिष्ठाचोच्यतेकैश्चित्कैश्चित्संप्रोक्षणक्रमः ॥ संप्रोक्षणेतुलिंगाद्देवमुद्वास्यपूर्ववत् ॥ ६६ ॥ अष्टपंचक्रमेणैवस्नापयित्वामृदंभसा ॥ गवांरसैश्चसंस्नाप्यदर्भतोयैर्विशोध्यच ॥ ६७ ॥ प्रोक्षयेत्प्रोक्षणीतोयैर्मूलेनाष्टोत्तरंशतम् ॥ सपुष्पंसकुशंपाणिंन्यस्यलिंगस्यमस्तके ॥ ६८ ॥ पंचावरंजपेन्मूलमष्टोत्तरशतोत्तरम् ॥ ततोमूलेनमूर्धादिपीठांतंसंस्पृशेदपि ॥ ६९ ॥ ॥ ॥ ॥

श्लथंविशीर्णं ॥ ६२ ॥ ६३ ॥ ६४ ॥ ६५ ॥ संप्रोक्षणविधिमाह ॥ देवमिति ॥ ६६ ॥ गवांरसैःगोदुग्धादिभिः ॥ ६७ ॥ ६८ ॥ ६९ ॥

Indira Gandhi National Centre for the Arts

लिंगालाभेविधिमाह ॥ अलब्धइति ॥ अत्रानुक्तंचसंदिग्धंतत्प्रकाशयितुंपृथक् ॥ शैवशास्त्रानुसारेणपद्धतीरचयिष्यते ॥ ७० ॥ इतिश्रीशैवमहापुराणे वायवीयसंहिताटीकायांसारबोधिन्यामुत्तरभागेलिंगबेरप्रतिष्ठासंप्रोक्षणादिविधिर्नामाष्टाविंशतितमोऽध्यायः ॥ २८ ॥ ओंनमःशिवाय ॥ योगाभ्यास विधिःसांगःसप्रयोजनकःस्मृतः ॥ सकलोमुनिनैकोनत्रिंशेध्यायेनिरूप्यते ॥ १ ॥ क्रियायांपूजादिकर्मणि ॥ चर्यायांपूर्वोक्तसेवायां ॥ १ ॥ ॥ २ ॥ वैधंविधिनाकृतं ॥ योगाद्यनुपमर्दतःयोगाभ्यासापरित्यागेनसांगयोगानुष्ठानेनेतियावत् ॥ रोगाद्यनुपमर्दतइतिक्वचित्पाठः ॥ ३ ॥ तत्

पूजांचमहतींकुर्याद्देवमावाह्यपूर्ववत् ॥ अलब्धेस्थापितेलिंगेशिवस्थानेजलेऽथवा ॥ वन्हौरवौतथाव्योम्निभगवंतं शिवंयजेत् ॥ ७० ॥ इतिश्रीशिवम०वा०संहितायामुत्तरभागेलिंगबेरप्रतिष्ठासंप्रोक्षणादिविधिकथनंनामाऽष्टा विंशोऽध्यायः ॥२८॥ छ ॥ श्रीकृष्णउवाच ॥ ज्ञानेक्रियायांचर्यायांसारमुत्धृत्यसंग्रहात्॥उक्तंभगवतासर्वंश्रुतंश्रुति समंमया ॥ १ ॥ इदानींश्रोतुमिच्छामियोगंपरमदुर्लभम् ॥ साधिकारंचसांगंचसविधिंसप्रयोजनम् ॥ २ ॥ यद्य स्तिमरणंवैधंयोगाद्यनुपमर्दतः ॥ सद्यःसाधयितुंशक्यंयेनस्यान्नात्महानरः ॥ ३ ॥ तच्चतत्कारणंचैवतत्कालकर णानिच ॥ तद्भेदतारतम्यंचवक्तुमर्हसितत्वतः ॥ ४ ॥ उपमन्युरुवाच ॥ स्थानेपृष्टंत्वयाकृष्णसर्वप्रश्नार्थवेदिना ॥ त तःक्रमेणतत्सर्वंवक्ष्येशृणुसमाहितः ॥ ५ ॥ निरुद्धवृत्त्यंतरस्यशिवेचित्तस्यनिश्चला ॥ यावृत्तिःसासमासेनयोगःस खलुपंचधा ॥ ६ ॥ मंत्रयोगःस्पर्शयोगोभावयोगस्तथापरः ॥ अभावयोगःसर्वेभ्योमहायोगःपरोमतः ॥ ७ ॥ मं त्राभ्यासवशेनैवमंत्रवाच्यार्थगोचरः ॥ अव्याक्षेपामनोवृत्तिर्मंत्रयोगउदाहृतः ॥ ८ ॥ प्राणायामसखासैवस्पर्श योगोभिधीयते ॥ समंत्रःस्पर्शनिर्मुक्तोभावयोगःप्रकीर्तितः ॥ ९ ॥ ॥ ॥

योगानुष्ठानं ॥ तत्कारणंतस्ययोगस्यकारणं ॥ एवमग्रेपि॥करणानिप्रकृष्टसाधनानि ॥ ४ ॥ ५ ॥ योगलक्षणमाह ॥ निरुद्धेति ॥ निरुद्धंअन्यविषयेभ्योनि र्वर्तितंवृत्त्यंतरंवृत्तिविशेषोयस्यतस्यचित्तस्यशिवेविषयेयावृत्तिःसयोगइत्यर्थः॥योगश्चित्तवृत्तिनिरोधइतिपतंजल्युक्तेः ॥ ६ ॥ योगभेदानाह ॥ मंत्रयोगइति॥ ॥ ७ ॥ आद्ययोगमाह ॥ मंत्राभ्यासेति ॥ अव्याक्षेपास्थिरा ॥ ८ ॥ स्पर्शयोगमाह ॥ प्राणायामेति ॥ प्राणायामःसखासहायोयस्याःसैवपूर्वोक्तमनोवृत्तिरे व ॥ तृतीयमाह ॥ समंत्रइति ॥ विशेषतोमंत्रार्थविचाराभावेपिमंत्रजपमात्रलक्षणः ॥ स्पर्शनिर्मुक्तःअर्थात्प्राणायामरहितः ॥ ९ ॥ ॥



Indira Gandhi National Centre for the Arts

चतुर्थमाह ॥ विलीनेति ॥ यतोयोगात्विश्वंनिखिलंरूपंविलीनावयवंतिरोहितसंस्थानंसंभाव्यतेप्रतीयतेसोऽभावयोगस्तत्रहेतुमाह॥अनाभासादिति ॥ सतो विद्यमानस्यापिवस्तुनोऽभानादित्यर्थः ॥ विलीनावयवंविश्वंस्वरूपंभाव्यतेयतइतिपाठांतरम्॥ १० ॥महायोगमाह ॥ शिवेति ॥ शिवस्वभावःशिवतत्वमात्र विषयकःनिरुपाधिकःसर्वप्रपंचोपाधिरहितोयथायेनप्रकारेणचिंत्यतेध्यायतेसैवमनोवृत्तिर्महायोगउच्यतइत्यर्थः॥ ११ ॥योगाधिकारिणमाह॥दृष्टइति॥दृष्टेलौ किकेप्रजापश्वादिसंपदंगनालिंगनादौ ॥ आनुश्रविकेवैदिकेकाम्यज्योतिष्टोमादिसाध्यस्वर्गे॥ १२ ॥ विरक्तत्वेकारणमाह ॥ विषयेति ॥ विषयद्वयंऐहिकामु

विलीनावयवंविश्वंरूपंसंभाव्यतेयतः ॥ अभावयोगःसंप्रोक्तोऽनाभासाद्वस्तुनःसतः ॥ १० ॥ शिवस्वभावएवैकश्चिं त्यतेनिरुपाधिकः ॥ यथासैवमनोवृत्तिर्महायोगइहोच्यते ॥ ११ ॥ दृष्टेतथाऽऽनुश्रविकेविरक्तंविषयेमनः ॥ यस्यत स्याधिकारोस्तियोगेनान्यस्यकस्यचित् ॥ १२ ॥ विषयद्वयदोषाणांगुणानामीश्वरस्यच ॥ विमर्शादेवसततंविरक्तं जायतेमनः ॥ १३ ॥ अष्टांगोवाषडंगोवासर्वयोगःसमासतः ॥ यमश्चनियमश्चैवस्वस्तिकाद्यंतथासनम् ॥ १४ ॥ प्राणायामःप्रत्याहारोधारणाध्यानमेवच ॥ समाधिरितियोगांगान्यष्टौचेतिप्रकीर्तिताः ॥ १५ ॥ आसनंप्राणसंरो धःप्रत्याहारोथधारणा ॥ ध्यानंसमाधिर्योगस्यषडंगानिसमासतः ॥ १६ ॥ पृथग्लक्षणमेतेषांशिवशास्त्रेसमीरित म ॥ शिवागमेषुचान्येषुविशेषात्कामिकादिषु ॥ १७ ॥ योगशास्त्रेष्वपितथापुराणेष्वपिकेषुचित्॥तस्मात्समासात्सा मान्याद्वक्ष्येयोगांगलक्षणं ॥ १८ ॥ ॥ ॥ ॥ ॥

ष्मिकसुखसाधनद्वितयंतस्ययेदोषास्तेषामित्यर्थः ॥ तत्रैहिकसुखसाधनेदृष्टेविषयेआशुनश्वरत्वादिदोषाःस्पष्टाएव ॥ आनुश्रविकेआमुष्मिकेपिदोषादर्शिताः सांख्यकौमुद्यां ॥ दृष्टवदानुश्रविकःसह्यविशुद्धिक्षयातिशययुक्तइति ॥ १३ ॥ योगांगान्याह ॥ यमइति ॥ १४ ॥ प्रकीर्तिताइतिपुंस्त्वमार्षं ॥ १५ ॥ १६ ॥ १७ ॥ योगशास्त्रेष्विति ॥ तथाचयोगयाज्ञवल्क्यगीतासु ॥ यमश्चनियमश्चैवआसनंचतथैवच ॥ प्राणायामस्तथाप्रोक्तःप्रत्याहारश्चधारणा ॥ ध्यानंसमाधिरेतानि योगांगानिवरानने ॥ यमश्चनियमश्चैवदशधासंप्रकीर्तितौ ॥ आसनान्युत्तमान्यष्टौत्रयंतेषूत्तमोत्तमं ॥ प्राणायामस्त्रिधाप्रोक्तःप्रत्याहारस्तुपंचधा ॥ धारणा पंचधाप्रोक्ताध्यानंचपरिकीर्तितं ॥ त्रयस्तेषूत्तमाःप्रोक्ताःसमाधिस्त्वेकरूपतः ॥ मुनयःकेचिदिच्छंतिविस्तरेणपृथक्शृणु ॥ अहिंसासत्यमस्तेयंब्रह्मचर्यंद यार्जवं ॥ क्षमाधृतिर्मिताहारःशौचंचैतेयमाःस्मृताः ॥ कर्मणामनसावाचासर्वभूतेषुसर्वदा ॥ अहितंचेत्तुहिंसास्यात्क्लेशजन्यैवजंतुषु ॥ वेदेनोक्तापिहिंसा

Indira Gandhi National Centre for the Arts

स्यादभिचारादिकर्मयत् ॥ सत्यंभूतहितंप्रोक्तंनयथार्थाभिभाषणं ॥ कर्मणामनसावाचासर्वावस्थासुसर्वदा ॥ सर्वत्रमैथुनत्यागोब्रह्मचर्यंप्रचक्षते ॥ ब्रह्मचर्याश्रमस्थानांयतीनांनैष्ठिकंस्मृतं ॥ ब्रह्मचर्यातुसैवोक्तातथैवारण्यवासिनः ॥ ब्रह्मचर्यातुसैवोक्तागृहस्थाश्रमवासिनां ॥ राज्ञश्चैवगृहस्थत्वंब्रह्मचर्यंप्रकीर्तितं ॥ विशांवृत्तवतांचैवकेचिदिच्छंतिपंडिताः ॥ शुश्रूषावागुरौनित्यंब्रह्मचर्यमुदाहृतं ॥ दयाचसर्वभूतेषुसर्वत्रानुग्रहःस्मृतः ॥ विहितेषुतथान्येषुमनोवाक्कायकर्मणां ॥ प्रवृत्तौवानिवृत्तौवाएकरूपत्वमार्जवं ॥ प्रियाप्रियेषुसर्वेषुसमत्वंयच्छरीरिणां ॥ क्षमासैवेतिविद्वद्भिर्गदितायोगवादिभिः ॥ अर्थहानौचबंधूनांवियोगेष्वपिसंपदां ॥ तयोःप्राप्तौचसर्वत्रचित्तस्यस्थापनंधृतिः ॥ अष्टौग्रासामुनेर्भक्ष्याःषोडशारण्यवासिनां ॥ द्वात्रिंशत्तुगृहस्थानांयथेष्टंब्रह्मचारिणः ॥ शौचंचद्विविधंप्रोक्तंबाह्यमाभ्यंतरंतथा ॥ मृज्जलाभ्यांस्मृतंबाह्यंभावशुद्धिस्तथांतरं ॥ मनःशुद्धिस्तथाज्ञेयाधर्मेणाध्यात्मविद्यया ॥ तपःसंतोषआस्तिक्यंदानमीश्वरपूजनं ॥ सिद्धांतश्रवणंचैवह्रीर्मतिश्चजपोव्रतं ॥ एतेचनियमाःप्रोक्तास्तांश्चसर्वान्पृथक्शृणु ॥ विधिनोक्तेनमार्गेणकृच्छ्रचांद्रायणादिभिः ॥

## अहिंसासत्यमस्तेयंब्रह्मचर्यापरिग्रहौ ॥ यमइत्युच्यतेसद्भिःपंचावयवयोगतः ॥ १९ ॥ शौचंतुष्टिस्तपश्चैवजपःप्रणिधिरेवच ॥ इतिपंचप्रभेदःस्यान्नियमःस्वांशभेदतः ॥ २० ॥ ॥ ॥ ॥

शरीरशोषणंप्राहुस्तापसास्तपउत्तमं ॥ यदृच्छालाभतोनित्यंममपूर्तिर्भवेदिति ॥ याधीस्तामृषयःप्राहुःसंतोषंसुखलक्षणं ॥ धर्माधर्मेषुविश्वासोयस्तदास्तिक्यमुच्यते ॥ न्यायार्जितंधनंचान्यद्दययायत्प्रदीयते ॥ अर्थिभ्यःश्रद्धयायुक्तंदानमेतदुदाहृतं ॥ यत्प्रपन्नंस्वभावेनबहुवाप्यल्पमेववा ॥ यथाशक्त्यर्चनंभक्त्याएतदीश्वरपूजनं ॥ रागाद्यपेतंहृदयंममतादुष्टतादिना ॥ हिंसादिरहितःकायस्तपईश्वरपूजनं ॥ सिद्धांतश्रवणंप्रोक्तंवेदांतश्रवणंबुधैः ॥ विप्रक्षत्रियस्योक्तंसिद्धांतश्रवणंबुधैः ॥ विशांचकेचिदिच्छंतिशीलवृत्तवतांसतां ॥ शूद्राणांचस्त्रियाश्चैवस्वधर्मस्थतपस्विनां ॥ सिद्धांतश्रवणंप्रोक्तंपुराणश्रवणंबुधैः ॥ वेदेलौकिकमार्गेषुकल्पितंकर्मयद्भवेत् ॥ तस्मिन्भवतियालज्जाह्रीस्तुसैवेतिकीर्तिता ॥ विहितेषुचमार्गेषुश्रद्धायासामतिर्भवेत् ॥ गुरुणाचोपदिष्टोपिवेदबाह्योविवर्जितः ॥ विधिनोक्तेनमार्गेणमंत्राभ्यासोजपःस्मृतः ॥ अधीतवेदेष्वंगेषुपुराणेसेतिहासके ॥ यदिहाध्ययनंतच्चमंत्राभ्यासोजपःस्मृतः ॥ प्रसन्नगुरुणापूर्वमुपदिष्टंत्वनुज्ञया ॥ धर्मार्थमात्मसिध्यर्थमुपायग्रहणंव्रतमिति ॥ एवमन्यान्यपिलक्षणानिशैवशास्त्रादिषुद्रष्टव्यानि ॥ कानिचिदत्राप्युच्यतेतदाह॥ सामान्यादिति ॥अपरिग्रहोदेहयात्रातिरिक्तभोगसाधनास्वीकारः॥१८॥१९॥प्रणिधिःप्रणिधानंतच्चफलाभिसंधिंविनाकृतानांकर्मणामीश्वरेसमर्पणं॥२०॥



Indira Gandhi National Centre for the Arts

योगांगानिवक्तुंप्रथममासनभेदानाह ॥ स्वस्तिकमिति ॥ स्थिरसुखमासनमित्यासनसामान्यलक्षणंपातंजलेभिहितं ॥ सनत्कुमारसंहितायामपितद्भेदाद र्शिताः ॥ आसनंस्वस्तिकंकुर्यात्पद्मंभद्रासनंतथेति ॥ योगयाज्ञवल्कीयेपि ॥ आसनान्यधुनावक्ष्येशृणुगार्गितपोधने ॥ स्वस्तिकंगोमुखंपद्मंवीरंसिंहासनं तथा ॥ भद्रंमुक्तासनंचैवमयूरासनमेवच ॥ तथैतेषांवरारोहेपृथग्वक्ष्यामिलक्षणं ॥ जानूर्वोरंतरेसम्यक्कृत्वापादतलेउभे ॥ सीवन्याश्चात्मनःपार्श्वेगुल्फौनिक्षि प्यपादयोः ॥ सीवनीशिश्नाग्रादारभ्यगुदद्वारपर्यंतंसूत्रसदृशीरेखा ॥ सव्येदक्षिणगुल्फंतुदक्षिणेदाक्षिणेतरं ॥ एतच्चस्वस्तिकंप्रोक्तंसर्वपापप्रणाशनं ॥ सव्य दक्षिणगुल्फौतुपृष्ठपार्श्वेनिवेशयेत् ॥ दक्षिणेतुयथासव्यंगोमुखंगोमुखंतथा ॥ अंगुष्ठौचनिबध्नीयाद्धस्ताभ्यांव्युत्क्रमंतथा ॥ जंघोरूपरिविप्रेंद्रकृत्वापादत लेउभे ॥ पद्मासनंभवेदेतत्सर्वेषामपिपूजितं ॥ एकंपादमथैकस्मिन्विन्यस्योरुणिसंस्थितः ॥ इतरस्मिंस्तथैवोरौवीरासनमुदाहृतं ॥ गुल्फौचवृषणस्याधः सीवन्याःपार्श्वयोःक्षिपेत् ॥ दक्षिणंसव्यगुल्फेनदक्षिणेनतथोत्तरं ॥ हस्तौतुजान्वोःसंस्थाप्यस्वांगुलीभिःप्रसार्यच ॥ व्याघ्रवक्त्रोनिरीक्षेतनासाग्रंतुसमाहि

स्वस्तिकंपद्ममर्धेंदुवीरंयोगंप्रसाधितम् ॥ पर्यंकंचयथेष्टंचप्रोक्तमासनमष्टधा ॥ २१ ॥ प्राणःस्वदेहजोवायुस्तस्या
यामोनिरोधनम् ॥ तद्रेचकंपूरकंचकुंभकंचत्रिधोच्यते ॥ २२ ॥ नासिकापुटमंगुल्यापीड्यैकमपरेणतु ॥ औदरंरे
चयेद्वायुंतथायंरेचकःस्मृतः ॥ २३ ॥ बाह्येनमरुतादेहंदृतिवत्परिपूरयेत् ॥ नासापुटेनापरेणपूरणात्पूरकंमतं ॥
॥ २४ ॥ नमुंचतिनगृण्हातिवायुमंतर्बहिःस्थितं ॥ संपूर्णकुंभवत्तिष्ठेदचलःसतुकुंभकः ॥ २५ ॥ रेचकाद्यंत्रयमिदंन
द्रुतंनविलंबितम् ॥ उद्यतःक्रमयोगेनत्वभ्यस्येद्योगसाधकः ॥ २६ ॥ ॥ ॥

तः ॥ सिंहासनंभवेदेतत्पूजितंयोगिभिःसदा ॥ गुल्फौचवृषणस्याधःसीवन्याःपार्श्वयोःक्षिपेत् ॥ पार्श्वपादौचपाणिभ्यांदृढंबध्वासुनिश्चलं ॥ भद्रासनंभवे देतत्सर्वव्याधिविषापहं ॥ संपीड्यसीवनींसूक्ष्मांगुल्फेनैवतुसव्यतः ॥ सव्यंदक्षिणगुल्फेनमुक्तासनमुदीरितं ॥ मेढ्रादुपरिनिक्षिप्यसव्यंगुल्फंतथोपरि ॥ गु ल्फांतरंचनिक्षिप्यमुक्तासनमिदंतथा ॥ अवष्टभ्यधरांसम्यक्कूर्पराभ्यांकरद्वये ॥ हस्तयोःकूर्परौचापिस्थापयन्नाभिपार्श्वयोः ॥ समुन्नतशिरःपादोदंडवद्व्योम्नि संस्थितः ॥ मयूरासनमेतत्तुसर्वपापप्रणाशनमिति ॥ अर्धेंदुअर्धचंद्राकृति ॥ योगंयोगाख्यं ॥ प्रसाधितंप्रकर्षेणाभ्यस्तं ॥ पर्यंकंपर्यंकाकृति ॥ यथेष्टंस्वेच्छ याक्रियमाणंकिमपि एतत्सनत्कुमारसंहितायांविचारयिष्यते ॥ २१ ॥ प्राणसंरोधस्वरूपमाह ॥ प्राणइति ॥ स्वदेहान्निष्पन्नोयःप्राणःश्वासप्रश्वासरूपो वायुस्तस्यआयामोनिरोधनंगतिविच्छेदःप्राणसंरोधःप्राणायामइत्यर्थः ॥ तथाचयोगसूत्रं ॥ तस्मिन्सतिश्वासप्रश्वासयोर्गतिविच्छेदःप्राणायामइति ॥ ॥ २२ ॥ अपरेणअन्येननासापुटेन ॥ रेचयेत्बहिर्निःसारयेत् ॥ २३ ॥ दृतिवत्भस्त्रावत् ॥ २४ ॥ २५ ॥ नद्रुतंनातिशीघ्रं ॥ नविलंबितंनातिमंदं ॥ उद्यतइति ॥ उत्सादक्रमयोगेनेतिपाठांतरं ॥ २६ ॥ ॥ ॥ ॥ ॥ ॥

Indira Gandhi National Centre for the Arts

॥ २७ ॥ कनीयादीति ॥ कन्यकादिक्रमवशादितिपाठांतरम् ॥ मात्रागुणेति ॥ मात्रायाःवक्ष्यमाणलक्षणायाःगुणोगुणनंतद्विभागतः ॥ २८ ॥ सकृदुद्घा
तइति ॥ प्राणेनप्रेर्यमाणेनअपानःपीड्यतेयदि ॥ गत्वाचोर्ध्वंनिवर्तेतएतदुद्घातलणं ॥प्राणवायुनाऽपानाभिघातेसतिनाभिमूलात्प्रेरितस्यवायोर्विरिच्यमा
नस्याशिरस्यभिहननमुद्घातइत्युक्तलक्षणःसकृत्उघातोयास्मिन्सः ॥ २९ ॥ तदुत्तरःचतुर्थः ॥ तदेतद्दर्शितंपातंजले ॥ बाह्याभ्यंतरस्तंभवृत्तिर्देशकालसं
ख्याभिःपरिदृष्टोदीर्घःसूक्ष्मः ॥ बाह्याभ्यंतरविषयाक्षेपीचतुर्थइति ॥ रेचकपूरकयोरभ्यासेनजितबाह्याभ्यंतरविषयनिश्चयंविनैवसकृत्प्रयत्नमात्रेणस्तंभवृत्तिः

रेचकादित्रयाभ्यासोनाडीशोधनपूर्वकः ॥ स्वेच्छोत्क्रमणपर्यंतःप्रोक्तोयोगानुशासने ॥ २७ ॥ कनीयादिक्रमवशा
त्प्राणायामनिरोधनं ॥ तच्चतुर्धोपदिष्टंस्यान्मात्रागुणविभागतः ॥ २८ ॥ कनीयःसकृदुद्घातःसचद्वादशमात्रकः ॥
मध्यमस्तुद्विरुद्घातश्चतुर्विंशतिमात्रकः ॥ २९ ॥ उत्तमस्तुत्रिरुद्घातःषट्त्रिंशन्मात्रकःपरः ॥ स्वेदकंपादिजनकःप्राणा
यामस्तदुत्तरः ॥ ३० ॥ आनंदोद्भवरोमांचनेत्राश्रूणांविमोचनं ॥ जल्पभ्रमणमूर्च्छाद्यंजायतेयोगिनःपरम् ॥ ३१ ॥
जानुंप्रदक्षिणीकृत्यनद्रुतंनविलंबितम् ॥ अंगुलीस्फोटनंकुर्यात्सामात्रेतिप्रकीर्तिता ॥ ३२ ॥ मात्राक्रमेणविज्ञेया
चोद्घातक्रमयोगतः ॥ नाडीविशुद्धिपूर्वंतुप्राणायामंसमाचरेत् ॥३३॥ अगर्भश्चसगर्भश्चप्राणायामोद्विधास्मृतः ॥
जपध्यानंविनाऽगर्भःसगर्भस्तत्समन्वयात् ॥ ३४ ॥ अगर्भाद्गर्भसंयुक्तःप्राणायामःशताधिकः ॥ तस्मात्सगर्भंकुर्वं
तियोगिनःप्राणसंयमम् ॥ ३५ ॥ प्राणस्यविजयादेवजीयंतेदशवायव ॥ प्राणोपानःसमानश्चउदानोव्यानएवच
॥ ३६ ॥ नागःकूर्मश्चकृकरोदेवदत्तोधनंजयः ॥ प्रयाणंकुरुतेयस्मात्तस्मात्प्राणोभिधीयते ॥ ३७ ॥ अवाङ्नयत्य
पानाख्योयदाहारादिभुज्यते ॥ व्यानोव्यानशयत्यंगान्यशेषाणिविवर्धयन् ॥ ३८ ॥ उद्वेजयतिमर्माणीत्युदानोवा
युरीरितः ॥ समंनयतिसर्वांगंसमानस्तेनगीयते ॥ ३९ ॥ उद्गारेनागआख्यातःकूर्मउन्मीलनेस्थितः ॥ कृकरः
क्षवथौज्ञेयोदेवदत्तोविजृंभणे ॥ ४० ॥ ॥ ॥ ॥

कुंभकस्तन्निश्चयपूर्वकःस्तंभवृत्तिर्बहुप्रयत्नसाध्यस्तुरीयइतिवैलक्षण्यादितियोगमणिप्रभायांव्याख्यातं॥३०॥नेत्राश्रूणामिति ॥ स्वरनेत्रांगमोटनमितिपाठां
तरं ॥ ३१ ॥ मात्रास्वरूपमाह ॥ जानुमिति ॥ ३२ ॥ ३३ ॥ ३४ ॥ ३५ ॥ ॥ ३६ ॥ प्राणादिशब्दानांव्युत्पत्तिमाह ॥ प्रयाणमिति ॥ ३७ ॥ अवा
क्अधः ॥ व्यानशयतिव्याप्नोति ॥ ३८ ॥३९॥ उद्गारेमुखादुद्गिरणव्यापारे ॥ उन्मीलनेतत्तद्गात्रविकासने ॥ क्षवथौकासे ॥ विजृंभणेजृंभिकायां ॥४०॥



Indira Gandhi National Centre for the Arts

प्रमाणवान्शास्त्रानुसृतः ॥ ४१ ॥ ४२ ॥ ४३ ॥ ४४ ॥ ४५ ॥ षोडशीमिति ॥ याज्ञवल्क्योपि ॥ प्राणायामपराःसर्वेब्रह्मविष्णुशिवादयः ॥ प्राणायामैर्विशुद्धायेतेयांतिपरमांगतिम् ॥ प्राणायामादृतेनान्यत्तारकंनरकादपि ॥ संसारार्णवमग्नानांतारकःप्राणसंयमइति ॥ प्रत्याहारमाह ॥ इंद्रियाणीति ॥ इंद्रियाणिश्रोत्रादीनिविषयेषुशब्दादिषुप्रसक्तानिसंप्रयुक्तानिआहृत्यविषयेभ्योवियुज्यनिगृण्हातिचित्तस्वरूपमिवानुकरोतिसप्रत्याहारइत्यर्थः ॥ तथाचयोगसूत्रं ॥ स्वविषयासंप्रयोगेचित्तस्यस्वरूपानुकारइवेंद्रियाणांप्रत्याहारइति ॥ याज्ञवल्क्योपि ॥ इंद्रियाणांविचरतांविषयेषुस्वभावतः ॥ बलादाहरणं

नजहातिमृतंचापिसर्वव्यापीधनंजयः ॥ क्रमेणाभ्यस्यमानोयंप्राणायामःप्रमाणवान् ॥ ४१ ॥ निर्दहत्यखिलंदोषंकर्तुर्देहंचरक्षति ॥ प्राणेतुविजितेसम्यक्तच्चिन्हान्युपलक्षयेत् ॥ ४२ ॥ विण्मूत्रश्लेष्मणांतावदल्पभावःप्रजायते ॥ बहुभोजनसामर्थ्यंचिरादुछ्वसनंतथा ॥ ४३ ॥ लघुत्वंशीघ्रगामित्वमुत्साहःस्वरसौष्ठवम् ॥ सर्वरोगक्षयश्चैवबलंतेजःसुरूपता ॥ ४४ ॥ धृतिर्मेधायुवत्वंचस्थिरताचप्रसन्नता ॥ तपांसिपापक्षयतायज्ञदानव्रतादयः ॥ ४५ ॥ प्राणायामस्यतस्यैतेकलांनार्हंतिषोडशीम् ॥ इंद्रियाणिप्रसक्तानियथास्वंविषयेष्विह ॥ ४६ ॥ आहृत्ययन्निगृण्हातिसप्रत्याहारउच्यते ॥ मनःपूर्वाणींद्रियाणिस्वर्गंनरकमेवच ॥ ४७ ॥ निगृहीतविसृष्टानिस्वर्गायनरकायच ॥ तस्मात्सुखार्थीमतिमान्ज्ञानवैराग्यमास्थितः ॥ ४८ ॥ इंद्रियाश्वान्निगृह्याशुस्वात्मनात्मानमुद्धरेत् ॥ धारणानामचित्तस्यस्थानबंधःसमासतः ॥ ४९ ॥ स्थानंचशिवएवैकोनान्यद्दोषाश्रयंयतः ॥ कालंकंचावधीकृत्यस्थानेऽवस्थापितंमनः ॥ ५० ॥ नतुप्रच्यवतेलक्ष्याद्धारणास्यान्नचाऽन्यथा ॥ मनसःप्रथमंस्थैर्यंधारणातःप्रजायते ॥ ५१ ॥ तस्माद्धीरंमनःकुर्याद्धारणाभ्यासयोगतः ॥ ध्यैचिंतायांस्मृतोधातुःशिवचिंतामुहुर्मुहुः ॥ ५२ ॥ ॥

तेषांप्रत्याहारःसउच्यतइति ॥ ४६ ॥ मनःपूर्वाणीति ॥ मनआदीनींद्रियाणिस्वर्गंनरकंचसाधयंतीतिशेषः ॥ ४७ ॥ निगृहीतविसृष्टानि निगृहीतानिस्वर्गायविसृष्टानिचनरकायभवंतीतिविवेकः ॥ ४८ ॥ धारणामाह ॥ चित्तस्येति ॥ चित्तस्यस्थानबंधःस्थानेबंधःस्थिरीकरणंधारणेत्यर्थः ॥ तथाचयोगसूत्रं ॥ देशबंधश्चित्तस्यधारणेति॥याज्ञवल्क्योपि ॥ यमादिगुणयुक्तस्यमनसःस्थितिरात्मनि॥धारणेत्युच्यतेसद्भिःशास्त्रतात्पर्यवेदिभिरिति ॥ ४९ ॥ ५० ॥ लक्ष्यात्शिवाख्यस्थानात् ॥ ५१ ॥ ध्यानमाह ॥ ध्यैचिंतायामिति ॥ ५२ ॥ ॥ ॥

Indira Gandhi National Centre for the Arts

सदृशप्रत्ययस्यएकाकारप्रत्ययस्यध्येयेशिवेवस्थितचित्तस्यप्रत्ययांतररहितप्रवाहोध्यानमित्यर्थः ॥ तथाचयोगसूत्रं ॥ तत्रप्रत्ययैकतानताध्यानमिति ॥ याज्ञवल्क्योपि ॥ जगत्कारणमव्यक्तंज्वलंतमामितौजसं ॥ मनसालोक्यसोहंस्यामित्येतत्ध्यानमुत्तमं ॥ अथवाबद्धपर्यंकंशिथिलीकृत्यविग्रहं ॥ शिवएवस्वयंभूत्वानासाग्रारोपितेक्षणः ॥ निराकारंपरंशांतंपरमात्मानमीश्वरं ॥ नीरूपममृतंध्यायेद्भ्रुवोर्मध्येवराननइति ॥ ५३ ॥ ५४ ॥ परःशिवःध्येयःअथवाईशाईश्वरशक्तिर्ध्येयेत्यस्मिन्नर्थेआथर्वणीश्रुतिःसमाप्तापर्यवसितेत्यर्थः ॥ ५५ ॥ विमुक्तीति ॥ विमुक्तिप्रत्ययःसर्वइतिपाठांतरं ॥ ५६ ॥ ५७ ॥ ध्यानध्येययोःस्वरूपस्योक्तत्वात्परिशिष्टंध्यातृलक्षणमाह ॥ ज्ञानेति ॥ ५८ ॥ ५९ ॥ प्राणायामधारणादीनामुत्तरोत्तरंश्रेष्ठत्वमाह ॥ धारणेति ॥ द्वादशायामाद्वादशप्राणायामसमा ॥ ६० ॥ ६१ ॥ समाधिंप्रशंसति ॥ सर्वत्रेति ॥ प्रज्ञालोकःप्रज्ञानप्रकाशः ॥ समाधिलक्षणमाह ॥ यदर्थेति ॥ यत्ध्यानमेवअर्थमात्रस्व

अव्याक्षिप्तेनमनसाध्यानंनामतदुच्यते ॥ ध्येयावस्थितचित्तस्यसदृशप्रत्ययस्ययः ॥ ५३ ॥ प्रत्ययांतरनिर्मुक्तप्रवाहोध्यानमुच्यते ॥ सर्वमन्यत्परित्यज्यशिवएवशिवंकरः ॥ ५४ ॥ परोध्येयोथवेशेतिसमाप्ताथर्वणीश्रुतिः ॥ सर्वप्रभूशिवौतस्मात्सर्वगौसर्वदोदितौ ॥ ५५ ॥ सर्वज्ञौसततंध्येयौनानारूपविभेदतः ॥ विमुक्तिप्रत्ययःपूर्वःप्रत्ययश्चाणिमादिकम् ॥ ५६ ॥ इत्येतद्द्विविधंज्ञेयंध्यानस्यास्यप्रयोजनं ॥ ध्याताध्यानंतथाध्येयंयच्चध्यानप्रयोजनम् ॥ ५७ ॥ एतच्चतुष्टयंज्ञात्वायोगंयुंजीतयोगवित् ॥ ज्ञानवैराग्यसंपन्नःश्रद्दधानःक्षमान्वितः ॥ ५८ ॥ निर्ममश्चसदोत्साहीध्यातेत्थंपुरुषःस्मृतः ॥ जपाच्छ्रांतःपुनर्ध्यायेत्ध्यानाच्छ्रांतःपुनर्जपेत् ॥ ५९ ॥ जपध्यानाभियुक्तस्यक्षिप्रंयोगःप्रसिध्यति ॥ धारणाद्वादशायामाध्यानंद्वादशधारणम् ॥ ६० ॥ ध्यानद्वादशकंयावत्समाधिरभिधीयते ॥ समाधिर्नामयोगांगमंतिमंपरिकीर्तितं ॥ ६१ ॥ समाधिनाचसर्वत्रप्रज्ञालोकःप्रवर्तते ॥ यदर्थमात्रनिर्भासंस्तिमितोदधिवत्स्थितम् ॥ ६२ ॥ स्वरूपशून्यवद्भानंसमाधिरभिधीयते ॥ ध्येयेमनःसमावेश्यतिष्ठेदपिचसुस्थिरम् ॥ ६३ ॥

रूपेणनिर्भासमानंससमाधिः ॥ तस्यस्थितौदृष्टांतमाह ॥ स्तिमितेति ॥ ६२ ॥ मात्रचोर्थमाह ॥ स्वरूपेति ॥ ध्यानस्वरूपज्ञानशून्यमिवेत्यर्थः ॥ इवशब्देनध्यानस्यसत्तांद्योतयति ॥ यथास्वच्छस्फटिकमणिःकुसुमरूपेणैवनिर्भासतेनस्वरूपेणतद्वदित्यर्थः ॥ विजातीयवृत्तिच्छिन्नाधारणाअविच्छिन्नंध्यानंध्येयध्यानध्यातृस्फूर्तिमत् ॥ ध्येयमात्रस्फूर्तिमान्समाधिः ॥ सएवदीर्घकालव्यापीसन्संप्रज्ञाताख्योयोगइत्युच्यते ॥ ध्येयस्फूर्तिशून्योऽसंप्रज्ञातइतिविवेकः ॥ एतत्सर्वमभिप्रेत्योक्तंपातंजले ॥ तदेवार्थमात्रनिर्भासंस्वरूपशून्यमिवसमाधिरिति ॥ याज्ञवल्क्योपि ॥ समाधिःसमतावस्थाजीवात्मपरमात्मनोः ॥ ब्रह्मणोवस्थितिर्यासासमाधिःप्रत्यगात्मनइति ॥ तदेवव्यक्तीकरोति ॥ ध्येयइति ॥ ६३ ॥ ॥ ॥



Indira Gandhi National Centre for the Arts

निर्वाणानलः स्थिरप्रदीपादिः ॥ समाधिनिष्ठस्यस्थितिमाह ॥ नशृणोतीति ॥ रस्यतिआस्वादयति ॥ ६४ ॥ ६५ ॥ निवातस्थःवातरहितप्रदेशस्थः॥निवातो दृढसन्नाहेनिवासेवातवर्जितेइत्यजयः ॥ ६६ ॥ तस्मात्समाधेः ॥ ६७ ॥ अंतरायाःफलस्यप्रतिबंधकाः ॥ तानेवविघ्नानाह ॥ आलस्यमिति ॥ ६८ ॥ ॥ ६९ ॥ अलसत्वंशैथिल्यं ॥ ७० ॥ धातुवैषम्यजाःशरीरस्थधातुविकारकृताः॥ साधनानांयमनियमाद्यंगानां ॥ ७१ ॥ इदमिति ॥ इदंध्येयमिदंवे

निर्वाणानलवद्योगीसमाधिस्थःप्रगीयते ॥ नशृणोतिनचाघ्रातिनरस्यतिनपश्यति ॥ ६४ ॥ नचस्पर्शंविजानातिन संकल्पयतेमनः ॥ नचाभिमन्यतेकिंचिन्नचबुध्यतिकाष्ठवत् ॥ ६५ ॥ एवंशिवेविलीनात्मासमाधिस्थइहोच्यते ॥ यथादीपोनिवातस्थःस्पंदतेनकदाचन ॥ ६६ ॥ तथासमाधिनिष्ठोपितस्मान्नविचलेत्सुधीः ॥ एवमभ्यस्यतश्चाब्दं योगिनोयोगमुत्तमम् ॥ ६७ ॥ तदंतरायानश्यंतिविघ्नाःसर्वेशनैःशनैः ॥ आलस्यंव्याधयस्तीव्राःप्रमादस्थानसं शयः ॥ ६८ ॥ अनवस्थितचित्तत्वमश्रद्धाभ्रांतिदर्शनं ॥ दुःखानिदौर्मनस्यंचविषयेषुचलोलता ॥ ६९ ॥ दशैतेयुंज तांपुंसामंतरायाःप्रकीर्तिताः ॥ आलस्यमलसत्वंतुयोगिनांदेहचेतसोः ॥ ७० ॥ धातुवैषम्यजादोषाव्याधयःकर्मदो षजाः ॥ प्रमादोनामयोगस्यसाधनानामभावना ॥ ७१ ॥ इदंवेत्युभयालंबिज्ञानंतत्स्थानसंशयः ॥ अप्रतिष्ठाहि मनसस्त्वनवस्थितिरुच्यते ॥ ७२ ॥ अश्रद्धाभावरहितावृत्तिर्वैयोगवर्त्मनि ॥ विपर्यस्तामतिर्यासाभ्रांतिरित्यभिधी यते ॥ ७३ ॥ दुःखमज्ञानजंपुंसांचेतस्याध्यात्मिकंविदुः ॥ आधिभौतिकमंगोत्थंयच्चदुःखंपुराकृतैः ॥ ७४ ॥ आधि दैविकमाख्यातमशन्यस्त्रविषादिजम् ॥ इच्छाविघातजंक्षोभंदौर्मनस्यंप्रचक्षते ॥ ७५ ॥ विषयेषुविचित्रेषुविभ्रमस्तत्र लोलता ॥ शांतेष्वेतेषुविघ्नेषुयोगासक्तस्ययोगिनः ॥ ७६ ॥ उपसर्गाःप्रवर्तंतेदिव्यास्तेसिद्धिसूचकाः ॥ प्रतिभाश्रवणं वार्तादर्शनास्वादवेदनाः ॥ ७७ ॥ उपसर्गाःषडित्येतेव्ययेयोगस्यसिद्धयः ॥ सूक्ष्मेव्यवहितेऽतीतेविप्रकृष्टेत्वनागते ॥ ७८ ॥ प्रतिभाकथ्यतेयोर्थेप्रतिभासोयथातथम् ॥ श्रवणंसर्वशब्दानांश्रवणंत्वप्रयत्नतः ॥ ७९ ॥

त्याकारकविरुद्धकोटिद्वयावगाहिज्ञानमित्यर्थः ॥ ७२ ॥ विपर्यस्ताविपरीताशुक्तौरजतमित्याकारिका ॥ ७३ ॥ अंगोत्थंशरीरस्यपांचभौतिकत्वात्तज्ज न्यज्वरादिकृतं ॥ ७४ ॥ क्षोभंमनश्चांचल्यं ॥ ७५ ॥ लोलतासतृष्णता ॥ ७६ ॥ ७७ ॥ एतेप्रतिभादयोदिव्योपसर्गायोगस्यव्ययेन्हासकरणेसिद्धयः साधकाइत्यर्थः ॥ ७८ ॥ प्रतिभेति ॥ यःसूक्ष्मादावर्थेयथातथंयथास्वरूपंप्रतिभासोभानंसाप्रतिभेत्यर्थः ॥ ७९ ॥ ॥

Indira Gandhi National Centre for the Arts

वार्तासुवृत्तांतेषु ॥ दिव्यानांवस्तूनां ॥ ८० ॥ ८१ ॥ ८२ ॥ आस्यात्मुखात् ॥ विविधेति ॥ विविधास्यप्रवर्ततइतिपाठांतरं ॥ ८३ ॥ दिशंतीति ॥ सुखमितिशेषः ॥ ८४ ॥ पार्थिवैश्वर्यगुणानाह ॥ कृशतेति ॥ ८५ ॥ चतुर्णामिति ॥ चतुर्भिःपृथिव्यप्तेजोवायुभिःपार्थिवांशंपुष्पादिकं ॥ ८६ ॥ पैशाचंपिशाचाधिपैरुपभुज्यमानं ॥ आप्यैश्वर्यगुणानाह ॥ जलइति ॥ विनिर्गमःअंतःप्रविश्यबहिरागमनं ॥ ८७ ॥ ८८ ॥ ८९ ॥ त्रयाणांत्रिभिःअप्तेजोवायुभिः ॥ ९० ॥ आप्यंअम्मयं ॥ तैजसै

वार्तावार्तासुविज्ञानंसर्वेषामेवदेहिनाम् ॥ दर्शनंनामदिव्यानांदर्शनंचाऽप्रयत्नतः ॥ ८० ॥ तथाऽऽस्वादश्चदिव्येषु रसेष्वास्वादउच्यते ॥ स्पर्शनाधिगमस्तद्वद्वेदनानामविश्रुता ॥ ८१ ॥ गंधादीनांचदिव्यानामाब्रह्मभुवनाधिपाः ॥ संतिष्ठंतेचरत्नानिप्रयच्छंतिबहूनिच ॥ ८२ ॥ स्वच्छंदमधुरावाणीविविधास्यात्प्रवर्तते ॥ रसायनानिसर्वाणिदिव्याश्चौषधयस्तथा ॥ ८३ ॥ सिध्यंतिप्रणिपत्यैनंदिशंतिसुरयोषितः ॥ योगसिध्यैकदेशेपिदृष्टेमोक्षेभवेन्मतिः ॥ ॥ ८४ ॥ दृष्टमेतन्मयायद्वत्तद्वन्मोक्षोभवेदिति ॥ कृशतास्थूलताबाल्यंवार्धक्यंचैवयौवनम् ॥ ८५ ॥ नानाजातिस्वरूपत्वंचतुर्णांदेहधारणम् ॥ पार्थिवांशंविनानित्यंसुरभिर्गंधसंग्रहः ॥ ८६ ॥ एवमष्टगुणंप्राहुःपैशाचंपार्थिवंपदम् ॥ जलेनिवसनंचैवभूम्यामेवविनिर्गमः ॥ ८७ ॥ इच्छेच्छक्तःस्वयंपातुंसमुद्रमपिचातुरः ॥ यत्रेच्छतिजगत्यस्मिंस्तत्रैवजलदर्शनम् ॥ ८८ ॥ विनाकुंभादिकंपाणौजलसंचयधारणम् ॥ यद्वस्तुविरसंचापिभोक्तुमिच्छतितत्क्षणात् ॥ ॥ ८९ ॥ रसादिकंभवेच्चान्यत्रयाणांदेहधारणम् ॥ निर्व्रणत्वंशरीरस्यपार्थिवैश्वसमन्वितम् ॥ ९० ॥ तदिदंषोडशगुणमाप्यमैश्वर्यमद्भुतम् ॥ शरीरादग्निनिर्माणंतत्तापभयवर्जनं ॥ ९१ ॥ शक्तिर्जगदिदंदग्धुंयदिच्छेदप्रयत्नतः ॥ स्थापनंवानलस्याप्सुपाणौपावकधारणं ॥ ९२ ॥ दग्धेसर्गोयथापूर्वंमुखेवान्नादिपाचनं ॥ द्वाभ्यांदेहविनिर्माणमाप्यैश्वर्यसमन्वितं ॥ ९३ ॥ एतच्चतुर्विंशतिधातैजसंपरिचक्षते ॥ मनोजवत्वंभूतानांक्षणादंतःप्रवेशनम् ॥ ९४ ॥ पर्वतादिमहाभारधारणंचाप्रयत्नतः ॥ गुरुत्वंचलघुत्वंचपाणावनिलधारणं ॥ ९५ ॥ अंगुल्यग्रनिपाताद्यैर्भूमेरपिचकंपनं ॥ एकेनदेहनिष्पत्तिर्युक्तंभोगैश्चतैजसैः ॥ ९६ ॥ द्वात्रिंशद्गुणमैश्वर्यंमारुतंकवयोविदुः ॥ छायाहीनविनिष्पत्तिरिंद्रियाणामदर्शनं ॥ ९७ ॥ ॥ ॥ ॥ ॥

श्वर्यगुणानाह ॥ शरीरादिति ॥ ९१ ॥ ९२ ॥ दग्धइति ॥ वस्तुनिदग्धेसतियथापूर्वंपूर्ववत्सर्गःपुनरुत्पतिः ॥ द्वाभ्यांतेजोवायुभ्यां ॥ ९३ ॥ मारुतैश्वर्यगुणानाह ॥ मनोजवत्वमिति ॥ भूतानांप्राणिनांमहाभूतानांवा ॥ ९४ ॥ ९५ ॥ एकेनवायुना ९६ ॥ आकाशैश्वर्यगुणानाह ॥ छायेति ॥ ९७ ॥

॥ ९८ ॥ ९९ ॥ चांद्रमसैश्वर्यगुणानाह ॥ यथेति ॥ १०० ॥ १०१ ॥ मानसंमनोमयं ॥ गुणतोधिकंअष्टचत्वारिंशद्गुणमित्यर्थः ॥ १०२ ॥ प्राजापत्यैश्वर्यगुणानाह ॥ छेदनमिति ॥ १०३ ॥ आभिमानिकमहंकारमयं ॥ १०४ ॥ ब्राह्मैश्वर्यगुणानाह ॥ सर्गइति ॥ १०५ ॥ १०६ ॥ प्राजापत्यैर्भोगैः

खेचरत्वंयथाकाममिंद्रियार्थैःसमन्वयः॥ आकाशेलंघनंचैवस्वदेशेतन्निवेशनम् ॥ ९८ ॥ आकाशपिंडीकरणमशरीरत्वमेवच ॥ अनिलैश्वर्यसंयुक्तंचत्वारिंशद्गुणंमहत् ॥ ९९ ॥ ऐंद्रमैश्वर्यमाख्यातमांबरंतत्प्रचक्षते ॥ यथाकामोपलब्धिश्चयथाकामविनिर्गमः ॥ १०० ॥ सर्वस्याभिभवश्चैवसर्वगुह्यार्थदर्शनं ॥ कर्मानुरूपनिर्माणंवशित्वंप्रियदर्शनम् ॥ १०१ ॥ संसारदर्शनंचैवभोगैरैंद्रैःसमन्वितम् ॥ एतच्चांद्रमसैश्वर्यंमानसंगुणतोधिकम् ॥ १०२ ॥ छेदनंताडनंचैवबंधनंमोचनंतथा ॥ ग्रहणंसर्वभूतानांसंसारवशवर्तिनाम् ॥ १०३ ॥ प्रसादश्चापिसर्वेषांमृत्युकालजयस्तथा ॥ आभिमानिकमैश्वर्यंप्राजापत्यंप्रचक्षते ॥ १०४ ॥ एतच्चांद्रमसैर्भोगैःषट्पंचाशद्गुणंमहत् ॥ सर्गःसंकल्पमात्रेणत्राणंसंहरणंतथा ॥ १०५ ॥ स्वाधिकारश्चसर्वेषांभूतचित्तप्रवर्तनम् ॥ असादृश्यंचसर्वस्यनिर्माणंजगतःपृथक् ॥ १०६ ॥ शुभाशुभस्यकरणंप्राजापत्यैश्चसंयुतम् ॥ चतुःषष्टिगुणंब्राह्ममैश्वर्यंतत्प्रचक्षते ॥ १०७ ॥ बौद्धादस्मात्परंगौणमैश्वर्यंप्राकृतंविदुः ॥ वैष्णवंतत्समाख्यातंतस्यैवभुवनेस्थितम् ॥ १०८ ॥ ब्रह्मणैतद्गुणंसर्वंवेत्तुमन्यैर्नशक्यते ॥ तत्पौरुषंचगौणंचगाणेशंपदमैश्वरं ॥ १०९ ॥ विष्णुनातत्पदंकिंचिज्ज्ञातुमन्यैर्नशक्यते ॥ विज्ञानसिद्धयश्चैवसर्वाएवौपसर्गिकाः ॥ ११० ॥ निरोद्धव्याःप्रयत्नेनवैराग्येणपरेणतु ॥ प्रतिभादिष्वशुद्धेषुगुणेष्वासक्तचेतसः ॥ १११ ॥ नसिद्ध्येत्परमैश्वर्यमव्ययंसार्वकामिकम् ॥ तस्माद्गुणांश्चभोगांश्चदेवासुरमहीभृतां ॥ ११२ ॥ तृणवद्यस्त्यजेत्तस्ययोगसिद्धिःपराभवेत् ॥ अथवानुग्रहेच्छायांजगतोविचरेन्मुनिः ॥ ११३ ॥ ॥ ॥

॥ १०७ ॥ वैष्णवैश्वर्यमाह ॥ बौद्धादिति ॥ अस्माद्बौद्धात्बुद्धिकृतात्परमतीतंगौणंगुणमयं ॥ १०८ ॥ गाणेशंपदमाह ॥ तदिति ॥ १०९ ॥ विज्ञानेति ॥ व्युत्थानेसिद्धयश्चैताइतिपाठांतरं ॥ ११० ॥ प्रतिभादिषु पूर्वोक्तप्रतिभाश्रवणादिषुगुणेषुपूर्वोक्तेषु ॥ १११ ॥ ११२ ॥ ११३ ॥ ॥

Indira Gandhi National Centre for the Arts

॥ ११४ ॥ ११५ ॥ मुक्तपुष्पैःपुंड्रकपुष्पैःसमाकीर्णेव्याप्ते ॥ ११६ ॥ ११७ ॥ ११८ ॥ ११९ ॥ १२० ॥ नच्छर्द्यांवांतभूमौ ॥ नातिसारेअतिसारा



यथाकामंगुणान्भोगान्भुक्त्वामुक्तिंप्रयास्यति ॥ अथप्रयोगंयोगस्यवक्ष्येशृणुसमाहितः ॥ ११४ ॥ शुभेकालेशुभे
देशेशिवक्षेत्रादिकेपुनः ॥ विजनेजंतुरहितेनिःशब्देबाधवर्जिते ॥११५॥ सुप्रलिप्तेस्थलेसौम्येगंधधूपादिवासिते ॥
मुक्तपुष्पसमाकीर्णेवितानादिविचित्रिते ॥ ११६ ॥ कुशपुष्पसमित्तोयफलमूलसमन्विते ॥ नाग्न्यभ्याशेजलाभ्या
शेशुष्कपर्णमयेपिवा ॥ ११७ ॥ नदंशमशकाकीर्णेसर्पश्वापदसंकुले ॥ नचदुष्टमृगाकीर्णेसभयेदुर्जनावृते॥११८॥
श्मशानेचैत्यवल्मीकेजीर्णागारेचतुष्पथे ॥ नदीनदसमुद्राणांतीरेरथ्यांतरेपिवा॥११९॥नजीर्णोद्यानगोष्ठादौनानिष्टे
नचनिंदिते ॥ नाजीर्णाम्लरसोद्गारेनचविण्मूत्रदूषिते ॥ १२० ॥ नच्छर्द्यांनातिसारेचनातिभुक्तःश्रमान्वितः ॥ नचा
तिचिंताकुलितोनचातिक्षुत्पिपासितः ॥ १२१ ॥ नापिस्वगुरुकर्मादौप्रसक्तोयोगमाचरेत् ॥ युक्ताहारविहारश्चयु
क्तचेष्टश्चकर्मसु ॥ १२२ ॥ युक्तनिद्राचबोधश्चसर्वायासविवर्जितः ॥ आसनंमृदुलंरम्यंविपुलंसुसमंशुचि ॥१२३॥
मृदुचर्मपरीधानंमध्वाद्यक्तंशुभंसुखं ॥ कल्पयित्वासमारुह्यसमंस्थिरसुखंयथा ॥ १२४ ॥ पद्मकस्वस्तिकादीनाम
भ्यसेदासनेषुच ॥ अभिवंद्यस्वगुर्वंतानभिवाद्याननुक्रमात् ॥ १२५ ॥ ऋजुग्रीवशिरोवक्षानातिश्लिष्टोष्ठलोचनः ॥
किंचिदुन्नामितशिरादंतैर्दंतान्नसंस्पृशेत् ॥ १२६ ॥ दंताग्रसंस्थितांजिव्हामचलांसंनिवेश्यच ॥ पार्ष्णिभ्यांवृषणौर
क्षंस्तथाप्रजननंपुनः ॥ १२७ ॥ ऊर्वोरुपरिसंस्थाप्यबाहूतिर्यगयत्नतः ॥ दक्षिणंकरपृष्ठंतुन्यस्यवामतलोपरि ॥
॥ १२८ ॥ उन्नाम्यशनकैःपृष्ठमुरोविष्टभ्यचाग्रतः ॥ संप्रेक्ष्यनासिकाग्रंस्वंदिशश्चानवलोकयन् ॥ १२९ ॥ संभृत
प्राणसंचारःपाषाणइवनिश्चलः ॥ स्वदेहायतनस्यांतर्विचिंत्यशिवमंबया ॥ १३०॥ हृत्पद्मपीठिकामध्येध्यानय
ज्ञेनपूजयेत् ॥ मूलेनासाग्रतोनाभौकंठेवातालुरंध्रयोः ॥ १३१ ॥ ॥ ॥ ॥

ख्यमलवर्जिते ॥ १२१ ॥ १२२ ॥ १२३ ॥ १२४ ॥ १२५ ॥ १२६ ॥ संनिवेश्यसंस्थाप्य ॥ १२७ ॥ १२८ ॥ १२९ ॥ संभृतेति ॥ संहृतप्राणेति
पाठांतरम् ॥ अंबयाशिवयासह ॥ १३० ॥ १३१ ॥ ॥ ॥ ॥ ॥ ॥



Indira Gandhi National Centre for the Arts

मूलेमूलाधारे ॥ द्वादशांतेशिवाख्यब्रह्मरंध्रस्थाने ॥ १३२ ॥ १३३ ॥ १३४ ॥ वर्णावसानकेवर्णयुतांतभगके ॥ १३५ ॥ स्वराअकारादयःतानिपत्राणि ॥
॥ १३६ ॥ द्वादशारस्यपर्णमयान्वर्णानाह ॥ ककारादीति ॥ १३७ ॥ दशारस्याह ॥ वर्णाइति ॥ गोक्षीरधवलस्यपद्मस्येत्यन्वयः ॥ १३८ ॥ षडस्र

भ्रूमध्येद्वादशांतेवाललाटेमूर्ध्निवास्मरेत् ॥ परिकल्प्ययथान्यायंशिवयोःपरमासनम् ॥ १३२ ॥ तत्रसावरणंवापि निरावरणमेववा ॥ द्विदलेषोडशारेवाद्वादशारेयथाविधि ॥ १३३ ॥ दशारेवाषडस्रेवाचतुरस्रेशिवंस्मरेत् ॥ भ्रुवोरंतरतःपद्मंद्विदलंतडिदुज्वलं ॥ १३४ ॥ भ्रूमध्यस्थारविंदस्यक्रमाद्वैदक्षिणोत्तरे ॥ विद्युत्समानवर्णेचपर्णेवर्णावसानके ॥ १३५ ॥ षोडशारस्यपत्राणिस्वराःषोडशतानिवै ॥ पूर्वादीनिक्रमादेतत्पद्मकंदस्यमूलतः ॥ १३६ ॥ ककारादिठकारांतावर्णाःपर्णान्यनुक्रमात् ॥ भानुवर्णस्यपद्मस्यध्येयंतद्धृदयांतरे ॥ १३७ ॥ वर्णाःपर्णानिपद्मस्यनाभेरुपरिपृष्ठतः ॥ गोक्षीरधवलस्योक्ताडादिफांतायथाक्रमम् ॥ १३८ ॥ अधोदलस्यांबुजस्यएतस्यचदलानिषट् ॥ विधूमांगारवर्णस्यवर्णाबाद्याश्चलांतिमाः ॥ १३९ ॥ मूलाधारारविंदस्यहेमाभस्ययथाक्रमं ॥ वकारादिसकारांतावर्णाःपर्णमयाःस्थिताः ॥१४० ॥ एतेष्वथारविंदेषुयत्रैवाभिरतंमनः ॥ तत्रैवदेवंदेवींचचिंतयेद्धीरयाधिया ॥१४१॥ अंगुष्ठमात्रममलंदीप्यमानंसमंततः ॥ शुद्धदीपशिखाकारंस्वशक्त्यापूर्णमंडितम् ॥ १४२ ॥ इंदुरेखासमाकारंतारारूपमथापिवा ॥ नीवारशूकसदृशंबिससूत्राभमेववा ॥ १४३ ॥ कदंबगोलकाकारंतुषारकणिकोपमम् ॥ क्षित्यादितत्वविजयंध्यातायद्यभिवांछति ॥ १४४ ॥ तत्तत्तत्वाधिपामेवमूर्तिंस्थूलांविचिंतयेत् ॥ सदाशिवांताब्रह्माद्याभवाद्याश्चाष्टमूर्तयः ॥ १४५ ॥ शिवस्यमूर्तयःस्थूलाःशिवशास्त्रेविनिश्चिताः ॥ घोरामिश्राःप्रशांताश्चमूर्तयस्तामुनीश्वरैः ॥ १४६ ॥ फलाभिलाषसहितैश्चिंत्याश्चिंताविशारदैः ॥ घोराश्चेच्चिंतिताःकुर्युःपापरोगपरिक्षयं ॥ १४७ ॥ सर्वसिद्धिप्रदामिश्राःप्रशांताःशांतिदायकाः ॥ सिध्यंतिसिद्धयःशीघ्रंघोरेवपुषिचिंतिते ॥ १४८ ॥ ॥

स्याह ॥ अधोदलस्येति ॥ १३९ ॥ चतुरस्रस्याह ॥ मूलाधारेति ॥ १४० ॥ १४१ ॥ १४२ ॥ नीवारेति ॥ नीवारास्तृणधान्यंदेवभातइतिप्रासिद्धंतच्छूकवत्सदृशंसूक्ष्ममित्यर्थः ॥ १४३ ॥ १४४ ॥ १४५ ॥ १४६ ॥ फलाभिलाषरहितैरितिपाठांतरं ॥ १४७ ॥ १४८ ॥ ॥

Indira Gandhi National Centre for the Arts

॥ १४९ ॥ सिद्धयश्चान्याइतिपाठांतरं ॥ १५० ॥ १५१ ॥ १५२ ॥ १५३ ॥ १५४ ॥ १५५ ॥ केवलास्थूलविषयरहिता ॥ १५६ ॥ बालेति ॥ स्थूला





चिरेणमिश्रेसौम्येतुनसद्योनचिरादपि ॥ सौम्येमुक्तिर्विशेषेणशांतिःप्रज्ञाप्रसित्ध्यति ॥ १४९ ॥ सित्ध्यंतिसिद्धय
श्चास्माक्रमशोनात्रसंशयः ॥ श्रीकंठनाथंस्मरतांसद्यःसर्वार्थसिद्धयः ॥ १५० ॥ प्रसित्ध्यंतीतिमत्वैकेतंवैध्यायंतियो
गिनः ॥ स्थित्यर्थंमनसःकेचित्स्थूलध्यानंप्रकुर्वते ॥ १५१ ॥ स्थूलेतुनिश्चलंचेतोभवेत्सूक्ष्मेतुसुस्थितं ॥ शिवेतुचिं
तितेसाक्षात्सर्वाःसित्ध्यंतिसिद्धयः ॥ १५२ ॥ मूर्त्यंतरेषुध्यातेषुशैवीसिद्धिर्नसिध्यति ॥ मूर्त्यंतरेषुध्यातेषुशिवरूपं
विचिंतयेत् ॥ १५३ ॥ रुच्यभ्यासादिनायद्यच्छिवरूपंविचिंतयेत् ॥ लक्षयेन्मनसःस्थैर्यंतत्तत्ध्यायेत्पुनःपुनः ॥
॥ १५४ ॥ ध्यानमादौसविषयंततोनिर्विषयंजगुः ॥ तत्रनिर्विषयंध्यानंनास्तीत्येवसतांमतम् ॥ १५५॥ बुद्धेर्हिसंत
तिःकाचित्ध्यानमित्यभिधीयते ॥ तेननिर्विषयाबुद्धिःकेवलेहप्रवर्तते ॥ १५६ ॥ तस्मात्सविषयंध्यानंबालार्ककिर
णाश्रयम् ॥ सूक्ष्माश्रयंनिर्विषयंनापरंपरमार्थतः ॥ १५७ ॥ यद्वासविषयंध्यानंतत्साकारसमाश्रयम् ॥ निराकारा
त्मसंवित्तिर्ध्यानंनिर्विषयंमतम् ॥ १५८ ॥ निर्बीजंचसबीजंचतदेवध्यानमुच्यते ॥ निराकाराश्रयत्वेनसाकाराश्र
यतस्तथा ॥ १५९ ॥ तस्मात्सविषयंध्यानमादौकृत्वासबीजकम् ॥ अंतेनिर्विषयंकुर्यान्निर्बीजंसर्वसिद्धये ॥ १६० ॥
प्राणायामेनसित्ध्यंतिदिव्याःशांत्यादयःक्रमात् ॥ शांतिःप्रशांतिर्दीप्तिश्चप्रसादश्चततःपरम् ॥ १६१ ॥ शमःसर्वा
पदांचैवशांतिरित्यभिधीयते ॥ तमसोंतर्बहिर्नाशःप्रशांतिःपरिगीयते ॥ १६२ ॥ बहिरंतःप्रकाशोयोदीप्तिरित्य
भिधीयते ॥ स्वस्थतायातुसाबुद्धेःप्रसादःपरिकीर्तितः ॥ १६३ ॥ कारणानिचसर्वाणिसबाह्याभ्यंतराणिच ॥ बुद्धेः
प्रसादतःक्षिप्रंप्रसन्नानिभवंत्युत ॥ १६४ ॥ ध्याताध्यानंतथाध्येयंयच्चध्यानप्रयोजनम् ॥ एतच्चतुष्टयंज्ञात्वाध्याता
ध्यानंसमाचरेत् ॥ १६५॥ ज्ञानवैराग्यसंपन्नोनित्यमुद्युक्तमानसः ॥ श्रद्दधानःप्रसन्नात्माध्यातासद्भिरुदाहृतः॥१६६॥



कारसमाश्रयमितिपाठांतरं ॥ १५७ ॥ १५८ ॥ १५९ ॥ १६० ॥ १६१ ॥ १६२ ॥ १६३ ॥ १६४ ॥ १६५ ॥ १६६ ॥ ॥

Indira Gandhi National Centre for the Arts

॥ १६७ ॥ १६८ ॥ विमुक्तीति ॥ विशेषेणमुक्तौप्रत्ययोविश्वासः ॥ विमुक्तिप्रत्ययःपूर्वःप्रत्ययश्चाणिमादिकमितिपूर्वंगतंतत्रमुक्तिविश्वासरूपोयःप्रत्य

ध्यैचिंतायांस्मृतोधातुःशिवचिंतामुहुर्मुहुः ॥ अव्याक्षिप्तेनमनसाध्यानमित्यभिधीयते ॥ १६७ ॥ बुद्धिप्रवाहरूपस्य
ध्यानस्यास्यावलंबनं ॥ ध्येयमित्युच्यतेसद्भिस्तच्चसांबःस्वयंशिवः ॥ १६८ ॥ विमुक्तिप्रत्ययःपूर्वमैश्वर्यंचाणिमादिक
म् ॥ शिवध्यानस्यतस्यास्यसाक्षादुक्तंप्रयोजनं ॥ १६९ ॥ यस्मात्सौख्यंचमोक्षंचध्यानादुभयमाप्नुयात् ॥ तस्मात्स
र्वंपरित्यज्यध्यानयुक्तोभवेन्नरः ॥ १७० ॥ नास्तिध्यानंविनाज्ञानंनास्तिध्यानमयोगिनः ॥ ध्यानंज्ञानंचयस्यास्ति
तीर्णस्तेनभवार्णवः ॥ १७१ ॥ ज्ञानंप्रसन्नमेकाग्रमशेषोपाधिवर्जितं ॥ योगाभ्यासेनयुक्तस्ययोगिनस्त्वेवसिध्यति ॥
॥ १७२ ॥ प्रक्षीणाशेषपापानांज्ञानेध्यानेभवेन्मतिः ॥ पापोपहतबुद्धीनांतद्वार्तापिसुदुर्लभा ॥ १७३ ॥ यथावन्हि
र्महादीप्तःशुष्कमार्द्रंचनिर्दहेत् ॥ तथाशुभाशुभंकर्मज्ञानाग्निर्दहतेक्षणात् ॥ १७४ ॥ अत्यल्पोपियथादीपःसुमह
न्नाशयेत्तमः ॥ योगाभ्यासस्तथाल्पोऽपिमहापापंविनाशयेत् ॥ १७५ ॥ ध्यायतःक्षणमात्रंवाश्रद्धयापरमेश्वरम् ॥
यद्भवेत्सुमहच्छ्रेयस्तस्यांतोनैवविद्यते ॥ १७६ ॥ नास्तिध्यानसमंतीर्थंनास्तिध्यानसमंतपः ॥ नास्तिध्यानसमोय
ज्ञस्तस्माध्यानंसमाचरेत् ॥ १७७ ॥ तीर्थानितोयपूर्णानिदेवान्पाषाणमृन्मयान् ॥ योगिनोनप्रपद्यंतेस्वात्मप्रत्यय
कारणात् ॥ १७८ ॥ योगिनांचवपुःसूक्ष्मंभवेत्प्रत्यक्षमैश्वरम् ॥ यथास्थूलमयुक्तानांमृत्काष्ठाद्यैःप्रकल्पितम् ॥ १७९ ॥
यथेहांतश्चराराज्ञःप्रियाःस्युर्नबहिश्चराः ॥ तथांतर्ध्याननिरताःप्रियाःशंभोर्नकर्मिणः ॥ १८० ॥ बहिःकरायथालो
केनातीवफलभागिनः ॥ दृष्टानरेंद्रभवनेतद्वदत्रापिकर्मिणः ॥ १८१ ॥ यद्यंतराविपद्येतज्ञानयोगार्थमुद्यतः ॥ योग
स्योद्योगमात्रेणरुद्रलोकंगमिष्यति ॥ १८२ ॥ अनुभूयसुखंतत्रसंजातोयोगिनांकुले ॥ ज्ञानयोगंपुनर्लब्ध्वासंसा
रमतिवर्तते ॥ १८३ ॥ जिज्ञासुरपियोगस्ययांगतिंलभतेनरः ॥ नतांगतिमवाप्नोतिसर्वैरपिमहामखैः ॥ १८४ ॥

योमुक्तौहेतुरित्यर्थः ॥ १६९ ॥ १७० ॥ १७१ ॥ १७२ ॥॥ १७३ ॥॥ ज्ञानाग्निरिति ॥ ज्ञानाग्निःसर्वकर्माणिभस्मसात्कुरुतेतथेतिभगवदुक्तेः ॥
॥ १७४ ॥ १७५ " १७६ ॥ १७७ ॥ १७८ ॥ १७९ ॥ १८० ॥ बहिःकरायाचनार्थंप्रसारितहस्ताः ॥ १८१ ॥ १८२ ॥ १८३ ॥ १८४ ॥

Indira Gandhi National Centre for the Arts

॥ १८५ ॥ १८६ ॥ अपवादंनिंदां ॥ श्रोतृभिःसहेत्यर्थः ॥ १८७ ॥ १८८ ॥ १८९ ॥ प्रतिश्रयोवासार्थगृहादि ॥ १९० ॥ वज्रमिति ॥ वज्रंतंडु



द्विजानांवेदविदुषांकोटिंसंपूज्ययत्फलम् ॥ भिक्षामात्रप्रदानेनतत्फलंशिवयोगिने ॥ १८५ ॥ यज्ञाग्निहोत्रदानेषु तीर्थहोमेषुयत्फलम् ॥ योगिनामन्नदानेनतत्समस्तंफलंलभेत् ॥ १८६ ॥ येचापवादंकुर्वंतिविमूढाःशिवयोगिनां॥ श्रोतृभिस्तेप्रपद्यंतेनरकेष्वामहीक्षयात् ॥ १८७ ॥ सतिश्रोतरिवक्तास्यादपवादस्ययोगिनां ॥ तस्माच्छ्रोताचपापी यांस्तद्दंडःसुमहानतः ॥ १८८ ॥ येपुनःसततंभक्त्याभजंतिशिवयोगिनः ॥ विंदंतितेमहाभोगानंतेयोगंचशांकरम् ॥ १८९ ॥ भोगयोगार्थिभिस्तस्मात्संपूज्याःशिवयोगिनः ॥ प्रतिश्रयान्नपानाद्यैःशय्याप्रावरणादिभिः ॥ १९० ॥ योगधर्मःससारत्वादभेद्यःपापमुद्गरैः ॥ वज्रंतंडुलवज्ज्ञेयंतथापापैर्नयोगिनः ॥ १९१ ॥ नलिप्यंतेचतापाद्यैःपद्मप त्रंयथांऽभसा ॥ यस्मिन्देशेवसेन्नित्यंशिवयोगरतोमुनिः ॥ १९२ ॥ सोपिदेशोभवेत्पूतःसपूतइतिकिंपुनः ॥ तस्मा त्सर्वंपरित्यज्यकृत्यमन्यद्विचक्षणः ॥ १९३ ॥ सर्वदुःखप्रहाणायशिवयोगंसमभ्यसेत् ॥ सिद्धयोगफलोयोगीलो कानांहितकाम्यया ॥ १९४ ॥ भोगान्भुक्त्वायथाकामंविहरेद्वात्रवर्तताम् ॥ अथवाक्षुद्रमित्येवमत्वावैषयिकंसुखम्॥ ॥ १९५ ॥ त्यक्त्वाविरागयोगेनस्वेच्छयाकर्ममुच्यताम् ॥ १९६ ॥ यस्त्वासन्नांमृतिंमर्त्योदृष्ट्वारिष्टंचभूयशः ॥ सयो गारंभनिरतःशिवक्षेत्रंसमाश्रयेत् ॥ १९७ ॥ सतत्रनिवसन्नेवयदिधीरमनातुरः ॥ प्राणान्विनापिरोगाद्यैःस्वयमे वपरित्यजेत् ॥ १९८ ॥ कृत्वाप्यनशनंवैधंहुत्वाचांगांशिवानले ॥ क्षिप्त्वावाशिवतीर्थेषुस्वदेहमवगाहनात् ॥१९९॥ शिवशास्त्रोक्तविधिवत्प्राणान्यस्तुपरित्यजेत् ॥ सद्यएवविमुच्येतनचासावात्मघातकः ॥ २०० ॥ रोगाद्यैर्वाथवि वशःशिवक्षेत्रंसमाश्रितः ॥ म्रियतेयदिसोप्येवंमुच्यतेनात्रसंशयः ॥ २०१ ॥ ॥

लैर्यथानभिद्यतेतद्वदित्यर्थः ॥ १९१ ॥ १९२ ॥ १९३ ॥ १९४ ॥ १९५ ॥ स्वेच्छयेति ॥ स्वेच्छयोत्क्रम्यमुच्यतामितिपाठांतरम् ॥ ॥ १९६ ॥ ॥ १९७ ॥ १९८ ॥ १९९ ॥ २०० ॥ २०१ ॥ ॥ ॥ ॥



Indira Gandhi National Centre for the Arts

निवृत्तीति ॥ पूर्वोक्तनिवृत्तिप्रतिष्ठादिकलावशादित्यर्थः ॥ २०२ ॥ उत्क्रम्येति॥प्राणानितिशेष उन्मनाशैवीशक्तिः ॥२०३ ॥ २०४॥२०५॥२०६॥२०७॥ ॥२०८॥२०९॥शिवासुक्रोष्ट्रीप्रभृतिषु॥२१०॥२११॥ तस्यमृतस्य॥शैवीति॥यदिशैवीशिवभक्तियुतातस्यसंततिरस्तितदासैवभजेद्द्रणहीयादित्यर्थः॥२१२॥ इतिश्रीशैवमहापुराणेवायवीयसंहिताटीकायांसारबोधिन्यामुत्तरभागेसांगयोगनिरूपणंनामैकोनत्रिंशोध्यायः ॥२९॥ ॐनमःशिवाय॥इत्थंमुन्युदितंशिवस्य

तथाविशिष्टंतत्रापिमरणंतूत्तरोत्तरं॥निवृत्त्यादिवशाद्देहोभूतेषुचविलीयते॥२०२॥स्वेच्छयोत्क्रम्यमरणांशिवक्षेत्रेविशे
षतः॥उत्तमंसर्वमरणादुन्मनापदयोगदं॥२०३॥शिवनिंदारतंहत्वापीडितःस्वयमेववा॥ यस्त्यजेद्दुस्त्यजान्प्राणान्न
सभूयःप्रजायते॥२०४॥शिवनिंदारतंहंतुमशक्तोयःस्वयंमृतः॥सद्यएवविमुच्येतत्रिःसप्तकुलसंयुतः॥२०५॥शिवार्थं
यस्त्यजेत्प्राणान्शिवभक्तार्थमेववा ॥ शिवाचारार्थमथवाशिवविद्यार्थमेववा ॥२०६॥ नतेनसदृशःकश्चिन्मुक्तिमार्ग
स्थितोनरः॥तस्माच्छीघ्रतरामुक्तिस्तस्यसंसारमंडलात्॥२०७॥एतेष्वन्यतमोपायंकथमप्यवलंब्यवा ॥ षडध्वशुद्धिं
विधिवत्प्राप्तोवाम्रियतेयदि ॥२०८॥ पशूनामिवतस्येहनकुर्यादौर्ध्वदेहिकम् ॥ नैवाशौचंप्रसज्येततत्पुत्रादेर्विशेषतः
॥२०९॥खनेद्वाभुवितद्देहंदहेद्वाशुचिनाऽग्निना ॥ क्षिपेद्वाप्सुशिवास्वेवत्यजेद्वाकाष्ठलोष्ठवत् ॥२१०॥ अथैनमपिचो
द्दिश्यकर्मचेत्कर्त्तुमीप्सितम् ॥ कल्याणमेवकुर्वीतशिवभक्तांश्चतर्पयेत् ॥२११॥ धनंतस्यभजेच्छैवंशैवीचेदस्तिसंत
तिः॥नास्तिचेत्तच्छिवेदद्यान्नादद्यात्पशुसंततिः॥२१२॥इतिश्रीशि०म०वा०सं०मु०सांगयोगनिरूपणंनामैकोनत्रिं
शोऽध्यायः ॥ २९ ॥ छ ॥ सूतउवाच ॥ इतिसविजितमन्योर्यादवेनोपमन्योरधिगतमभिधायज्ञानयोगंमुनीभ्यः॥
प्रणतिमुपगतेभ्यस्तेभ्यउद्भावितात्मासपदिवियतिवायुःसायमंतर्हितोभूत् ॥ १ ॥ ततःप्रभातसमयेनैमिषीयास्तपो
धनाः ॥ सत्रांतेऽवभृथंकर्तुंसर्वएवसमुद्ययुः ॥ २ ॥ तदाब्रह्मसमादेशाद्देवीसाक्षात्सरस्वती ॥ प्रसन्नास्वादुसलिला
प्रावर्ततनदीशुभा ॥ ३ ॥ सरस्वतींनदींदृष्ट्वामुनयोत्दृष्टमानसाः ॥ समाप्यसत्रंप्रारब्धंचक्रुस्तत्रावगाहनम् ॥ ४ ॥
अथसंतर्प्यदेवादींस्तदीयैःसलिलैःशिवैः ॥ स्मरंतःपूर्ववृत्तांत्तंययुर्वाराणसींप्रति ॥ ५ ॥ ॥

चरितंसंवर्ण्यवायुर्मुनीनंतर्धानमगाद्विधायमुनयःसत्रादियाताविधिं ॥तेनैवप्रहिताःसुमेरुशिखरेपुत्रंकुमारंतदानंद्यागत्यसमब्रवीच्छिवकथामेतत्स्थितंत्रिंशके ॥ ॥१॥इतीति ॥ सःवायुर्विजितमन्योरुपमन्योःसकाशात्यादवेनकृष्णेनाधिगतंज्ञानयोगंमुनिभ्यइत्यभिधायप्रणतिमुपगतेभ्यस्तेभ्यःउद्भावितात्माप्रकाशितपर मात्मस्वरूपस्सन्वियतिसायमंतर्हितोभूदित्यन्वयः ॥ १ ॥ २ ॥ ब्रह्मसमादेशात्ब्रह्माज्ञया ॥ ३ ॥ ४ ॥ तदीयैःसारस्वतैः ॥ ५ ॥ ॥

॥ ६ ॥ ७ ॥ ८ ॥ आत्मप्रभावितानेनस्वद्युतिजालेन ॥ ९ ॥ १० ॥ ११ ॥ ब्रह्मवनपूर्वोक्तं ॥ १२ ॥ १३ ॥ दीर्घपूर्वस्येति ॥ हिरण्यपूर्वकशिपु
मितिवदयंप्रयोगःदीर्घसत्रस्येत्यर्थः ॥ १४ ॥ ब्रह्मयोनयेवेदानांप्रकाशकाय ॥ तदनुज्ञातोब्रह्मणाज्ञप्तः ॥ १५ ॥ १६ ॥ १७ ॥ १८ ॥ साहचर्येषुसाहाय

तदातेहिमवत्पादात्पतंतींदक्षिणामुखीम् ॥ दृष्ट्वाभागीरथींतत्रस्नात्वातत्तीरतोययुः ॥ ६ ॥ ततोवाराणसींप्राप्यमुदि
ताःसर्वएवते ॥ तत्रोत्तरप्रवाहायांगंगायामवगाह्यच ॥ ७ ॥ अविमुक्तेश्वरंलिंगंदृष्ट्वाभ्यर्च्यविधानतः ॥ प्रयातुमुद्य
तास्तत्रददृशुर्दिविभास्वरम् ॥ ८ ॥ सूर्यकोटिप्रतीकाशंतेजोदिव्यंमहाद्भुतम् ॥ आत्मप्रभावितानेनव्याप्तसर्वदिगं
तरम् ॥ ९ ॥ अथपाशुपताःसिद्धाभस्मसंछन्नविग्रहाः ॥ मुनयोऽभ्येत्यशतशोलीनाःस्युस्तत्रतेजसि ॥ १० ॥ तथा
विलीयमानेषुतपस्विषुमहात्मसु ॥ सद्यस्तिरोदधेतेजस्तदद्भुतमिवाभवत् ॥ ११ ॥ तद्दृष्ट्वामहदाश्चर्यंनैमिषीयाम
हर्षयः ॥ किमेतदित्यजानंतोययुर्ब्रह्मवनंप्रति ॥ १२ ॥ प्रागेवैषांतुगमनात्पवनोलोकपावनः ॥ दर्शनंनैमिषीयाणां
संवादंतैःसहात्मनः ॥ १३ ॥ शुद्धांबुद्धिंततस्तेषांसांबेसानुचरेशिवे ॥ समाप्तिंचापिसत्रस्यदीर्घपूर्वस्यसत्रिणां ॥
॥ १४ ॥ विज्ञाप्यजगतांधात्रेब्रह्मणेब्रह्मयोनये ॥ स्वकार्येतदनुज्ञातोजगामस्वपुरंप्रति ॥१५॥ अथाऽऽस्थानंगतोब्र
ह्मातुंबुरोर्नारदस्यच ॥ परस्परंस्पर्धितयोर्गानेविवदमानयोः ॥ १६ ॥ तदुद्भावितगानोत्थरसेमाध्यस्थ्यमाचरन् ॥
गंधर्वैरप्सरोभिश्चसुखमास्तेनिषेवितः ॥ १७ ॥ तदानवसरादेवद्वास्थैर्द्वारिनिवारिताः ॥ मुनयोब्रह्मभवनाद्बहिःपा
र्श्वमुपाविशन् ॥ १८ ॥ अथतुंबुरुणागानेसमतांप्राप्यनारदः ॥ साहचर्येष्वनुज्ञातोब्रह्मणापरमेष्ठिना ॥ १९ ॥ त्य
क्त्वापरस्परस्पर्धांमैत्रींचपरमांगतः ॥ सहतेनाप्सरोभिश्चगंधर्वैश्चसमावृतः ॥ २० ॥ उपवीणयितुंदेवंनकुलीश्वर
मीश्वरम् ॥ भवनान्निर्ययौधातुर्जलदादंशुमानिव ॥ २१ ॥ तंदृष्ट्वाषट्कुलीयास्तेनारदंमुनिगोवृषम् ॥ प्रणम्यावस
रंशंभोःपप्रच्छुःपरमादरात् ॥ २२ ॥ ॥ ॥ ॥ ॥

केषु ॥ १९ ॥ तेनतुंबुरुणा ॥ २० ॥ उपवीणयितुंवीणयाउपस्तोतुं ॥ सत्यापपाशेत्यादिनाणिच्ततस्तुमुन् ॥ नकुलीश्वरंलकुलीश्वरमितिपाठांतरं॥ २१॥
षट्कुलीयाःत्रिवेण्यांषट्सुकूलेषुभवाः ॥ ऱ्हस्वत्वमार्षं ॥ क्वचित्सुकुलीयाइतिपाठः ॥ मुनिगोवृषंमुनिश्रेष्ठं ॥ शंभोःकल्याणविधायिनोब्रह्मणः ॥ २२ ॥

Indira Gandhi National Centre for the Arts

सःनारदःअन्यपरःकार्यांतरेव्यापृतः ॥ २३ ॥ तान्मुनीन् ॥ पिंडीभूयएकत्रमिलित्वा ॥ अंडजन्मनःब्रह्मांडोत्पत्तिकारणस्य ॥ २४ ॥ २५ ॥ २६ ॥
॥ २७ ॥ २८ ॥ लिंगस्येत्यादावर्चनंचयथाक्रमामितिपाठांतरं ॥ २९ ॥ तस्यतेजसः ॥ ३० ॥ तस्मैब्रह्मणे ॥ ३१ ॥ प्रत्यासीदतिसंनिहिताभवति ॥

सचावसरएवायमितोऽतर्गम्यतामिति ॥ वदन्ययावन्यपरस्त्वरयापरयायुतः ॥२३॥ ततोद्वारिस्थितायेवैब्रह्मणेतान्
न्यवेदयन् ॥ ततस्तेविविशुर्वेश्मपिंडीभूयांडजन्मनः ॥ २४ ॥ प्रविश्यदूरतोदेवंप्रणम्यभुविदंडवत् ॥ समीपेतदनु
ज्ञाताःपरिवृत्योपतस्थिरे ॥ २५ ॥ तांस्तत्रोपस्थितान्पृष्ट्वाकुशलंकमलासनः ॥ वृत्तांतंवोमयाज्ञातंवायुरेवाहप्रेय
तः ॥ २६ ॥ भवद्भिःकिंकृतंपश्चान्मारुतेऽतर्हितेसति ॥ इत्युक्तवतिदेवेशेमुनयोऽवभूथात्परम् ॥ २७ ॥ गंगातीर्थ
स्यगमनंयात्रांवाराणसींप्रति ॥ दर्शनंतत्रलिंगानांस्थापितानांसुरेश्वरैः ॥ २८ ॥ अविमुक्तेश्वरस्यापिलिंगस्याभ्य
र्चनंसकृत् ॥ आकाशेमहतस्तस्यतेजोराशेश्चदर्शनम् ॥ २९ ॥ मुनीनांविलयंतत्रानिरोधंतेजसस्ततः ॥ याथा
त्म्यावेदनंतस्यचिंतितस्यापिचात्मभिः ॥ ३० ॥ सर्वंसविस्तरंतस्मैप्रणम्याहुर्मुहुर्मुहुः ॥ मुनिभिःकथितंश्रुत्वाविश्वक
र्माचतुर्मुखः ॥ ३१ ॥ कंपयित्वाशिरःकिंचित्प्राहगंभीरयागिरा ॥ प्रत्यासीदतियुष्माकंसिद्धिरामुष्मिकीपरा ॥३२॥
भवद्भिर्दीर्घसत्रेणचिरमाराधितःप्रभुः ॥ प्रसादाभिमुखोभूतइतिभूतार्थसूचितम् ॥३३ ॥ वाराणस्यांतुयुष्माभिर्यदृ
ष्टंदिविदीप्तिमत् ॥ तल्लिंगसंज्ञितंसाक्षात्तेजोमाहेश्वरंपरम् ॥ ३४ ॥ तत्रलीनाश्चमुनयःश्रौतपाशुपतव्रताः ॥ मुक्ता
बभूवुःस्वस्थाश्चनैष्ठिकादग्धकिल्बिषाः ॥ ३५ ॥ प्राप्यानेनपथामुक्तिरचिराद्भवतामपि ॥ सचायमर्थःसूच्येतयुष्म
दृष्टेनतेजसा ॥ ३६ ॥ तत्रवःकालएवैषदैवादुपनतःस्वयम् ॥ प्रयांतुदक्षिणंमेरोःशिखरंदेवसेवितम् ॥ ३७ ॥ सन
त्कुमारोयत्रास्तेममपुत्रःपरोमुनिः ॥ प्रतीक्ष्यागमनंसाक्षाद्भूतनाथस्यनंदिनः ॥ ३८ ॥ पुरासनत्कुमारोपिदृष्ट्वापिपर
मेश्वरम् ॥ अज्ञानात्सर्वयोगींद्रमानीविनयदूषितः ॥ ३९ ॥ ॥ ॥ ॥

॥ ३२ ॥ इतीति ॥ इतिइत्याकारकोभूतोर्थःसूचितोयेनतत्तेजइत्यन्वयः ॥ भूतार्थसूचकमितिक्वचित्पाठः ॥ ३३ ॥ ३४ ॥ ३५ ॥ सूच्येतज्ञाप्येत ॥
॥ ३६ ॥ कालएवकल्याणप्राप्त्यवसरएव ॥ ३७ ॥ ३८ ॥ सर्वयोगींद्रमानीसर्वयोगींद्रमात्मानंमन्यतेसोऽतएवविनयदूषितःदुर्विनीतः ॥ ३९ ॥ ॥

॥ ४० ॥ ४१ ॥ तस्यसनत्कुमारस्य ॥ सनत्पूर्वेति ॥ सनत्कुमारतेत्यर्थः ॥ ४२ ॥ गणाधिपंनंदिनं ॥ मुनिःसनत्कुमारः ॥ ४३ ॥ ४४ ॥ एषःसनत्कुमारः निर्वर्तयिष्यतिकरिष्यति ॥ ४५ ॥ पत्युःशिवस्य ॥ ४६ ॥ गणेशस्यनंदिनः ॥ ४७ ॥ गणेशसमागमात्नंदीश्वरागमनात् ॥ ४८ ॥ ४९ ॥ ५० ॥ ५१॥

अभ्युत्थानादिकंयुक्तमकुर्वन्नास्तनिर्भयः ॥ ततोऽपराधात्क्रुद्धेनमहोष्ट्रोनंदिनाकृतः ॥ ४० ॥ अथकालेनमहतातद र्थेशोचतामया ॥ उपास्यदेवंदेवींचनंदिनंचानुनीयवै ॥ ४१ ॥ कथंचिदुष्ट्रतातस्यप्रयत्नेननिवर्तिता ॥ प्रापिताचय थापूर्वंसनत्पूर्वाकुमारता ॥ ४२ ॥ तदाहचमहादेवःस्मयन्निवगणाधिपम् ॥ अवज्ञायहिमामेषतथाहंकृतवान्मुनिः॥ ॥ ४३ ॥ अतस्त्वमेवयाथात्म्यंममास्मैकथयानघ ॥ ब्रह्मणःपूर्वजःपुत्रोमाभून्मूढइतिस्मरन् ॥ ४४ ॥ मयैषशिष्य स्तेदत्तोममज्ञानप्रवर्तकः ॥ धर्माध्यक्षाभिषेकंचतवनिर्वर्तयिष्यति ॥ ४५ ॥ सएवंव्याहृतोनंदीसर्वभूतगणाग्रणीः ॥ पत्युराज्ञापनंमूर्ध्नाप्रीतःप्रतिगृहीतवान् ॥ ४६ ॥ तथासनत्कुमारोपिमेरौमदनुशासनात् ॥ प्रसादार्थंगणेशस्यतप श्चरतिदुश्चरम् ॥ ४७ ॥ द्रष्टव्यश्चसयुष्माभिःप्राग्गणेशसमागमात् ॥ तत्प्रसादार्थमचिरान्नंदीतत्रागमिष्यति ॥ ॥ ४८ ॥ इतिसत्वरमादिश्यप्रेषिताविश्वयोनिना ॥ कुमारंशिखरंमेरोर्दक्षिणंमुनयोययुः ॥ ४९ ॥ तत्रस्कंदसरोना मसरःसागरसन्निभम् ॥ अमृतस्वादुशिशिरस्वच्छागाधलघूदकम् ॥ ५० ॥ समंततःसंघटितंस्फटिकोपलसंचयैः ॥ सर्वर्तुकुसुमैःफुल्लैश्छादिताखिलदिङ्मुखं ॥ ५१ ॥ सौवर्णैरुत्पलैःपद्मैःकुमुदैस्तारकोपमैः ॥ तरंगैरभ्रसंकाशैराका शमिवभूमिगम् ॥ ५२ ॥ सुखावतरणारोहैःस्थूलनीलशिलामयैः ॥ सोपानमार्गैरुचिरैःशोभमानाष्टदिङ्मुखम् ॥ ॥ ५३ ॥ तत्रतत्रावतीर्णैश्चतत्रोत्तीर्णैश्चभूयशः ॥ स्नातैःसितोपवीतैश्चशुक्लकौपीनवल्कलैः ॥ ५४ ॥ जटाशिखायु तैर्मुंडैस्त्रिपुंड्रकृतमंडनैः ॥ विरागविशदस्मेरमुखैर्मुनिकुमारकैः ॥ ५५ ॥ घटैःकमलिनीपत्रपुटैश्चकलशैःशिवैः ॥ कमंडलुभिरन्यैश्चतादृशैःकरकादिभिः ॥ ५६ ॥ ॥ ॥ ॥

अभ्रसंकाशैर्मेघसदृशैः ॥ ५२ ॥ सुखेति ॥ सुखेनावतरणमधोगमनमारोहउपरिगमनंयैस्तैः ॥ ५३ ॥ ५४ ॥ विरागेति ॥ विरागेणवैराग्येणविशदंवि शुद्धमतएवस्मेरंमुखंयेषांतैः ॥ ५५ ॥ ५६ ॥ ॥ ॥ ॥ ॥



Indira Gandhi National Centre for the Arts

॥ ५७ ॥ ५८ ॥ इष्टेति ॥ इष्टंयजनंततोवशिष्टैरित्यर्थः॥त्यक्तदर्भपवित्रकैरुपलक्षितं ॥५९॥ निर्वर्त्यमुनिभिर्विधाप्य निवेदयादितिसरोविशेषणं ॥ ६० ॥
समीरणंसमर्पणं ॥ ६१ ॥ ६२ ॥ मयूरवरवानरामितिक्वचित्पाठः ॥ ६३ ॥ ६४ ॥ ६५ ॥ आमंत्रयदितिसरसएवविशेषणं ॥ ६६ ॥ वज्रशिलाहीरकमणि

आत्मार्थेचपरार्थेचदेवतार्थेविशेषतः ॥ आनीयमानसलिलमात्तपुष्पंचनित्यशः ॥ ५७ ॥ अंतर्जलशिलारूढैर्नीचा
नांस्पर्शशंकया ॥ आचारवद्भिर्मुनिभिःकृतभस्मांगधूलनैः ॥ ५८ ॥ इतस्ततोऽप्सुमज्जद्भिरिष्टशिष्टैःशिलागतैः ॥
तिलैश्चसाक्षतैःपुष्पैस्त्यक्तदर्भपवित्रकैः ॥५९॥ देवाद्यमृषिमध्यंचनिर्वर्त्यपितृतर्पणम् ॥ निवेदयदभिज्ञेभ्योनित्य
स्नानगतान्द्विजान् ॥ ६० ॥ स्थानेस्थानेकृतानेकबलिपुष्पसमीरणैः ॥ सौराघ्र्यपूर्वंकुर्वद्भिःस्थंलिडेभ्यर्चनादिकं ॥
॥ ६१ ॥ क्वचिन्निमज्जदुन्मज्जत्प्रशस्तगजयूथपम् ॥ क्वचित्तृषयायातमृगीमृगतुरंगमं ॥ ६२ ॥ क्वचित्पीतजलो
त्तीर्णमयूरवरवारणम् ॥ क्वचित्कृततटाघातवृषप्रतिवृषोज्वलम् ॥ ६३ ॥ क्वचित्कारंडवरवैःक्वचित्सारसकूजितैः ॥
क्वचिच्चकोकनिनदैःक्वचिद्भ्रमरगीतिभिः ॥ ६४ ॥ स्नानपानादिकरणैःस्वसंपदुपजीविभिः ॥ प्रणयात्प्राणिभिस्तैस्तै
र्भाषमाणमिवाऽसकृत् ॥ ६५ ॥ कूलशाखिशिखालीनकोकिलाकुलकूजितैः ॥ आतपोपहतान्सर्वानामंत्रयदिवानि
शम् ॥ ६६ ॥ उत्तरेतस्यसरसस्तीरेकल्पतरोरधः ॥ वेद्यांवज्रशिलामय्यांमृदुलेमृगचर्मणि ॥ ६७ ॥ सनत्कुमार
मासीनंशश्वद्बालवपुर्धरम् ॥ तत्कालमात्रोपरतंसमाधेरचलात्मनः ॥ ६८ ॥ उपास्यमानंमुनिभिर्योगींद्रैरपिपूजित
म् ॥ ददृशुर्नैमिषीयास्तेप्रणताश्चोपतस्थिरे ॥ ६९ ॥ यावत्पृष्टवतेतस्मैप्रोचुःस्वागतकारणम् ॥ तुमुलःशुश्रुवेताव
द्दिविदुंदुभिनिःस्वनः ॥ ७० ॥ ददृशेतत्क्षणेतस्मिन्विमानंभानुसंनिभम् ॥ गणेश्वरैरसंख्येयैःसंवृतंचसमंततः ॥
॥ ७१ ॥ अप्सरोगणसंकीर्णंरुद्रकन्याभिरावृतम् ॥ मृदंगमुरजोद्घुष्टवेणुवीणारवान्वितम् ॥७२॥ चित्ररत्नविता
नाढ्यंमुक्तादामविराजितम् ॥ मुनिभिःसिद्धगंधर्वैर्यक्षचारणकिंनरैः ॥ ७३ ॥ नृत्यद्भिश्चैवगायद्भिर्वादयद्भिश्चसंवृ
तम् ॥ वीरगोवृषचिन्हेनदिव्यविद्रुमयष्टिना ॥ ७४ ॥ ॥ ॥ ॥

मयाशिला ॥ ६७ ॥ समाधेरिति ॥ अचलात्मनःस्थिरादपिंसमाधेःसकाशादुपरतंव्युत्थितं ॥ ६८ ॥ ६९ ॥ ७० ॥ ७१ ॥ ७२ ॥ ७३ ॥ ७४ ॥

Indira Gandhi National Centre for the Arts

मान्यहेतुनाप्रशंसनीयफलेनकेतुनाध्वजेनकृतगोपुरसत्कारंकृतःगोपुरस्यपुरस्थशविमानद्वारस्यसत्कारःपरिष्कारोयस्मिन् ॥ ७५ ॥ शुचेःभास्वरस्य ॥ सुयश सेत्यत्रसुयशयेतिक्वाचित्पाठः ॥ ७६ ॥ प्रभोःशिवस्य ॥ ७७ ॥ ७८ ॥ ७९ ॥ ८० ॥ ८१ ॥ समाप्तमिति ॥ निर्वाणंमोक्षंप्रतिसम्यक्प्राप्तमिव ॥ ८२ ॥



कृतगोपुरसत्कारंकेतुनामान्यहेतुना ॥ तस्यमध्येविमानस्यचामरद्वितयांतरे ॥ ७५ ॥ छत्रस्यमणिदंडस्यचंद्रस्येवशु
चेरधः ॥ दिव्यसिंहासनारूढंदेव्यासुयशसासह ॥ ७६ ॥ श्रियाचवपुषाचैवत्रिभिश्चापिविलोचनैः ॥ प्रकारैरपि
कृत्यानांप्रत्यभिज्ञापकंप्रभोः ॥ ७७ ॥ अविलंघ्यंजगत्कर्तुराज्ञापनमिवागतम् ॥ सर्वानुग्रहणंशंभोःसाक्षादिवपु
रःस्थितम् ॥ ७८ ॥ शिलादतनयंसाक्षाच्छ्रीमच्छूलवरायुधम् ॥ विश्वेश्वरगणाध्यक्षंविश्वेश्वरमिवापरम् ॥ ७९ ॥
विश्वस्यापिविधातॄणांनिग्रहानुग्रहक्षमम् ॥ चतुर्बाहुमुदारांगंचंद्ररेखाविभूषितम् ॥ ८० ॥ कंठमध्येचकालेनकलंके
नाप्यलंकृतं ॥ सविग्रहमिवैश्वर्यंसामर्थ्यमिवसत्क्रियम् ॥ ८१ ॥ समाप्तमिवनिर्वाणंसार्वज्ञमिवसंगतम् ॥ दृष्ट्वात्र
त्दृष्टवदनोब्रह्मपुत्रःसहर्षिभिः ॥८२॥ तस्थौप्रांजलिरुत्थायतस्यात्मानमिवार्पयन् ॥ अथासन्नतरेतस्मिन्विमानेचा
वनिंगते ॥ ८३ ॥ प्रणम्यदंडवद्देवंस्तुत्वाव्यज्ञापयन्मुनीन् ॥ षट्कुलीयाइमेदीर्घैर्नैमिषेसत्रमास्थिताः ॥ आगता
ब्रह्मणादिष्टादेवसेवाभिकांक्षया ॥ ८४ ॥ श्रुत्वावाक्यंब्रह्मपुत्रस्यनंदीछित्वापाशान्दृष्टिपातेनसद्यः ॥ शैवंधर्मंचैश्वरं
ज्ञानयोगंदत्वाभूयोदेवपार्श्वंजगाम ॥ ८५ ॥ सनत्कुमारेणचतत्समस्तंव्यासायसाक्षाद्गुरवेममोक्तं ॥ व्यासेनचोक्त
महितेनमह्यंमयाचतद्वःकथितंसमासात् ॥ ८६ ॥ नाऽवेदविद्भ्यःकथनीयमेतत्पुराणरत्नंपुरशासनस्य ॥ नाऽभक्तशि
ष्यायननास्तिकेभ्योदत्तंहिमोहान्निरयंददाति ॥ ८७ ॥ मार्गेणवेदानुगतेनयैस्तद्दत्तंगृहीतंपठितंश्रुतंवा ॥ तेभ्योमु
खेधर्ममुखंत्रिवर्गंनिर्वाणमंतेनियतंददाति ॥ ८८ ॥ ॥ ॥ ॥ ॥७१॥

॥ ८३ ॥ ८४ ॥ एतत्कथांसूतउपसंहरति ॥ श्रुत्वेति ॥ ८५ ॥ महितेनपूजितेन ॥ ८६ ॥ ८७ ॥ धर्ममुखंधर्मादिकंत्रिवर्गंधर्मार्थकामरूपंपुमर्थत्रयं ॥८८॥

Indira Gandhi National Centre for the Arts

॥ ८९ ॥ ९० ॥ तेमुनयः ॥ अनिंदिताइति ॥ आपुरनापदइतिपाठांतरम् ॥ ९१ ॥ इतिश्रीशिवमहापुराणेवायवीयसंहिताटीकायांसारबोधिन्यामुत्तरभागे

परस्परस्योपकृतंभवद्भिर्मयाचपौराणिकमार्गयोगात् ॥ अतोगमिष्येऽहमवाप्तकामःसमस्तमेवास्तुशिवंसदानः ॥
॥ ८९ ॥ सूतेकृताशिषिगतेमुनयःसुवृत्तायागेचपर्यवसितेमहितेप्रयागे ॥ कालेकलौचविषयैःकलुषायमाणेवाराण
सीपरिसरेवसतिंवितेनुः ॥ ९० ॥ अथचतेपशुपाशमुमुक्षयास्वकृतयाकृतपाशुपतव्रताः ॥ अधिगताखिलबोधसमा
धयःपरमनिर्वृतिमापुरनिंदिताः ॥ ९१ ॥ इतिश्रीशिवमहापुराणेवायवीयसंहितायामुत्तरभागेश्रीकृष्णोपमन्युसं
वादेत्रिंशोऽध्यायः ॥ ३० ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥

॥ इतिवायुसंहितासमाप्तिमगमत् ॥

IGNCA RAR
ACC. No. R-740

श्रीकृष्णोपमन्युसंवादेशिवतत्त्ववर्णनंनामत्रिंशोध्यायः ॥ ३० ॥ ॥ इतिवायुसंहिताटीकासमाप्ता ॥ श्रीसांबसदाशिवायनमः ॥ ॥

Indira Gandhi National Centre for the Arts

शैवमादिपुराणंयच्छ्रीमद्भागवतादिषु ॥ चतुर्विंशतिसाहस्रंकथितंतद्धिसांप्रतं ॥ दुर्लभंप्रायशोलोकेशिवभ
क्तैर्विलोपतः ॥ तथापिशिवभक्तैस्तत्कैश्चिदन्वेषितंबहु ॥ तदात्रिचतुराण्येतत्पुस्तकान्याहृतानितैः ॥ लब्ध
स्ययावतस्तस्यवर्ततेसंहिताश्चषट् ॥ कैलाससंहितापूर्वभागस्तत्रनलभ्यते ॥ तल्लाभायापिबहुधाप्रयत्नःक्रि
यतेऽधुना ॥ तस्येप्सुभिस्तद्विवृतौप्रेरितःशिवपूजकैः ॥ सकलेष्वपिशास्त्रेषुपारगाणांमहात्मनां ॥ कालेकरोपा
भिधानांश्रीराजारामशास्त्रिणां ॥ रानडोपाभिधानानांतथाश्रीबालशास्त्रिणां ॥ श्रीमद्गणेशतनयोबोडसो
पाभिधानकः ॥ राजारामाभिधःकाशीवासीशिवपरायणः ॥ शिष्योप्यल्पधियाशास्त्रंकिंचिदेवाप्तवांस्ततः ॥
अशक्तोपिप्रवृत्तोहमत्रविह्वलतांगतः ॥ पारंनीतोस्यकार्यस्यश्रीगंगाधरशास्त्रिभिः ॥ यैरत्रविवृतासम्यक्पु
राणेधर्मसंहिता ॥ तथाश्रीढुंढिराजाख्यबुधैर्धर्माधिकारिभिः ॥ सनत्पूर्वकुमाराख्यसंहिताविवृताचयैः ॥
आरब्धाविवृतिर्ज्ञानसंहिताप्रभृतिक्रमात् ॥ मयातुपूर्वंव्याख्याताःपंचाध्यायाःक्रमादिह ॥ ततोन्येनैवंवि
दुषाह्यध्यायाविवृतास्तथा ॥ आपंचचत्वारिंशत्तेततस्तुविवृतंमया ॥ अविद्यामूलसंसारनिर्वाहोद्यमयो
गतः ॥ कथंचिदपिकर्मैतस्यायशःपूर्णतांगतं ॥ ईश्वरस्यगुरूणांचकृपयैवेतिनिश्चितं ॥ किर्लोस्करोपाभिधानो
रामचंद्रात्मजःसुधीः ॥ गणेशोनीतिकुशलःशैवानांपरितुष्टये ॥ तथाबेंद्रोपाभिधानत्र्यंबकस्यतनूजनुः ॥ गोपा
लआभ्यांमहतायत्नेनांकितमादरात् ॥ नप्रतिष्ठाधनाद्यर्थमेतत्कार्यंकृतंमया ॥ केवलंशिवभक्तानांसंतोषण
कृतेकृतं ॥ तत्रन्यूनातिरिक्तंयज्जातंस्यात्क्षम्यतांबुधाः ॥ संशोधनीयंतत्सर्वंप्रार्थनेयंपुनःपुनः ॥ शुद्धिपत्रेपिय
त्किंचिदिदंसंशोधयिष्यते ॥ अनेनकर्मणादेवोभगवान्प्रीयतांशिवः ॥

हें पुस्तक मुंबईंत गणेशरामचंद्र किर्लोस्कर हायकोर्ट वकील व गोपाळत्र्यंबक बेंदरे यांच्या हुकुमावरून गणपत कृष्णाजी यांचे
छापखान्याचे मालक आत्माराम कान्होबा यानीं छापिलें. शके १८०६ मार्गशीर्ष कृष्ण ११ शनिवार.

सन १८६७ च्या २५ व्या आक्ट प्रमाणें नोंदलें आहे.

Indira Gandhi National Centre for the Arts

॥ इति श्रीशिवमहापुराणं संपूर्णम् ॥

Indira Gandhi National
Centre for the Arts